SASTHRAMUKTHAVALI-48

THE SATHADUSHANI

BY

SRI VEDANTA DESIKA

—*:—

WITH

chandamarutha

BY

THODDAIACHARIA

—(*)—

Edited by

P B ANANTHACHARIAR

Printed at the

SRI SUDARSANA PRESS

CONGEEVERAM

Vol 4.

(Copy Right Registered)

1926

Price Rs 3—8—0

श्रीः ।

शास्त्रमुक्तावळी—४८.

शतदूषणी ।

श्री कवितार्किक सिंहेन सर्वतन्त्रस्वतन्त्रेण

श्रीमद्वेदान्ताचार्येण विरचिता

वाधूलकुलतिलक श्रीमहाचार्यविरचितया

चण्डमारुताख्यया व्याख्यया सह

—०—

श्रीकाञ्चीप्रतिवादिभयङ्करअनन्ताचार्येणपरिशोधिता

श्रीसुदर्शनमुद्राक्षरशालायां

अमुद्रयत ।

चतुर्थसंपुटः—षट्षष्टितमस्कन्धान्तः

श्रीकाञ्ची ।

इदानी मेतन्मूल्यम् ३—१२—०

—०—

श्रीरस्तु ।

श्रीहयग्रीवाय नमः ।

शास्त्रमुक्तावळी ।

शतदूषणी ।

एकचत्वारिंशो वादः ।

अविद्याख्यावद्यं फलमपि तदीयं भगवतो
विदूरे यस्येति श्रुतिशिरसि जोघुष्यत इदम् ।
यदज्ञानाद्धन्धो भवति न तु यद्वैभवविदां
स मे देवः श्रीमांश्छमयतु सदा चेतसि तमः ॥

यः पुनरय स्वप्रकाशचिन्मात्रैकरसस्य ब्रह्मणो विश्वभ्रमहेतु रविद्याख्यो दोष , स किं परमार्थः, उतापरमार्थ ? आद्येपि ब्रह्मणो भिन्नोऽभिन्नोवा ? भिन्नत्वे परमार्थद्वित्वप्रसङ्ग. । अभिन्नत्वे च ब्रह्मण एव विश्वभ्रमहेतुदोषत्वमुक्तं स्यात् । तथाच ब्रह्मणो नित्य-

---

चण्डमारुतः ।

ज्ञानाङ्कुरशिवङ्कराः कलिमलप्रोल्लाससर्वङ्कषाः
काणादप्रमुखप्रकल्पितकथाकुलङ्कषाः पञ्चषा. ।
व्याकुर्वन् यतिभूपतेरिह कृतीरुज्जीवयन्मादृशा
नाकल्प करुणालयो विजयता श्रीश्रीनिवासो गुरु ॥

य पुन रिति । स्वप्रकाशपदेन स्वविषयाविद्याभयत्वे व्याघातः प्रद र्श्यते । स्वप्रकाशत्वेपि अखण्डानन्दत्वादेरप्रकाशात्तदवच्छिन्नविषयकाज्ञानमुप पद्यत एवेत्यत्राह– चिन्मात्रे ति । आनन्दत्वादयो धर्मास्सन्त्येवेत्यत्राह– एक रसस्ये ति । आनन्दत्वादेर्मिथ्यात्वान्न तद्विषयत्वमज्ञानस्य युक्तम्, तज्ज्ञा नस्यापिविद्यानिवर्तकत्वप्रसङ्गेनात्तत्त्वज्ञानान्मोक्षापत्तेः । ब्रह्मणो नित्यमुक्तत्वान्निर्दोष त्वाच्चैव संसारहेत्वज्ञानाश्रयत्व व्याहतमित्याह– विश्वभ्रमहेतुर्दोष इति ।

त्वेन नित्यभ्रमप्रसङ्गः। सहकारिसद्भावात् कदाचिद्भ्रमः, तद्वैकल्यात्तु पश्चान्निवृत्तिरितिचेत्? तर्हि प्राप्ताप्राप्तविवेकेन सहकारिदोष इत्युक्त भवति। तत्रापि हि परमार्थापरमार्थविकल्पानुपपत्तिर्दुर्वारा। कश्चासौ सहकारित्वेन विवक्षितः? तत्त्वमस्यादिवाक्यजन्यतत्त्वज्ञान प्रागभाव इति चेन्न;— भावरूपाज्ञानप्रतिपादनप्रयासवैय्यर्थ्य प्रसङ्गात्। तस्य च प्रागभावस्य न ब्रह्मस्वरूपता युक्ता, तत्त्वज्ञाना दब्रह्मनिवृत्तिप्रसङ्गात्। ब्रह्मव्यतिरिक्तस्य तु मिथ्यात्वेन तद्दर्शन हेतुदोषत्व ब्रह्मण एव स्यात्। ब्रह्मणश्च नित्यत्वेन तस्य नित्य

ननु सहकारिवशादातत्त्वज्ञानाद् भ्रम', उत्पन्ने तत्त्वज्ञाने सहकारिणो निवृत त्वान्न भ्रमोत्पाद इति शङ्कते— सहकारी ति। तर्हीं ति। ब्रह्मणि सत्यपि सहकार्यभावे भ्रमानुत्पत्तेस्तत्सत्त्वे च भ्रमोत्पत्तेरन्वयव्यतिरेकाभ्या सहकारित्वे नाभिमतस्यैव कारणत्व स्यान्न ब्रह्मणः, परिणामित्वमपि ब्रह्मणोऽपरिणामि त्वश्रुत्यनुसारेण सहकारिण एव स्यात्— इति तस्यैव दोषत्वं युक्तम्, ब्रह्मणः परिणामित्वेपि अखण्डाकारवृत्तिरूपप्रमा प्रत्यपि कारणत्वादप्रमासाधारणकारणत्वाभावात् न ब्रह्मणो दोषत्वम्, किन्तु सहकारिण एवेत्यर्थः। विकल्पानुपपत्ति रिति। विकल्पयो - कोऽन्योरनुपपत्तिरित्यर्थः। दुर्वारे ति। "ब्रह्मव्यतिरिक्तस्यत्वि" त्यादिना वक्ष्यमाणो दोषो ऽपरमार्थे प्रसज्यत इति भावः। ने ति। नन्च परिणाम्यर्थं, तदुपादानम्, अभावस्य भावपरिणामत्ववत् भावपरिणामित्वस्यापि विरोधात्। किं प्रागभावो ब्रह्मस्वरूपमेव, उत तदतिरिक्त इति विकल्पमभिप्रेत्याद्ये दोषमाह—तस्ये ति। अनित्यमात्रस्य तत्त्वज्ञाननिवर्त्यत्वादिति भावः, यद्वा तत्त्वज्ञाने सति ब्रह्मभावप्रसङ्ग इत्यर्थः। द्वितीये दोषमाह—ब्रह्मव्यतिरिक्तस्ये ति। मिथ्यात्वेने ति। अन्यथा अद्वैतहानिरिति भावः। तस्ये ति। प्रागभावस्येत्यर्थः। ननु कथ तत्त्वज्ञानानुत्पादप्रसङ्गः? तत्सामग्रीवैशात्तदुत्पत्तेः अनिवार्यत्वादिति चेन्न,— अध्याससामग्र्या नित्यत्वेन तत्त्वज्ञानोत्पत्तियोग्यत्वे ऽभिमतकालेपि प्रागभावाध्यासस्यावश्यकत्वात्, तस्य चाध्यस्यमानाविनाभावात्,

लयमेष्यति। ' कुर्वन्नेवेह कर्माणि जिजीविषेच्छत समा' ' न कर्म लिप्यते नरे ' ' यस्य नाहङ्कृतो भाव ' इत्यादिभिर्ब्रह्मविदा कर्मा लेपोपदेशश्च जीवन्मुक्तिमन्तरेण न घटते । ' तस्यकार्यं न विद्यत ' इति सर्वोपायानुष्ठाननिवृत्तिरपि तेषान्तदैव मुक्तिमावेदयति । अतो वयन्निर्गुणब्रह्मविदस्सर्वम्वैरयोग्या — इति ।

अत्र ब्रूम:- यदुक्त ज्ञानस्यैव मोक्षप्रतिबन्धकनिवर्तकत्वात्तस्यच निष्पन्नत्वात्तदानीमेवासौ मुक्त इति , तदसत् , असकृदावृत्तस्या प्रयाणादनुवृत्तस्य ज्ञानविशेषस्य मुक्तिसाधनत्वस्थापनात् , तस्य च प्रक्रान्तस्याप्यन्तिमप्रत्ययसावधिकत्वेन निश्शेषनिष्पन्नत्वाभावात्। भवतुवोपायभूतज्ञान निष्पन्नम् , तथापि तदानीमेव फलसिद्धि रिति नायन्नियम , स्वर्गादिसाधनेषु सगुणानुष्ठितेषु यज्ञादिष्विव प्रतिबन्धकेन फलविलम्बोपपत्ते । नच प्रतिबन्धकमपि मिथ्या-त्वाविशेषात्तत्वज्ञानेनैव निवृत्तमिति वाच्यम् , तथासति जीव नादेरपि निवृत्तिप्रसङ्गेन जीवन्मुक्तिश्चोयुक्तेरेवायुक्ते । शरीरादि मिथ्यात्ववर्णनदूषणमपि विस्तरेणान्यत्र द्रष्टव्यम् । इहामृतत्व श्रुत्यादिकमपि प्रत्यक्षादिविरोधात् बहुविधश्रुतिस्मृत्यादिविरोधाच्च उत्तरपूर्वाघाश्लेषविनाशरूपमुक्तिकल्पावस्थाविशेषाभिप्रायमिति व्यव स्थाप्यते । एतदभिप्रायेण ह्युक्तं महाभारते- ' मुक्तानां लक्षण ह्येतद्यच्छ्वेतद्वीपवासिनामि ' ति । ' अत्र ब्रह्म समश्नुत ' इत्येदपि

स्थापनादिति। अविधेयज्ञानभङ्गे। **फलविलम्बोपपत्ते** रिति। तवापि प्रबलारब्ध कर्मप्रतिबन्धादेव निश्शेषाविद्यानिवृत्त्यभाव इति भावः। **श्रुतिस्मृती**ति। ध्यानादि विधिः ' तस्यताव ' दित्यादिश्च श्रुति , 'बुद्धेश्चेदि' त्यादिस्तु स्मृति' ध्याना दिस्मृतिश्च। **अश्लेषविनाशे** ति तत्सङ्कल्पाभिप्रायम् । ननु 'मुक्तानांलक्षण' मिति वचनेन जीवतोऽपि मुक्तिप्रतीतेः सिद्धान्ते कथ तन्निराम इत्यपेक्ष याम्राह **एतदि**ति।

समाधिदशाभाविब्रह्मानुभवपरम्। नच सैव साक्षाद्ब्रह्मप्राप्ति. अन्या नुकल विच्छेदात्, अपुनर्विच्छेदस्य निरवशेषब्रह्मानुभवस्य सिषाधयिषितत्वात् ।

यत्तु यथा पूर्व देहानुबन्धस्य दग्धपटदन्नबन्धकत्वमिति, तदपि स्वहृदयविसंवादेनोक्तम्। नहि तत्त्वमस्यादिवाक्यश्रवण समनन्तरमप्यनुवर्तमानदेहेन्द्रियादिभिर्दु खादिक न जायते। काचेय जीवन्मुक्ति ? कि जीवत एव देहादिभेदनिवृत्ति, उत तत्प्रतिभासस्य. अथ तदधीनप्रवृत्ते, यद्वा तन्मूलपुण्यपापादे, अथवा तत्प्रयुक्तसुखदु खादे. यद्वान्यस्य कस्यचिदिति। नाद्य, व्याघातात्, जीवनस्य शरीरादिसम्बन्धात्मकत्वात्। सशरीरत्व बन्धः, अशरीरत्व मोक्ष इति त्वयैव श्रुतिभिरुपपादितत्वात्। अथ सशरीरत्वप्रतिभासे सत्यपि बाधात् सशरीरत्व निवृत्तमिति न विरोध इति चेत् ? सशरीरत्वे निवृत्ते कथमशरीरस्य सतो जीव-

---

मिसाधयिषितत्वा दिति । मुमुक्षुणा मिसाधयिषितत्वात् मैव मुक्तिरितिभाव. । द्वितीयादिकल्पेषु निवृतिरित्यध्याहार । चतुर्थे निवृत्तिरनुपपत्ति. । **व्याघातादि** ति । शरीरसम्बन्धतन्निवृत्त्योः परस्पर व्याघात. बन्धमोक्षयो. परस्पर व्याघात इति व्याघातद्वय विवक्षितम् । इदच क्रमेण जीवनन्येत्यादिपञ्चम्यन्तद्वयनिवक्षितहेतुद्वयेनोपपाद्यते । **श्रुतिभिरि** ति 'नह वैसशरीरस्ये'त्यादि' श्रुति.। द्वितीयव्याघातपरिहार शङ्कते अथेति । सशरीरत्व निवृत्तौ परममुक्त्यपेक्षया जीवन्मुक्तेः को विशेष इत्यपेक्षाया प्रतिभासो विशेष इत्याह **सशरीरत्वप्रतिभास** इति । **कथ** मिति । जीवनाभावादिति भाव । ननु शरीर प्रतिभासो जीवनम्, अतो न विरोध इत्यत्राह **अजीवत** इति । सम्प्रति पन्नाया ज्ञानजन्यायाश्शरीरनिवृत्ते. तत्प्रतिभासनिवृत्यात्मकत्वात् जीवतोऽपि त्वदिष्टज्ञानजन्यसशरीरत्वनिवृत्ति. प्रतिभासनिवृत्तिरेव वाच्या, एवञ्च शरीर प्रतिभासात्मकजीवनस्याभावाज्जीवन्मुक्तिविरोध इत्यर्थः । अथवा— **कथ** मिति ।

न्मुक्ति ' अजीवतोऽपि हि मुक्ति सशरीरत्वरूपनिमित्तार्थं बन्धस्य निवृत्तिमात्रात्मा. ननु त्वन्मते तदधिका वासनावरूपनिवृत्तिरिति जीवन्मुक्तेरजीवन्मुक्तेश्च न विशेष इत्याह । सशरीरत्वप्रतिभास बाधेऽपि द्विचन्द्रज्ञानादिवत्तदनुवृत्त्या विशेष इति चेन्न — त्वत्पक्षे बाधितानुवृत्त्यसम्भवस्योक्तत्वात् । प्रत्यक्षाविरोधाच्च । निवृत्तावप्यनुवृत्तवद्भातीति चेन्न — स्वरूपतो नित्यनिवृत्तस्य प्रतिभासमात्राधीनसिद्धितया भिमतस्य प्रतिभासानुवृत्तौ निवृत्तिवचनायोगात् । न द्वितीय. बाधादेव. जीवनविरोधाच्च। नच देहादिभेदप्रतिभासात्यन्तनिवृत्तौ जीवनाद्याम किमपि । नच सुषुप्तवदसौ जीवन्मुक्तो निवृत्तप्रतिभास एव प्राणिति. तथासति यथापूर्व प्रवृत्तिविरोधात । अत एव न तृतीय ।

शरीरसम्बन्धस्यैव जीवनत्वादिति भाव. । मुक्तयाद्विशेषपरिहृतं दूषणान्तरमाह **अजीवतोऽपिही** ति । मुक्तिसामान्यरूपे सिद्धे हि जीवन्मुक्तिरिति विशेषो वाच्य, अत शरीरनिवृत्तिसामान्यमिति वाच्यम, ततश्च परममुक्तौ प्रतिभासनिवृत्यतिरेकेण शरीरनिवृत्यभावात् जीवन्मुक्तावपि प्रतिभासनिवृत्तिर्वाच्या, ततश्चोभयोरविशेष इत्यर्थ । मिथ्यात्वनिश्चयाय - मिथ्याभूतस्यार्थस्याध्यवसाय. । मिथ्यार्थतत्प्रतिभासनिवृत्तेरसम्भवात्व **नतुत्वन्मत** इत्यादिना विवक्षितम् । **सशरीरत्वे**ति । बाधात् प्रतिभासोऽपि विषयेण सहैव निवृत्त तथापि प्रतिभासान्तरोत्पत्त्या प्रतिभासानुवृत्तिर्युज्यते, अप्रामाण्याध्यवसायलक्षणबाधे सत्यपि द्विचन्द्रज्ञानानुवृत्तिवदित्यर्थ । **त्वत्पक्ष** इति । अनुवृत्तिहेतुभूतदोषस्यापि मिथ्यात्वात्सहैव निवृत्तेरित्यर्थ । **प्रत्यक्षविरोधाच्चे** ति । नाद्य इत्यनेनान्वय. । **बाधादेवे** ति । आद्यकल्पोक्तात् प्रत्यक्षविरोधादित्यर्थ. । **नचे** ति । जीवनस्य तद्घातत्वादिति भाव. । **किमपि**- देहसम्बन्धो वा प्राणसम्बन्धोवेत्यर्थ. । **यथे** ति । सुषुप्तवदेवेति भाव । **अत एवे** ति

नच यत्किञ्चित्प्रवृत्तिशून्य कञ्चिदद्वैतनिष्ठ पश्याम शृणुमोवा । प्रतिष्ठिताद्वैतविज्ञानैरेवहि भवत्सिद्धान्त ग्रन्थकन्थाशतानि निर्मितानि । नापि चतुर्थ , जातिवर्णाश्रमाद्युपाधिकाना विधिनिषेधाना ब्रह्मविदोप्यनुवर्तनीयत्वस्य " नाविरतो दुश्चरितात् " " नियतस्य तु सन्न्यास कर्मणो नोपपद्यते । मोहात्तस्य परित्यागस्तामस परिकीर्तित । " इत्यादिभिस्सिद्धत्वात् । अलेपकमतभङ्गेचास्य प्रपञ्चो ग्राह्य । अथ मन्यसे अबुद्धिपूर्वकेषु न लेप इति अत्वेव, तथापि नासौ मुक्त , बुद्धिपूर्वे प्रारब्धैश्च बन्धानुवृत्ते । एतावन्मात्रजीवन्मुक्तेरश्लेपश्रुतिवशेनास्माभिरर्पीप्यमाणत्वात् । अत एव न पञ्चम , प्रामादिकै कर्मभि ब्रह्मविदा फलारम्भानभ्युपगमात् । बुद्धिपूर्वं प्रारब्धैश्च फलस्य प्रत्यक्षादिसिद्धस्य दुरपह्नवत्वात् । अनिर्वचनीयत्वादिमात्रेण तदपह्नवे तत्त्वज्ञानात्प्रागपि वस्तुतो मुक्तत्वेन जीवन्मुक्तिपर्वकल्पनानुपपत्ते । नापि षष्ठ , अन्यथापि निवृत्ति जीवनविरोधिनी नवा ' आद्ये विरोधादेव जीवन्मुक्त्यसम्भव । द्वितीयेपि जीवनाविनाभूत दु खादेरेवावर्जनीयत्वान्न मुक्त्युपपत्ति । अन्ततो अविद्याशेषमन्तरेण जीवनानुपपत्ति । तच्छेषेच मुक्त्यनुपपत्ति ।

प्रत्यक्षविरोधादेव । तद्विवृणोति नचे ति । नापी ति । अस्मिन् कल्पे अव्याहृतस्य निवृत्तिपदस्यानुत्पत्तो तात्पर्यम् । प्रत्यक्षत सिद्धस्यापि परमार्थतो भाव एव मुक्तिरित्याह अनिर्वचनीयत्वादी ति । नमुक्त्युपपत्ति रिति । दु खविरोधिन एव मुक्तित्व युक्तम् , न तत्सहभूतस्येति भाव । तच्छेषेचे ति ।

एतेनेद निरस्तम् , यदाह नवीन — प्राथमिकसाक्षात्कारात् सञ्चितकर्मोपादानाज्ञानाशविनाश प्रारब्धकर्मोपादानाज्ञानाशस्य प्रारब्धकर्मणा प्रतिबन्धान्न तदा नाश , किन्तु भोगेन प्रारब्धनाशे सत्येव, यथाच व्युत्प-

त्तिमतो वेदान्ताध्ययनमात्रजन्यात साक्षात्कारादविद्यानिवृत्तौ अतिप्रसक्तावपि विपरीतवासना प्रतिबन्धिका तथा अज्ञानकार्यमपि प्रारब्धकर्माविद्यानिवृत्तौ प्रतिबन्धकम्. बिम्बसाक्षात्कारेणापि विना प्रतिबन्धात् प्रतिबिम्बभ्रमानिवृत्तिवदज्ञानानिवृत्तिरपि ब्रह्मसाक्षात्कारेऽपि जुज्यते देहस्थापकप्रारब्धकर्मणेवाश्रमधर्म्य नि श्रेयसस्यापि जुद्रेणापि कर्मणा प्रतिबन्धोऽपि न विरुद्ध शुकादीना विदुषामपि शरीरश्रवणानुपपत्त्या प्रारब्धकर्मणो ज्ञानप्रतिबन्धकत्वकल्पनान्मात्र प्रमाणाभाव. शङ्कनीय . प्रारब्धकर्मक्षयानन्तरमुत्पन्नवृत्त्यानुवृत्तस्याविद्यालेशस्य निवृति· यद्वा प्रार्थमिकसाक्षात्कारादावरणशक्तिमदज्ञानाशनिवृत्ति· प्रति बन्धनिवृत्त्यनन्तर तेनैव निवृत्तावरणचैतन्येन विक्षेपशक्तिमदज्ञानाशस्यापि निवृत्ति तावत्पर्यन्त विक्षेपानुवृत्ते जीवन्मुक्ति नन्वेव घटाद्यवच्छिन्नचैतन्यस्यापि सकृदुत्पन्नवृत्तिनिवृत्तस्य पश्चादप्यवस्थानसम्भवात् कालान्तरे वृत्त्यन्तर विनापि तदज्ञाननिवृत्ति· स्यादितिचेन्न ,– प्राथमिकवृत्तेर्घटमात्रविषयत्वेपि कालान्तरीयघटाधिषयत्वात् सर्वात्मना तदनभिव्यञ्जकतया तदर्थ वृत्त्यन्तरापेक्षणात्. अज्ञानान्तरेण पुनरावृत्तत्वादपि तस्यापेक्षितत्वाच्च वेदान्तानां सर्वात्मना ब्रह्मबोधनसमर्थत्वात् तज्जनितसाक्षात्कार· सर्वात्मनाभिव्यञ्जक., मानाभावाच्च नाज्ञानान्तरमिति वैषम्यम्, प्रार्थमिकवृत्त्यभिव्यक्तचैतन्यस्य कालान्तरे अज्ञान निवर्त्तकत्वे मान तु तस्याभिध्यानादि ति श्रुति. तस्य– शास्त्रयुक्तिभ्यां निश्चितस्य, अभिध्यानात् - सजातीयप्रत्ययप्रवाहरूपात्. प्रपञ्चे पारमार्थिकत्व भ्रमप्रयोजकाविपरीतवासनाहेतुमायाशस्य निवृत्ति·. तत . युज्यतेनेनेति योजनम् - असम्भावनाद्यसहकृतसाक्षात्कार· तस्मात्. प्रपञ्चे व्यावहारिकत्वभ्रमप्रयोजकावारकमायाशस्य, ततस्तत्वभाव· - अभिव्यक्तब्रह्मात्मनावस्थानम्, तस्मादन्ते प्रारब्धकर्मक्षये बाधितानुवृत्त्या प्रतिभासमानप्रपञ्चहेतुमायाशस्य, इत्येव तदा सर्वमायानिवृत्तिरिति श्रुत्यर्थ । तदुक्त- 'शास्त्रेण नश्येत् परमार्थरूप कार्यक्षम नश्यति चापरोक्ष्यात्। प्रारब्धनाशात्प्रतिभासनाश एव त्रिधा नश्यति चात्ममाया ॥ इति।

किञ्च सञ्चित प्रारब्ध वा कर्म नैतत्पुरुषीयाज्ञानकल्पितम्, अतो नैतत्पुरुषीयाज्ञाननिवर्त्यन्तादृशाज्ञानम्, तस्मात् ज्ञानाग्निरित्यादिप्रमाणबलात् कर्मणा

मेदज्ञानेन निवृत्तिर्युक्ता प्रमाणबलावधार्यज्ञानस्यानानेतरनिवर्तकत्वादर्शनत् कर्मनिवर्त्यत्वं न सम्भवतीत्युक्तो तेनैवादर्शनेन ज्ञानेनाज्ञाननिवृत्तौ कर्मणः प्रतिबन्धकत्वमपि न स्यात्।

ननु व्यावहारिकार्थकल्पनाऽनवच्छिन्नब्रह्मकर्तृकैव, अनवच्छिन्नस्यावच्छिन्नोपाधया भेदाभावात् एतत्पुरुषीयतत्त्वज्ञानमपि ब्रह्मण एवेति तेन तत्त्वज्ञानेन ब्रह्मकर्तृककल्पनोपादानाज्ञाननिवृत्तिर्युक्ता नचैव सति पुरुषद्वयस्य युगपच्छुक्तिरजताध्यासे तयोरन्यतरस्य शुक्तिसाक्षात्कारेण तदध्यासवत् इतराध्यासस्यापि निवृत्त्यापात सर्वैर्ब्रह्मणोभिन्नतया अध्यासतत्त्वज्ञानयोस्तदीयत्वादिति वाच्यम्, प्रातिभासिकाध्यासस्यावच्छिन्नब्रह्मकर्तृकतया तदन्तःकरणावच्छिन्नकर्तृकाध्यासस्य तदीयतत्त्वज्ञाननिवर्तकत्वात्, अनवच्छिन्नब्रह्मकर्तृकाध्यासस्यत्ववच्छिन्नसम्बन्धितत्त्वज्ञानेन निवृत्तिर्युक्तैव, ब्रह्मणस्तदभिन्नतया तत्त्वज्ञानस्यापि तदीयत्वात्, इति चेन्न – तथा सति एकस्य तत्त्वज्ञानादेव युगपत्सर्वेषा मुक्तिप्रसङ्गात्।

दृष्टमेवेदम्, नचैव शुकादिमुक्तिवचनविरोधः तद्वचनस्य जीवन्मुक्तिविषयत्वात् इतिचेत्? तर्हि जीवन्मुक्तिरेव सर्वेषा युगपत्स्यात्, एतत्पुरुषीयसञ्चितकर्मादिवत् सर्वपुरुषीयसञ्चितकर्मादेर्ब्रह्मसम्बन्धित्वाविशेषात्।

किञ्चानादौ ससरे जीवन्मुक्तपरम्पराया अप्यनादित्वात् एतावत्काल प्रारब्धकर्म तैरनुभूत इतः परञ्च मुक्तिपर्यन्त तैश्शुकादिभिश्च प्रारब्धकर्मानुभोक्ष्यत इति महदिद साहसम्, इतः पर मुक्तिरस्मिन्काल इत्यनिर्णयात् शुकादीनामपि सुबहुसहस्रब्रह्मकल्पेषु प्रारब्धानुभवप्रसङ्गात्। नच कर्मणामेत दज्ञानोपादानत्वमेवास्त्विति वाच्यम तथासति शुक्तिरजतादिवदनन्यानुभाव्यत्व प्रसङ्गात्। कर्मसाध्यादृष्टस्य तु प्रत्यापरोक्ष्यप्रसङ्गाच्च। अतस्तत्त्वज्ञानेन कर्मोपादानाज्ञाननिवृत्तिर्युक्ता। अतएव न प्रारब्धकर्मणः प्रतिबन्धकत्वकल्पनापि युक्तिमती। प्रारब्धकर्मभिः प्रतिबन्धे यः प्राथमिकदृष्टान्तः सोऽनुपपन्नः, अध्ययनमात्रजन्यस्य तत्त्वज्ञानस्य विरोधिवाक्यश्रवणेनानिर्द्धारणरूपतया तस्याविद्या निवर्तने सामर्थ्याभावात् तत्र प्रतिबन्धकल्पनात्। द्वितीयदृष्टान्तोप्यनुपपन्नः, जलाद्युपाधेर्बिम्बतत्त्वज्ञानानिवर्त्यतया तत्रोपाधिना प्रतिबन्धसम्भवात् कर्मकृतत्व

ज्ञाननिवर्त्यमिति कथ तस्य प्रतिबन्धकता । ननु अज्ञानस्य ज्ञानेन निवृत्तौ सत्या तथैवाज्ञाननिवृत्त्या अज्ञानोपादानककर्मनिवृत्तिरिति चेत् ? एव [कर्म] क्रमकल्पनाया मानाभावात् । रजतज्ञानमुत्पन्नमिति प्रतीते त्वया रजतज्ञानस्य साक्षिरूपतया तस्योत्पत्त्यभावेन रजतविषयत्वाङ्गीकारात्तुत्यन्यायेन शुक्तिज्ञानेन रजतज्ञान निवृत्तमिति प्रतीतेरेव ज्ञानेनाज्ञानकार्यनिवृत्तौ मानाभावात् । ननु निवर्त्य यदि स्वनिवृत्तिप्रतिबन्धकम् तथाहि दोषः, तत्सत्त्वे निवृत्तेरसम्भवात्, तन्निवृत्तौ पुनर्निवृत्त्यसम्भवेन निवर्तकत्वाभिमतस्य तान्निवर्तकत्वाभावप्रसङ्गात्. निवर्त्यस्य निवर्त्यान्तरनिवृत्तिप्रतिबन्धकत्वे को दोष इति चेन्न,— एतन्निवृत्तेः प्रतिबन्धकान्तरकल्पनापत्ते नचेष्टापत्ति , तस्यैवाज्ञाननिवृत्तिप्रतिबन्धकत्व कल्पनौचित्यात् ।

किञ्चाद्वैतज्ञानाधीनाज्ञाननिवृत्तिर्ब्रह्मस्वरूपैव, तदधीना कार्यनिवृत्ति· का नाम ? अश्वमेधदृष्टान्तोप्यनुपपन्न , अश्वमेधात् प्रारब्धस्य क्षुद्रता का नाम ? प्रारब्धत्वादेव प्रावल्यात् । सर्वेषा वैदिककर्मणा फलजनकत्वावश्यम्भावाविशेषात्, प्रारब्धस्य मध्ये विराम हेत्वभावाच्च प्रारब्धभोगानन्तरमेव तद्देहवियोगसाम्य कर्मफलभोगो युक्त.. अतः तत्र प्रारब्धेन प्रतिबन्धकल्पना युज्यते, अत्र तथा कल्पक न किञ्चित् पश्याम , प्रत्युत ज्ञाननिवर्त्यत्वादप्रतिबन्धकल्पना युज्यते । नच विदुषा शरीरश्रवणानुपपत्तिःकल्पिका, तच्छरीरस्य तदज्ञानोपादानकत्वाभावेन तदीयतत्वज्ञानानिवर्त्यत्वात् । शरीरस्य तदज्ञानकार्यत्वे शुक्तिरजतवदसाधारण्यप्रसङ्ग·, मासामृगाद्यान्तरविशेषप्रतिपत्तिप्रसङ्ग·, इन्द्रियापरोक्षप्रसङ्ग., सुषुप्त्यादौ शरीरानुपलम्भप्रसङ्गश्च । तदज्ञानकार्यत्वे हि तत्कर्तृकोध्यासस्स्यात् । सुषुप्त्यादौ च न देहादध्याससम्भव· , तद्दशाया स्वरूप मात्रानुभवस्य त्वयैवाभिधानात् । ननु शरीरमेतदज्ञानोपादानकम्माभूत् , न तत्र प्रतिबन्ध· कल्पते, किन्तु शरीरस्थितये प्रारब्धानुवृत्त्यर्थ प्रारब्धोपादाना ज्ञानानिवृत्तेरेवेति चेत् ? न, प्रारब्धस्याप्येतदज्ञानकार्यत्वाभावस्योक्तत्वात् ।

किञ्च सञ्चितकर्मोपादानाज्ञाननिवृत्ति· कुतोऽङ्गीक्रियते ? तत्वज्ञानस्योत्पन्नत्वादिति चत् ? तर्हि प्रारब्धोपादानाज्ञानमपि निवर्त्येत । तन्नोपपद्यते, शरी-

रानुवृत्तेरिति चेत्? तर्हि सञ्चितमपि न निवर्त्येत। मुक्तिश्रवणात्तन्निवृत्तिरिति चेत्? तर्हि कृत्स्नाज्ञाननिवृत्तिप्रसङ्ग, किञ्चिदज्ञाननिवृत्तेस्ससारदशासाधारणत्वात्। ब्रह्मज्ञान निवृत्तम्, अल्पीय एव प्रारब्धमिति चेत्? तर्हि किञ्चिदूना मुक्तिरित्यौपचारिकत्वमेव समर्थित स्यात्। मुख्यत्वव्यपदेशस्तु स्वैराभिलाषनिबन्धनो युष्माकमिति वय पश्याम.।

वृत्त्यन्तरेण प्रारब्धकर्माविद्यानिवृत्तिरित्यप्यनुपपन्नम्। अहमध्यासानुवृत्तौ न मुक्तिः, तथा सति ससार एव मुक्तिरिति सुवचनत्वात्। अहमध्यासनिवृत्तौ तु न तृत्युत्पत्ति, उत्पन्नापि वा नैतदीया। प्राथमिकसाक्षात्कारादावरणाज्ञानाशनिवृत्तिरित्यप्यनुपपन्नम्, एवमशभेदकल्पनाया विक्षेपकस्याज्ञानत्व एव मानाभावप्रसङ्गात्। इद न जानामीत्यनुभवो हि अज्ञाने मानम्, तत्वतस्तत्र इद नेच्छामि इद च द्वेष्मीत्यादिवत् अभावप्रतियोगिभूतज्ञानगततया सकर्मकत्वस्य भासमानत्वेपि सकर्मकत्व भावरूपाज्ञानगततया भासत इति त्वया कल्प्यते, एव कल्पनेपि आवारकाज्ञानस्यैव सकर्मकतया मान स्यात्, नतु विक्षेपकस्यापि, उभयोस्सकर्मकत्वे मानाभावात्। निरुक्तानुभवश्चैकेनापि चारितार्थो नोभय विषयीकरोति, गौरवात्, तत्रावरणदशावच्छेदेन इद नाज्ञासिषमिति प्रतीयमानत्वात्, जलाद्युपाधिस्थले निवृत्ते आवरणे विक्षेपकाज्ञानस्य सत्वेपि न जानामीति प्रतीतेरदर्शनाच्च निरुक्तानुभवस्यावारकाज्ञान विषयत्वमेव युक्तम्, भूतले घटादिजनकस्य दण्डादेर्भूतलविषयत्ववत्। शुक्त्यादौ विक्षेपकस्यापि शुक्त्यादिविषयत्वाभावात् न तस्याज्ञानत्वे किञ्चिन्माना पश्यामः। विक्षेपकस्यापि सविषयत्वे सोपाधिकभ्रमस्थले जानामि न जानामीति च प्रतीतिप्रसङ्गः।

किञ्च - ज्ञानविरोधितया ह्यज्ञान भास्यते, आवारकाज्ञानमेव च ज्ञान विरोधि, न तु विक्षेपकम्, सोपाधिकभ्रमे ज्ञानविरोधादर्शनात्, रजतादि भ्रमेपि शुक्तिज्ञानेन तद्विरोध्यावरणे निवृत्ते तत एव तन्निमित्तविक्षेपाभावः, नतु विक्षेपकस्य ज्ञानेन निवृत्तत्वात्, विक्षेपकस्य ह्युभयनिमित्त आवरणम्। जलाद्युपाधिर्वा। निमित्तनिवृत्त्यापि कार्यनिवृत्तिः युज्यत एव, स्थिते

ग्यन्तःकरणे इन्द्रियसन्निकर्षरूपनिमित्तनिवृत्त्या वृत्तिनिवृत्तेः। एवच एकस्यैवाज्ञानस्याच्छाद्यविक्षेपकत्वम्, शुक्तिरजतादिस्थले आवरणनिवृत्तिरज्ञाननिवृत्तिर्वा, सोपाधिकस्थले विक्षेपानुवृत्तेरावरणस्यैव निवृत्तिः, इति वाच्यम्, ततश्चात्रापि विक्षेपानुवृत्तेरावरणनिवृत्तिरेव तत्वज्ञानेन जातेति अज्ञाननिवृत्तेरभावात् कथ तद्रूपामुक्तिः? तदभावे कथ तद्विशेषजीवन्मुक्ति. ?

पूर्ववृत्त्याभिव्यक्तमेव चैतन्यमनुवृत्ताज्ञानाशनिवर्तकमित्यप्यनुपपन्नम्, वृत्तिमनपेक्ष्य निवर्तकत्वे तत एव सर्वेषामप्यज्ञाननिवृत्तिप्रसङ्गात्, चैतन्यस्य तदीयत्वतदभावयोरविशेषात्, स्वरूपाभेदात्तदीयत्वं तदीयवृत्त्यवच्छेदाभावात्तदभावश्चैव हि तुल्ये। तदीयवृत्तिनिवृत्ताकरणकत्वमेव तदीयत्वमिति चेन्न,-सुखदु·खादिप्रकाशस्य तदीयत्वाभावप्रसङ्गात्। नन्वन्तःकरणावच्छिन्नचैतन्यस्यैवानया चरमवृत्त्यावच्छेदात् तस्यच चैतन्यस्यैतदीयत्वान्न निरुक्तातिप्रसङ्ग इति चेन्न·,- तथा सति तत्वमस्यादिवाक्यस्य परिच्छिन्नब्रह्मबोधकतया पूर्णाखण्डब्रह्मबोधकत्वाभावप्रसङ्गात्,एतदन्तःकरणानवच्छिन्नब्रह्माशावारकाविद्यानिवृत्त्यभावप्रसङ्गात्, एकदेशस्फुरणमात्रेण सर्वांशेप्यविद्यानिवृत्तौ घटावच्छिन्नचैतन्यस्फुरणेपि सर्वस्मिन्नपि चैतन्यांशे अविद्यानिवृत्तिप्रसङ्गात्, एकदेशावारकाज्ञाननिवृत्तिमात्रेण जीवन्मुक्त्युक्तावतिप्रसङ्गाच्च।

किञ्चैव सकृद्घटवृत्त्याभिव्यक्तचैतन्य कालान्तरे घटविक्षेपकाज्ञानान्तरान्निवर्त्तयेत्, प्राथमिकवृत्तेः कालान्तरीयत्वागोचरतायामपि घटगोचरत्वात्, अज्ञाननिवृत्तौ सर्वात्मनाभिव्यक्तयपेक्षाया स्पर्शगन्धाद्यनभिव्यक्तेश्चाक्षुषवृत्त्या अज्ञाननिवृत्तिर्नस्यात्, एवमन्यत्रापीत्यज्ञाननिवृत्तिरेव क्वापि न स्यात्। अज्ञानान्तरेणावरणमप्यसङ्तम्, विरोधिसन्निधाने तदयोगात्। अन्यथा ब्रह्मणोऽपि पुनरावरणप्रसङ्गात्, वेदान्तानां सर्वात्मना ब्रह्मबोधनसमर्थत्वादिति निरर्थकोऽय तव प्रलाप·।

ब्रह्मणि मानाभावान्नाज्ञानान्तरमित्यनुपपन्नम्, विक्षेपकस्याप्यभावप्रसङ्गात्। नच देहानुवृत्तिर्विक्षेपकाशसत्वे मानम्, देहस्यैतत्पुरुषीयाज्ञानकार्यत्वाभावस्योक्तत्वात्।

ईश्वरावताराणामिव ब्रह्मविदामपि जीवतान्दुःखाद्यभिनयमात्रमिति चेत्?

'तस्याभिध्यानादि' ति व्याख्यान चा सङ्गतम्, ज्ञानस्याज्ञानतया मायानिवर्त्तकत्वासम्भवात्। ब्रह्मसत्ताप्रतीत्यतिरेकेण पारमार्थिकसत्वप्रतीतिः व्यावहारिकसत्वप्रतीतिरिति प्रतीतिद्वयाभावात्। तत्वभावपदस्याभिव्यक्तब्रह्मात्मनावस्थाने व्युत्पत्त्यभावात्। बाधितानुवृत्तिशब्दस्य वृषलोद्वाहमन्त्रतुल्यत्वात्। विक्षेपकाशस्य त्वयैवाबाधितत्वोक्तेः तस्यैतदीयत्वाभावेन एतदीयज्ञाननिवर्त्यत्वासम्भवादभिध्यानादीना समानविषयतया भिन्नविषयज्ञानानिवर्त्तकत्वासम्भवात्, निवृत्तित्रयाप्रतीतेः। निवृत्तिपदस्याऽऽवृत्त्यान्वये वाक्यभेदप्रसङ्गात्। विश्वस्या अपि मायाया अन्ते निवृत्तिप्रतीतेः विश्वगोचरमायानिवृत्तिरिति षष्ठीसमासाङ्गीकारे निषादस्थपत्यधिकरणविरोधात्। तत्वभावात् - श्रवणरूपतत्वज्ञानात्, तत्सिद्धात्, योजनात् - युक्तितः, स्थिरीकरणरूपान्मननात्, तत्साध्यात् भूयोभूयस्तस्याभिध्यानाच्च, प्रारब्धकर्मावसाने कृत्स्नस्यापि प्रारब्धेतरकर्मणः तदधीन भगवद्विचित्रसङ्कल्पस्य वा निवृत्तिरित्येकवाक्यतयान्वयप्रतीतेः आकाङ्क्षाक्रमानुसारादुत्पत्तिक्रम परित्यज्यावरोहक्रमेण निर्देशोपपत्तेः। भूयःपद श्रवणादित्रयेणापि वान्वेतु।

नन्वभिध्यानान्मायानिवृत्तिः, तत्वभावान्मायानिवृत्तिः, एव विश्वमायानिवृत्तिः इत्येव निवृत्तिपदावृत्त्या भेदेन नान्वय, किन्त्वभिध्यानयोजनातत्वभावैर्विश्वमायानिवृत्तिरिति चेत्? एव तर्हि इद मायाया निवृत्तित्रये न मान स्यात्, अभिध्यानान्मायानिवृत्तिर्भवति, तत्वभावादपि भूयो मायानिवृत्तिर्भवतीत्येवमन्वये हि निवृत्तित्रय शङ्क्येतापि, एकवाक्यताया तु निवृत्तित्रयस्य न प्रसङ्ग। नच साधनत्रयकीर्त्तनान्निवृत्तित्रयसिद्धिः, तस्य तदसाधकत्वात्, साक्षात्पारम्पर्याभ्यामेककार्यान्वयोपपत्तेरुपपादितत्वात्।

ननु अस्तु पञ्चमः पक्षः, नच प्रत्यक्षादिविरोधः, परकीयप्रत्यक्षे विप्रतिपत्ते, दुःखतत्प्रत्यक्षकल्पकव्यापाराणाञ्चाभिनयनमात्रत्वादित्याशयेन शङ्कते ईश्वरे ति। सुखदुःखानुत्पाद इति पञ्चमपक्षे स्वप्रयोजनविरहस्य सिद्धत्वात्

हन्त स्वानुभवविरुद्धं धार्ष्ट्यम् । शक्यञ्चेदं सर्वैर्वक्तुम् । नच स्वपर प्रयोजनविरहे मन्दोपि कश्चित्प्रवर्तेत । नच मुक्तस्य लीलाप्रसङ्गमप्यनु मन्यसे, जक्षदादिवाचामेव भक्षणात् । अतो जिवतिचेन्न मुक्त . मुक्तश्चेन्नजीवतीति न कथञ्चिदपि जीवन्मुक्तिस्सम्भवतीति ।

यत्तु चक्रभ्रमादिदृष्टान्तेनानुवृत्ताशस्य स्वयमेव विलय इति, तदप्यहेतुकविनाशाद्यनुपपत्त्या बाधितानुवृत्तिभङ्गे निरस्तम् ।

यत्पुनरलेपोपदेशो जीवन्मुक्तिमन्तरेण न घटत इति, तदपि प्रामादिकविषयत्वस्थापनादेव परिहृतम् । "तस्य कार्य न विद्यत' इत्यादिसर्वोपायानुष्ठाननिवृत्तिवादाश्च मुक्तविषयतया समाध्यवस्था विषयतया च यथासम्भवं व्यवस्थाप्या । अन्यथा ब्रह्मविदामेव यावज्जीवानुष्ठानस्य निषिद्धपरिहारस्य च श्रुतिस्मृतिसिद्धस्य बाध प्रसङ्गात् ।

किञ्च निर्गुणविषयत्वाभिमतसद्विद्यानिष्ठस्यैव "तस्य तावदेव चिर यावन्न विमोक्ष्ये अथ सम्पत्स्य" इति शरीरपातमात्रमपेक्षते मोक्ष इति विळम्बावधिमुपदिशन्ती श्रुतिरेव जीवन्मुक्ति वारयति । तथा "नह वै सशरीरस्य सत प्रियाप्रिययोरपहतिरस्ति, अशरीरं वा व सन्तं न प्रियाप्रिये स्पृशत" इति श्रुतिमप्यधीमहे ।

स्वप्रयोजनविरहानुवादः । **भक्षणादि** ति । अन्यपरत्वोक्तेरित्यर्थ. । यद्वा अन्यस्य निवृत्तिर्जीवनाविरोधिन्येव, नचजीवनाविनाभूतदुःखादिप्रसङ्गः, जीवनस्य दुःखाद्यप्रयोजकत्वात् , नापि प्रत्यक्षविरोध , अभिनयमात्रत्वादिति

अत्राशरीरत्वञ्च कर्माधीनशरीरवैधुर्यमित्यन्यत्र स्थापितम् । आपस्तम्बेनोपासनगत्यादिविषयबहुविधाध्यात्मशास्त्रार्थतत्वपारदृश्वना निराकृतेयं जीवन्मुक्तिः— "वेदानिम लोकममुंच परित्यज्यात्मान मन्विच्छेत्, बुद्धे क्षेमप्रापणम्, तच्छास्त्रैर्विप्रतिषिद्धम्, बुद्धे चेत् क्षेम प्रापणमिहैव न दुःखमुपलभेत, एतेन परं व्याख्यात" मिति । एतेन- निर्विशेषवादिनां जीवन्मुक्तिनिराकरणेन, तत्कल्पित निराकरणीय सर्व तुल्यन्यायतया निराकृतमित्यर्थः । अत प्रत्यक्षश्रुति स्मृत्यादिविरोधात्, स्वैराभिलाषिभि. स्वैरजनसङ्ग्रहश्रद्धाव्यामुग्धैर्वा कल्पितेय जीवन्मुक्तिरिति प्रत्यक्षीकृतस्वदु खैर्मुमुक्षुभिरुपेक्षणीयेति ।

इति शतदूषण्या जीवन्मुक्तिभङ्ग

एकत्रिंशोवादः ।

षष्ठपक्ष एव शङ्कते **ईश्वरे** ति । नन्वीश्वरस्यापि प्रियाप्रियस्पर्शप्रसङ्ग इत्यत्राह **अत्राशरीरत्वमि** ति । तुल्यन्यायतामाह **अत** इति ॥

इति वाधूलकुलतिलकश्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्वयाथात्म्येन
तदेकदैवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्ध
महाचार्यापरनामधेयेन रामानुजदासेन विरचिताया
शतदूषणीव्याख्याया चण्डमारुतारव्याया
जीवन्मुक्तिभङ्ग

एकत्रिंशस्कन्ध. ।

निर्विकारस्येति चेत्? सा किं विवर्तपरम्पराविद्यायास्स्वरूपम्, उत तत्कार्याण्येव, यद्वा वस्त्वन्तराणि? नाद्य, उक्तदोषानतिक्रमात्; स्वरूपत्वाविशेषात् सर्वदा सर्वाध्यासप्रसङ्गात्। न द्वितीयः, निर्वाह्यस्यैव निर्वाहकत्वानुपपत्तेः। नच तृतीयः, अनभ्युपगमात्। अभ्युपगमेपि तत्सत्यमिथ्यात्वादिविकल्पशतदौस्थ्यापातात्। सत्यत्वे सद्वितीयत्वादिप्रसङ्गात्, मिथ्यात्वेपि तत्परम्परायां प्रतिनियतकालविचित्राध्यासे तथाविधपरम्परान्तरकल्पनाप्रसङ्गात्। पूर्वपूर्वविवर्तानामेव उत्तरोत्तरहेतुत्वान्नासौ दोषः, यथा ब्रह्मपरिणामानां प्रकृतिपरिणामानां वा तत्तदुत्तरोत्तरपरिणामहेतुभाव इति चेन्न,- तथाप्यविद्याकल्पनस्य निर्मूलत्वप्रसङ्गात्, ब्रह्मण्येवान्यनिरपेक्षानाद्यध्यासप्रवाहवैचित्र्येण सर्वाध्याससिद्धे। तर्हि परिणामपरंपरासामर्थ्यमाश्रित्य परिणामिद्रव्यापह्नवप्रसंग इति चेन्न—प्रत्यक्षादिविरोधप्रसङ्गात्। नचात्रापि तथा, तद्विषयप्रमाणानां प्रत्येकं प्रतिक्षेपात्। न तथा निरधिष्ठानभ्रमापत्तिरिति

उत तत्कार्याण्येवे ति। तत्तत्कालनियतोत्पत्तिकतया निर्वाह्यत्वेनाभिमतान्येवेति विरोधसूचनार्थ एवकारः। उक्ते ति। नियताध्यासासम्भवादित्यर्थः; तदेवोपपादयति— स्वरूपत्वे ति। परम्परायास्स्वरूपत्व हि परम्परान्तर्गतानां तदभेद एवेति नियामकत्वेनाभिमतानां मृदादीनां सर्वदा सत्त्वान्नियाम्यत्वेनाभिमतानामपि सर्वेषां घटादीनां सर्वदाध्यासप्रसङ्ग इत्यर्थः। निर्वाह्यस्यैवे ति। कार्यक्रमे नियामकप्रश्ने क्रमविशेषविशिष्टकार्यस्यैव नियामकत्वोक्तावात्माश्रय इत्यर्थः। क्रमविशेषविशिष्टकार्याणामेव विवर्तपरम्पराशब्दार्थत्वादिति भावः। मिथ्यात्वेपीति। प्रतिनियताध्यासनियामकत्वेनाङ्गीकृतायां विवर्तपरम्परायाः क्रमिककार्यघटितत्वात् तत्तत्कार्यक्रमेपि विवर्तपरम्परान्तरापेक्षायामनवस्थाप्रसङ्गादित्यर्थः। ननु परम्परात्मकसमुदायस्य न समुदायरूपेण नियामकत्व विवक्षितम्, येनोक्तदोषः स्यात्, किन्तु पूर्वपूर्वविवर्तविशेषस्य उत्तरोत्तरविवर्तविशेषहेतुत्वमिति शङ्कते- पूर्वे ति। प्रत्यक्षे ति। पिण्डघटाद्यवस्थाव्यतिरेकेणानुगतस्य मुद्द्रव्यस्य दर्शनादित्यर्थः।

भेतव्य भवता, ब्रह्मण एव सर्वविवर्ताध्यासाधिष्ठानत्वाभ्युपगमात् । नह्यपरमार्थभूतया अविद्यया अधिष्ठानतया स्वीकारश्शक्यः, तथासति ब्रह्मण एवासिद्धिप्रसङ्गे माध्यमिकसमाजमध्यमध्यास्स्व । ब्रह्मसत्यत्वश्रुत्यादिबलात्तदभ्युपगमः,नतु विवर्ताधिष्ठानत्वादितिचेन्न,-विकारतद्धुपादानप्रकृत्यादिसत्यत्वश्रुतिबलादेव प्रकृतितत्परिणाम परम्पराभ्युपगमप्रसगेनाविवादप्रसगात् । तत्सत्यत्वप्रतिपादकश्रुति बाधे ब्रह्मसत्यत्वप्रतिपादिकाया अपि तस्या बाधितु शक्यत्वात् । किञ्च किमविद्या प्रकाशते, नवा? नचेत्तुच्छत्वम् , निरुपाख्यस्यैव तुच्छत्वात् । प्रकाशते चेत् स प्रकाशः किमविद्यास्वरूपम् , उत ब्रह्मस्वरूपम्, अथ तस्यास्तस्य वा धर्म ,उतान्य कश्चित्? न तत्राद्य', स्वप्रकाशत्वेन ब्रह्मवत्सत्यत्वप्रसङ्गात् । न द्वितीय , तन्नित्यत्वेन नित्यमविद्याप्रकाशादनिर्मोक्षप्रसंगात् । नापि तृतीय . तयोर्ज्ञातृत्वा नभ्युपगमात् । अध्यस्तज्ञातृत्वाभ्युपगमे कः प्रतीकार इति चेन्न,-तस्याप्यध्यासस्याविद्याहेतुकत्वेन्योन्याश्रयणात् , प्रकाशाध्यासस्य तदधीनत्वात् , तस्याश्च प्रकाशाधीनसिद्धित्वात् । ब्रह्महेतुकत्वे तस्य नित्याध्यासप्रसङ्गात् । अहेतुकत्वे पूर्ववत्प्रपञ्चाध्यासस्यैवाहेतु कत्वप्रसगादादिमदनादिवैषम्यस्याप्रयोजकत्वोक्तेः । निर्दोषप्रकाश

श्रुतिबला दिति। "नित्या सततविक्रिया" "अजामेका लोहितशुक्लकृष्णा बह्वी प्रजां जनयन्ती सरूपा" मित्यादि वाक्य विवक्षितम् । प्रकाशाधीनासिद्धित्वा दिति । अध्यस्तस्याध्यासात् प्रागसिद्धेरित्यर्थः । अप्रयोजकत्वोक्ते रिति । अनादित्वेपि कारणापेक्षा परिहर्तु शक्यत इत्यत्रेत्यर्थः । निर्दोषे ति। दोषमन्तरेण प्रकाशमानस्य ब्रह्मवत्सत्यत्वप्रसङ्गादित्युक्तो दोषः, यदि निर्दोषस्यापि ब्रह्मणोविद्या प्रकाशेत नित्य तत्प्रकाशप्रसङ्ग इत्युक्तो दोष., अविद्यायामुक्तरीत्या तत्त्वज्ञ नप्रागभावसत्त्वा सत्त्वाभ्या ज्ञातृत्वस्य प्रकाशाप्रकाशव्यवस्थायाञ्च— तथासति तत्त्वज्ञानप्रागभाव एवेत्यादिनोक्त. अविद्याया असिद्धिप्रसङ्गलक्षणदोषश्चात्र विवक्षितः । अविद्या

गोचरत्वप्रयुक्तदोषाणां च प्रागनुवृत्तेः । नापि चतुर्थः, सत्यस्य तस्यानभ्युपगमात्, मिथ्याभूतस्य त्वध्यासेऽन्योन्याश्रयप्रसङ्गात् ।

एतेनाविद्याप्रवाहपक्षोपि निरस्तः, प्रपञ्चप्रवाहस्यैव हेतुकार्य भावेन स्थित्युपपत्तौ निरर्थकाविद्याप्रवाहकल्पनायोगात्, उपलम्भाद्यसिद्धेश्च ।

किञ्चेयमविद्या निराश्रया, साश्रया वा ? पूर्वत्र ब्रह्मवत् सत्यत्वप्रसङ्गः । शशशृङ्गवद्वा तुच्छत्वप्रसङ्गः । उत्तरत्राप्यसावाश्रयः किं ब्रह्मस्वरूपम्, उत तदेवोपहितम्, अथवा स्वतन्त्रोन्यः ? न प्रथमः, नित्यशुद्धस्याशुद्धिविरोधात् । अन्यतरमिथ्यात्वे वोभयमिथ्यात्वे वा तदविरोध इति चेन्न,- शुद्धमिथ्यात्वेऽपसिद्धान्तशास्त्रवैय्यर्थ्यादिप्रसंगात् । अशुद्धमिथ्यात्वे तन्निवृत्तिर्नैरपेक्ष्यप्रसगात् । कदाचिदेपि तस्या अभावात् तत्प्रतिभासानिवृत्तेरपेक्षेति चेत् ? प्रतिभासस्यापि मिथ्यात्वे प्रसंगसाम्यात् । तत्सत्यत्वानभ्युपगमात् । मिथ्यात्वेपि सत्यत्व इवापुरुषार्थत्वाविशेषात् तन्निवृत्त्यपेक्षेति चेत् ? तर्ह्यपुरुषार्थाश्रयत्वलक्षणाशुद्धत्वस्य दुस्त्यजत्वा

प्रवाहाङ्गीकारपक्षे नायमन्योन्याश्रयः, पूर्वपूर्वाविद्यया उत्तरोत्ताराविद्याप्रकाशोपपादनसम्भवादित्याह– एतेने ति । एतद्विवृणोति– प्रपञ्चे ति । कार्यानुपपत्त्या भावेपि प्रमाणबलात्स्वीक्रियत इत्याह– उपलम्भादी ति । स्वतन्त्रोन्य इति । ब्रह्मानाश्रय इत्यर्थः । मिथ्यात्वेपी ति । व्यावहारिकसत्त्वस्य विद्यमानतया अपुरुषार्थत्वतन्निवृत्योस्सम्भवादिति भावः । सत्यत्व इति । सत्यत्वाङ्गीकार इत्यर्थः । तर्ही ति । ब्रह्मणो हेयसम्बन्धाङ्गीकारे ब्रह्मणो निरवद्यत्व प्रतिपादिकानां बह्वीना श्रुतीनां तदुपबृंहकबहुस्मृतीतिहासपुराणानाञ्चाप्रामाण्यप्रसङ्गेन हेयसम्बन्धस्य मिथ्यात्वेनाप्रामाण्यं परिहरसि, तस्य यदि सत्त्वमङ्गीकरोषि तदा यादृशसत्त्वविशिष्टादशुद्धिर्लोके तादृशी ब्रह्मण्यप्यङ्गीकृतैवेति तच्छ्रुतिप्रामाण्येप-

त्तन्मिथ्यात्वोक्तिरुपच्छन्दनमात्रे पर्यवस्यति । उभयमिथ्यात्वे तूभय विधदोषापत्तिः । व्याघातादयश्च स्युः । नापि द्वितीयः, अविद्याश्रयस्य ब्रह्मण उपाधिमत्त्वे सत्यमिथ्याविकल्पिताविद्यान्तरादिपरिग्रहेऽपसिद्धान्तानवस्थाविरोधादिदोषसमुन्मेषात् । नापि तृतीयः,

---

पादनमुपच्छन्दनमात्रमेवेत्यर्थः । धर्मिसमसत्ताकाशुद्धेरेव हेयत्वम्, प्रातिभासिकशुद्धिविशिष्टेऽशुद्धत्वाव्यवहारात्, ततश्च धर्मिसमसत्ताकाशुद्धिरेव ब्रह्मणि निषिद्धयत इति चेत् ? तर्हि जीवब्रह्मणोस्सावद्यत्वनिरवद्यत्ववैषम्यं न सिद्धयेत्, जीवेपि धर्मिसमसत्ताकस्य अवद्यस्यासिद्धेः । उपहितस्यैवाविद्याश्रयत्वाद्धर्मिसमसत्त्वमस्तीति चेत् ? तत्र किमुपाधेरविद्याश्रयत्वम्, उतोपाध्युपलक्षितस्य, उत तद्विशिष्टस्य ? नाद्यः,— उपाधेरेव जीवत्वापातेन जीवब्रह्मणोरभेदानुपपत्तेः । न द्वितीयः, दोषस्य धर्मिसमसत्ताभावेन जीवस्य सावद्यत्वाभावप्रसङ्गात् । तृतीयेप्यवद्यस्य किमुभयत्र प्रत्येक परिसमाप्य वृत्तित्व विवक्षितम्, उत व्यासज्यवृत्तित्व ? नाद्यः— पूर्वोक्तदोषद्वयप्रसङ्गात् । न द्वितीयः,- असिद्धेः, दुःखादेरन्तःकरणवृत्त्यात्मकस्यान्तःकरणे परिसमाप्य वृत्तेः, तदभेदाज्जीवे प्रतीतावपि व्यासज्यवृत्तित्वासिद्धेः । **उभयमिथ्यात्व** इति । **उभयविधो दोषः**— अपसिद्धान्तादिः निवृत्तिनैरपेक्ष्यादिश्च । **व्याघाते** ति । शुद्ध्यशुद्ध्योर्भावाभावात्मकयोस्समानसत्ताकयोः परस्परव्याघात इत्यर्थः । उभयोर्भिन्नसत्ताकत्वे च यद्यशुद्धेर्व्यावहारिकत्व शुद्धेश्च प्रातिभासिकत्वमिष्यते तदा ब्रह्मणश्शुद्धिप्रतिपादकवेदाप्रामाण्य स्यात्, यद्यशुद्धेः प्रातिभासिकत्व शुद्धेर्व्यावहारिकत्वमिष्यते तदा संसारस्य प्रातिभासिकत्वप्रसङ्ग इत्यादिदूषणान्यादिपदेन विवक्षितानि **नापी** ति । उपहित ब्रह्मैवाविद्याश्रय इत्यत्र किं स उपाधिरविद्यान्तरम्, उतान्यः ? उभयथापि सत्यत्वाङ्गीकारे अपसिद्धान्तः, मिथ्यात्वे तु निराश्रयतेति सत्यत्वापत्त्या साश्रयत्वे वाच्ये आश्रयान्तरासम्भवाच्च ब्रह्माश्रयत्वे वाच्ये केवलब्रह्मणः शुद्धिविरोधेन तदाश्रयत्वासम्भवेनोपहितस्यैव तदुपाध्याश्रयत्वे वाच्ये तदुपाध्याश्रयत्वमपि पूर्ववदुपाध्यन्तरोपहितस्यैवेत्यनवस्था, एतत्परिहारार्थं स्वस्यैवोपाधित्वे उच्यमाने स्वस्मिन्नपि स्ववृत्त्या विरोध इत्यर्थः। किंच यद्यु

ब्रह्माज्ञानवादपरित्यागादिप्रसंगात् । तस्याप्याधाननिरूपणे ऽनवस्थादिप्रसक्तेश्च । स्यादेतत्, ब्रह्मवत्स्वयमेवाविद्या स्वाश्रयेति; तन्न, आश्रयाश्रयित्वयोरेकप्रतिसम्बन्धिकयोरुपाधिभेदमन्तरेण विरुद्धत्वात् । ब्रह्मणस्तु स्वाश्रयत्वं नास्त्येव । आश्रयान्तरनिष्ठाभिप्रायेण स्वाश्रयत्वोक्तिः । अस्तूपाधिभेदेनेति चेन्न;— तस्याप्याधाराकारोपाधेरनाधारत्वानुपपत्तेः तदाधारोपाध्यन्तरादिभेद

धिर्विशेषणं, तदा तस्य सासारिकत्वादिप्रसङ्गः, यदि च उपलक्षणं तदा ब्रह्मण एव सावद्यत्वादिप्रसङ्गश्चादिपदग्राह्यम् । ब्रह्माज्ञानवादपरित्यागादी त्यादिशब्देन जीवाज्ञानपरित्यागवादपरिग्रहः । अन्यगताशुद्धिनिवृत्त्यर्थं जीवस्य श्रवणाद्यनुपपत्तिश्चादिशब्देन विवक्षिता । स्यादेत दिति । नचैव निराश्रयत्व इव स्वाश्रयत्वेपि ब्रह्मवत् सत्यत्वप्रसङ्गः; ब्रह्मभिन्नत्वेन मिथ्यात्वात् । नच निराश्रयत्वेपि तथा वक्तु शक्यम्, निराश्रयत्वे अधिष्ठानस्याप्यभावेन सत्यत्वस्वावश्यकत्वात्; स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वलक्षणमिथ्यात्वस्यासम्भवात्, निरधिष्ठानभ्रमस्यानङ्गीकाराच्च । आश्रयाश्रयित्वयो रिति । यद्यप्याश्रयाश्रयित्वयोरेकप्रतिसम्बन्धिकयोरुपाधिभेदेनाप्येकत्र वृत्तिर्न दृष्टा, तथापि विरुद्धधर्माणा केषाञ्चित्कपिसंयोगतदभावादीनां मूलत्वाग्रत्वाद्युपाधिभेदादेकत्र वृत्तिदर्शनमात्रेण इदमुक्तम्। कथ तर्हि "स्वे महिम्नि प्रतिष्ठित" इति श्रुतिरित्यत्राह— आश्रयान्तरे ति । तदाधारे ति । आधाराधेयत्वप्रयोजकयोराकारयोरविरोधे द्रव्यत्ववृक्षत्वयोरिव कपिसंयोगतदभावयोः प्रयोजकत्वासम्भवाद्विरोधे वाच्ये तयोरप्येकाश्रयत्वाय ऽधाध्यन्तरं कल्पनीयमित्यनवस्थेत्यर्थः । कथ तर्हि मूलत्वाग्रत्वयोरवच्छेदकत्वम्? अविरोधादिति चेन्न,— तयोरप्यवयवभेदेनैव वृत्त्या विरुद्धत्वात् । ननु तर्हि कपिसंयोगतदभावयोरप्यवयवभेदेनैव वृत्तेः कथमय दृष्टान्त इति चेन्न,- वृक्षरूप समुदाय्यपेक्षया दृष्टान्तोपादानात् । ननु विषयविषयिभावसम्बन्धेन विषये विद्यमाना प्रमैव प्रमाविषयत्वमिति कैश्चिदभिधानात् प्रमेत्यादिसामान्याकारक ज्ञानं विषयत्वेन स्वाधारः— विषयित्वेन स्वाधेयम्, तद्वदत्रापि स्यादिति चेन्न;- अत्र तादृशाकारद्वयादर्शनात् । नन्वत्रापि मिथ्यात्वेनाविद्याधेयत्वम्, घटादे-

कल्पनेऽनवस्थानात् । आधेयाकारतादात्म्येन तस्यापि स्वाधेयत्वे तूपाधिभेदवाचोयुक्तिविलोपप्रसङ्गात् । ननु मिथ्याभूतायाः किमा श्रयविकल्पेन, अध्यासस्याधिष्ठानमात्रमपेक्षितमिति चेन्न;— भवत्पक्षे सर्वत्राश्रयाणामध्यासाधिष्ठानमात्रत्वात् । घटादिसंसर्गोपि भूतलादावध्यस्त एव, अन्यथा तत्रैव तत्सत्यत्वप्रसङ्गात् । किंचापरमार्थभूतेयमविद्याप्रतीतिर्नाहङ्कारतद्वृत्तितदवच्छिन्नदृशिष्व-न्यतमा, तेषां तदपत्यत्वात् । अन्यथापि काल्पनिकत्वेन मूल

स्तथात्वात्, अविद्यात्वेन च तस्या आधारत्वमिति चेन्न,- नहि घटादेर्मिथ्या-त्वेनाविद्याधेयत्वम्, अपितु तत्परिणामतया, नचानादिरविद्या तत्परिणामः । आधारत्वाधेयत्वप्रयोजकाकारयोर्विरुद्धयोर्व्यवस्थापके ये उपाध्यन्तरे तयोरपि विरुद्ध योर्व्यवस्थापके उपाध्यन्तरे आदिशब्दार्थः । एतच्चानवस्थोपपादनार्थमादिशब्देन गृहीतम् । ननु आधारत्वाधेयत्वप्रयोजकाकारयोः परस्परतादात्म्यादविरोधादेकत्र वृत्त्युपपत्तेस्तन्निर्वाह्ययोराधारत्वाधेयत्वयोरप्येकत्र सम्भवान्नानवस्थेत्याशङ्कामनूद्य परिहरति- **आधेयाकारे** ति । **आधेयाकारः** आधेयत्वप्रयोजकाकारः । **तस्य**—आ-धारत्वप्रयोजकाकारस्य । **स्वाधेयत्वम्**— अविद्याधेयत्वम् । आश्रयाधिष्ठानयो र्भेदाभिप्रायेण शङ्कते- **ननु मिथ्याभूताया** इति । **अधिष्ठाने** ति । ब्रह्मण एवा विद्याधिष्ठानत्वसम्भवात् अशुद्ध्यधिष्ठानस्य च शुद्धिविरोधाभावादिति भावः । **भवत्पक्ष** इति । आश्रयित्वाधिष्ठानत्वयोरभेदादाश्रयत्वाभावे अधिष्ठानत्वमपि न स्यात्, अधिष्ठानत्वे च जडत्वाद्यशुद्ध्याश्रयघटादिष्विव शुद्धिविरोधो दुस्त्यज इति भावः। **अन्यथे** ति । यत्र यदध्यस्तं न भवति तत्र तत्स्वात्यन्ताभावसमानाधिकरणं न भवतीति व्याप्तया तस्य तत्र मिथ्यात्वासम्भवादिति भावः । **एकदेशिमतेने-दमुक्तम्** । **किंचे** ति । **तदपत्यत्वं**— तत्कार्यत्वम् । तत्कार्यस्य च तदध्यासकत्व मनुपपन्नम्, कार्यपूर्वकाले तदध्यासाभावेनाविद्यास्वरूपस्यैवासिद्धिप्रसङ्गात्, आध्यासिकस्याध्यासकाले नियतसत्ताकत्वादित्यर्थः । **अन्यथे** ति । अविद्या-कार्यत्वाभावेपि काल्पनिकत्वे तन्मूलदोषान्तरं वाच्यम्, तदध्यासस्यापि काल्प

दोषान्तरापेक्षायामनवस्थानात्। नच ततोऽन्या काचिद्दृशिः? तस्या ब्रह्मस्वरूपत्वे ब्रह्मणोपि मिथ्यात्वप्रसङ्गात्। तदतिरिक्त सविदन्तरासिद्धेश्च। अपिच प्रकाशमानेयमविद्या किं ब्रह्मात्मना प्रकाशते, उत तदन्यत्वेन, यद्वान्यत्वानन्यत्वसाधारणात्मना? नाद्यः, सहि ब्रह्मस्वभावनिह्नवेन वा, स्वस्वभावनिह्नवेन वा, उभयोस्समुच्चयेन वा, उभयनिह्नवेन वा? आद्ये ब्रह्मस्वभावनिह्नवे प्रकाशतत्वविलयेन तदधीनसत्ताकमविद्यादिकमपि विलीनमेव स्यादिति वृथा शास्त्रादिपरिश्रमः, प्राप्यनिवर्त्यायाः प्रसंगस्यापि दूरापास्तत्वात्। अविद्यास्वभावनिह्नवे तु ब्रह्ममात्रप्रकाशे अपवर्गबन्ध

निकत्वे तत्रापि दोषान्तरमित्यनवस्थेत्यर्थः। **नच ततोन्ये** ति। अविद्याप्रतीत्युद्दृशस्यानुषङ्गः। **कुत** इत्यत्राह— **तस्या** इति। **संविदन्तरम्**— सविद्विशेषः। **यद्वान्यत्वे** ति। अन्यत्वानन्यत्वान्यतरमात्रसहचरितत्वेन गृहीतरूपान्यरूपेणेत्यर्थः। **सही** ति। प्रकाशः। **स्वभावनिह्नवः**— स्वासाधारणधर्माप्रतीतिः। तत्प्रतीतौ हि भेदप्रतीतेः न ब्रह्मात्मना भानमुपपद्यत इति प्रथमद्वितीयतुरीयविकल्पानां भावः। तत्तदाकारयोरविरोधप्रतीत्या समुच्चयसम्भवाद्ब्रह्मात्मना भानमुपपद्यत इति तृतीयविकल्पस्य भावः। **आद्य** इति। ब्रह्मस्वभावस्याप्रकाशे तत्प्रकाशात्मक ब्रह्मस्वरूपमेव न स्यादिति तदधीनसत्ताक किमपि न स्यादित्यर्थः। **प्राप्य निवर्त्याया** इति। प्राप्येति ल्यबन्तम्। णिच्प्रकृतिभूतधात्वर्थनिवृत्त्यपेक्षया प्रापकर्तृकत्व बोध्यम्। यद्वा प्राप्येति णिजन्तादेव ल्यप्, "विभाषाप" इति णेरयादेशाभावपक्षे रूप णिजन्तम्, निवर्तयतिधात्वर्थापेक्षयैवात्र पक्षे समान कर्तृकत्वम्। आत्मा ह्यध्यस्यन्नविद्या प्रापयति ज्ञानेन निवर्तयति च। यद्वा प्राप्येति अर्हार्थे ण्यत्। प्राप्या चासौ निवर्त्या चेति पूर्वकालैकसर्वेत्यादिना समानाधिकरणसमासः। पूर्व प्राप्तयर्हा, अनन्तर निवृत्त्यर्हेत्यर्थ.। पूर्व प्राप्तौ सत्येवानन्तरं निवृत्त्यर्हेत्युक्त भवति। **अविद्यास्वभावनिह्नवे**अ- विद्यागतासाधारणधर्माप्रतीतौ। **ब्रह्ममात्रप्रकाश** इति। ब्रह्मण एव स्वासाधारणाकारविशिष्टतया प्रतितौ। अविद्याया स्वासाधारणाकारविशिष्टतया प्रतीत्यभावे तन्निवर्तकब्रह्मज्ञानेच्छाया अभावात्,

वैषम्यविरहप्रसंगेन पूर्वोक्तदोषानतिपातः । समुच्चयस्तु न सम्भवत्येव, विद्याविद्ययोर्वैरस्य शाश्वतिकत्वात् । अन्यथा विद्यानिवर्त्यत्वमविद्यायाः क्वचिदपि न स्यादिति स्थितमन्यत्र । उभयनिह्नवे तु उभयविधदोषस्यानायाससिद्धिः स्यात् । स्यादेतत्, यथा दर्पणमुखयोस्स्वभावमनपह्नुत्य दर्पणे मुख्याध्यासः, यथावा अतिरस्कृतोभयस्वभावो दीपकज्जलसंभेदः, यथा वा दीपालोकमण्डलस्य तद्वाह्य

ब्रह्ममात्रप्रकाशस्य च सिद्धत्वाज्जिज्ञासाविरहादपवर्गार्थप्रवृत्तिविघातः । वैषम्येति । अविद्यायाः स्वरूपेणैव प्रकाशे अनर्थत्वादेरप्रकाशात् प्रकाशाधीनसिद्धिकस्य च तस्य प्रकाशाभावे असिद्धेस्तत्त्वज्ञानात्प्रागनर्थसम्बन्धस्तदुत्तरमनर्थनिवृत्तिरिति वैषम्यस्य विरहप्रसङ्गात्तदर्थशास्त्रपरिश्रमवैयर्थ्यमित्यर्थः । समुच्चयस्त्विति । तुशब्देन तत्तदसाधारणाकारेण प्रतीतौ भेदप्रतीतेरावश्यकत्वादभेदाध्यासो न सम्भवतीति सूच्यते । नच तत्तदसाधारणाकारयोरविरोधभ्रमात् तादात्म्याध्यास सम्भवः, जडत्वाजडत्वयोरविरोधभ्रमासम्भवात् । स हि व्यावहारिकविषयो वा प्रातिभासिकविषयो वा स्यात् ; तत्र व्यावहारिकविषयत्व तावन्नोपपद्यते, जडत्वाजडत्वयोर्विरोधस्यैव व्यावहारिकतया तुल्यसत्ताकाविरोधासिद्धेः । नापि प्रातिभासिकत्वम्, अनाद्यध्यासस्य प्रातिभासिकत्वासिद्धेः । भेदे प्रतीयमाने अभेदेनाध्यासासम्भवे हेतुमाह– विद्याविद्ययो रिति । भेदे प्रतीयमाने ऽभेदाज्ञानासम्भवादधीनाभेदाध्यासो नोपपद्यत इत्यर्थः । क्वचिदपी ति । शुक्तिरजतादिरशुक्तिज्ञानात् शुक्त्यज्ञाननिवृत्तिर्न स्यादित्यर्थः । ननु ब्रह्माविद्ययारसाधारण रूपद्वय तयोर्विरोधश्च प्रतीयत एव, नचैव ब्रह्मण्यविद्याध्यासानुपपत्तिः, अधिष्ठानाध्यस्यमानयोरसाधारणाकारे प्रतीयमान एवाध्यासदर्शनात्, तथान्यत्रापि शाश्वतिकविरोधे आलोके विद्यमानेपि सन्तमसदर्शनाच्च, इति शङ्कते– स्यादेतदिति । मुख्याध्यास इत्यनन्तर क्रियत इति शेषः । यथावे ति । अतिरस्कृते ति च्छेद । यथावे ति । उभयञ्च निवर्तकसन्निधानेपि निवर्त्यसद्भावमात्रे दृष्टान्तो

सन्तमसमण्डलस्य च सामीप्यविरोध', एवमयमविद्याब्रह्मणोरनपह्नुतोभयस्वभावयोरेवानादिरासत्तिविशेष इति किमस्मान् वर्णनावशेन वशीचिकीर्षसि , मैवम् , सर्वत्र तादात्म्याध्यासे भेदाग्रहं ससर्गाध्यासे ऽ त्वसंसर्गाग्रहमन्तरेण क्वचिदपि भ्रमासिद्धेः। दर्पण मुखाध्यासेऽप्यन्तराळाग्रहणादेव नैरन्तर्यभ्रम' । कथं तर्हि दर्पणस्य दूरस्थताग्रहणमिति चेत् ? श्रूयतामवधानेन, दर्पणाभिमुखप्रवृत्तेन नायनतेज प्रवाहेण सान्तरालदर्पणग्रहः, दर्पणप्रतिहतेन तु प्रतिस्रोतसा तेनागृह्यमाणान्तराळमुखस्वरूपमात्रग्रहः, तत एव दर्पणे

पन्यास' । अनपह्नुतोभयस्वभावयो रिति । प्रतीयमानतत्तदसाधारणाकार विशिष्टयोरित्यर्थः । आसत्तिविशेषः— आध्यासिकं तादात्म्यम् । अध्यासरूपविशेषणसम्भवोपपादने तात्पर्य परिहरति किमस्मा नि ति । किमित्याक्षेपे । इच्छामात्रमेव,नतु तत्फलसिद्धिरित्यर्थः । वर्णनावशेन ति । दृष्टान्तोपन्यासेनेत्यर्थ' । यथा कविभिः काव्यादिनोपमाद्यलङ्कारैर्ललितमनसो वशीक्रियन्ते नैव तत्त्वनिर्णयप्रधाना मीमांसका इति भावः । सर्वत्रे ति । भेदग्रहो हि तादात्म्याध्यासं प्रत्येव विरोधीति भेदाग्रहं विना तादात्म्याभ्यासः पर न स्यात् , न तु ससर्गाध्यासः, स तु तत्रासंसर्गग्रहस्यैव विरोधितया तदभाव विना पर न स्यात्, नतु भेदाग्रह विना; दर्पणे मुखाध्यासश्च संसर्गाध्यास एवेति ग्रहणभेदो विरोधात्सम्भवत्येवेति नाय दृष्टान्त इत्यर्थः । ननु तर्हि विरोधिभूतासंसर्गग्रहे विद्यमान एव दर्पणे मुखससर्गाध्यास एव ब्रह्माविद्ययोर्भेदग्रहेपि अभेदाध्यासे दृष्टान्तोस्त्वित्यत्राह— दर्पण इति । अन्तरालम्– असंसर्गः । नैरन्तर्यम्– ससर्गः । यदि मुखदर्पणयोरसंसर्गग्रहो न स्यात् तदा कथं दर्पणस्य मुखापेक्षया दूरस्थत्वग्रह इति शङ्कते- कथं तर्ही ति । सान्तरालदर्पणग्रह इति । मुखासंसर्गविशिष्टदर्पणग्रह इत्यर्थः । अगृह्यमाणान्तराले ति । अगृह्यमाण दर्पणासंसर्गमुखस्वरूपग्रहणमित्यर्थः । तत एवे ति । प्रतिस्रोतसा तेजःप्रवाहेण दर्पणासंसर्गस्य मुखे अग्रहणात् मुखग्रहणाच्च तेन दर्पणाभिमुखप्रवृत्त

मुखमिति भ्रमः, तद्व्यवहारमात्रं वा जायते । ज्ञानद्वित्वं न दृश्यत इति चेत् ? किं धारावाहिकधीसन्ततौ तद्भेदः ? अत्र तु तत्वधीभ्रमयोरितरेतरव्यवहिता धारेति विशेषः । यौगपद्यप्रतीतिस्तु शैघ्र्यातिशयेन कालकलाभेदाग्रहणात् । अतः न क्वचिदपि प्रत्यक्षविरुद्धाकारस्य क्लृप्तिः । दीपकज्जलसम्भेदे तु न विरोधगन्धोपि, तत्राध्यासप्रसङ्गाभावात्, वध्यघातकभावादि

नायनरश्मिजन्यज्ञानोपनीतदर्पणस्य मुखे ससर्गभ्रमो दर्पणे मुखमित्याकारको जायत इत्यर्थः । यद्यपि दर्पणाभिमुखप्रवृत्तरश्मिभिरससर्गो मुखदर्पणयोर्गृहीतः, तथापि ससर्गग्रहहेतुभूतसन्निकर्षेणासर्गस्याग्रहणादसर्गाग्रहस्य हेतुत्वमव्याहत मेवेति भावः । ननु भेदाग्रहस्य कथमभेदज्ञाने कारणत्वम्, अङ्गुल्यवष्टम्भा दिना भेदे गृह्यमाण एव चन्द्रादौ अभेदग्रहात्, अस्ति हि चन्द्रद्वित्वे गृह्यमाण एव दक्षिणचन्द्रो दक्षिणचन्द्रादभिन्न इति ग्रह इति चेन्न,- तद्रूपेणोपस्थिते तद्रूपावच्छिन्नभेदग्राहाभावस्यैव तद्रूपोपस्थिते तद्रूपावच्छिन्नाभेदज्ञानहेतुत्वात्, अत्र च सव्यचन्द्रत्वावच्छेदेन दक्षिणचन्द्रभेदज्ञानेपि दक्षिणचन्द्रो दक्षिणचन्द्राद्भिन्न इति तदवच्छेदेन भेदग्रहाभावात्तदवच्छेदेनाभेदग्रहसम्भवात्। अख्यातिपक्षानुसारेणाह– व्यवहारमात्र मिति । किमिति–दृश्यत इत्यनुषङ्गः । अन्नत्वि ति । प्रथमप्रवृत्तनायनरश्मिभिर्मुखासंसृष्टत्वेन दर्पणग्रहण तत्वधीः,प्रतिहत नायनरश्मिभिर्दर्पणससृष्टतया मुखज्ञान भ्रमः, शैघ्र्यादद्वित्वाप्रतीतावववयवविशेषो न विरोधीति भावः । क्लृप्ति रिति । भ्रम इत्यर्थः।विरोधगन्धः-अनुपपत्तिगन्धः। 'यथा वा अतिरस्कृतोभयस्वभावो दीपकज्जलसम्भेद'इत्यत्र कियथा दीपकज्जलयोर्भेदे भासमानेपि अभेदोऽभ्यस्यते तथात्रापीति विवक्षितम्,उत यथा विरुद्धयोरपि दीपक ज्जलयोस्ससर्गस्तथेहापि विरुद्धयोरपि विद्याविद्ययोस्ससर्ग इतीत्येवं विकल्पमभि प्रेत्याद्य दूषयति- तत्राध्यासे ति । द्वितीय दूषयति- वध्यघातके ति। वध्यघा– तकभावः- निवर्त्यनिवर्तकभावः। आदिशब्देन एकस्मिन् काले सहानवस्थान नियमलक्षणविरोधो गृह्यते। ननु मूर्तयोस्सामान्यतः समानदेशत्वविरोधेपि यथा

विरोधासिद्धेः । मूर्तयोस्समानदेशत्वविरोधस्त्वशभेदेन सूक्ष्मवै देश्यात्परिहृतः । आलोकसन्तमसमण्डलयोरपि सादेश्य एव विरोध., नतु सामीप्ये । नच अत्रापि ब्रह्माविद्ययो परस्पर समीपदेशत्वादिस्वीकारो युक्त, परिच्छिन्नत्वादिप्रसङ्गात् । अतो नाविद्या ब्रह्मासक्तिर्वक्तुं शक्यते । एवमन्यान्यप्यनन्तानि विक रूपदूषणानि अविद्यास्वरूपमनुवध्नन्ति ।

ननु किमनेनानिष्टापादनप्रपञ्चेन, प्रासादनिमरणादिवदवस्तुभूताया मविद्यायां नैते वस्तुदोषा क्षतिमावहन्ति, यदाहु —"दुर्घटत्व मविद्याया भूषण न तु दूषण" मिति, अतोऽविद्याप्यनुपपन्नेति स्थितौ ब्रह्माद्वैतमकण्टकमिति चेत् ? हन्त निष्प्रयोजन. प्रयास तव माध्यमिकादिमतनिरासे । तेपि यदि सर्वशून्यत्वमपि दुर्घटम्, ततोपि सर्वशून्यत्वमेव प्रतिष्ठितमितीष्टप्रसङ्गता यदि ब्रूयु, तदानी किं वक्ष्यसि । यदि सर्वशून्यत्वं दुर्घटम्, तदा परपक्ष

दीपकजलयोस्समानदेशत्वम्, एवमिहापि निवर्त्यनिवर्तकयोस्सामान्यस्ते विरोधे सत्यपि विद्याविद्ययोरविरोधोस्त्वित्यत्राह– मूर्तयो रिति। विरोध.- अनुपपत्तिः। प्रदीपकजलदृष्टान्तोपादानेन यदि विरुद्धयोरपि कश्चित्सम्बन्धो न स्यात् तदा मूर्तयोस्समानदेशत्वविरोधात् प्रदीपकजलयोर्मूर्तयोस्समानदेशत्वस्य यानुपपत्ति रापादयितुमिष्यते सा इष्टापत्त्या परिहृतेत्यर्थ । आलोके ति। यद्यप्यालोक सन्तमसयोर्निवर्त्यनिवर्तकभावः, तथापि समानदेशत्वेनैव, तथा च भिन्नदेशस्थ स्यानिवर्तकत्वात्सामीप्यलक्षणस्सम्बन्ध उपपद्यत इत्यर्थ । ननु ब्रह्माविद्ययोरपि सादेश्य एव विरोधः, इदानी च परस्पर समीपदेशत्वमेवेति नाविद्यानिवृत्ति रित्याशक्याह– नचे ति। परिच्छिन्नत्वादीति। आदिशब्देन ब्रह्माभिन्नदेशस्था विद्यादेर्ब्रह्मण्यवस्तुत्वानुपपत्तिः परिच्छिन्नत्वप्रयुक्तमिथ्यात्वादिकञ्च गृह्यते । अत इति । आसक्ति.— तादात्म्याध्यास , एवमविद्या ब्रह्मात्मना प्रकाशत इति पक्षो दूषितः । द्वितीयतृतीयपक्षौ दूषयन् दूषणान्तराण्यपि सङ्गृह्णाति– एवमन्यानीति ।

विजयप्रसङ्गः, ततश्च दुर्घटपक्ष परित्यज्य परपक्षः स्वीक्रियतामिति ब्रूयामितिचेत्? तर्ह्यस्माभिरप्येवमभिधाने भव निरुत्तरः। तदेतत् सर्वमुपक्षिप्तं भाष्ये- " निर्विषया निराश्रया स्वप्रकाशैयमनुभूतिः स्वाश्रयदोषवशादनन्ताश्रयमनन्तविषयमात्मानमनुभवतीत्यत्र किमयं स्वाश्रयदोषः परमार्थभूत उतापरमार्थभूत इति विवेचनीय" मित्यादिना। आरम्भणाधिकरणे च व्यस्तृणीत।

इति शतदूषण्यामविद्यास्वरूपानुपपत्तिर्नाम
एकचत्वारिंशो वाद. ॥४१॥

——(×)——

अय भावः,— मिथ्यापदार्थस्य ह्यधिष्ठानसत्त्वमेव सत्त्वमिति तव सिद्धान्तः, तच्च तादात्म्याध्यास एव स्यात्, ततश्चाविद्यायास्तादात्म्येन ब्रह्मण्यध्यासाभावे प्रातिभासिकत्व व्यावहारिकत्व वा न स्यादेवेति तुच्छत्व परमार्थत्वं वा स्यात्, तथाच तत्त्वज्ञानान्निवृत्तिरपि न स्यात्। किञ्च अधिकरणभिन्नसत्ताकप्रतियोगिकाभावोधिकरणाद्विद्यत इति त्वयैवाभिधानात् ब्रह्मणि प्रपञ्चनिवृत्तिर्ब्रह्माभिन्नैव स्यात्, तत्र च पारमार्थिकत्वादिविकल्पो दुर्वारः। किञ्च दृग्दृश्ययोस्सम्बन्धानुपपत्तेः, आध्यासिक तादात्म्यमेव सम्बन्ध इत्यवोचः, ततश्च ब्रह्मतादात्म्यासिद्धौ दृग्दृश्ययोस्सम्बन्धान्तरमधिष्ठानभूतदृगन्तरं अविद्याया अप्रतीतिर्वा स्यात्, तथा तस्या अपरोक्ष्यञ्च न स्यात्, सवित्ता दात्म्यस्यापरोक्षत्वात्। किञ्चाविद्याया व्यावहारिकत्वे प्रातिभासिकरजतोत्पत्तिर्न स्यात्, प्रातिभासिकत्वे व्यावहारिकोत्पत्तिर्न स्यात्।

ननु प्रातिभासिकस्यापि व्यावहारिकार्थक्रियाकारित्वमस्त्येव, शुक्तिरजत रज्जुसर्पादेरपि भयाद्यर्थक्रियाजनकत्वात्, नच ज्ञानमेवार्थक्रियाजनक तच्च व्यावहारिकमिति वाच्यम्, ज्ञानमात्रस्य जनकत्वे घटादिज्ञानादपि भयादि प्रसङ्गात्, रजतादिविषयत्वेन जनकत्वे चागतमेवार्थस्यापि प्रयोजकतयाऽर्थक्रियाकारित्वम्, स्वप्नकल्पिततडागादिना स्नानपानादिक्रियाऽदर्शनाच्च नच

त्र क्रियाप्यस्त्येवेति वाच्यम्, तदवस्थाया सुखादिजनिकायास्तस्या घटादि क्रियाऽविशेषात्, अवस्थान्तरे मृत्वत्वबुद्धिस्तु घटादावपि तुल्या, किंच रज-तादिकमपि स्वध्वंस जनयतीति चेन्न,—सर्पादिज्ञानस्यैव भयाद्यर्थक्रियाकारणत्वात्। नच ज्ञानमात्रस्य भयाद्यर्थक्रियाकारित्वे घटादिज्ञानादपि तत्प्रसङ्गः, घटादिवि-षयत्वस्य जनकतावच्छेदकत्वात्। स्वप्नतडागस्नानादिनापि श्रान्तिनिवृत्ति रप्यस्त्येव। मतिस्तु तज्ज्ञानजन्यैव। शुक्तिरजतादेश्च यदि अतिरिक्तध्वंसोस्ति तदा स प्रातिभासिक एव। वस्तुतस्त्वधिकरणात्मैव तद्ध्वंस इति स्वोक्तिविरोध एव, अधिकरणस्य तदजन्यत्वात्।

किञ्च— किमज्ञान भाव', उताभावः? नाद्य,—ध्वंसस्याज्ञानानुपादानकत्व प्रसङ्गात्। यदिचाभावस्यापि भावोपादानकत्वमिष्येत, तदा भावस्याप्यभावो पादानकत्वाविरोधात्तत्त्वज्ञान प्रागभावोपादानकत्वमेव प्रपञ्चस्य लाघवात्प्रसज्येत। अत एव न द्वितीय। अपिच किमज्ञान सादि, उतानादि? आद्ये अनवस्था। द्वितीयेपि किमज्ञानमेकम्, उतानेकम्? नाद्य, शुक्तिज्ञानेन तन्निवृत्तौ संसारोच्छेदप्रसंगात्। नच शुक्तिज्ञानेन सम्बन्धनिवृत्तिरेव, तत्त्वज्ञाननिवृत्तिरिति वाच्यम्, एकेन ज्ञानेन सम्बन्धे निवृत्ते पुनः कालान्तरे तदज्ञानानुभवापातात्। नच पूर्वसम्बन्धनिवृत्तौ सम्बन्धान्तरमुत्पद्यत इति वाच्यम्,— पूर्वोत्तरकालयोरविशेषात्सम्बन्धनिवृत्युत्तरक्षण एव सम्बन्धान्तरोत्पत्त्या-पत्त्या सर्वदाऽज्ञानानुभवप्रसङ्गात्। ननु तज्ज्ञानमेव तदुत्पत्तिप्रतिबन्धकमिति चेत्? तर्हि ज्ञानानन्तरमेव सम्बन्ध उत्पद्येत। नचेष्टापत्ति, ज्ञानानन्तर न जानामीत्यनुभवप्रसंगात्। नच तदपीष्टमेवेति वाच्यम्, सकृज्ज्ञानेन प्रागवगत न जानामीत्यनुभव इति स्वोक्तिविरोधात्। किंच अज्ञानसम्बन्धो ह्यज्ञानावरण तच्च नास्ति न प्रकाशत इति व्यवहारयोग्यता, तस्याश्च यावद्वस्तुभाविन्या. कथ मध्ये निवृत्तिरुत्पत्तिर्वा? ब्रह्मज्ञानेनापि वा सम्बन्धस्यैव निवृत्तावज्ञानस्या निवृत्तिप्रसङ्गश्च। द्वितीयेपि कि प्रतिविषय अज्ञानभेद', उत प्रातपुरुषम्, उत प्रतिज्ञानम्? नाद्य,— एकेनैव शुक्तिज्ञानेन शुक्त्यज्ञाननिवृत्तौ पुरुषान्तरस्य कस्यापि कालान्तरे शुक्त्यज्ञानानुभवापातात्। अत एव न द्वितीय,— एकेन ज्ञानेनैकाज्ञाने निवृत्ते अज्ञानान्तरस्य सत्त्वेन तदानीमेव तेनावरणप्रसङ्गात्। नचैक

मेवाज्ञानमेकदावृणोति, यदावृणोति तन्निवर्तत इति वाच्यम् । तथा सति अज्ञानान्तराणामानर्थक्यप्रसगात् , कालान्तरे अज्ञाननुभवापाताच्च । कालान्तरे किंचिदज्ञानान्तरमावृणोति, तस्मिंश्च ज्ञानान्तरेण निवृत्ते पुनरज्ञानान्तरमिति नाज्ञानान्तरवैयर्थ्यम् , नच कालान्तरे ऽज्ञाननुभवप्रसग इति वाच्यम्, एकेन ज्ञानेन एकाज्ञाने निवृत्ते तदानीमेवाज्ञानान्तरावरणप्रसगात् । नच कालान्तर एव तेनावरणमिति वाच्यम् । तत्कालकालान्तरयोरविशेषात् । अपि च घटोत्पत्ति क्षण एव एकेनाज्ञानेनावरणवत् सर्वाज्ञानैरप्यावरणप्रसक्त्या प्राथमिकज्ञानेनैव सर्वविषयज्ञानानि निवर्तेरन्निति अज्ञानान्तरवैयर्थ्यमनिवार्यमेव । किंच - एव तत्तत्प्रागभावानामेव आवारकत्वकल्पनाया लाघवमिति मुधैव भावरूपाज्ञान कल्पनम् । अपिच किमिदमज्ञानत्व ज्ञानाजन्यत्वम्, उत ज्ञानविरोधित्वम्, अथवा ज्ञानाभावत्वम्? नाद्य, घटादावतिव्याप्तेः । अतएव न द्वितीय, घटादेरात्मधर्मत्वाभावात् । न तृतीयः, असम्भवात्, तदङ्गीकारेऽतिव्याप्ति । नच ज्ञानस्याविद्याव्यतिरेकेणाभावो नेति वाच्यम् , घटादौ तस्येवाङ्गीकारादिति ।

अत्र कश्चित् ब्रह्ममीमासागोचरप्रेक्षावत्प्रवृत्तिहेतुज्ञानविषयतावच्छेदकत्व मज्ञानत्वम् । विषयप्रयोजनादिसत्त्वस्य प्रेक्षावत्प्रवृत्तिहेतुत्वात्, 'अजात ब्रह्म विषयो ज्ञात ब्रह्म प्रयोजनमि' त्यङ्गीकाराद्ब्रह्मणश्शास्त्र प्रतिपाद्यत्वेन विषय त्वात्, तस्य प्रागेव ज्ञातत्वे तत्प्रतिपाद्यत्वानुपपत्ते, प्रतिपाद्यतावच्छेदकमज्ञान मेव पर्यवस्यति । प्रतिपाद्यत्वमेव हि विषयत्वम् । नच ब्रह्मत्वमेव तदवच्छेद कम्, प्रतिपाद्यभिन्नावृत्तित्वादिति वाच्यम्,– प्रतिपन्ने ब्रह्मणि प्रतिपाद्यताया अभावेन तदभाववदवृत्तित्वेनावच्छेदकत्वाभावात् । प्रतिपत्तिप्रागभावावच्छिन्न समयमात्रवृत्तिधर्मस्यैव तदवच्छेदकत्वादज्ञानमेव तथा, न तु ब्रह्मत्वादि । नच घटाद्यज्ञाने अव्याति, यदवच्छिन्नस्य विषयतावच्छेदकत्व तदाश्रयत्वमेव तत्त्वमित्यत्र तात्पर्यात्, तादृशज्ञावच्छेदकमज्ञानत्वमेवेति तदाश्रयत्वात् । अथवा– स्वसमानाधिकरणषड्विधतात्पर्यलिङ्गान्यतमप्रयोजकत्वकत्वे सति विषयनिष्ठात्य न्ताभाव.प्रतियोगिधर्मत्व वा । प्रतिपिपादयिषाया श्च उपक्रमोपसहारप्रयोजकत्वेपि विषयनिष्ठत्वाभावात्, ब्रह्मत्वादेश्च विषयनिष्ठत्वेपि तात्पर्यलिङ्गान्यतमप्रयोज कत्वाभावात्, उपक्रमादिषट्कस्य धर्म्याश्रयत्वेन धर्मितावच्छेदकतया तस्य

साधारण्येन सकलप्रयोजकत्वेपि अन्यतमप्रयोजकत्वाभावाद्लद्वयोपादानम् । तदेकमात्रसाधारणप्रयोजकत्वस्यैव तदर्थत्वात्, ज्ञातत्वे अपूर्वत्वायोगात् अज्ञातत्वे सत्येवापूर्वत्वात् अन्वयव्यतिरेकाभ्यामपूर्वत्वप्रयोजकमज्ञानम् । अपूर्वतायाश्च विषयनिष्ठत्वात्तत्समानाधिकरणमेवाज्ञान तत्प्रयोजकम् । नन्वन्यस्याज्ञातत्वे अन्यस्यापूर्वता, अतिप्रसङ्गात् । तथाच विषयनिष्ठमज्ञान स्वसमानाधिकरणापूर्वतायाः प्रयोजकम्, अपूर्वता च तात्पर्यलिङ्गमिति न लक्षणासम्भव', नचैव शुक्तयज्ञाने अव्याप्ति, तत्रोपक्रमादेरभावादिति वाच्यम्,- वाक्यार्थस्यापूर्वत्वाच्छुक्तयादेरपि वाक्यार्थत्वसम्भवेनापूर्वत्वस्य वक्तव्यत्वात्, तत्रापुपक्रमादिकल्पनायास्तुकरत्वात् । प्रयोजकत्वेत्यत्र फलोपधानस्याविवक्षितत्वात्प्रयोजकतावच्छेदकतावच्छेदकरूपस्वरूपयोग्यतायाश्च तत्रापि सत्त्वान्नाव्याप्ति । यद्वा- मीमांसकनैयायिकमतसिद्धविशेषादर्शनभिन्नत्वे सति विशेषादर्शनाधारसमयानाधारसंशयसामग्री अज्ञानम् । अधिकरणमेवाभाव इति मते अधिकरणज्ञानाभावस्य अतिरिक्ताभावमते विशेषदर्शनाभावस्य च संशयसामग्रीत्वेपि उभयवादिसिद्धतद्भिन्नत्वाभावात्, धर्मिज्ञानकोटिस्मरणादेश्च तद्भिन्नसंशयसामग्रीत्वेपि विशेषदर्शनकालेपि सत्त्वेन तदाधारसमयानाधारत्वाभानान्नातिव्याप्त्यादिदोष । यद्वा- निग्रहस्थानविभाजकोपाधिव्यापकभावत्वान्यव्यतिरेकिधर्माश्रयस्संशयसामग्री अज्ञानम्, प्रतिज्ञाहान्यादिनिग्रहस्थानमध्ये अज्ञानाख्यनिग्रहस्थानस्यापि परिगणितत्वात्तस्य च वादिवाक्यार्थज्ञानरूपत्वात् यत्र वादिवाक्यार्थाज्ञानत्व तत्राज्ञानत्वमिति व्याप्तया अज्ञानत्वस्य तादृशविभाजकोपाधि प्रति व्यापकत्वात्तदाश्रयत्वमज्ञानगात्रेऽस्तीति नासम्भव । प्रमेयत्ववस्तुत्वादेस्तादृशधर्मान्प्रति व्यापकत्वेपि व्यतिरेकिधर्मत्वाभावात्तदादाय धर्मिज्ञानकोटिस्मृत्यादौ नातिव्याप्ति' । अतएव भावत्वान्येत्यपि सार्थकम् । नन्वज्ञान नाम निग्रहो ज्ञानाभाव एव, नतु भावरूपाज्ञानमिति लक्षणमसम्भव एवेति वाच्यम्,- ज्ञानाभावस्य निग्रहसामान्यलक्षणत्वेन अज्ञानाख्यनिग्रहविशेषासाधारणधर्मत्वाभावात् । ननु वादिवाक्यार्थज्ञानाभाव एवाज्ञानमस्तु, निग्रहसामान्य च ज्ञानसामान्याभाव, सामान्यविशेषाभावयो र्भेद एवेति न पूर्वोक्तानुपपत्तिरिति, न, एवमपि ज्ञानाभावव्याप्यभावरूपाज्ञानस्य निराकरणाद्विनिगमनाविरहात् उभयस्यापि निग्रहस्थानत्वात् । इत्याह ।

तत्र तावदाद्यं लक्षणमनुपपन्नम् । तथाहि— किं मीमांसोपदेशः शास्त्रं विवक्ष्यते, किंवा ज्ञानेच्छा, अथवा विचारः? नाद्यः, शास्त्रं प्रवर्तकीभूतं ज्ञानं वेदान्तार्थनिश्चयोपयोगिन्यायप्रतिपादनपरमिति शास्त्रमिति ज्ञानम्, तज्ज्ञानविषयत्वं च वेदान्तानां शास्त्रस्य न्यायस्यार्थस्तीति तद्विषयतावच्छेदकेष्वतिव्याप्तिः । न द्वितीयः, तद्विषये प्रवृत्तेरेवासिद्धेः । अत एव न तृतीयः । तदुद्देश्यप्रवृत्तिविवक्षायाञ्च वेदान्तत्वादौ पूर्ववदतिव्याप्तिः । किञ्च ब्रह्मविचारो निश्चयद्वारा मोक्षसाधनमिति ज्ञानस्य प्रवृत्तिहेतुत्वाद्विचारनिर्णयफलानां तद्विषयत्वात्तथा विषयतावच्छेदकेष्वतिव्याप्तिः । यदुक्तं— 'अज्ञात ब्रह्मविषयः' इति । तत्र किमज्ञानानुकूलो विवक्ष्यते, उत ज्ञानविषयत्वाभावः? नाद्यः, तत्त्वज्ञानविषयस्य मोक्षकालीनस्य च ब्रह्मणो मीमांसाविषयत्वात् । न द्वितीयः । ज्ञानाभावऽतिव्याप्तेः । यदप्युक्तं 'प्रागेव ज्ञातत्वं तत्प्रतिपाद्यत्वानुपपत्तिरिति, तन्न, प्रतिपाद्यत्वं हि शास्त्रजन्यप्रतिपत्तिविषयत्वम्, तच्च पूर्वं ज्ञाते ऽप्यस्त्येव । अत एव भाविप्रतिपत्तियोग्यत्वमपि । पूर्वमप्रतिपन्नत्वे सति भाविप्रतिपत्तियोग्यत्वं तदिति चेन्न,— प्रवर्तकीभूतज्ञानस्य तद्विषयत्वे मानाभावात् । यच्चोक्तं— 'प्रतिपाद्यमेव हि विषयत्वं' मिति । तन्न,- शास्त्रप्रतिपाद्यत्वं हि शास्त्रजन्यप्रमितिविषयत्वम् । अत्र चाज्ञानावच्छेदतया विवक्षितं विषयत्वं प्रवर्तकीभूतज्ञानविषयत्वमेव, कथमनयोर्भेदः? ततश्च कथं प्रतिपाद्यतावच्छेदकत्वेपि प्रकृतविषयतावच्छेदकता । यच्चोक्तं 'नच ब्रह्मत्वमेव तदवच्छेदकं' मित्यादि, तन्न, तथा सत्यज्ञानस्याप्यवच्छेदकत्वाभावापत्तेः । तदपि हि वाक्यजन्यप्रतिपत्युत्तरकालीनजीवन्मुक्तिदशायामपि सत्त्वेन न प्रतिपत्तिप्रागभावावच्छिन्नसमयमात्रवृत्ति । किंच घटाद्यज्ञाने अव्याप्तिः, नच यदवच्छिन्नं विषयतावच्छेदकं तदाश्रयत्वस्य विवक्षितत्वात्तादृशज्ञानत्वाश्रयत्वात् नाव्याप्तिरिति वाच्यम्, यदवच्छिन्नमित्यत्रावच्छेदकत्वं न सम्बन्धमात्रम्, तथा सति तादृशप्रमेयत्वाश्रयतया घटादावतिव्याप्तेः, किन्तु कारणतावच्छेदकत्वादितुल्यं विषयतावच्छेदकतावच्छेदकत्वं विवक्षणीयम्, तथाच घटाद्यज्ञानेऽतिप्रसक्तत्वाज्ज्ञानत्वं तथा, किन्तु ब्रह्माज्ञानत्वमेवेत्यव्याप्तिरेव। अज्ञानत्वज्ञाने सत्युक्तविषयतावच्छेदकतावच्छेदकत्वज्ञानम्, तज्ज्ञाने च तद्घटितलक्षणज्ञानादज्ञानत्वग्रह इत्यन्योन्याश्रयः । द्वितीयलक्षणमप्ययुक्तम्, अज्ञानस्यापूर्वत्वप्रयोजकत्वाभावात् । ज्ञानविषयत्वाभावो ह्य

पूर्वत्वम्, तत्रच ज्ञानसामग्रीविरहस्यैव प्रयोजकत्वात्। नचाज्ञानविषयत्व मेवापूर्वत्वम्, तत्रचाज्ञान प्रयोजकमिति वाच्यम्, ज्योतिष्टोमादेर्जडस्याज्ञान विषयस्यापूर्वत्वाभावप्रसङ्गात्। नच तत्रापि ज्योतिष्टोमावच्छिन्नचैतन्यज्ञान मेवापूर्वत्वप्रयोजकमिति वाच्यम्, अज्ञानविषयेष्वहङ्कारादौ "अथातोऽङ्कारा-देश" इति शास्त्रप्रतिपाद्ये अपूर्वत्वस्य सत्त्वाद्विद्वद्वाक्यादेरपूर्वार्थकतया ऽननुवादत्वप्रसङ्गात्। आग्नेयादिवाक्यैस्तत्तदर्थप्रतीतावपि ततो ऽज्ञानानिवृत्तेः। अज्ञानविषयत्वरूपापूर्वत्वस्याज्ञानत्वज्ञानाधीनज्ञानत्वात्। अपूर्वत्वप्रयोजकत्वरूपा ज्ञानत्वस्य चापूर्वत्वज्ञानाधीनज्ञानत्वादन्योन्याश्रयः। किंच सर्वस्याप्यज्ञानाधीन त्वेनान्यतममात्रप्रयोजकत्वाभावादसम्भव॰। अज्ञानत्वेनान्यतममात्रप्रयोजकत्व विवक्षितम्, तथाचोपादानत्वेन सर्वप्रयोजकत्वेपि उक्तरूपेणापूर्वत्वं प्रत्येव प्रयोजकत्वमिति चेन्न,— अज्ञानत्वस्यैव निरूप्यमाणत्वेनात्माश्रयात्। किंच ब्रह्मत्वबदज्ञानमेव धर्मितावच्छेदकमस्त्वित्यसम्भव.। अज्ञानस्य स्वनिवृत्तिरूप फलप्रयोजकत्वा-भासम्भव.। अद्वैतोपपत्तिप्रयोजकभेदकल्पितत्वोपयोगित्वाच्चा ज्ञानस्यासम्भवः। घटाद्यज्ञानस्य विषयीभूतघटादिजडावृत्तित्वाद्ब्रह्माज्ञानस्य विषयीभूतब्रह्मणि कल्पितत्वाच्च विषयनिष्ठात्यन्ताभावप्रतियोगित्वादसम्भव.। नच प्रतियोगिव्यधिकरणत्वमभावविशेषणम्, तादृशाभावाप्रसिद्धे, सर्वस्यापि ब्रह्मणि कल्पितत्वात्। यादृशार्थविशेषे कदापि वाक्य नासीत्तदर्थाज्ञाने च पूर्वप्रतीकाभावादव्याप्तिः, उत्तरप्रतीकाभावाच्च। किंच प्रसक्तप्रकाशस्या कल्पितस्यैवाप्रकाशात्मककल्पिताविद्या प्रति आश्रयित्व विषयित्व वेति चित्त्व सत्यत्वयोरज्ञानाश्रयत्वविषयत्वप्रयोजकत्वात्। अज्ञानस्य चापूर्वताप्रयोजकत्वा च्चित्त्वसत्यत्वयोरपूर्वताप्रयोजकत्वमिति तत्राव्याप्तिः। किंच "ज्ञातं ब्रह्म प्रयोजन" मित्युक्तत्वात्। फलत्वप्रयोजकीभूतज्ञातब्रह्मत्वेतिव्याप्ति.। आनन्दत्वे नाविद्यानिवृत्तित्वेन च ब्रह्मस्वरूपस्य फलमिति फलमात्रप्रयोजकत्वादानन्दत्वा दावतिव्याप्तिः। जीवात्मविषयवाक्योपक्रमोपसंहारप्रयोजकप्रतिपिपादयिषाऽऽप्ति व्याप्ति.। तद्विषये जीवे प्रतिपिपादयिषायास्सत्त्वात्। किंच उपक्रमोपसंहारा भ्यासार्थवादान्तर्गतपदानामुपक्रमोपसंहारप्रयोजकत्वादब्रह्मण एव प्रपञ्चाभावत्वपक्षे ब्रह्मरूपात्यन्ताभावप्रतियोगित्वेपि ब्रह्मनिष्ठात्यन्ताभावप्रतियोगित्वाभावादतिव्याप्तिः। किंच अज्ञानावरणेऽतिव्याप्तिः। किंचात्र किं प्रयोजकत्व विवक्षितम्? न तावं

जनकत्वम्, ब्रह्मत्वस्योपकमाद्यजनकत्वात् ततएव न घटकत्वमपि । नापि तद्व्यतिरेकव्याप्यव्यतिरेकप्रतियोगित्वम्, असम्भवप्रसङ्गात् । देवदत्तज्ञानव्यतिरेकेपि यज्ञदत्त प्रत्यपूर्वत्वस्य सत्त्वात् । किंच विषयगतत्वमिति सिद्धौ व्यर्थो व्यतिरेकोपन्यासः । प्रतिपिपादयिषायाश्च अस्मादादावपि प्रयोजकत्वात्तदुत्तरावृत्ति व्यर्थः । किंच विषयत्व न यत्किंचित्प्रति, असम्भवादतिव्याप्तेर्वा । नाप्यज्ञान विषयत्वम्, आत्माश्रयात्। स्वविषयत्वनिवक्षाया निर्विषयब्रह्मत्ववारणाय पक्षप्रतीक वैयर्थ्यम्। तात्पर्यविषयगतत्वविवक्षायाच यत्किंचित्तात्पर्यविषयगतत्वात्प्रतिपिपादयि षायामतिव्याप्त्यपरिहार, तत्तात्पर्यविवक्षायामपि अद्वैतात्पर्यकवाक्यमूल भूताया तस्यामतिव्याप्तेः । किंच ब्रह्मत्वम् स्वरूपमन्यद्वा ? नाद्यः, धर्मिता वच्छेदकत्वस्य तथासत्यसम्भवेन विशेषणवैयर्थ्यात्, स्वस्मिन् स्वस्याभावेन विशेष्यभागेनापि तदवारणाच्च । अनिरुक्तत्वे मिथ्यात्वेन विषयनिष्ठात्यन्ता भावप्रतियोगित्वात् नच स्वरूपाभिन्नस्येव ब्रह्मत्वस्य तदाश्रयत्वमेव तत्प्रयोजकत्वमिति वाच्यम्, एतादृशप्रयोजकत्वस्यैव लक्षणघटकत्वे असम्भवात्। तृतीयलक्षणमप्ययुक्तम्, मीमांसकमतनैयायिकमतसिद्धाभिन्नत्व सतीत्यलम्, विना षेत्यादिव्यर्थम् । नचाखण्डाभावे न वैयर्थ्यम्, एवमपि गौरवेण तस्य ज्ञान निवर्त्यतावच्छेदकत्वात्, अज्ञानत्वस्य तदवच्छेदकत्वेनाङ्गीकारात् सर्वदापि यत्किंचिदर्थविशेषदर्शनसत्त्वात् विशेष्यासिद्धिश्च । तदर्थविशेषदर्शनसमवा नाधारसंशयसामग्रीतदर्थज्ञानमिति तत्तदज्ञानानामिद लक्षणमिति चेन्न,— एवमप्यज्ञानसामान्यलक्षणालाभात् । स्वस्य यो विषय. तद्विशेषदर्शनसमवा नाधारसंशयसामग्री अज्ञान स्वमिति लक्ष्यत्वाभिमतमज्ञानमेवोच्यत इति चेन्न,— एवमपि यस्यार्थस्य विशेषदर्शन संशयो वा नास्ति तत्राव्याप्तेः । नैयायिकाद्यभिमतविशेषादर्शनस्याभावात्मनो निर्विषयतया पूर्वप्रतीकवैयर्थ्यञ्च । स्वमते भावरूपात्मज्ञानात्मकविशेषादर्शनस्य संशयजनकत्वाङ्गीकार अभावरूप विशेषादर्शनस्याभावतया गौरवेण जनकत्व प्रमाणाभावेन पूर्वप्रतीकवैयर्थ्यच्च । अभावात्मविशेषादर्शनस्य जनकत्वे प्रमाणमस्ति चेत् तत एवापत्तेः भावरूप विशेषादर्शनस्य जनकत्वे प्रमाणाभावात् असम्भवापत्तेः । अतएव स्वविरोधि ज्ञानस्य यो विषयस्तद्व्याप्यदर्शनसमवानाधारसंशयसामग्रीति विवक्षितम्, स्वशब्दश्च लक्ष्यपर एव, विरोधित्व च न निवर्तकत्वादि, अभावात्मकविशेषादर्शन-

निवर्तकासम्भवात्, किन्तु स्वस्थितिसमयास्थितिकत्वमिति निरस्तम्, अखण्ड ब्रह्मज्ञाने अव्याप्तेश्च, तन्निवर्तकाखण्डार्थनिष्ठवेदान्तजन्यज्ञानविषयस्य निराश्रयस्य ब्रह्मणो व्याप्यलक्षणविशेषाभावात्। धर्माद्यतीन्द्रियाज्ञानाव्याप्तेश्च, शास्त्रजन्यस्यापि धर्मादिज्ञानस्य परोक्षतया स्वानिवर्तकत्वेन स्वस्थितिसमयास्थितिकत्वाभावात्; अखण्डब्रह्मज्ञानस्यापि अखण्डाज्ञान निवर्त्यैव वियदादिना सममखण्डाज्ञानाधीनसत्ता कधर्माद्यजाननिवर्तकत्वेन स्वस्थितिसमयास्थितिकत्वाभावात्। सत्त्वेपि तद्विषयी भूताखण्डब्रह्मणो व्याप्याभावाच्च। किंच पुरुषाज्ञानस्यैव पुरुषसंशयसामग्री त्वात्, तस्य च विशेषदर्शनसमयाधारत्वादव्याप्तिः। ननु करादिलक्षणविशेषा दर्शनमपि तत्र कारणम्, पुरुषाज्ञानमपि संशयान्तरविषयव्याप्यभूतपुरुषदर्शन समयानाधारमिति प्रकारेण सर्वत्र लक्षणमूह्यमिति चेत्? परोक्षविशेषदर्शन स्थले निराश्रयब्रह्माज्ञाने चाव्याप्तेः। किंच—करादिविशेषदर्शनात्तद्द्वितीयक्षण एव तदज्ञाननिवृत्तिः, नाद्यक्षण इति क्षाज्ञानस्य विशेषदर्शनसमयानाधारत्वम्। ननु विशेषदर्शनस्थितिसमयास्थितिकत्व विवक्षितमिति चेन्न,—अतीन्द्रियधर्माद्यज्ञाने तथाप्यव्याप्तेः। धर्मिज्ञानकोटिस्मृत्यादावतिव्याप्तेश्च, ज्ञानद्वयस्य एकक्षणे स्थित्य-भावात्। यत्र विशेषदर्शन नास्ति तत्स्थलीयसंशयसामग्रीभूतधर्मिज्ञानादिव्यक्ता वतिव्याप्तिश्च। नच कारणतावच्छेदकावच्छेदेन विशेषदर्शनसमयानाधारत्व विव-क्षितमिति वाच्यम्, सामान्यतो विशेषदर्शनसमयानाधारत्वस्याज्ञानेष्वभावात्॥ विशेषदर्शनस्थितिसमयास्थितिकत्वस्य तु कारणतावच्छेदकावच्छेदेन "धर्मिज्ञा-नेपि सत्त्वात्, विशेषाजानत्वरूपकारणतावच्छेदकस्य ज्ञानघटितत्वात्, तस्या चेदानीं निरूप्यमाणत्वेनान्योन्याश्रयादिति दिक्। चतुर्थलक्षणमनुपपन्नम्, वृत्ति मत्त्वादिरूपधर्मस्याज्ञानत्वव्यापकत्वात्तदाश्रयत्वाद्धर्मिज्ञानमदेस्तत्रातिव्याप्तेः॥ किञ्च प्रतिज्ञान्तरत्वव्यापकशब्दत्वरूपव्यतिरेकिधर्माश्रये संशयसामग्रीभूतविप्रतिपत्ति वाक्येऽतिव्याप्ति, पर्यनुयोज्योपेक्षणत्वव्यापकाभावत्वरूपव्यतिरेकिधर्माश्रये संशय सामग्रीभूतविशेषादर्शनेऽतिव्याप्तिः। किञ्चाज्ञानत्वग्रहस्य निग्रहस्थानविभाजको-पाधिव्यापकत्वग्रहाधीनत्वादज्ञानत्वग्रहाधीनत्वाच्च व्यापकत्वग्रहस्यान्योन्याश्रयः। किञ्च ज्ञानाभावस्यैव निग्रहत्वेन भावरूपाज्ञानस्य निग्रहत्वाभावादसम्भवः।

नच लाघवाद्भावरूपाज्ञानमेव निग्रह, विनिगमनाविरहादुभयमेवेति वा, वादिवाक्यार्थस्य ज्ञातत्वेपि अपरोक्षज्ञानाभावेनाज्ञानस्यानिवृत्त्या निग्रहप्रसङ्गात् । किञ्च— भावरूपाज्ञानस्य यदि ज्ञानाभावत्व नाङ्गीक्रियते, तदा ज्ञानाभावत्वं निग्रहसामान्यलक्षणमिति त्वयोक्तत्वात्तादृशसामान्यलक्षणानाक्रान्तत्वाद्वादिवाक्यार्थविषयकभावरूपाज्ञानं निग्रहस्थानविशेष इत्यसम्भव एव । भावत्वाभ्युपगमे वैय्यर्थ्यञ्च । यदि चाङ्गीक्रियते, तदा अभावत्वमेवादाय विशेषादर्शनसंशयप्रागभावादावतिव्याप्तिरिति ।

अत्र नवीनः, अनाद्युपादानत्वे सति मिथ्यात्वमज्ञानत्वम् । मृदादावविद्यासम्बन्धादौ आत्मनि चातिव्याप्तिवारणाय विशेषणत्रयम् ।

अनादित्वे सति स्वजन्यज्ञानापेक्षज्ञाननिवर्त्यत्व वा अज्ञानत्वम् । स्मृत्यादिनिवर्त्यसंस्कारे ज्ञाने चातिव्याप्तिवारणायानादीति । आत्मन्यतिव्याप्तिवारणाय उत्तरविशेषणम् । स्वजन्यज्ञानापेक्षत्वविशेषणाच्च नाविद्यासम्बन्धादावतिव्याप्तिः । यदि च प्रागभावोऽङ्गीक्रियते तदा इच्छादिप्रागभावेऽतिव्याप्तिवारणाय भावत्वमपि विशेषणम् । तथाच तन्मते अनादिभावत्वे सति स्वजन्यज्ञानापेक्षज्ञाननिवर्त्यत्व लक्षणम् । ज्ञानत्वेन ज्ञाननिवर्त्यत्व वा लक्षणम् । संस्कारादावतिव्याप्तिवारणाय ज्ञानत्वेनेति । नचाविद्यासम्बन्धादावतिव्याप्तिः, तस्य ज्ञानानिवर्त्यत्वात्, अविद्यानिवृत्त्यैव तन्निवृत्तेः ।

तत्र तावदाद्य लक्षणमनुपपन्नम्, अनुत्पादितभ्रमाज्ञाने अव्याप्तेः । न चोपादानत्वयोग्यत्व विवक्षितमिति वाच्यम्, तस्य भ्रमोपादानत्वावच्छेदकावच्छिन्नत्वरूपत्वात् अज्ञानत्वस्यैवावच्छेदकत्वात्तद्रूपापरिचये योग्यताया ज्ञातुमशक्यत्वात् । नच लाघवान्निखिलप्रपञ्चोपादानं ब्रह्मगोचरमेकमेवाज्ञानमिति नाव्याप्तिरिति वाच्यम्, शुक्तिज्ञानेन शुक्त्यज्ञाननिवृत्तौ संसारानिवृत्त्यापत्तेः, अज्ञानस्यैकत्वात् । नच शुक्तिज्ञानेनावरणनिवृत्तिरेव, नत्वज्ञाननिवृत्तिरिति वाच्यम्;— ज्ञानेनाज्ञान निवृत्तमित्यनुभवस्यावरणमात्रविषयत्वकल्पनायोगात् । अज्ञाननानात्वस्यैव वाच्यत्वात् । चरमसाक्षात्कारस्याप्यावरणमात्रनिवर्तकतया ततोप्यज्ञानानिवृत्तिप्रसङ्गात् । नापि द्वितीयलक्षण युक्तम् । ब्रह्मण एवाज्ञाननिवृत्तित्वात्तस्य च ज्ञानसाध्यत्वाभावाज्ज्ञानजन्यनिवृत्तिप्रतियोगित्वलक्षणज्ञाननिव-

र्त्यत्वासम्भवात्। ज्ञानसाध्यनिवृत्तिप्रतियोगित्व विवक्षितम्, साध्यत्वं च क्षेमसाधारण ब्रह्मात्मकनिवृत्तावप्युपपादितमिति चेन्न,—अविद्यासम्बन्धादावति व्याप्तेः। अविद्यानिवृत्तेरेवमपि स्वजन्यत्वाभावेन स्वजन्यानपेक्षत्वस्य सत्त्वात्। नच स्वजन्यत्वमपि स्वसाध्यत्वमेव विवक्षितमिति वाच्यम्, एवमप्यविद्या सम्बन्धादावतिव्याप्तेः। नहि ब्रह्मरूपाविद्यासम्बन्धनिवृत्तिः ब्रह्मरूपामेवाविद्या निवृत्तिमपेक्षते, स्वस्य स्वापेक्षत्वायोगात्। नन्वाविद्यानिवृत्तित्वेनापेक्ष्यत्वम्, सम्बन्धनिवृत्तित्वेन तदपेक्षत्व चेति वाच्यम्, — एव सति तादृशनिवृत्तित्व प्रति सम्बन्धवदविद्याया अपि प्रतियोगित्वादसम्भवापत्तेः। अथा चाविद्यानिवृत्तेर्न साध्यत्वसम्भवः तयोक्तमविद्यानिवृत्तिभङ्गे। अनयैव नीत्या ज्ञाननिवर्त्यत्व घटितलक्षणान्तरनिरासो भाव्यः। एतेन अनाद्युपादानत्वे सति ज्ञाननिवर्त्यत्व मित्यन्यत्र यदुक्त तदपि निरस्तम्। किंच कि ज्ञानशब्देन चैतन्यमुच्यते, उत निवृत्तिः? नाद्य,— सस्कारस्य वृत्तिनिवर्त्यतया चैतन्यनिवर्त्यत्वाभावेन पूर्वलक्षणेऽनादिपदवैयर्थ्यात्। सस्कारनिवृत्तेरपि मिथ्यात्वेन चैतन्याधिष्ठानकत्वा त्तज्जन्यत्वमस्तीति चेन्न,— तथा सति सस्कारस्यापि मिथ्यात्वेन चैतन्याधिष्ठानक तया तज्जन्यत्वात्, स्वजन्यानपेक्षत्वविशेषणेनैव तद्व्यावृत्तिसिद्धौ अनादिपद वैयर्थ्यात्। उक्तलक्षणे च सस्कारनिवृत्तश्चित्त्वेनैवाधिष्ठानभूताचिन्निवर्त्यत्वात् सस्कारे ऽतिव्याप्तिश्च। नच सस्कारनिवृत्तौ सत्त्वेनैव हेतुत्वम्, अविद्या निवृत्तौ तु ज्ञानत्वनैवेति वाच्यम्, सत्त्वचित्त्वयोर्ब्रह्मस्वरूपतया विवक्षित व्यवस्थानुपपत्ते। न द्वितीय,— वृत्तेरविद्यानिवृत्तिप्रतिबन्धकावरणनिवर्तकत्व चैतन्यस्य स्वज्ञाननिवर्तकत्वमिति मते असम्भवात्। आवरणे ऽतिव्याप्तिश्च। मतान्तरेऽपि किमेकाज्ञानपक्ष इद लक्षणम्, उत नानाज्ञानपक्षे? आद्ये घटादि ज्ञानानामज्ञाननिवर्तकत्वाभावेनावरणनिवर्तकत्वादावरणनिवृत्तेरज्ञाननिवृत्त्यनपेक्ष-तया ऽज्ञानावरणयोस्सहैव निवृत्तिस्स्यादित्यावरणे ऽतिव्याप्ति। द्वितीये तु यद्विषयकाज्ञान समानविषयकज्ञानस्यानुदयान निवृत्तम्, किन्तु अखण्डसाक्षा त्कारेणाप्यखण्डाज्ञाने निवृत्ते तन्निवृत्त्येव निवर्तत तन्नाव्याप्ति। नच तस्याप्यना दित्वेनाखण्डाज्ञानानुपादानकत्वेन तन्निवृत्तिमनपेक्ष्याखण्डाज्ञानेन सहैव तन्नि-वृत्तिरिति वाच्यम्, तथा सत्यावरणस्याप्यजन्यतया अखण्डाज्ञाननिवृत्त्यनपेक्ष

निवृत्तित्वेन तत्रातिव्याप्तेः । यदि च तस्य तादधीन्यात्तन्निवृत्त्यधीननिवृत्तिकत्वम्, तथा सति कृत्स्नस्याप्यखण्डाज्ञानाधीनतया तन्निवृत्त्यधीननिवृत्तिकत्वमेवेत्यव्याप्तिरेव । अखण्डाज्ञानेन ब्रह्मस्वरूपावरणाभावे अध्यास एव न स्यादिति कृत्स्नस्याप्यखण्डाज्ञानाधीनत्वमनिवार्यमेव । किंच–तत्तत्स्वरूपस्याननुगतरूपेण निवर्तकत्वमते असम्भवः । मतान्तरेपि परोक्षवृत्तेरनिवर्तकत्वात् ज्ञानत्वस्य निवर्तकतावच्छेदकत्वाभावादसम्भव एव । नचापरोक्षत्व विवक्षितमिति वाच्यम् , चन्द्रापरोक्षे सत्यपि कश्चन्द्र इति प्रश्नानुसारेण चन्द्राज्ञानानिवृत्तेस्त्वयेवाङ्गीकारात् । नचापरोक्षावधारणत्व विवक्षितमिति वाच्यम् , चन्द्रज्ञानस्यैव तादृशत्वात् । यथा च एककोटिकज्ञानस्यानवधारणत्वासम्भवस्तथोक्त प्राक् ।

यच्चोक्तमन्यत्रैव—ज्ञानत्वेन ज्ञाननिवर्त्यत्वमज्ञानत्वम् , ज्ञानत्वेन चित्सामान्यरूपेण यत् स्वजन्य तदनपेक्ष्य सत् लेनैव रूपेण यत् ज्ञान निवर्तयति तद् ज्ञानमित्यर्थः । आवरणनिवर्तकसाक्षात्काररूपवृत्त्यपेक्षणेनासम्भवपरिहाराय ज्ञानत्वेन जनकत्व विवक्षितम् , " तथा विद्वान्नामरूपाद्विमुक्तः " इत्यादिशास्त्रात् कार्यस्यापि ज्ञाननिवर्त्यत्वसिद्धे तत्रातिव्याप्तिपरिहाराय स्वजन्यानपेक्षेति : ज्ञान ह्यविद्यानिवृत्तिसहकृतमेव कार्य निवर्तयति, नतु साक्षात्, तदनिवर्तकेदमित्यादि ज्ञाने सत्यपि कार्यस्यानिवृत्ते., ननु अविद्यानिवर्तक युगपदेव तदुभयं ज्ञान निवर्तयन्निति चेन्न,– केवलज्ञानस्य कार्यनिवृत्युपस्थिति विना अनुत्पादितभ्रमाज्ञाननिवर्तकतया बलवत्तस्य, अन्यस्यापि तथाविधस्य तावन्मात्रतया कार्यनिवृत्तिहेतुत्वे प्रमाणाभावात्, गौरवाच्च, कार्यनिवृत्तरन्यथाप्युपपत्तेः; नचैव कार्यनिवृत्तौ ज्ञान हेतुरेव मास्त्विति वाच्यम , उक्तश्रुतिविरोधात्, शुक्तिज्ञानाद्रजतादिभ्रमनिवृत्त्यनुभवाच्च , अज्ञानस्यापि मिथ्यात्वेनैव ज्ञाननिवर्त्यत्वात्तत्कार्यमपि मिथ्याभूत ज्ञाननिवर्त्यमेव, तस्मादविद्यानिवृत्तिसहकृतमेव ज्ञान तत्कार्य निवर्तयतीति न तत्रातिव्याप्ति', स्मृतिनिवर्त्यसस्कारेऽतिव्याप्तिपरिहाराय ज्ञानत्वेन निवर्तकता विवक्षिता, स्वपदन्तु जनकविशेष स्पष्टयति, इति ! तन्न, पूर्वोक्तदोषानतिवृत्ते. ।

किञ्च– अविद्यानिवर्तक ज्ञान युगपदेवाविद्यातत्कार्यं निवर्तयतीति अविद्यावरणेऽतिव्याप्तिः ।

यदुक्तं 'केवलज्ञानस्ये' त्यादि, तन्न, कार्याभावस्थले ज्ञानस्याज्ञानमात्रनिवर्तकत्वेपि यत्र कार्यमस्ति तत्र युगपदेवोभयनिवर्तकत्वसम्भवात्। नच ज्ञानस्य कार्यनिवृत्तिहेतुत्वे मानाभावः, "तथा विद्वान्नामरूपाद्विमुक्तः" इत्यादेरेव मानत्वात्। नचोभयत्र साक्षात्कारणत्वकल्पने गौरवात्, अविद्यानिवृत्तावेव साक्षात्कारणत्व — तन्निवृत्तिद्वारैव तत्कार्यनिवृत्तौ कारणत्वमिति वाच्यम्,— ज्ञानस्याविद्यानिवृत्तावव्यवधानेन कारणत्वं - तद्द्वारा कार्यनिवृत्तौ कारणत्वम् - अविद्यानिवृत्तेश्च कार्यनिवृत्तौ कारणत्वमिति कल्पनापेक्षया एकस्यैव ज्ञानस्योभयत्र कारणत्वकल्पने लाघवादिति।

यदपि स्वसमानविषयज्ञानप्राक्कालव्यापिसत्ताकत्वे सति तन्निवर्त्यत्वम्, स्वसमानविषयज्ञानासहकृतसामग्र्ययोग्यध्वसप्रतियोगित्व वा, ज्ञानातिरिक्तागन्तुकदृष्टकारणायोग्यध्वसप्रतियोगित्वं वा, जन्यज्ञानाजन्यध्वसप्रतियोगिवृत्तिबाह्यावृत्तिजातिमदन्यत्वे सति स्वसमानविषयज्ञाननिवर्त्यत्व वा अज्ञानलक्षणम्; नचाविद्यासम्बन्धादावतिव्याप्तिः, तस्य निर्विषयत्वात्, अविद्यानिवृत्तिरूपदृष्टकारणयोग्यध्वसप्रतियोगित्वाचेति द्रष्टव्यमिति। तत्राद्यलक्षणमनुपपन्नम्, पूर्वज्ञानसत्ता हि ब्रह्मस्वरूपमेव, तच्चोत्तरज्ञानप्राक्कालव्यापकमेव। ज्ञाननिवर्त्यत्वदूषणञ्च पूर्ववद्द्रष्टव्यम्। उभयत्र ज्ञानपदवैय्यर्थ्यञ्च। द्वितीयलक्षणेपि तत्त्वज्ञाननिवर्त्यभ्रमेऽतिव्याप्तिः, उभयोरप्यधिष्ठानविषयत्वेन समानविषयत्वात्। नच यावत्स्वविषयविषयत्व विवक्षितमिति वाच्यम्, यादृशघटाद्यज्ञान स्वसमानविषयकज्ञानानुत्पत्तेश्चरमसाक्षात्कारेणैव निवृत्त तत्र यावत्स्वविषयकज्ञानाभावेनाव्याप्तेः, अज्ञानस्यावच्छिन्नविषयतयाऽखण्डब्रह्मज्ञानापेक्षया भिन्नविषयत्वात्। प्रतियोगिनोध्वसहेतुत्वात्सर्वस्यापि ज्ञानस्य स्वनिवर्त्यत्वात्तत्राप्तिव्याप्तिः। अविद्यानिवृत्त्यैव तदितरनिवृत्तिः, ज्ञानन्त्वविद्यानिवृत्तावन्यथासिद्धमिति मते स्वसमानविषयकज्ञानासहकृताविद्यानिवृत्तिरूपसामग्रीयोग्यब्रह्मात्मकध्वसप्रतियोगित्वाद्ब्रह्माज्ञाने अव्याप्तेः। असहकृतेति तदसहकारकत्व न विवक्षितम्, किन्तु तदनपेक्षत्वमात्रम्, अत्र चाविद्यानिवृत्तिघटिता सामग्री तद्धेतुभूतताद्दशज्ञानापेक्षैवेति चेत्? तर्हि इच्छाप्रयत्नादिष्वतिव्याप्तेः, इच्छादेस्स्वनिवर्त्तिहेतोर्ज्ञानापेक्षत्वात्। तृतीयलक्षणेपि अविद्यानिवृत्तेर्ब्रह्मस्वरूपतया आगन्तुकत्वाभावादविद्यासम्बन्धेऽतिव्याप्तिः। आगन्तुकशब्देन क्षेमसाधारणसाध्यत्वविवक्षायामाविद्यानिवृत्तेर्ब्रह्मस्वरूपतया ब्रह्म

स्वरूपाभिन्नसम्बन्धनिवृत्तावनपेक्ष्यत्वादतिव्याप्तिः । अविद्यानिवृत्तित्वसम्बन्ध निवृत्तित्वाकारभेदेनापेक्ष्य वापेक्षकत्वसम्भवेपि अविद्यानिवृत्तेर्ब्रह्मरूपाया ज्ञानातिरिक्तत्वाभावात्तत्रैवातिव्याप्तिः । ज्ञानपदेन वृत्तिविवक्षायामपि तादृशसामग्रीयोग्य ब्रह्मात्मकत्वसप्रतियोगित्वमविद्यासम्बन्धवदविद्यायामप्यस्तीत्यसम्भवः । किञ्च त्रैवर्णिकस्य भाषाप्रबन्धजन्यज्ञानेन तज्जन्यदुरितापूर्वेण प्रतिबन्धादेवाज्ञान न निवर्तत इति त्वयोक्तत्वाद्दुःखप्रागभावादेः प्रायश्चित्तादिसाध्यत्वब्रह्मापाजन्यदुरिता पूर्वसाध्यत्वमज्ञानस्याप्यस्तीत्यसम्भवः । चतुर्थलक्षणेपि ज्ञानमात्रेऽतिव्याप्तिः, सर्वज्ञानस्यापि जन्यज्ञानजन्यध्वंसप्रतियोगित्वात् , स्वसमानविषयस्वस्वरूपज्ञाननिवर्त्यत्वाच्च । भ्रान्तिपरिणामित्वमज्ञानत्वमित्यपि न, अन्तःकरणेऽतिव्याप्तेः । प्रातिभासिकविषयज्ञानपरिणामित्वविवक्षायामपि अन्तःकरणेऽतिव्याप्तिः, प्रातिभासिकविषयपरोक्षवृत्तिपरिणामवत्त्वात् । नच प्रातिभासिकविषयापरोक्षवृत्तिरूपपरिणामवत्त्व प्रातिभासिकपरिणामवत्त्व वा विवक्षितमिति वाच्यम्,—मूलाज्ञाने अनुत्पादितभ्रमाजाने चाव्याप्तेः । अविद्यातिरिक्तदोषजन्यत्वस्य प्रातिभासिकलक्षणत्वोक्त्या अन्योन्याश्रयाच्च । द्वितीयादिषु सर्वेष्वपि लक्षणेषु अविद्याध्वंसस्य प्रातिभासिकत्वव्यावहारिकत्वपारमार्थिकत्वपञ्चमप्रकारत्वसम्भवस्यान्यत्रोपपादितत्वात् अविद्याया निवृत्तिप्रतियोगित्वाभावेनासम्भव एव दोषः ।

इति श्रीवाधूलकुलतिलकश्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्येन
तदेकदैवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्ध
महाचार्यापरनामधेयेन रामानुजदासेन विरचितायां
शतदूषणीव्याख्यायां चण्टमारुताख्यायां
अविद्यास्वरूपानुपपत्तिर्नाम
एकचत्वारिंश स्कन्धः ।

श्रीरस्तु ।

अथ द्विचत्वारिंशोवादः ।

य एको दुर्लङ्घ्यत्रिगुणनिजमायानिगळितै
र्विचित्रैः क्षेत्रज्ञैर्विहरति सरोजासहचरः ।
जगत्सर्गक्षेमक्षपणपरिकर्मीणमहिमा
दयाळुर्देवोसौ तुरगवदनस्तारयतु नः ॥

ये तु ब्रह्मणो दोषं परिजिहीर्षन्तः ब्रह्मज्ञान माकाशब्देनोपचरन्ति, तान्प्रति ब्रूम.— मायाविद्ययो· को विशेष इति । परव्यामोह

विशदयतु नस्तत्त्व श्रुत्यन्तवृन्ददरीशयं
श्रुतिसहचरी वेदान्ताचार्यसूक्तिरशेषतः ।
मनसि कृतयत्नात्पर्याणा दुरत्ययपद्धति
त्यजति भगवन्माया स्वायत्तविश्वजनापि नः ॥
व्यामोहयत्त्रिगुणया निजमायया ऽन्यान्
यत्प्रीतिभारपटलप्रतिरुद्धदृष्टिः ।
ईशो न पश्यति यदङ्घ्रिजुषामघाळीं
व श्रीनिवासगुरुमाश्रयतोज्झितान्याः ॥

य एक इति । अनेन स्वमते त्रिगुणात्मिका प्रकृतिर्माया, कर्म मिथ्या ज्ञान वा अविद्या, इति माया विद्याविभाग·, ब्रह्मणो निर्दोषत्वम्, जीवस्य तु अविद्यया सदोषत्वं चोपपद्यते; परमते तु तन्न सम्भवतीति सूच्यते । अत्र च " दैवी ह्येषा गुणमयी " इत्यादिवचनार्थोऽनुसहितः । येत्वि ति । अवि द्याश्रयत्वे सदोषत्वप्रसङ्गात् ब्रह्मणो नाविद्या, किन्तु मायैव, सा चैन्द्रजालि कादिष्विव न दोष इत्याहु ; तत्र तस्या अविद्यामोहनीयपरदर्शनरूपव्यामोहादि हेतुत्वेनाविद्यात्व पर्यवस्यति, ततश्च तत्र मायाशब्द उपचारमात्रमिति न मायाशब्दप्रयोगमात्रात् ब्रह्मणो निर्दोषत्वसिद्धिरिति भाव· । माये ति । ब्रह्मजीवयोर्निर्दोषत्वसदोषत्वनिर्वाहकत्वेनाभिमतयोर्मायाविद्ययोः को विशेष इत्यर्थः । परे ति । मायाविच्चेनाभिमतब्रह्मापेक्षया परः जीवः, अविद्याश्रय त्वेनाभिमतो जीवः स्वशब्दार्थः, ऐन्द्रजालिकव्यामुग्धयोस्तथैव दर्शनादिति भावः ।

नहेतुर्माया, स्वव्यामोहनहेतुरविद्येति चेत् ? किं परेषामदर्शनेपि तद्व्यामोहनम्, उत तद्दर्शने ? न प्रथमः, असम्भवात्; न हि माया विन. परानपश्यन्तस्तन्मोहनमिच्छन्ति मोहयन्तिवा, मायाविशब्दस्य परव्यामोहनाभिसन्धिमत्पुरुषविशेषवाचित्वात् । अन्यथा मोहन हेतूनां मणिमन्त्रौषधीनामपि मायावित्वप्रसङ्गात् । नापि द्वितीयः, तद्धि परदर्शनं ब्रह्मणः किं स्वभावतः, उताज्ञानेन, अथ तयैव मायया ? नाद्यः, निर्दोषदर्शनविषयतया परेषां सत्यत्वप्रसङ्गात्; ब्रह्मणि ज्ञातृत्वस्य स्वाभाविकत्वप्रसङ्गाच्च । न द्वितीयः, ब्रह्मा ज्ञानवादावतारात् । तथा [च] सति तेनैवाज्ञानेन सर्वसम्भवे तद्व्यतिरिक्तमायाभ्युपगमानुपपत्तिश्च । नच तृतीयः, परेषु दृष्टेषु तन्मोहनमात्रोपकरणत्वान्मायायाः परदर्शनहेतुत्वायोगात् । अथ ब्रह्मगतायाः मायायास्त्वयमतिशयो धर्मिग्राहकसिद्धः- यत्परदर्शन

अन्यत्र तथा वैषम्यसत्त्वेपि प्रकृते तन्निराकर्तुं विकल्पयति । किमि ति । किं ब्रह्म परान् दृष्ट्वा व्यामोहयति, उतादृष्ट्वेत्यर्थः । नहीं ति । इच्छाया ज्ञानपूर्वकत्वानियमात्परव्यामोहनेच्छा परज्ञानपूर्वकैवेति भावः । परव्यामोहनेच्छुत्वाभावेपि परव्यामोहकारित्वादेव मायावित्त्व ब्रह्मणः, तथाच न पर ज्ञानावश्यम्भाव इत्यत्राह– मायावी ति । अन्यथे ति । नच व्यामोह हेतुत्व मायावित्वम्, नच तन्मन्त्रादाविति वाच्यम्, मणिमन्त्राद्याश्रयभूतलाकाशा देरपि मायावित्त्वापत्तेरिति भाव· । स्वाभाविकत्वे ति । उपाध्यन्तराप्रयुक्तत्वादिति भावः । ब्रह्माज्ञाने ति । अज्ञानस्य स्वाश्रय प्रत्येव मिथ्याभूतपरदर्शनहेतुत्वा दिति भावः । तथासती ति । ब्रह्मणो निर्दोषत्वसिद्धये हि मायाकल्पनम्, मायाङ्गीकारेपि परदर्शनार्थमज्ञानस्यावश्यकत्वे निर्दोषत्वस्य भग्नत्वात्तत एव सर्वकार्योपपत्तेश्च न माया कल्पनीयेत्यर्थ. । परेष्वि ति । ऐन्द्रजालिकादौ तथा दर्शनादिति भावः । धर्मिग्राहके ति । श्रुत्या हि मायासिद्धिः, श्रुतिश्च " इन्द्रो मायाभि. पुरुरूपः " इत्यादिका मायया नानात्वदर्शनमाहेत्यर्थः ।

तद्व्यामोहनयोर्हेतुत्वमिति चेन्न, - मिथ्याभूतपरदर्शनहेतुत्वांशेन तस्या एवाविद्यात्वस्यापि दुर्वारत्वात् ।

अथ मन्यसे- विपरीतदर्शनहेतुरविद्या, यथा- शुक्तिरजतादि दर्शनहेतु', मायातु न ब्रह्मणो विपरीतदर्शनहेतुः, मिथ्याभूतस्य ब्रह्मव्यतिरिक्तस्य मिथ्यात्वेनैव बोधनात् ; नहि शुक्तिरजतमिथ्या त्वग्राहकस्याविद्यात्वम् , तथा सति बाधकज्ञानानां सर्वेषामप्यविद्या मूलत्वप्रसङ्गात् , भवदभिमतसर्वज्ञस्यापि सर्वेषा जीवाना भ्रमस्वरूपं विजानतस्तत्तद्भ्रमविषयैस्सह तत्तद्भ्रमग्रहणादविद्यावत्त्वप्रसङ्गात्; नहि निर्विषयज्ञानग्रहण सम्भवति; नचेश्वरस्य भ्रमानभिज्ञता , असर्वज्ञत्वप्रसङ्गात् ; आश्रितव्यामोहनिबर्हणार्थप्रवृत्तिशून्यत्वप्रस-ङ्गाच्च, अतो मिथ्याभूत ब्रह्मव्यतिरिक्तं मिथ्यात्वेनैव बोधयन्ती ब्रह्मणो माया नाविद्येति। तदप्यसारम्। किमिदं ब्रह्म स्वव्यति रिक्त मिथ्याभूत स्वभ्रमसिद्धतया मिथ्यात्वेन, उत परभ्रमसिद्ध तया, अथ भ्रमसिद्धत्वमजानदपि मिथ्यात्वमात्रं जानातीति ? न प्रथमः, ब्रह्माज्ञानस्य दुस्त्यजत्वात्। न द्वितीय , परेषामदर्शने परभ्रमसिद्धत्वादर्शनात्; परदर्शने पुनरविद्यास्वीकारापाताच्च। परानपि

दुर्वारत्वा दिति । स्वव्यामोहहेतुत्वयोगादिति भावः । विपरीते ति । सत्य तया मिथ्यार्थप्रतिभासहेतुरविद्येत्यर्थः । तथासती ति । ततश्च तेषामपि बाध्यत्वप्रसङ्गात् बाध्यबाधकव्यवस्था न स्यादिति भावः । भवदभिमते ति । यद्यपि व्यधिकरणप्रकारकत्वाभावान्न भ्रमत्वप्रसङ्गः, तथाप्यनिर्वचनीयविषयत्व मेव भ्रमत्वमिति स्वमतानुसारेणेदमुक्तम् । नही ति । ईश्वरज्ञानस्य साक्षा त्काररूपत्वादित्यर्थः । किमिद मिति। किं मद्भ्रमसिद्धत्वादिद मिथ्येति जानाति, उत परभ्रमसिद्धत्वादिद मिथ्येति, उत भ्रमसिद्धत्वमगृहीत्वा मिथ्यात्वमात्रं जानातीत्यर्थः । परभ्रमसिद्धतये ति । मिथ्यात्वेनेत्यनुषङ्ग. । पूर्ववाक्ये इहच्च जानातीति शेषः । मिथ्यात्वेन परदर्शने नाविद्यास्वीकार इति शङ्कते– परानपी

परभ्रमसिद्धतया ब्रह्म पश्यतीति चेन्न, परान्तरस्वीकरणेऽनवस्थानात् । तेषामेव परेषां भ्रमेण तत्सिद्धत्वदर्शनेपि तथाविधविशिष्टपरदर्शने स्वस्याविद्यापेक्षणात् । नहि वन्ध्यासुतभ्रमसिद्धो वन्ध्यासुत इति ज्ञाने वन्ध्यासुतस्यैव भ्रमः—नतु तद्विज्ञातुरिति वक्तुं शक्यम् । नच तृतीयः, भ्रमसिद्धत्वाज्ञाने मिथ्यात्वस्य दुर्ग्रहत्वात् । नह्यसत्त्वमात्रं मिथ्यात्वम्, अपितु स्वात्यन्ताभावसमानाधिकरणतया प्रतीयमानत्वादिकम् । परेषां मिथ्यात्वदर्शने च न ब्रह्मणः परव्यामोहनेच्छा सम्भवति, नहि प्रतिबिंबवन्ध्यासुतचित्रपुरुषादीना व्यामोहनाय मायाविनोपि मायां प्रयुञ्जते; प्रयुञ्जाना वा कथं स्वयमनुन्मत्तास्युः । आहुश्च- "अचेतनेषु मायावी मायामोचक एव वा । उभावुन्मत्तपदवीमश्नुवाते मनीषिणाम्॥" इति । ततश्च ब्रह्मापि मिथ्यात्वेनावधारितपरव्यामोहनार्थं मायां प्रयुञ्जानमुन्मत्तपर्यायमिव स्यादिति तदेव ब्रह्माज्ञानम् ।

अथ स्यात्- यद्यपि परव्यामोहने परदर्शनमवश्यम्भावि, मिथ्याभूतपरदर्शनं च न दोषमन्मतरेण, तथापि नात्र ब्रह्मणः

ति । स्वस्वभ्रमसिद्धतयैव परेषा दर्शने नानवस्थेत्यत्राह— तेषामेवे ति । भ्रमसिद्धत्वे ति । स्वपरौदासीन्येन भ्रमसिद्धत्वमात्रं ज्ञायतामिति चेन्न,— एवमपि भ्रमस्य स्वकीयत्वे ब्रह्मणोऽज्ञत्वप्रसगः, परकीयत्वे च तदीयत्वेनाज्ञाने असर्वज्ञत्वप्रसगः, तदीयत्वेन ज्ञाने च प्रागुक्त एव दोषः । स्वात्यन्ताभावे ति । आदिशब्देन प्रतिपन्नोपाधौ निषेधप्रतियोगित्व विवक्षितम् । परेषा मिति । एतेन स्वात्यन्ताभावसमानाधिकरणत्वं मिथ्यात्वमिति सूचितम् । ननु प्रतिबिम्ब चित्रादिषु व्यामोहनकार्याभावान्न तदर्थं प्रवर्तन्ते, इह व्यामोहलक्षणकार्यसद्भावात्प्रवृत्तिस्स्यादिति चेन्न,— भेदमिथ्यात्वे ज्ञाते अनिर्वचनीयस्वप्रतियोगिकभेदाश्रयतया ज्ञायमानत्वेन परव्यामोहनार्थं प्रवृत्त्ययोगात् । मनीषिणा मिति । ज्ञातृज्ञेयसम्बन्धे षष्ठी । मनीषिभिरिह मननया ज्ञायेतेत्यर्थः । तथापी ति । ब्रह्मणोऽनर्थो

परदर्शनहेतोर्मायाख्यदोषस्याविद्यात्वम्, अपुरुषार्थापरमार्थदर्शन हेतुरविद्येति तल्लक्षणात्; ब्रह्मणस्तु व्यामोहनीयान् परान् प्रकाश यन्त्यपि माया नापुरुषार्थतया प्रकाशयति, स्वप्नसिद्ध (भोगो) लीलो पकरणादिवत्पुरुषार्थतयैव प्रकाशयति, अतस्तस्या नाविद्यात्वमिति। तदपि न, पुरुषार्थहेतोर्दोषत्वाभावात्। दोषत्वे त्वपुरुषार्थतान्वयस्या वर्जनीयत्वात्। नह्यनिष्टं किञ्चिदनन्तर्भाव्य क्वचिदपि दोषत्ववर्ण नम्, अन्यथा तत्तत्सामग्र्या तत्तत्कार्योत्पत्तौ सर्वेषां कारणानां दोषत्वमेव वा गुणत्वमेव वा स्यादिति गुणदोषविभागाभावप्रसङ्गात्।

ननु किमिहेष्टानिष्टचिन्तनेन[1] स्वाभाविकाकारो गुण', औपाधिका कारस्तु दोषस्स्यात्, यथा– द्विचन्द्रदर्शनदशायां चक्षुषस्तिमिरादि; नच द्विचन्द्रदर्शने कश्चिदपुरुषार्थस्पर्श इति चेत्? मैवम्, द्विचन्द्रदर्शनहेतोरपि पारम्पर्येणानिष्टमन्तर्भाव्यैव दोषत्ववर्णनात्। अन्यथा निधिदर्शनादिहेतोरञ्जनादेरप्यस्वाभाविकतया दोषत्व प्रसङ्गात्। यदि च द्विचन्द्रदर्शनहेतोर्दोषत्वमविद्यात्वं च न स्यात्, कथं तन्निरासाय प्रेक्षावन्तः प्रयस्यन्ते। नह्यस्पृष्टानिष्टगन्धं किंचि-

---

वहो दोष एवास्माक परिजिहीर्षित इति भावः। **नापुरुषार्थतये** ति। शोकाद्य हेतुत्वादिति भावः। परदर्शनस्य भ्रान्तिरूपस्य शोकहेतुत्व स्यादित्यत्राह– **स्वप्ने** ति। **अन्यथे** ति। अनिष्टहेतुर्दोषः- इष्टहेतुर्गुण इति गुणदोषविभागः, यदिचा निष्टमनन्तर्भाव्यैव यत्किंचिद्धेतुत्वमात्रेण दोषत्व स्यात्, तर्हि हेतुमात्र दोष एव स्यान्न गुणः, यदि च गुणो ऽवश्य वाच्यः तदा हेतुमात्र गुण इति दोषो न स्यात्, गुणदोषयोः परस्परप्रतिकोटित्वात्, ततश्च गुणदोषविभागो न स्या दित्यर्थः। यद्यपुरुषार्थपर्यवसान दोषत्वे आवश्यकम्, तर्हि लाघवात्तदेव दो-षत्वप्रयोजक स्यात्, न भ्रमहेतुत्वमपि, तथा च लीलारसहेतुतया ब्रह्मणो माया

द्विमृश्यकारिणां निरसनीयम् । माभूत्तर्हि माया ब्रह्मणो दोष', पुरुषार्थैकपर्यवसायितया गुण एव तु स्यादिति चेत् ? न,– सा किमुच्छेदनीया नवा? पूर्वत्रापि किं ब्रह्मेच्छया, अन्यतो वा? यदि ब्रह्मेच्छया, कथ पुरुषार्थैकपर्यवसायिता ? नह्यस्पृष्टानिष्ट निरस नीयमित्युक्तम् । नचान्यतस्तदुच्छेद', ब्रह्ममायामोहितैररुपज्ञानश-क्तिभिः क्षेत्रज्ञैस्सर्वज्ञस्यापरिमितशक्तेर्ब्रह्मणोऽनन्तपुरुषार्थसाधिकायाः विश्वेन्द्रजालपिच्छिकाया अपहर्तुमशक्यत्वात् । नच स्वतः कदाचि न्मायोच्छेदिनीति वाच्यम् ;– अहेतुकविनाशेन क्षणभङ्गापातात् ; अविशेषादितः पूर्वमेव तदुच्छेदकप्रसङ्गाच्च । ततश्चानुच्छेदपक्षावि-शेषे नित्यैव माया ब्रह्मस्वरूपानुबन्धिनी स्यात् । अस्तु मायायाः नित्यत्वम् , तथापि न ब्रह्माज्ञानप्रसङ्ग इतीष्टप्रसङ्गत्वमेवेति चेन्न,– ब्रह्मस्वरूपानुबन्धिनी हि माया किं ब्रह्मवत्परमार्थभूता , उतापर मार्थभूता ? नाद्यः, अद्वैतपरतया युष्माभिरभ्युपैतैः श्रुतिशतैर्विरोध प्रसङ्गात् ; अपसिद्धान्ताच्च । अथपुनर्मायामपि ब्रह्मस्वरूपेऽन्तर्भाव्य श्रुतिविरोधादिक परिजिहीर्षसि ? तथाच सति ब्रह्मण एव माया शब्देनोपचारात्तस्य च स्वमात्रप्रकाशचिन्मात्रवपुष. परदर्शनहेतुत्वा भावात्परव्यामोहनादिकमेव न स्यात् । परदर्शनमपि ब्रह्मणः स्वभाव इति चेदिष्येत, हन्त जितं सगुणवादेन । नापि द्वितीय', नित्याया स्तस्या मिथ्यात्वस्य साधयितुमशक्यत्वात् । नह्यबाधितमपि

गुण एवास्त्विति शकते माभू दिति । ब्रह्ममाये ति । सर्वज्ञस्सर्वशक्तिरीश्वरस्स्व प्रयोजनपर्यवसायिन्या मायायाः परैरुच्छेद न सहेतेति अन्यैस्तदुच्छेदोशक्य इत्य-र्थः । नित्यैव माया अपरमार्थभूता इति द्वितीयपक्ष दूषयति– नापि द्वितीय इति । बाधितापि माया बाधितानुवृत्तिवशान्नित्यमनुवर्तते, अतो नित्या अपरमार्थ

मिथ्येति वक्तुं शक्यम्, बाधितापि द्विचन्द्रादिबुद्धिवन्नित्यमनुवर्तत इति चेन्न,—भवत्पक्षे बाधितानुवृत्त्यसम्भवस्योक्तत्वात्। नित्यस्यापि मिथ्यात्वे कथं "अनाशी परमार्थश्च प्राज्ञैरभ्युपगम्यते" इति पराशरादिवचन निर्वक्ष्यसि, ब्रह्मणोपि मिथ्यात्वप्रसङ्ग कथं परिहरिष्यसि। अबाधादिति चेन्न,— तत्रापि यत्किञ्चिद्बाधकस्य सुवचत्वात्। प्रमाणाप्रमाणविभागस्य त्वयैव शिथिलीकृतत्वात्।

किंचेयं माया परमार्थत्वेन ब्रह्मणः प्रकाशते, उतापरमार्थत्वेन? पूर्वत्र सिद्धं ब्रह्माज्ञानम्। उत्तरत्र कथ तया क्रीडितुमिच्छेत्? कथच तन्मूला मिथ्यात्वेनैव प्रतीयमानां क्रीडामभिनिविशेत। नहि क्रीडोपकरणानि तन्मूलां क्रीडा तदुभयप्रतिभासस्वरूपञ्चापरमार्थतया जानता प्रेक्षावता क्रीडारसो निष्पद्यते। बालोन्मत्तादयः कथं प्रतिबिंबादिभिः क्रीडन्तीति चेन्न,- तेषां तदानी प्रतिबिंबादेस्तत्प्रतिभासस्य च मिथ्यात्वग्रहणाभावात्। अस्त्विहापि बालादिवद्ब्रह्म, तथाच स्मरन्ति- "बालः क्रीडनकैरिव" "क्रीडतो बालकस्येव चेष्टां तस्य निशामय" इत्यादि, इतिचेन्न,- उन्मत्तवदीश्वरस्याविस्रम्भणीयत्वप्रसङ्गात्; स्वयं व्यामुह्यतः परव्यामोहनसामर्थ्यासम्भवाच्च; मुमुक्षुभिरुपेक्ष्यत्वप्रसङ्गाच्च। बालकदृष्टान्तस्तर्हि कथमिति चेत्? सर्वथा सादृश्यस्य दृष्टान्तानङ्गत्वात्। अन्यथा बालत्वादेरपि प्रसङ्गात्।

भूता च, इति शकते— बाधितापी ति। निर्वक्ष्यसी ति वहेर्लृट्। ब्रह्मणोपी ति। ज्ञानन्निवर्त्यत्वाभावेपि मिथ्यात्वे ब्रह्मणोपि किं न स्यात्, अविशेषादिति भावः। अबाधा दिति। प्रपञ्चवद्ब्रह्मणो ऽनिषिद्धत्वादित्यर्थः। तत्रापी ति। सर्वं शून्यमित्यादिवाक्यस्य सुवचत्वादित्यर्थः। प्रमाणतो निषिद्ध मिथ्या, अनिषिद्ध सत्यम्, ब्रह्म च न प्रपञ्चवत्प्रमाणतो निषिद्धमित्यत्राह—प्रमाणे ति। उभयो र्नित्यत्वे उभयनिषेधस्यापि प्रामाण्यमप्रामाण्य वा स्यात्, अविशेषादिति भावः।

किंच यस्य जीवब्रह्मणोरद्वैतं तत्त्वम्, तस्य कथं जीवाज्ञाने ब्रह्माज्ञान न स्यात् । अथ यदि जीवो ब्रह्मणस्तत्त्वतो भिन्नः ततः कथमैक्यज्ञानान्मोक्ष इत्यादिक घटेत । अतो यस्य मते माया सत्या, मायाविनश्च भगवतो न भ्रमः . व्यामोहनीयाश्च जीवाः परस्मादत्यन्तभिन्नाः सत्याश्च, परेणच यथावद्दृश्यन्ते, तस्यैव मायाविद्याविभागेन ब्रह्माज्ञान सुपरिहरम् ; नतु निर्विशेषैकचिन्मात्रवादिन इति।

इति शतदूषण्यां मायाविद्याविभागवादभङ्गो
द्विचत्वारिंशो वाद. ॥४२॥

——(*)——

ननु मायायाः ब्रह्मरूपाभावप्रतियोगित्वात्तन्निषेधः, ब्रह्मणश्चाभावप्रतियोगित्वाभावान्न ब्रह्मनिषेधः प्रमाणमिति चेन्न,-मायाया अपि ब्रह्माभावत्वावश्यम्भावात्, अविशेषात्, त्वयाप्यविद्याया ब्रह्माभावत्वाङ्गीकारात्। नन्वस्माक कल्पितसिद्धयधीना मायाया अभावप्रतियोगित्वसिद्धिरिति चेत्? किमतः, एवमप्यभावप्रतियोगित्वस्यानपायात्। अकल्पिताभावप्रतियोगिनिषेधः प्रमाणमिति चेत्? अकल्पितत्व यदि नित्यत्वम्, तन्मायाया अप्यस्ति, यदि सत्यत्वम्, तदा तद्यद्यबाधितत्व तन्न ब्रह्मणोपि, केनचिद्बाधादित्युक्तत्वात्, ज्ञानानिवर्त्यत्व मायाया अपि सिद्धमिति विपरीतदर्शनहेतुरविद्येति पक्षाभिप्रायेणोक्तम् । अपुरुषार्थापरमार्थदर्शनहेतुरविद्येत्यत्रतु मायाया अपारमार्थ्याज्ञानाद्ब्रह्मणोऽसर्वज्ञत्वप्रसङ्ग इति ॥

इति श्रीवाधूलकुलतिलकश्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्येन
तदेकदेवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्ध
महाचार्यापरनामधेयेन रामानुजदासेन विरचिताया
शतदूषणीव्याख्यायां चण्डमारुताख्याया
मायाविद्याविभागवादभङ्गो
द्विचत्वारिंशस्स्कन्धः ॥४२॥

——oo:o:oo——

श्रीरस्तु।

अथ त्रिचत्वारिंशो वादः

———(*)———

अनन्यानां पुसामनवधिकभक्तिस्थितिजुषा-
मविद्याध्वंसो यच्चरणवरिवस्यापरिणते.।
तदेक सत्सवित्सुखमवधिदूरीकृतगुणं
हताशेषावद्य ह्यवदनमीडीमहि महः॥

प्रतिष्ठितोयमर्थः प्रमाणपरतन्त्राणां- यदुत कर्मयोगज्ञानयोगपरिशोधितान्तःकरणस्य तत्तद्वर्णाश्रमोचितनित्यनैमित्तिकोपसंहृतिनिषिद्धपरिहारनिष्ठस्य अनवरतविहितध्यानार्चनादिक्रमपरिणतनिरतिशयप्रीतिरूपतापन्ननिदिध्यासननिरुद्धसुहृद्द्विषत्संक्रमणीयपूर्वोत्तरपुण्यपापस्य, फलोन्मुखकर्मपर्यवसाननिर्मुक्तस्थूलसूक्ष्माचित्ससर्गस्य तथाविधभजनाराधितपरमपुरुषप्रसादादेव सार्वज्ञ्यापरपर्य्यया निःशेषाविद्यानिवृत्तिरिति। ये पुनरद्वैतविज्ञानादेव ब्रह्माज्ञाननिवृत्तिरिति जल्पन्ति, तान्प्रति ब्रूमः. कथम्भूतमिदमद्वैतज्ञानमिति? किं ब्रह्मस्वरूपभूतात् ज्ञानाद्भिन्नम्, उताभिन्नम्, यद्वा भिन्नाभिन्नम्, उतानुभयात्मकम्, उताशक्यवेदनकथम्भाव किञ्चिदिति। न प्रथमः, तद्धि निर्विषयम्, सविषयं वा? पूर्वत्र ज्ञानत्वमेव हीयेत।

वादार्थं स्वगृहणन्मङ्गलमाचरति– अनन्यानामिति। अत्र च स्वमतोपन्यासेन वादप्रतिपाद्यभूतमतान्तरनिरसनमर्थात्सिद्धयति। अद्वैतज्ञानस्याविद्यानिवर्तकत्वानङ्गीकारे अनिर्मोक्षप्रसङ्ग इत्याशङ्क्य निराकर्तुमुपोद्घातरीत्या स्वमतमुपन्यस्यति– प्रतिष्ठित इति। तद्धीति। नन्वद्वैतज्ञानादेव ब्रह्माज्ञाननिवृत्तिरित्युक्तत्वात्कथं निर्विषयत्वविकल्प इति चेन्न,– पर्युदासलक्षणया द्वैतज्ञानादन्यदद्वैतज्ञानमिति विवक्षोपपत्तेः। पर्युदासे च नञ्सदृशयुक्तन्यायेन ज्ञानत्वेनाद्वैतज्ञानसदृशज्ञानान्तरमेव लक्ष्यते। यथोक्त वार्तिके– "नञ्सदृशयुक्तमन्यसदृशाधिकरणे

वृत्तिरूपं हि ज्ञान सविषयमेवेति भवतामपि सिद्धान्तः । उत्तरत्रापि कस्तस्य विषय ? किं ब्रह्मस्वरूपम्, उत तदेवाविद्याशबलम्, यद्वा तद्व्यतिरिक्त तस्य मिथ्यात्व वा. अथवाऽन्यदेव किञ्चिदिति । नाद्य', आत्मस्वरूपस्येव ज्ञानस्य तस्यापि भ्रमनिवर्तकत्वायोगात्, उभयोरपि यथावस्थितब्रह्मस्वरूपप्रकाशरूपत्वाविशेषात् । ननु स्वरूपप्रकाशोऽध्यासौपाधिकाधिष्ठानप्रकाशात्मकः, यथेद रजत

तथाह्यर्थगति " रिति । अत्र भाष्यम्– " नञ्युक्तमिवयुक्तञ्च कार्यमन्यस्मिंस्तत्सदृशे विज्ञायते, तथा ह्यर्थो गम्यते– अब्राह्मणमानयेत्युक्ते ब्राह्मणसदृशः क्षत्रिय आनीयते, नासौ लोष्टमानीय कृतीभवति " इति । निवर्तकज्ञानस्य ब्रह्मस्वरूपातिरिक्तत्वाङ्गीकारे तस्य वृत्तिरूपत्वलाभाद्वृत्तेश्च सविषयत्वात् । निर्विषयत्वाङ्गीकारे ऽयमसिद्धान्तोपीत्याह– वृत्तिरूपंही ति । उत्तरत्रे ति । ननु पर्युदासविवक्षाया कथ तदेवाविद्याशबलमित्यादिकोट्यन्तरादय. ? मैवम्, द्वैतशब्दस्याविद्याकार्यपरत्वविवक्षाया द्वैतमात्रविषयत्वविवक्षाया वा द्वितीयपक्षोत्थानात् । द्वयोर्भावः– द्विता, द्वितैव द्वैतम्, द्वैतप्रकारकमवधारण द्वैतज्ञानम्, अस्ति द्वय ब्रह्मव्यतिरिक्त सत्यमेवेति ज्ञान तदन्यज्ञानम्, सजातीयपर्युदासात्प्रपञ्चविषयक मज्ञानमिति लभ्यते, ततश्च ब्रह्मव्यतिरिक्त सत्यमेवेति ज्ञानातिरिक्त यत्प्रपञ्च स्वरूपमात्रविषयक ज्ञानम्, तत् तृतीयकोटिः, यच्च प्रपञ्चमिथ्यात्वविषयक सा चतुर्थकोटिः, एतदर्थविवक्षयैव पञ्चमकोट्युत्थिति' । अन्य दिति । ब्रह्मगता द्वितीयत्वादिकमित्यर्थः । गत्यन्तराभावाद्द्वैतज्ञानशब्दार्थत्वाभावेपि पञ्चमकोट्युत्थितिः । यद्वा अद्वैतज्ञानमित्यत्र समासान्तर्गतायाष्षष्ठ्यास्सम्बन्धसामान्यपरत्व विवक्षया सविषयत्वनिर्विषयत्वविकल्पः । तत एवोत्तरत्र तद्व्यतिरिक्तमित्यादि कोट्युत्थितिः । ननु समानविषयत्वे ऽप्यध्यासानुपयोग्यधिष्ठानज्ञान निवर्तकम्, अध्यासोपयोग्यधिष्ठानज्ञानन्तु न निवर्तकम्, इदमिति ज्ञानस्य शुक्तिरिति ज्ञानस्य च समानविषयत्वेपि तत एव निवर्तकत्वानिवर्तकत्वयोर्दर्शनादिति शङ्कते–ननु स्वरूपेति

मित्यत्र इदमर्थप्रकाश:, विषयप्रकाशस्त्वध्यासनिवर्तक, यथेदमर्थ-स्य शुक्तिरिति प्रकाश ,इति चेन्न,- दत्तोत्तरत्वात्। नहीदमिति प्रकाशस्य शुक्तिरिति प्रकाशस्य चात्यन्तसमानविषयता, इदमिति प्रकाशस्य शुक्तिरजतसाधारणाकारविशिष्टगोचरत्वात्; शुक्तिरिति प्रकाशस्य रजतव्यावर्तकशुक्तित्वविशिष्टविषयत्वात्। अन्यथा तस्यापि भ्रमनिवर्तकत्वप्रसङ्गात्। नचात्राप्याकारभेदोधिको वृत्तिज्ञानेन बोध्यत इति वाच्यम्;- तस्याकारस्य सत्यत्वे सगुणसिद्धान्तोररीकरणप्रसङ्गात्। मिथ्यात्वे भ्रान्तिज्ञानत्वादेव सुतरामनिवर्तकत्व प्रसङ्गात्। वसुन्धरारम्भबोधे मालाभुजङ्गनिवृत्तिवदुपपद्यत इति चेन्न,- तस्यैव भ्रमरूपत्वेन तद्वदेव स्वय स्वविषयाबाधकत्वात् सर्वत्र भ्रमनिवृत्त्यसिद्धिप्रसङ्गात्। बाधकान्तरगवेषणायामनवस्थानात् स्व-परनिर्वाहकसमाधेरपि बाधकज्ञानविषयीभूतप्रपञ्चविरोधिमिथ्याकारा

दत्तोत्तरत्वा दिति। उभयोरपि यथावस्थिते त्यादिनेति शेषः। दृष्टान्तेपि निवर्तकत्वानिवर्तकत्वयोर्विषयभेद एव प्रयोजक इत्याह- नहीं ति। साधारणाकारे ति- शुक्त्यंशसाधारणत्वेनागृहीतधर्मो विवक्षितः, तेन "इदन्त्वस्य तत्तद्व्यक्तिपर्यवसिततया न केवलान्वयित्व"मिति जिज्ञासानुपपत्तिवादो क्तेन न विरोध.। ननु इदंशुक्तिज्ञानयोरप्यत्यन्तसमानविषयकत्वमेव, तत्र च निवर्तकत्वानिवर्तकत्वे उक्तप्रयोजकाभ्यामेवेत्याशङ्क्याभ्यासोपयोगानुपयोगावेव विषयवैलक्षण्याभावे न सम्भवत इत्याह- अन्यथे ति। ब्रह्मस्वरूप विषय इत्यत्र किं ब्रह्मस्वरूपमात्र विषयः, उतानन्दत्वादिविशिष्टब्रह्मस्वरूपमिति विकल्प हृदि निधायाद्यः पक्षो निरस्तः। इदानी द्वितीयमाशङ्क्य निराकरोति- नचे ति। न तस्यैवे ति। वसुधारम्भभ्रमस्थले वसुधारम्भभ्रमस्य स्वविषयाबाधकत्वात् सर्पभ्रमनिवृत्त्यभाववदधिकाकारविशिष्टब्रह्मज्ञानस्य स्वविषयाबाधकत्वात् स्वस्य च भ्रमरूपत्वात्सर्वभ्रमानिवृत्तिप्रसङ्गादित्यर्थः। बाधकज्ञानविषये ति। अध्यास सहप्रकाशातिरिक्तो ह्यधिष्ठानप्रकाशोऽध्यासनिवर्तकस्यात्, तस्मादद्वितीयत्वरूपाधि

ध्याससहस्वरूपप्रकाशातिरिक्तप्रकाशाभावेन तस्याकारस्य बाध्यत्वा सिद्धेरेवेति परिहृतत्वात । स्वस्यैव स्वविषयार्थबाधकत्वे व्याघाताच्च । अस्तु तर्ह्यभिज्ञाप्रत्यभिज्ञयोरिव स्वरूपतद्विषयज्ञानयोस्ताध्यभेद इति चेन्न,- दत्तोत्तरत्वात् । तत्रैतत्स्यात्, यथा देवदत्तगोचरत्वाविशेषे ऽप्यसावित्यवगाहमानाभिज्ञा न देवदत्तभेदभ्रम निवर्तयति- सोयमिति प्रत्यभिज्ञाबुद्धिस्तु तत्प्रतिक्षेपाय प्रगल्भते । तद्वदत्रापि स्वरूपप्रकाशस्सोहमिति कल्पिताकारप्रकाशश्चेति चेन्न, दत्तोत्तरत्वात् । तत्राप्यभिज्ञाप्रत्यभिज्ञयोः प्रकाश्याकारभेदोऽस्ति । अन्यथा

काकारविशिष्टविषयतया प्रपञ्चानिवर्तकत्वेपि तदाकाराध्याससहाधिष्ठानस्वरूपप्रकाशातिरिक्ततद्विरुद्धाकारप्रकाशाभावेन तस्याकारस्य बाध्यत्वासिद्धेरित्यर्थः । **परिहृतत्वा** दिति । परिहृतप्रायत्वादित्यर्थ. । **यथावस्थितेत्यत्रेति** शेषः । **व्याघाताच्चे** ति । साक्षिणोविद्याभासकत्वान्न तद्बाधकत्वमिति स्ववचनेन व्याघातादित्यर्थः । स्वरूपरूपप्रकाशस्य तदतिरिक्तप्रकाशस्य च प्रकाश्यभेदाभावेपि देवदत्तविषयकाभिज्ञाप्रत्यभिज्ञयोरतत्त्वभ्रमनिवर्तकत्वतदभाववदविद्यानिवर्तकत्वतदभावानुपपत्तेते, इति शङ्कते— **अस्तु तर्ही** ति । **दत्तोत्तरत्वा** दिति । पूर्ववदव शेषः । अभिज्ञाप्रत्यभिज्ञयोरपि भिन्नविषयत्वमेवेति भावः । नन्वभिज्ञाप्रत्यभिज्ञयोर्न विषयभेदः, स्वरूपमात्रविषयत्वात् , सोय देवदत्त इति वाक्यस्याखण्डार्थत्वव्यवस्थापनेन तत्समानविषयप्रत्यभिज्ञाया अपि स्वरूपमात्रविषयत्वावश्यम्भावात् , इत्यभिप्रायेण शङ्कते- **तत्रैतत्स्या** दिति । **असा** विति । अत्र देवदत्तत्व न विषयः, किन्त्वन्य एवेति विवक्षितम् । **दत्तोत्तरत्वा** दिति । पूर्ववदेव शेष. । अखण्डार्थत्वञ्च निरस्तमेवेति भावः । गत्यन्तराभावात् पूर्वदूषितामेव प्रकाश्याकारभेदशङ्का पुनरुत्थाप्य परिहरति– **तत्रे** ति । प्रकाश्याकारभेदाभावेपि साविषयत्वतदभावाभ्या वृत्तित्वतद्भिन्नत्वाभ्या च वैषम्यात् , ततएव निवर्तकत्वानिवर्तकत्वे उपपद्येते नहि विषयभेदादेव निवर्तकत्वानिवर्तकत्वे नियते, तथासति सेत्यप्रत्यक्षानुमितोश्वड्वपीतभ्रमनिवर्तकत्व तदभावव्यव-

अभिज्ञाप्रत्यभिज्ञयोर्भेदासिद्धिप्रसङ्गात्। कोवा भवन्तमन्तरेण स इत्यादिकोल्लेखिनीम्प्रत्यभिज्ञामसावित्येतावन्मात्रोल्लेखिन्याभिज्ञया सह धारावाहिकवदत्यन्तसमानविषयामभिमन्येत। अत्रापि आकारातिरेकाभ्युपगमे तु दत्तमुत्तरम्। प्रकाशातिरेकिविषयित्वतदभावाभ्यां वैषम्यमिति चेत्? किं ततः? बाधकत्वाबाधकत्वे प्रत्यप्रयोजकत्वात्। वृत्तिज्ञानस्य हि बाधकत्व यथावस्थितब्रह्मस्वरूपप्रकाशात्मकत्वेन, नतु वृत्तित्वाद्याकारेण, तथासति विरोधिप्रकाशातिरिक्त वृत्तित्वाद्याकारबाध्यत्वेन मुद्गरादिनिर्वर्त्यसत्यसर्पघटादेरिव प्रपञ्च स्यापि सत्यत्वप्रसङ्गात्। एतेनाविद्याशबल तदेव विषय इति दत्तोत्तरम्, साक्षिप्रत्यक्षवदेव भ्रमोपकारकत्वप्रसङ्गात्। अन्यथा साक्षिप्रत्यक्षस्यापि भ्रमनिवर्तकत्वप्रसङ्गेन प्रपञ्च [प्रति] निर्भासस्या प्यनुदयप्रसङ्गात्। साक्षिप्रत्यक्षमपि हि अविद्याप्रकाशात्मकं स्व-

---

स्थानुपपत्तेरिति शङ्कते- **प्रकाशे** ति। चैत्यप्रत्यक्षस्यापि विरोधिविषयप्रत्यक्षत्वेनैव निवर्तकत्वम्, नतु प्रत्यक्षत्वमात्रेण, अतिप्रसङ्गादिति परिहरति **कितत** इति। **वृत्तित्वादी**त्यादिशब्देन सविषयत्व गृह्यते। **तथासती** ति। प्रकाशपद वृत्तिपदञ्च भावप्रधानम्। आदिशब्देन सविषय गृह्यते। विरोधि विषयप्रकाशत्वातिरिक्तो वृत्तित्वाद्याकारो यस्य तद्बाध्यत्वेनेत्यर्थः। विरोधि साक्षात्कारत्वेन ज्ञाननिवर्त्यत्वस्य मिथ्यात्वप्रयोजकतयाङ्गीकारादिति भावः। **एतेने** ति। भ्रान्तित्वादध्यासस्याधिष्ठानस्वरूपप्रकाशातिरिक्तप्रकाशाभावात्स्वस्य स्वविषयार्थबाधकत्वे व्याघाताच्चेत्यर्थः। "एतेने" त्येतदेव विवृणोति- **साक्षी** ति। ननु कथमुपकारकत्वप्रसङ्गः, नहि साक्षिप्रत्यक्षस्याविद्याविषयत्वादेव भ्रमोपकारकत्वम्, किन्तु अविद्यायास्साक्ष्यधीनसिद्धिकत्वात्, प्रपञ्चभ्रमस्य च तदुपादानत्वात्, निवर्तकत्वाभिमतवृत्तेश्चाविद्यास्वरूपसाधकत्वाभावादिति चेन्न,—भ्रमोपकारकपदेन भ्रमानिवर्तकत्वस्य विवक्षितत्वात्। **अन्यथे** ति। अवि

प्रकाशश्च । ब्रह्मव्यतिरिक्तमात्रगोचरत्वपक्षे स्वयं तद्भ्रमरूपत्वा-त्तद्बाधकरूपत्वसम्भावनापि नास्ति । नहि शुक्तिकलधौतधीरेव कलधौतधियमवधुनोति । तन्मिथ्यात्वविषयपक्षस्तु तदा शोभते, यद्यधिष्ठानयाथात्म्यग्रहणमन्तरेणापि तन्मिथ्यात्व सुग्रह स्यात् । याथात्म्यग्रहरूपता च दूषितैव । किंच, इदं निवर्तकज्ञानं स्वविषयं ब्रह्मव्यतिरिक्तमिथ्यात्व किं मिथ्यात्वेन गृह्णाति उत सत्यत्वेन, उतानिर्द्धारितविशेषात्मनेति । आद्ये व्याघात, मिथ्यात्वस्य च मिथ्या स्वग्रहणे प्रपञ्चस्य सत्यत्वेन प्रकाशप्रसङ्गात्, स्वप्नावगतपितृमरण मिथ्यात्वेन पितृसत्यतावत्, सम्यग्रजतमिथ्यात्वमिथ्यात्वेन रजतसत्य-तावच्च । ब्रह्मव्यतिरिक्तत्वोपाधिक्रोडीकारवशात् प्रपञ्चस्य तन्मिथ्या-त्वस्य च मिथ्यात्वमेकहेलया लभ्यते, यथा भवता प्रपञ्चस्य तत्स-

---

द्याविषयवृत्तेरविद्यानिवर्तकत्वे । तद्भ्रमरूपत्वा दिति । भ्रममात्ररूपत्वात्,-अधिष्ठानाविषयत्वादित्यर्थः । अधिष्ठानविषयकज्ञानस्यैव निवर्तकत्वादधिष्ठाना विषयकस्यास्य निवर्तकत्वसम्भावनापि नास्तीति भाव । नहीं ति । शुक्ति-रजतज्ञानस्याधिष्ठानविषयस्याप्यारोप्यविषयत्वेनानिवर्तकत्वदर्शनादारोप्यमात्रविषय स्यानिवर्तकत्व कैमुत्यसिद्धमिति भाव । तन्मिथ्यात्वे ति । नन्वधिष्ठान याथात्म्यग्रहणाभावे प्यारोपितमिथ्यात्व सुग्रहमेव, तद्रजत मिथ्येत्यात्मोपदेशा दिव "नेह नानास्ती" ति वाक्यात्प्रपञ्चमिथ्यात्वग्रहसम्भवादिति चेन्न,—मिथ्यात्वसाक्षात्कारस्याधिष्ठानयाथात्म्यज्ञान विना असिद्धे । शाब्दज्ञानस्य च परोक्षतया ऽविद्यानिवर्तकत्वासिद्धेः । याथात्म्ये ति । याथात्म्यस्य स्वरूपत्वे ऽध्यासानुपपत्तेस्तदतिरिक्तत्वे वाच्ये तस्य सत्यत्वमिथ्यात्वयोर्दूषणमेवे त्यर्थः । व्याघात इति । मिथ्यात्व हि प्रतिपन्नोपाधौ निषेधप्रतियोगित्वम्, ततश्च मिथ्यात्वस्य प्रपञ्चनिष्ठात्यन्ताभावप्रतियोगित्वेन प्रतीतौ प्रपञ्चस्य सत्य त्वेनैव प्रतीतिप्रसङ्गो न मिथ्यात्वेनेति व्याघात इत्यर्थः । स्वप्ने ति । अन्यथा ख्यात्यनुसारेणाय दृष्टान्तः । सर्वसाधारण दृष्टान्तमाह— सम्य गिति ।

त्यत्वस्य च सत्यत्वमिति चेन्न,– विरोधाविरोधाभ्यां वैषम्यात् । नहि रजतमिथ्यात्वमिथ्यात्वेपि रजतमपि मिथ्याभूत दृष्टम् । नच शुक्तिरजतमिथ्यात्वे तन्मिथ्यात्व मिथ्याभून दृष्टम् ।

तदय सग्रह –मिथ्यात्वस्य च मिथ्यात्वे मिथ्यात्व बाधितं भवेत् ।
सत्यत्वस्य तु सत्यत्वे सत्यत्व स्थापित भवेत् ॥

ननु, वन्ध्यासुततन्मरणयोरिव द्वयोरपि मिथ्यात्वमुपपद्यत इति चेन्न,- निराश्रयतया तत्र धर्मिमिथ्यात्वोपपत्ते । नहि तत्रापि वन्ध्या सुतमिथ्यात्वं वा तन्मरणमिथ्यात्व वा मिथ्याभून दृष्टम् । द्वितीये तु- ब्रह्मव्यतिरिक्तस्य प्रपञ्चमिथ्यात्वस्य सत्यत्वेन प्रकाशनात् स द्वितीयत्वभ्रान्तित्वादिदोषो दुस्तरः ।

विरोधमुपपादयति– **नहीं** ति । शुक्तिरजतमिथ्यात्वस्य मिथ्यात्वेपि शुक्तिरजत मिथ्यैव दृष्टमिति कथ विरोध इत्याशङ्क्य, शुक्तिरजतमिथ्यात्वस्य मिथ्यात्वे न मानमस्ति– प्रत्युत सत्यत्वेनैव प्रतीतेस्सत्यत्वमेवेत्याभिप्रायेणाह– **नच शुक्ती** ति । ननु देवदत्तमरणमिथ्यात्वे तदा तत्प्रागभावासिद्धौ तस्य सत्यत्वं दृश्यते, तथा वन्ध्यासुतमरणमिथ्यात्वे तत्प्रागभावाभावेपि तन्मिथ्यात्वं दृश्यते, तद्वदिहापि सम्यग्रजतमिथ्यात्वस्य मिथ्यात्वेन सम्यग्रजतसत्यत्वेपि शुक्तिरजत मिथ्यात्वस्य मिथ्यात्वेपि शुक्तिरजतस्य मिथ्यात्वमुपपद्यत इति शङ्कते- **ननु वन्ध्ये** ति । कि वन्ध्यासुतप्रतीतिरसद्विषया, उत मिथ्याविषया? इति विकल्प मभिप्रेत्याद्ये दोषमाह–**ने** ति। निराश्रयत्वम्–असदाश्रयत्वम्, मिथ्यात्वम्-असत्त्वम्। द्वितीये दोषमाह–**नहीं** ति ।नहि वन्ध्यासुतो मिथ्या, तस्याप्रसिद्धत्वेनारोपासम्भवात्, किन्तु सुतस्य वन्ध्याजन्यत्व सुतत्वे वन्ध्याप्रतियोगिकत्व वा मिथ्येति वक्तव्यम्, तथा मरणे तादृशारोपविषयप्रतियोगिकत्व मिथ्येति वक्तव्यम् , तच्च मिथ्यात्व सत्यमेवेत्यर्थः । मिथ्यात्वस्य सत्यत्वे दोषमाह– **सद्वितीयत्वे** ति । मिथ्यात्वस्य मिथ्यात्वे दोषमाह- **भ्रान्तित्वे** ति । आदिशब्देन प्रपञ्चस्य निवृत्तावपि मिथ्यात्वस्यानिवृत्ते सर्वभ्रमनिवृत्त्यसिद्धिप्रसङ्गो विवक्षितः । मिथ्यात्व सत्यत्वेनैव

ब्रह्मव्यतिरेके तु दत्तमुत्तरम् । तृतीयेप्यसम्भव', ब्रह्म व्यतिरिक्तत्वग्रहणे प्रयोजकज्ञानवतो मिथ्यात्वेनैव ग्रहण प्रसङ्गात् , प्रयोजकज्ञानाभावे प्रपञ्चमिथ्यात्वस्याप्यग्रहण प्रसङ्गात् । ब्रह्मव्यतिरेकेणाग्रहणे गृह्यमाणस्य मिथ्यात्वस्य ब्रह्मणश्चागृह्यमाणव्यतिरेकयोरशुक्तिरजतयोरिवैक्येन ग्रहणप्रसङ्गात् । ततश्च सत्यत्वेन प्रकाशाप्रसक्तेर्न साधारणाकारग्रहणसम्भव । अन्यस्य कस्य चिद्विपयत्वमपि परमार्थापरमार्थविकल्पेन दत्तैरेव दूषणैर्दूषितम् , परमार्थत्वे ब्रह्मव्यतिरेके द्वैतप्रसङ्गात्, तदव्यतिरेकेऽन्यत्वस्यैवासिद्धि प्रसङ्गात् । अपरमार्थत्वे अविद्यातत्कार्यकोट्य तर्भावेन बाध्याकार तया प्रागुक्तदोषापातात् । बहिर्भावे तद्बाधकगवेषणप्रसङ्गात् । किंच ब्रह्मव्यतिरिक्तं तत् बाधक ज्ञानं सत्यमसत्यं वा? असत्यत्वे त्विदमपि बाध्याकारकोटौ घटमान कथमिव तद्बाधक स्यात् ।

गृह्णाति, तच्च मिथ्यात्व सत्यमेव,अतो न भ्रान्तित्वम्, नच सद्वितीयत्वम्, तस्य ब्रह्मस्वरूपत्वात् , इत्याशक्य परिहरति ब्रह्मव्यतिरेक इति । मिथ्यात्वं ब्रह्म व्यतिरिक्तत्वेन गृह्यते नवेति विकल्पमभिप्रेत्याद्ये दोषमाह ब्रह्मव्यतिरिक्तत्वे ति । तत्रापि ब्रह्मव्यतिरिक्तत्वस्य मिथ्यात्वप्रयोजकत्वग्रहणमस्ति नवेति विकल्पमभि प्रेत्याद्ये दोषमाह- प्रयोजकेति । ब्रह्मव्यतिरिक्तत्वावच्छेदेन मिथ्यात्वज्ञाने हि मि- थ्यात्व ब्रह्मव्यतिरिक्तमिति ज्ञानवतो मिथ्यात्व मिथ्येति ज्ञानमवर्जनीयमेव । द्वितीये दोषमाह- प्रयोजकेति । ब्रह्मव्यतिरिक्त मिथ्येति ब्रह्मव्यतिरिक्तत्वावच्छेदेन मिथ्यात्वस्याग्रहणे प्रातिस्विकरूपेणापि गृहीतुमशक्यत्वात् कृत्स्नप्रपञ्चमिथ्यात्व ग्रहण न स्यादिति भावः । द्वितीये दोषमाह ब्रह्मव्यतिरेकेणे ति । साधारणेति । सत्यत्वेन ग्रहणादनिर्धारितविशेषात्मनेत्येतन्नोपपद्यत इति भावः । असत्यत्व इति । ज्ञानस्य बाध्यस्य बाधकत्व नोपपद्यते, तथा सति मिथ्याज्ञतास्यैव तद्बाधकत्व प्रसङ्गादित्यर्थः । बाध्यत्वमेवाकार , स एव कोटि', तत्र सम्बद्धम् । ननु ब्रह्म ज्ञानत्वेनैव बाधकत्वम् , ब्रह्मभिन्नत्वेन बाध्यत्वम् , तदुभय ब्रह्मज्ञानेऽस्तीति तद्बाध्य बाधक च, रजते तद्बाधकताप्रयोजक न किंचिदस्तीति न शुक्तिरजत बा-

आकारभेदादविरोध इति चेन्न,- बाधकाकारभेदस्यापि बाध्यत्वाभ्युपगमात्। अन्यथा तस्य सत्यत्वप्रसङ्गात्। तत्राप्याकारभेदाभ्युपगमेऽनवस्थानात्। प्रमाणस्थापके [ने] प्रमाणविशेषस्थापकाकारविशेषस्यापि स्थाप्यत्ववदविरोध इति चेन्न,— स्थापकाकारविशेषस्थितेस्स्थाप्यसामान्यस्थित्युपयुक्तत्वात्। बाधकाकारविशेषबाध्यत्वस्य विश्वबाधासिद्धिपर्यवसितत्वात्। किंचैतन्निवर्तक ज्ञानमद्वैतश्रवणादिमात्रसमुद्भवमिदानीन्तनमेव ज्ञानम्, एष्यद्वा किमपि? पूर्वत्र भवन्मतश्रोतृणा तत्क्षणादेव प्रपञ्चविलयप्रसङ्ग। यद्वात्मैक्याद्वैश्येषामेव। बाधितानुवृत्तिस्तु दूषितैव। उत्तरत्रापि तत्किं पूर्वाविशिष्टविषयमपि निवर्तकम्, उत विशिष्टविषयम्? अविशिष्टविषयत्वेतु

धकमित्यभिप्रायेण शङ्कते- आकारे ति। बाधकतावच्छेदकत्वेनाभिमतस्याप्याकारस्य ब्रह्माभिन्नत्वेन बाध्यत्वाच्छुक्तिरजतत्ववन्न बाधकतावच्छेदकत्वमपीति परिहरति- ने ति। ननु बाधकतावच्छेदकताप्रयोजक तत्त्वज्ञानत्वमिति तद्बाधकतावच्छेदकमेव, शुक्तिरजतत्वन्तु न बाधकतावच्छेदकम्, तत्प्रयोजकाभावादित्याशयः, तत्त्वज्ञानत्वमपि बाध्यत्वादेव न बाधकतावच्छेदकताप्रयोजक स्यात्, शुक्तिरजतत्ववत्, अवच्छेदकताप्रयोजकताप्रयोजकत्वयोराप्याकारभेदाधीनत्वाभ्युपगमे तस्याप्याकारभेदस्य मिथ्यात्वादेव सम्प्रतिपन्नवदप्रयोजकत्वापादने तत्रापि प्रयोजकान्तरान्वेषणपरम्परायामनवस्थेत्याह- तत्रापी ति। बाधकाकारस्य बाध्यत्वेपि बाधकतावच्छेदकत्वमुपपद्यते, साधकाकारस्य साध्यत्वेपि साधकतावच्छेदकत्ववत्, यथार्थप्रवृत्त्यनुपपत्त्यादिना प्रमाणमात्रसाधको यः प्रमाणविशेषः तस्य योयमसाधारणाकारः तस्य मानाधीना मेयसिद्धिरिति न्यायेन मानाधीनसिद्धिकत्वेपि मानसाधनतावच्छेदकत्ववत्, इति शङ्कते- प्रमाणस्थापक इति। सामान्यतः प्रमाणमात्रसाधके प्रमाणविशेषे योयमसाधारणाकारः स सामान्येन प्रमाणसिद्धयनुगुण एव, तदाकारविशेषाभावे तदवच्छिन्नप्रमाणाभावेन तत्साध्यस्याप्यसिद्धेः, बाधकतावच्छेदकविशेषाकारस्य बाध्यत्वे तु तदवच्छिन्नस्यासिद्धया तत्साध्यविश्वबाधो न सिध्येदिति परिहरति- ने ति। विशेषाभावे ति। विलयप्रसङ्ग

पूर्वस्यापि निवर्तकत्वप्रसगः। तस्य तदभावे उत्तरस्यापि तन्न स्यात्। विशिष्टविषयत्वन्तु न सम्भवत्येव । ब्रह्मणि प्रकाशिष्यमाणपरमार्थाकारान्तरानभ्युपगमात् । अपरमार्थाकारान्तरप्रकाशस्य प्रागुक्तन्यायेन दूषितत्वात् । प्रपञ्चमिथ्यात्वव्यवसायस्य च भवन्मतश्रद्धाजडानामिदानीमपि सिद्धत्वात् । परोक्षरूपमिदानीन्तनज्ञानमपरोक्षभ्रमबाधक न भवति, अपरोक्षन्तु भविष्यज्ज्ञानं बाधनायालमिति चेन्न,-परोक्षापरोक्षशब्दाभ्यामविशदविशदत्वविवक्षायामनतिरिक्तविषयतयैव तथाविधभेदासिद्धेः । करणभेदाधीनभेदस्य चाकिञ्चित्करत्वात्। नचास्य करणभेद', भविष्यतोऽपि विशदज्ञानस्य भवद्भिर्वाक्यजन्यत्वाभ्युपगमात् । एतेन वेदान्तनैरर्थक्यमपि फलितम् , यतः कुतश्चिदनुमानादेरप्यद्वैतज्ञानसम्पादनोपपत्तेस्तदतिरिक्तस्य कस्यचिदशस्य वेदान्तेपि भवद्भि' प्रतिपादनानभ्युपगमात् । सत्यस्य प्रामाण्य

इति शेषः । प्रागुक्तन्यायेने ति । भ्रान्तित्वादिनेत्यर्थः । अद्वितीयत्वस्य ब्रह्मस्वरूपाभिन्नतया तज्ज्ञानात्प्रपञ्चमिथ्यात्वज्ञान भिन्नविषयमेव, अतस्तद्विषयमेव भविष्यज्ज्ञान निवर्तकत्वमस्त्वित्याशक्य निराकरोति- प्रपञ्चे ति । अनतिरिक्त विषयतयैवे ति । न्यूनविषयत्वाधिकविषयत्वाभ्यामेव लोके विशदत्वाविशदत्व व्यवहारादित्यर्थः । ननु परोक्षापरोक्षयोः कारणाधीनवैलक्षण्यमिन्द्रियकरणकत्व तदितरकरणकत्वरूपमस्त्येव, तदेव परोक्षापरोक्षशब्दाभ्या विवक्ष्यते, तत्राह— करणभेदे ति । शाब्दज्ञानानुमित्योः करणभेदाधीनभेदे सत्यपि निवर्तकत्वादर्शनादिति भावः । ननु अन्वयव्यतिरेकाभ्या इन्द्रियकरणस्य निवर्तकत्व नेतरस्येत्यत्राह- नचास्ये ति । एव ब्रह्मस्वरूपभूताज्ज्ञानाद्भिन्न ज्ञान निवर्तकमिति कल्पो विकल्प्य दूषित. । इदानी तत्रैव दूषणान्तरमाह एतेने ति । एष्यदिदानीन्तनज्ञानयोर्विषयभेदाभावे निवर्तकत्वानिवर्तकत्ववैषम्याभावापादनेनानिवर्तकज्ञानभूतानुमितिसमानविषयस्य वेदान्तवाक्यजन्यज्ञानस्याप्यनिवर्तकतया वेदान्तानां नैरर्थक्य फलितमित्यर्थः । ननु शाब्दानुमित्योः प्रामाण्याप्रामाण्याभ्या वैषम्यान्निवर्तकत्वानिवर्तकत्वे स्त इत्यत्राह सत्यस्ये ति । ननु यद्यप्यद्वैतविज्ञानमनुमानादेरपि

स्योभयत्रानभ्युपगमात्, व्यावहारिकस्य तु तस्योभयत्र सम्मतत्वात्, उपासनादिपरवेदान्तभागस्य तत्तत्फलविशेषपर्यन्ततया बन्धकत्वेन बन्धनिवृत्तिं प्रति प्रतिकूलत्वाभिधानात्। अतो यदा प्रपञ्चमिथ्यात्वानुमानादिकं न विश्वबाधकं तदा वेदान्तवाक्यान्यपि न तद्बाधकानि स्युः, तदविशिष्टज्ञानजनकत्वात्; यदि तानि बाधकानि स्युः, तदा तदविशिष्टादनुमानादेरपि तद्बाधः स्यादिति निरर्थकस्तत्त्ववेदको वेदान्तभागः। एवञ्च वेदान्तमन्तरेणापि यथावस्थितब्रह्मस्वरूपज्ञानसम्पादनोपपत्तेः शारीरकापशूद्राधिकरणानारम्भप्रसङ्गश्च। ननु भेदवासनाविक्षिप्तचेतसां बुभुत्सोद्बोधने शास्त्रोपयोग इति चेन्न,-सांख्यसौगतसमयेपि तत्त्वविचारमारभमाणै पुरुषैस्तापत्रया

सुसम्पाद, तथापि ब्रह्मोपासनतत्फलादिज्ञानस्यानुमानादिभिर्दुस्सम्पादत्वात् तत्प्रतिपादनद्वारा उपासनानुष्ठानार्थतया वेदान्तोऽर्थवानेवेत्याशङ्क्य अद्वैतोपासनपरवेदान्तवाक्यानामद्वैतज्ञानस्योक्तन्यायेन निवर्तकत्वासिद्ध्या नैष्फल्यस्य सिद्धत्वात् सगुणोपासनपरवेदान्तवाक्यानां तत्फलसिद्ध्या सार्थकत्वेपि प्रपञ्चनिवृत्यर्थतयार्थवत्त्वासम्भवाद्वेदान्तवाक्यं व्यर्थमेवेत्यभिप्रायेणाह– उपासने ति। प्रत्यक्षादिभिर्भेदस्यैव निश्चयेन कोट्यन्तरानुपस्थितेश्च सन्देहासम्भवात्तन्मूलतत्त्वबुभुत्सा नोपपद्यते, तद्विरुद्धाभेदप्रतिपादकशास्त्रदर्शने सति द्वैताद्वैतसन्देहाद्बुभुत्सोत्पद्यत इति बुभुत्सोत्पादकत्वान्न शास्त्रवैय्यर्थ्यमिति शङ्कते– नन्वि ति। साङ्ख्या हि ज्ञातृत्वकर्तृत्वादेर्बुद्धिधर्मत्वमङ्गीकुर्वन्त आत्मनो निर्गुणत्वमाहु, सौगताः प्रपञ्चस्यासत्यत्वमाहु, अतस्तन्मतश्राविणा प्रत्यक्षादेरप्रामाण्यशङ्कया निर्गुणत्वसगुणत्वप्रपञ्चसत्यत्वासत्यत्वसन्देहादबुभुत्सोत्पत्तिसम्भवान्न बुभुत्सोत्पादकत्वेन वेदान्तानां सार्थक्यमित्याह– ने ति। भेदवासनाविक्षिप्तचेतसामपि तत्त्वविचारमारभमाणैः पुरुषैस्तत्त्वबुभुत्सोत्पत्ते रिति योजना। यद्वा– साख्यसौगतसमयेपि आत्मनिर्गुणत्वप्रपञ्चासत्यत्वबुभुत्सया हि विचारमारभन्ते, अतस्तत्रयेनैव हेतुना बुभुत्सोत्पादस्तेनैव हेतुना प्रकृतेऽपि बुभुत्सोत्पत्तिसम्भवात् किं

भिहतानां भेदवासनाविक्षिप्तचेतसामपि तत्त्वबुभुत्सोत्पत्तेः । नच प्रतिपत्तृभेदेन शास्त्रमनुमान च सप्रयोजनमिति वाच्यम्, सर्वात्मना साधकबाधकप्रमाणसम्भावनावैदेशिके विषये शास्त्रार्थतत्त्वस्य मीमांसितत्वात् । अतस्तत्रभवता महत्तरेषु मतगह्वरेषु महावाक्यश्रवणमपि बालव्यामोहनमात्रमित्यापद्यते । अतो न निवर्तकज्ञानब्रह्मणो भिन्नम् । नापि द्वितीयः, ब्रह्मस्वरूपस्य विश्वनिवर्तकत्वे तस्यानादित्वेन प्रपञ्चाध्यासाभावप्रसङ्गेन प्रपञ्चप्रतिभासस्याप्यनुदयप्रसङ्गात् । एकस्यैव दण्डादेर्घटादिकारणत्वतन्नाशकत्ववदुपपद्यत इति चेत्[1] यौगपद्ये विरोधात् ,

---

वेदान्तेनेत्याह– ने ति । बुभुत्सोत्पत्ते रित्यनन्तरमङ्गीकारादिति शेषः । तत्त्वबि चारमारभमाणै. तत्त्वबुभुत्सोत्पत्तेरङ्गीकारादित्यन्वयः । वादिवाक्याद्वा स्वयमेव त्वदुक्ततर्कानुसन्धानाद्वा बुभुत्सोपपत्तेर्वेदान्तनैरर्थक्यमिति तात्पर्यम्। एव वेदान्तानां नैरर्थक्यात् त्वादृशा तच्छ्रवण तत्प्रतिवचनञ्च बालव्यामोहनमित्युपालभते– अत इति । तत्रभवता मित्युपालम्भोक्तिः । महावाक्यम्– जीवब्रह्मणोरभेदप्रतिपादक तत्त्वमस्यादिवाक्यम् । नापि द्वितीय इत्यादि । ननु ब्रह्मस्वरूपस्येति वाक्ये प्रपञ्चाध्यासाभावे निवर्तकस्यानादित्व हेतुतयोक्तम्, एकस्यैवेत्यत्र कारणस्यापि निवर्तकत्वसम्भव उपपाद्यः, तत्कथ युज्यते[1] पूर्व कारणत्वस्य निवर्तकत्वविरोधित्वानुपन्यासात्, नच एकस्यैव यथा कारणत्वनाशकत्वे एवमेकस्यैव ब्रह्मस्वरूपस्याध्यासस्वरूपानिवर्तकत्वतत्सहिष्णुत्वे अप्युपपद्येते इत्येवम्परोऽय ग्रन्थः, ननु ब्रह्मण एवाध्यासकारणत्वतन्निवर्तकत्वसम्भवोपपादनपर इति वाच्यम्,– तत्परिहारग्रन्थस्य यौगपद्ये विरोधा दित्यादेः ब्रह्मण एव जनकत्वनाशकत्वानुपपत्तिविषयत्वात्, नहि दण्ड इति वाक्ये दण्डवैषम्योक्तिपुरस्सर ब्रह्मण अध्यासकारणत्वतन्निवर्तकत्वासम्भवोपपादनप्रतीतेश्च, अत्रापी त्यादिशङ्काग्रन्थे दण्डवदेव कारणत्वनिवर्तकत्वोपपादनविरोधाच्च, अतः कथमेते ग्रन्था उपपद्येरन्निति चेत्[1]

क्रमे तु सहकार्यवश्यम्भावात । नहि दण्डो घटकारणसामग्री मध्यमध्यासीन एव घटं नाशयति, अपितु सिद्धे घटे अभिघातरूपसयोगादिकमपेक्ष्य । अत्रापि तर्हि ब्रह्म स्वरूपेणाध्यासानुगुणम्, अध्यासमेव तु निवर्त्य सहकारित्वेनापेक्ष्य तन्निवर्तकम्, निवर्तनशक्तस्यापि निवर्त्यासिद्धौ निवृत्तिजनकत्वायोगात्; इति चेन्न,— तथाप्यनादेरध्यासस्य चिरतरा-

---

उच्यते, ब्रह्मस्वरूपस्ये त्यादिवाक्ये निवर्तकस्य निवर्त्यस्वरूपासहिष्णुत्वात्तस्य चानादित्वात् कदापि प्रपञ्चाध्यासो न स्यादित्येवाभिप्रेतम् । एकस्यै वे त्यादिशङ्कावाक्ये दण्डादेरिव ब्रह्मण एवाध्यासकारणत्वनिवर्तकत्वे अप्युपपद्येते, कि वक्तव्य निवर्तकस्य तत्स्वरूपसहिष्णुत्वमुपपद्यत इत्यत्रेत्यभिप्रेतम् । अस्मिन् वाक्ये निवर्तकस्यापि कैमुत्यन्यायेनाध्यासस्वरूपसहिष्णुत्वोपपादनार्थं ब्रह्मण एवाध्यासकारणत्वतन्निवर्तकत्वयोरुक्तत्वात्तदनुसारेण सर्वोत्तरग्रन्थ उपपद्यत इति । यद्वा— एकस्यैवे ति वाक्ये दण्डो यथा घटमुत्पाद्य नाशयति, एवं ब्रह्माप्यध्यासमुत्पाद्य निवर्तयतु, निवर्तनशक्तत्वेन निवृत्तिवदुत्पादनशक्तत्वेन तदुत्पत्तेरपि सम्भवात्, अतः कथ प्रपञ्चाध्यासाभावप्रसङ्ग इत्यभिप्रेतम् । क्वचित् कोशे प्रपञ्चाध्यासाभावप्रसङ्गा दि-यनन्तरं प्रपञ्चप्रतिभासस्याप्यनुदयप्रसङ्गादिति वाक्य दृश्यते, तत्र पूर्ववाक्येनादित्वमध्यासाभावे हेतुतया विवक्षित नतूत्तरत्र, तत्र प्रपचप्रतिभासस्याप्यनुदयप्रसङ्गादित्यत्र तत इति विशेष । ब्रह्मस्वरूपस्य विश्वनिवर्तकत्वे तत. प्रपचप्रतिभासस्याप्यनुदयप्रसङ्गादित्यन्वय· । निवर्तकस्य कारणत्वासम्भवो वा विवक्षितः। उत्तरग्रन्थाश्च द्वितीयहेत्वनुसारिण·। क्रम इति । कार्यविलम्बस्य कारणविलम्बप्रयोज्यत्वादिति भावः । तथापी ति । कार्याध्यासे उक्तपरिहारसम्भवेपीत्यर्थः । अनादे रित्यादि । अविद्याध्यासस्येत्यर्थः । पूर्वं द्युरविद्यासत्त्वे तदानीमेव तन्निवृत्त्यावश्यकतया नैतावत्कालमनुवृत्तिरुपपद्यते, तथा तत्पूर्वकालेपि निवृत्त्यावश्यकतया तदानीमपि नाविद्याध्याससम्भव·, एव तत्पूर्वकालेपि त्वया निवृत्तिर्वाच्येति अविद्याध्यासाधिकरणत्वयोग्यक्षणस्य कस्याप्यलाभात् कदाप्यविद्याध्यासो न स्यात्, तदभावे तन्मूल. कार्याध्यासोपि न

नुवृत्तिभङ्गप्रसङ्गात् । एवं पूर्वपूर्वक्षणानुवृत्तिभङ्गे कदाचिदपि नाध्याससिद्धिः । किञ्च परिशुद्ध ब्रह्मस्वरूपमध्यासानुगुणम् , अशुद्धन्तु तन्निवर्तकमिति महदिदमुपपादनम् । अस्तु तर्हि सामग्र्यभावादितः पूर्वमनुत्पन्न सामग्रीसम्पत्तिदशायामुत्पत्स्यमानान्त.करणवृत्तिविशेषमेव सहकारित्वेनापेक्ष्य ब्रह्मैव निवर्तकम्, तन्न, प्राप्ताप्राप्तविवेकेनान्तःकरणवृत्तेरेव निवर्तकत्वप्रसङ्गात् । तथा च सति ब्रह्मस्वरूपान्तर्गततत्त्वपक्षव्याघातः । अत एव न तृतीयः, अपसिद्धान्ताच्च । किञ्च– तस्य सत्यत्वे भेदांशेन ब्रह्मणस्स द्वितीयत्वप्रसङ्गः । मिथ्यात्वे त्वभेदांशेन ब्रह्मणोपि मिथ्यात्वप्रसङ्गः। नित्यत्वानित्यत्वविकल्पेनापि दूषणमूह्यम् । चतुर्थस्तूभयप्रतिक्षेपरूपोनिर्वचनीयोक्तदूषणनयेनोभयसिद्ध्यनतिरेकात् दूषणेनैव दूषितः । पञ्चमस्तु परिशिष्यते । तथाभूत कि तज्ज्ञानं यथाकथचिदपि प्रतीतिपदवीं नावतरति, अथावतरति ? पूर्वत्र किं साधनदूषणप्रयासेन? उत्तरत्र कथचिदपि उक्तकोटिबहिर्भावासिद्धेः न पृथग्दूषणीयमवशिष्टमिति । किञ्च– निवर्तकज्ञानं निवर्तिष्यते नवा? पूर्वत्र तन्निवृत्तेरेवागन्तुकत्वाद्ब्रह्मस्वरूपातिरिक्ताविद्यास्थिति प्रसङ्गः । उत्तरत्र ब्रह्मस्वरूपातिरिक्तनिवर्तकज्ञानसद्भावेनैवा विद्यास्थितिरनिवार्या । अतो यदविद्याया निवर्तकत्वेन सम्मतं

स्यादित्यर्थः । एवमविद्याध्यासानुपपत्त्या कार्याध्यासानुपपत्तिरुक्ता । इदानीं कार्याध्यासासम्भवे हेत्वन्तरमाह—किञ्चे ति । शुद्धम्– आरोप्याविषयकम् । अशुद्धम्– आरोप्यविषयकम् । अध्यासमेव तु निवर्त्य सहकारित्वेनापेक्षेत्यध्याससैव सहकारित्वोक्तेः तस्मिन् स्वस्यैव तद्रूपरूपत्वादशुद्धस्यैव निवर्तकत्वमित्युक्त भवति, एतत्प्रतिकोटितया ब्रह्म स्वरूपेणाध्यासानुगुणमित्यत्रारोप्याविषयकत्वलक्षणशुद्धिरेवाभिप्रेता स्यात् , ततश्चारोप्याविषयमध्यासानुगुणमारोप्यविषय तन्निवर्तकमिति व्याहतमित्यर्थः । प्राप्ताप्राप्तविवेकेने ति । एतेन

तदेव स्वात्मना स्वनिवृत्त्यावा तामेव स्थापयतीति विपरीता पत्तिरिति । निवर्तकज्ञानप्रध्वसोपि निवर्तिष्यत इति चेत्? तर्हि तत्तन्निवर्तकनिवृत्त्यनुवृत्तिप्रसङ्गेन ब्रह्मणो यावदात्मभाविन्यविद्या नुवृत्तिस्स्यादिति वैपरीत्यस्थैर्यापत्तिः। इत्यल हिताहितविपर्यस्तचेतसां शोच्याना निग्रहणेति ।

इति शतदूषण्यां निवर्तकानुपपत्तिः
त्रिचत्वारिंशो वाद' ॥४३॥

———(*)———

वृत्तिप्रतिबिम्बितचैतन्य निवर्तकमित्ययमपि पक्षो निरस्तो वेदितव्यः । प्राप्ता प्राप्तविवेकेन वृत्तेरेव निवर्तकत्वप्रसङ्गात् । किञ्च यथाह्ययमित्यादिभिरापात प्रतीत्यान्त.करणे प्रतिबिम्बकल्पनायामपि न निवृत्तौ प्रतिबिम्बकल्पनम्, तत्र तादृशस्यापि प्रमाणस्यादर्शनात् । नच तत्परिणामित्वादेव तत्र प्रतिबिम्ब कल्पना, जलपरिणामभूतायां करकाया प्रतिबिम्बादर्शनात् ॥

इति श्रीवाधूलकुलतिलकश्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्येन
तदेकदेवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्ध
महाचार्यापरनामधेयेन रामानुजदासेन विरचिताया
शतदूषणीव्याख्याया चण्डमारुताख्यायां
निवर्तकानुपपत्तिभङ्गो नाम
त्रिचत्वारिंशस्स्कन्धः ॥४३॥

श्रीरस्तु ।

अथ चतुश्चत्वारिंशो वादः ।

(*)

सत्वानीव विरुद्धजातिजनुषा सिद्धानि सिद्धाश्रमे
वैर यत्र मिथस्त्यजन्ति विधयस्सर्वैर्निषेधैस्सह ।
त रङ्गेशयमंगसगिकमलालक्ष्येश्वरप्रक्रियं
शान्तावद्यमनन्तमङ्गलगुणं देव प्रपद्येमहि ॥

येय ब्रह्मण श्रवणमननिदिध्यासनादिक्रमपरिणतविशदा द्वैतवाक्यार्थविज्ञानहेतुका निश्शेषाविद्यानिवृत्तिरुच्यते, सा किं मध्यासरूपा, नवा[1] पूर्वत्र कथं निश्शेषाविद्यानिवृत्तिः, अध्यास रूपायां तस्यां सत्यां तन्मूलाविद्याया अपि विद्यमानत्वात्, उपादान मन्तरेणोपादेयस्थित्ययोगात्। आत्मोपादाना सास्विति चेन्न,-आत्मनः परिणामित्वप्रसगात्। सत्योपादानायाश्च सत्यत्वेन सद्वितीयत्वप्रसगात्। नच दोषमन्तरेणाध्यासो भवतामपीष्टः, तथा सत्यविद्याकल्पनस्यैव निर्मूलत्वप्रसंगात्। यदि सा ब्रह्मवदविद्यावच्च उपादानरहिता, तदा

अध्यासरूपे ति । अध्यासो– रूप यस्यास्साध्यासरूपा, मिथ्येति यावत् । कथ मिति । अविद्यातत्कार्ययोस्सत्त्वादित्यर्थः, अपिना कार्यविद्यमानत्वस्य समुच्चयात् । सत्योपादानायाश्चे ति । उपादानोपादेययोस्तुल्यसत्ताकत्वस्य तेनैवाङ्गीकारादिति भाव. । नचे ति । दोषनिवृत्तावध्यासनिवृत्तेर्दर्शनाद्यावदध्यास दोषानुवृत्तिरास्थेयेति भावः । निर्मूलत्वप्रसङ्गा दिति । नच दोषत्वेन तत्कल्पनेऽप्युपादानत्वेन तत्कल्पनमस्त्विति वाच्यम्, अविद्यानिवृत्तिवदेव प्रपञ्च स्यात्मोपादानत्वसम्भवादिति भावः । यदी ति । निरुपादानत्वे अनादित्वा दविद्यया सह स्थितिर्वाच्या, साचानुपपन्नेत्यर्थः । नच निरुपादानत्वेपि नानादित्वम्, ब्रह्मज्ञानरूपवृत्तिसापेक्षत्वादिति वाच्यम्,– कार्यत्वे अविद्योपादानत्व नियमात् । नन्वविद्यानिवृत्तिरविद्योपादानैव, न ब्रह्मोपादाना, नापि निरुपादाना, नच निश्शेषाविद्यानिवृत्त्यसम्भवः, अविद्यानिवृत्तेरपि निवृत्तेः, इति शङ्कते–

कथं तया सहाविद्या तिष्ठेत्। स्थिता वा किमिति पश्चान्नावतिष्ठते। निवृत्तिरपि ब्रह्मव्यतिरिक्तत्वैकप्रयोजकप्रयुक्तमिथ्यात्ववशान्निवर्तिष्यत इति निश्शेषाविद्यानिवृत्तिरिति चेन्न,- निवृत्तिनिवृत्तौ तन्मिथ्यात्वे च निवर्त्योन्मज्जनतत्सत्यत्वयोः प्रसंगात्। प्रागभावनिवृत्तिरूपस्य घटस्य निवृत्तावपि प्रागभावानुन्मज्जनवत्, जागरदशायां स्वाप्नान्धकारनिवृत्तिरूपस्य स्वाप्नप्रदीपस्य निवृत्तावपि स्वप्नान्धकारमिथ्यात्ववच्चानुन्मज्जनमिथ्यात्वयोस्सिद्धिरिति चेन्न;- घट तत्प्रागभावनिवृत्त्यात्मकस्य प्रध्वसस्य स्वाप्नतेजस्तमोबाधकस्य जागरस्य च विद्यमानत्वेन तद्द्वयानुन्मज्जनमिथ्यात्वयोरुपपत्तेः। अत्र त्वविद्यातन्निवृत्त्योर्द्वयोरपि प्रत्यनीकमन्यन्न परिशिष्यते। अस्ति ब्रह्मस्वरूपमिति चेन्न;- तस्य तदुभयप्रत्यनीकत्वे तयोरनादित्वात्तयोः प्रागप्यारोपाभावप्रसङ्गात्। तथाच सति भेद

निवृत्तिरपी ति। निवृत्तिनिवृत्तेरपि कार्यत्वेनाविद्योपादानत्वावश्यम्भावात् अविद्यास्थितिरवर्जनीयैवेत्यभिप्रायेणाह–नेति। दूषणान्तरमाह– **निवृत्ती** ति। **तन्मिथ्यात्व** इति। निवृत्तेर्मिथ्यात्वे प्रतियोगिन एव प्रतिपन्नोपाधौ त्रैकालिकनिषेधरूपतया मोक्षकालेपि तत्सत्त्वेन प्रतियोगिरूपनिवर्त्यस्य सत्यत्व स्यादित्यर्थः। यद्वा घटे विद्यमान एव घटो नष्ट इति भ्रमे सति तत्र प्रातिभासिकनिवृत्तिप्रतियोगिनस्सत्यत्वदर्शनादविद्यानिवृत्तेर्मिथ्यात्वे निवर्त्यसस्यत्व स्यादित्यर्थः। निवृर्त्यपेक्षयोत्कृष्टसत्ताकत्वमापाद्यमिति न व्यावहारिकमत्यत्वसिद्धेरिष्टापादना घटादिनिवृत्तिः पक्षसमेति बोध्यम्। **स्वाप्नान्धकारनिवृत्तिरूपस्ये** ति। इद भावान्तराभावमतेन प्रदीपपर तन्नियताभावपर वा। **प्रदीपस्य निवृत्तावपी** ति। निवृत्तिपद तत्प्रयोज्यमिथ्यात्वपरम्। **स्वाप्नतेजस्तमोबाधकस्ये** ति। बाधकपद विरोधिपरम्। जागरपद तत्कालीनाभावपरम्, भावान्तराभावमतेन जागरस्यैव तदभावत्वविवक्षया तत्परमेव वा। स्वाप्नतमःप्रतियोगिकायास्स्वाप्ननिवृत्तेर्मिथ्यात्वेपि न तमसस्सत्यत्वासिद्धि., जागरकालीनाभावप्रतियोगित्वेन तेजसो मिथ्यात्व

प्रतिभासादेर्निर्मूलत्वे सर्वप्रमाणविरोधो मोक्षशास्त्रानारम्भश्च, पूर्वं तदविरोधित्वे पश्चादपि तद्वैरासम्भवात् । कैवल्येन रूपेण पश्चाद्विरोध इति चेन्न,— कैवल्यस्य स्वरूपमात्रत्वे दत्तोत्तरत्वात् । स्वरूपातिरिक्तत्वे सत्यत्वे सद्वितीयत्वप्रसङ्गात्, तन्मिथ्यात्वे तत एवाविद्यास्थित्यवश्यम्भावात् । एतेन प्रयोजक यदुक्तम्, तदपि दत्तोत्तरम् । अतएव न द्वितीयः, अनध्यासरूपाया निवृत्तेस्स्वरूपान्तर्भावादिविकल्पदुस्स्थत्वात् । अन्तर्भावे ब्रह्मणोऽनादित्वेनाविद्याया नित्यनिवृत्तिप्रसङ्गात् । यद्यपि घटादेः स्वरूपमेव तत्प्रागभावनिवृत्तिरितिवत् ज्ञानस्वरूप ब्रह्मैवाज्ञाननिवृत्तिरिति वक्तु शक्यम्, तथापि स्वप्रागभावनिवृत्तिरूपघटादेरिव स्वाज्ञाननिवृत्तिरूपब्रह्मणोपि तदनन्तरत्वावश्यम्भावे कादाचित्कत्वादयो दोषास्समुन्मिषेयुः । ननु पूर्वसिद्धभूतलस्वरूपमेव पश्चिमसिद्धघटादिनिवृत्तिरित्यभावापलापवादिभिरभ्युपगम्यत इति चेत्[१]

सिद्धया तन्मिथ्यात्वसिद्धये प्रतियोगिनः प्रतिपन्नोपाधौ निषेधरूपत्वस्य, तत्रैकः कालिकत्वस्य वाऽनपेक्षणात् । तमसो मिथ्यात्वञ्च तेजोवज्जागरकालीनाभाव प्रतियोगित्वादेवेत्यर्थः । अन्य दिति । प्रतियोगिन इति शेषः । तस्य तदुभय प्रत्यनीकत्वपि अद्वैतसाक्षात्कारात्प्राङ् न तद्विरोधित्वमिति शङ्कामनूद्य परिहरति- पूर्व मिति । नित्यनिवृत्तिप्रसङ्गा दिति । अविद्यास्वरूपस्यैव कदाप्यसम्भवादिति तात्पर्यम् । ननु कथ ब्रह्मणोऽविद्यानिवृत्तित्वम्[१] तथासति घटस्यापि पटनिवृत्तित्वप्रसङ्गात्, अतो ब्रह्मैवाविद्यानिवृत्तिरिति पक्षस्यानुत्थितिरेवेति किं तद्दूषणगवेषणेनेत्याशङ्क्य, कथञ्चित्तदुत्थान समर्थयन् दूषणान्तरमाह- यद्यपी त्यादिना । अज्ञानस्य ज्ञानप्रागभावरूपत्वाभावेपि ज्ञानप्रागभावप्रतिपादनयोग्या ज्ञानशब्दबोध्यत्वमात्रेण भावरूपाज्ञानस्य ब्रह्मरूपज्ञानप्रागभावत्वाङ्गीकारेणवा तन्निवृत्तिरूपत्व ब्रह्मणो घटदृष्टान्तेन उपपाद्यत इति ध्येयम् । वस्तुतस्तु अन्यस्यासम्भवात् ब्रह्मैवाविद्यानिवृत्तिरिति वक्तव्यमिति विवक्षितम् ।

ननु कथ तदनन्तरत्वस्यावश्यकत्वम्? तन्निवृत्तेस्तत्साध्यत्वनियमात्, साध्यत्वस्य चानन्तर्यनियतत्वगदिति चेत्? प्रागभावस्येव क्षेमसाधारणसाध्यत्वस्य प्रवृत्यङ्गस्य सम्भवात्; इति चेन्न;— यस्मिन् सत्युत्तरक्षणे यस्य सत्त्व यदभावे यदभावस्तत्तत्साध्यमित्यादिना हि क्षेमसाधारण साध्यत्व निरुच्यते, तच्च प्रागभावादौ सम्भवत्येव, मङ्गले सति विघ्नप्रागभावः, तदभावे तदभाव इति सत्त्वात्, नच प्रकृते तथा सम्भव', अविद्याभावे ब्रह्माभावासिद्धेः। ननु तत्साध्यत्वाभावेपि तन्निवृत्तित्वमस्तीति चेन्न,— तथाऽदर्शनात्। किंच तदानन्तर्याभावे तत्समानकालीनतया ब्रह्मणस्तद्विरोधित्वाभावेन तन्निवृत्तित्वमनुपपन्नमेव। आदिपदेनाविद्योपादानकत्वादिक विवक्षितम्। अपिच- एव ब्रह्मणोऽविद्यानिवृत्तिरूपत्वाभ्युपगमे ज्ञाननिवर्त्यत्वमविद्याया न स्यात्. ब्रह्मणस्सदातनत्वेन ज्ञानसाध्यत्वासम्भवात्, ज्ञानजन्यनिवृत्तिप्रतियोगित्वस्यैव ज्ञाननिवर्त्यत्वरूपत्वात्।

अत्राह नवीनः-- येन विना यत्तिष्ठत्येव यस्मिन् सति च न तिष्ठति, तत्तन्निवर्त्यम्, अविद्यानिवृत्तिर्ज्ञानेन साध्येत्युपचर्यते, इति। तदसत्, एव पारिभाषिकनिवर्त्यत्वनिर्वचनेपि तत्त्वज्ञानवैयर्थ्यस्यानुद्धारात्। अविद्याया ज्ञाननिवर्त्यत्वं सिद्धयर्थत्वान्न वैयर्थ्यमिति चेत्? न तावत् तदविद्यास्वरूपमेव, अनादित्वेना साध्यत्वात्। नापि तदतिरिक्तम्, सत्यत्वे अद्वैतहानेः मिथ्यात्वे तस्यानिवर्त्यत्वे तदर्थं तदुपादानाविद्यास्थित्यवश्यम्भावात्, निवर्त्यत्वे च तस्यापि निवर्त्यत्वादनवस्थितनिवर्त्यत्वपरम्परासिद्धये तत्त्वज्ञानस्याविनाशितया तदुपादानाज्ञानस्यावस्थितिप्रसङ्गात्। किञ्चाविद्यायाः ब्रह्मरूपनिवृत्तिप्रतियोगित्वस्य सिद्धत्वात् ब्रह्मणो ज्ञानोत्तरकालीनत्वसिद्धये ज्ञानार्थप्रवृत्तिरित्यापन्नम्, तच्च न सम्भवति, ज्ञानोत्तरकालीनत्वस्यापुरुषार्थत्वात्। किंच तिष्ठत्येवेत्येवकारेणाविद्याभावो व्यावर्तनीयः, मच कथ व्यावर्तनीयः? ब्रह्मस्वरूपस्य तस्यानादित्वात्। ननु तद्व्यावृत्तिस्तद्भाव एव, अतोऽविद्याभावस्य व्यावृत्तिरविद्यैवेति कथमविद्याभावस्य न व्यावर्त्यतेति चेन्न;— अविद्याया मानाभावेन ब्रह्माभावत्वासिद्धेः। तदभावप्रतियोगिनस्तत्प्रतियोगिकाभावत्वनियमादविद्यास्वाभावरूपब्रह्मप्रतियोगिकाभावत्व वाच्यम्; नचाय नियमोसिद्ध', घटत्वस्य घटान्योन्याभावाभावत्वेपि घटान्योन्याभावस्य घटत्वाभावत्वासिद्धेरिति वाच्यम्,— घटान्योन्याभावे घटत्व नास्तीति व्यवहारस्य घटान्योन्याभावविषयतया घटान्योन्याभावस्य घटत्वाभावरूपत्वादिति चेन्न,—

अप्रयोजकत्वेन व्यातथसिद्धेः । ध्वसप्रतियोगी न ध्वसात्यन्ताभाव इत्यपि नियम दर्शनेन ब्रह्मरूपध्वसप्रतियोग्यविद्यायास्तदभावत्वासिद्धेश्च । नचाविद्याया ब्रह्म प्रागभावत्व शङ्कनीयम् , मानाभावात् । ध्वसप्रतियोगिनस्तत्प्रागभावत्वनियमो ऽस्तीति चेन्न,– अप्रयोजकत्वेन व्यातथसिद्धे' । प्रतियोगिसमानकालीनत्वाच्च न प्रागभावत्वम् । ब्रह्मणस्सर्वदा सत्त्वेन कदाचिदपि ब्रह्म नास्तीत्यबाधितव्यवहारा सिद्धेः न ब्रह्मप्रतियोगिकससर्गाभावसम्भवः । नच विद्यमानत्वाभावो व्यावर्त्यः, तद्विद्यमानत्वाभावापेक्षया तदभावस्यैव लघुत्वेन तस्यैव लक्षणानुप्रवेशात् । स्वाधिकरणक्षणोत्तरयावद्यत्प्रागभावकालसम्बन्धि यदिति येन विना यत्तिष्ठत्येवेत्यस्यार्थ इति विवक्षितमिति चेन्न,– एवमपि ब्रह्मस्वरूपमेव निवर्तक वृत्तिरवच्छेदकैवेति मते असम्भव एव, ब्रह्मणः प्रागभावाप्रतियोगित्वात् । किञ्चैवमविद्यायास्सर्व प्रागभावप्रतियोगिनिवर्त्यत्वापत्ति , अविद्यायाः यावद्घटादिप्रागभावकालवृत्तित्वात् , घटादिसमानकालीनब्रह्मरूपाभावप्रतियोगितया यस्मिन् सति यन्न तिष्ठतीत्येतन्नास्त्येव, घटादौ सत्यप्यविद्यमानत्वादिति चेन्न,– यस्मिन् सति न तिष्ठतीत्यनेन यदुत्तरकालीनध्वसप्रतियोगीति विवक्षितत्वात् । ननु यदुत्तरकाले विद्यमानत्वाभाव एव विवक्षितः, नच घटोत्तरकाले ऽविद्याया विद्यमानत्वाभाव इति चेन्न,– विद्यमानत्वाभावस्य व्यावहारिकस्याविद्याकाले प्रतियोगिना साक विरोधेनासम्भवात् , तदुत्तरकाले चोपादानविरहादसम्भवात् । सर्वोपशमादि श्रुतिबलाच्च विद्यमानत्वाभावस्य ब्रह्मस्वरूपत्वात्तस्य च घटोत्तरकाले सत्त्वात्तद विद्याया घटादिनिवृत्तित्व स्यादेव । किंच– मोक्षदशाया परोक्षवृत्त्यभावात् अविद्याया अत्यभावात् येन विना यत्तिष्ठत्येवेत्यसिद्धम् । ननु येन विनेत्यत्र प्रागभावो विवक्षित इति चेन्न,— एवमपि घटस्य मुद्गरादिनिवर्त्यत्वाभावापत्ते', मुद्गरप्रागभावकाले घटावस्थानियमाभावात् घटप्रागभावकाले घटस्यासत्त्वात् । नच येन विना यत् स्वोत्पत्त्युत्तरकाले तिष्ठतेवेति विवक्षितमिति वाच्यम् , तथा सत्यविद्याया उत्पत्त्यभावेन निवर्त्यत्वाभावप्रसङ्गात् । नच येन विना यत् स्वाधिकरणोत्तरक्षणे तिष्ठत्येवेति विवक्षितमिति वाच्यम् , एवमपि घटरूपप्रागभावस्य घटस्पर्शनिवर्त्यत्वापत्ते. । किंच– यस्मिन् सति यन्न तिष्ठतीत्यस्य यदधिकरण क्षणोत्तरक्षणवर्त्यभावप्रतियोगीति ह्यर्थः । स च प्रकृते न सम्भवति, अविद्या

निवृत्तिकाल एवाऽऽविद्यकस्यैव कृत्स्नस्यापि निवृत्त्या ज्ञानाधिकरणक्षणोत्तरक्षणस्या भावात्। नन्वविद्यानिवृत्तिसाध्यत्वादाविद्यकनिवृत्तेः कालस्य नाविद्यया सह निवृत्तिः, किन्त्वनन्तरमेवेति ज्ञानस्य द्वितीयक्षणोत्पत्येवेति चेन्न,— अविद्यातत्कार्य निवृत्त्योर्ब्रह्मस्वरूपतया कार्यकारणभावासिद्धेः। घटकीभूतोत्तरक्षणस्योत्तरक्षणा भावेन तस्य निवर्त्यत्वाभावप्रसङ्गाच्च। ननु यस्मिन् सति यन्न तिष्ठतीत्यनेन उत्तर कालो न विवक्षितः, येन तदभावाद्दोषस्यात्, किन्तु यद्यत्सत्तात्प्रागभावकालयो रविद्यमानाभावप्रतियोगीति विवक्षितमिति चेन्न,— ज्ञानतत्प्रागभावकालयोर्ब्रह्मणो विद्यमानत्वेनाविद्यायास्तत्कालाविद्यमानाभावप्रतियोगित्वाभावेन तन्निवर्त्यत्वास— म्भवात्।

यदप्याह— यस्मिन् सति यस्य अग्रिमक्षणे सत्त्वं यद्व्यतिरेके चाभाव इतत्तत्साध्यम्, आत्मस्वरूपाविद्यानिवृत्तेश्च ज्ञाने सति सत्त्व तद्व्यतिरेके चाभावः, तत्प्रतियोग्यविद्याया एव तदभावरूपत्वात्तस्या ज्ञानात्पूर्वं कल्पितायां विद्यमान त्वात्; नच यद्व्यतिरेके असत्त्वमिति कार्यमत्वाभाव उच्यते, सचाविद्या निवृत्तेः नास्ति, तस्यास्सदात्मरूपत्वादिति वाच्यम्;— यस्य सत्त्वाभावः इत्यस्माद्यस्याभाव इत्यस्यैव लघुत्वात्। तस्मान्नित्यसिद्धसत्यात्मस्वरूपैव मुक्ति- र्ज्ञानसाध्येति। अत्र ब्रूमः,— अविद्याया ब्रह्माभावत्वे मानाभावः। नच तदभावप्रतियोगिनस्तत्प्रतियोगिकाभावत्वनियमः, अप्रयोजकत्वेन व्याप्त्यसिद्धेः। नच घटस्य घटात्यन्ताभावाभावत्वं कथ सिद्ध्येदिति वाच्यम्,— घटवति भूतले इह घटाभावो नास्तीति व्यवहारस्यातिरिक्ताभावविषयत्वे गौरवात्, घटविषयत्वमिष्यते, ब्रह्मणस्सदा सर्वत्र सत्त्वेन इहेदानी ब्रह्म नास्तीत्यबाधित व्यवहारासिद्धेः न ब्रह्मप्रतियोगिकाभावत्वसम्भव.। किंच यदभावे यदभावः इत्यत्र किमभावमात्रं विवक्षितम्, उत प्रतियोगिविरोध्यभाव.? नाद्य, प्रमेयत्वाभिधेयत्वयोः परस्परसाध्यत्वापत्तेः, व्यधिकरणधर्मावच्छिन्नतत्प्रतियोगि काभावस्य केवलान्वयित्वात्। किञ्चैव मोक्षसाधनत्वस्य केवलान्वयित्वापत्तिः। न द्वितीयः, ब्रह्मस्वरूपाया निवृत्तेरविद्यालक्षणप्रतियोगिविरोधित्वाभावात्। ननु विरोध्यभावो विवक्षितः, नच पूर्वोक्तदोषः, कैवल्यविशिष्टस्य निवृत्ति- त्वात्, तस्य च विरोधित्वादिति चेन्न,— तथा सति क्षेमसाधारणसाध्यत्वोप

किमनेन, अस्माभिः तत्रापि घटसंसर्गप्रत्यनीकतारूपस्य पराभि मतघटाभावाविनाभूतभावान्तरात्मककालविशेषसंसर्गतन्मूलपरिणामा दे: प्रत्यक्षसिद्धस्य भूतलावस्थाविशेषस्य यथायथं घटाभावत्वा भ्युपगमात्तस्य घटसंसर्गोत्तरभावित्वेन पूर्वसिद्धत्वासिद्धिः । नन्वभाववादिनोपि कार्यप्रागभावस्य कारणाश्रयत्वात्कारणेपि कार्य

पादनवैयर्थ्यात्कैवल्यविशिष्टब्रह्मस्वरूपस्य साध्यत्व हि कैवल्यस्य साध्यत्वे पर्य वस्यति, तस्य च साध्यत्व घटादिवदेवोपपद्यत इति । किंच कैवल्यस्य स्वरूपान्तर्भावबहिर्भावयोरुक्तदोषाः प्रादुष्यु. ।

किंचैवमविद्या ब्रह्मणा सह भिन्नसत्ताकत्वेन विरोधाभावाद्द्वैतसाक्षा त्कारात्प्रागिवानन्तरमपि स्यादेवेत्यनिर्मोक्षप्रसङ्गः । किंच- दु खानुत्पादस्य दु.खाविरोधित्वभ्रमे न हि कश्चित्प्रायश्चित्तादौ प्रवर्तते, ततश्चानादिसहचरितयोः प्रतियोग्यनुयोगिनोरविद्याब्रह्मणोरविरोधित्वे ज्ञायमाने कथ कश्चिदपि ब्रह्मस्वरूपा विद्यानिवृत्त्यर्थ श्रवणादौ प्रवर्तेत । किंच- ब्रह्मणस्सिद्धत्वेन इच्छाया असिद्ध गोचरत्वनियतायास्तत्रासम्भवात् न तदर्थ श्रवणादौ प्रवृत्तिसम्भवः । उत्तर कालदु खप्रागभावसम्बन्धस्यासिद्धत्वात्तदर्थ प्रायश्चित्तादौ युज्यत एव प्रवृत्ति । नच प्रकृतेपि ब्रह्मण उत्तरकालीनसम्बन्ध एव साध्यः, तत्त्वज्ञानाभावेपि ब्रह्मणो नित्यतया उत्तरकालसम्बन्धस्याक्षतेः । प्रायश्चित्ताकरणे चोत्तरकाल दु:खस्यैवोत्पत्त्या दु खप्रागभावो न स्यादेवेति युज्यत एव तदर्थिनः प्राय श्चित्ते प्रवृत्तिः । किंच तत्त्वज्ञाने उत्पन्ने अविद्याया अविद्यमानत्वेन त त्कार्यकालस्याप्यविद्यमानत्वेन कथ तत्कालसम्बन्धस्य साध्यता ? ननु कथ दु:खप्रागभावोत्तरकालसम्बन्धस्यासिद्धता ? प्रतियोगिनोरेव सम्बन्धत्वात्, तयोश्च प्रतियोगिनोस्सिद्धत्वादिति चेन्न,- स्वस्य दु.खप्रागभावोत्तरकालसम्ब न्धस्यासिद्धतया तदर्थिनः प्रायश्चित्ते प्रवृत्तिसम्भवात् ।

घटसंसर्गप्रत्यनीकतारूपस्ये ति । प्रत्यनीकता, रूप- धर्मो, यस्य तत् प्रत्यनीकतारूपम्, तच्च कालविशेषससर्गादेर्विशेषणम् । **घटाभावाविनाभूते** ति । घटाभावाधिकरणत्वेन पराभिमतदेशनिष्ठेत्यर्थः । **परिणामादे**रित्यादिपदेन तदानीन्तनद्रव्यान्तरसयोगादिक गृह्यते । तच्चावस्थाविशेषस्य समानाधिकरण

प्रागभावस्य सम्बन्धोभ्युपगत, सम्बन्धिनः प्रागभावस्य निवृत्तौ च तत्सम्बन्धनिवृत्तिरास्थेया, सा च सम्बन्धनिवृत्ति· कारण स्वरूपानतिरेकिणीष्टा च, कार्यन्तु दृश्यमान स्वप्रागभावस्यैव निवृत्ति·, एवं कार्यकारणयोस्सम्बन्धोपि स्वप्रागभावानिवृत्तिरेवेति परिशेषात पूर्वसिद्धकारणस्वरूपमेव कार्यप्रागभावकारणयोस्सम्बन्ध निवृत्तिरिति, तदप्यसत्, कार्यतत्प्रागभावयो कारणेन सह स्वरूपातिरिक्तसम्बन्धमनभ्युपगच्छता पुरतो नेद चोद्यम्। अभ्युपगच्छतामपि कार्यसम्बन्धप्रागभाव कार्यप्रागभावकारणयोस्सम्बन्ध एवेति तस्य तन्निवृत्तित्व युक्तम्। कार्यमेव वा स्वप्रागभाव तत्सम्बन्धयोरप्यभावो भवतु, विरोधाविशेषात्। यथैक एव प्रध्वसः कार्यतत्प्रागभावयो. प्रतिपक्ष इत्यादि स्वयमूह्यम्। ननु भवतामप्यविद्यानिवृत्तिः पूर्वसिद्धजीवस्वरूपाविर्भाव एव, "स्वेन रूपेणाभिनिष्पद्यत" इति श्रुत्यनुसारात्, तद्वद्ब्रह्म स्वरूपाविर्भाव एवास्माकमविद्यानिवृत्तिरस्त्विति चेन्न,– संसार दशायामनाविर्भूतानेकाकारगोचरस्याविर्भावशब्दार्थस्य धर्मभूतज्ञान विकासविशेषस्य पूर्वं कर्मणा प्रतिबद्धस्य पश्चात्तन्निवृत्तौ स्वरूपानुवन्धित्वादनिवर्ननीयस्यास्माभिरभ्युपगमात्। भवतस्तु निराकारे ब्रह्मणि नित्याविर्भूतज्ञप्ति[व्यक्ति]मात्रस्वरूपे नापूर्व· कश्चिदाविर्भावः। ननु ब्रह्माकारवित्तर्तान्त.करणवृत्युपलक्षितस्वरूपेणापूर्वेण ब्रह्म स्वाज्ञाननिवृत्ति., कारणविनाशाच्चोपलक्षकान्त करणवृत्तिनाशे

विशेषणम्। **नेदं चोद्य** मिति। प्रागभावसम्बन्धस्य प्रागभावाभिन्नतया प्रागभावनिवृत्तिरूपस्य कार्यस्यैव स्वप्रागभावसम्बन्धनिवृत्तिरूपत्वादित्यर्थः। **अभ्युपगच्छता** मिति। **कार्यसम्बन्धप्रागभाव एव कार्यप्रागभावकारणयोस्सम्बन्ध** इति योजना। **तस्य**– कार्यसम्बन्धस्य। **तन्निवृत्तित्वम्**– कार्यप्रागभावसम्बन्धनिवृत्तित्वम्। **स्वरूपानुवन्धित्वादनिवर्तनीयस्ये** ति।

तदुपलक्षणाभावेन न सद्वितीयत्वादिप्रसङ्गावकाश इति चेत् ? तदप्यतिमन्दम्, उपलक्षणस्वरूपस्यैव निष्कर्षवशान्निवृत्तिरूपत्वप्रसङ्गेनाध्यासरूपविकल्पानुप्रवेशात्, तस्य च दूषितत्वात् । उक्तानां च विकल्पोत्तराणां तथाविधान्तःकरणवृत्तिनाशे तन्मूलोपलक्षणनाशे च तुल्यप्रसरत्वात् । बहिर्भावे तु सद्वितीयत्वापत्तेः । समुच्चये विरोधात् । आकारभेदकल्पनेऽनवस्थानात् । आकारैक्ये भेदाभेदयोरैक्यप्रङ्गात् । किंच बहिर्भावे च सा किमनादिरुतादिमती? पूर्वत्र नित्यमविद्यानिवृत्तिप्रसङ्गः । उत्तरत्र कारणाभावात् कार्या

कर्मनिबन्धनत्वाभावोऽनिवर्तनीयत्वं च "स्वेन रूपेण" त्यनेन विवक्षितमिति भावः । तदुपलक्षणाभावेने ति । उपलक्षकाकाराधीनोत्क्रमणत्ववदत्राप्युपलक्षकवृत्त्यधीनः कश्चिद्धर्मविशेषः उपलक्षणशब्देन विवक्षितः । अत एवाह– तन्मूलोपलक्षणविनाशेचे ति । बहिर्भाव इति । ननु भावाद्वैताङ्गीकारादभावेन सद्वितीयत्वं न दोषायेति चेन्न,- अद्वितीयश्रुतेस्सङ्कोचप्रसङ्गात् । तदङ्गीकारे च मानान्तरश्रुत्यन्तराविरुद्धविषयत्वमेव युक्तम् । नन्वन्तर्भावान्न बहिर्भावप्रयुक्तो दोषः, बहिर्भावान्नान्तर्भावप्रयुक्तो दोष इति शङ्कामनूद्य परिहरति- समुच्चय इति । अन्तर्भावबहिर्भावयोः सत्त्वे उभयप्रयुक्तदोषस्स्यात्, नत्वन्यतरेण इतरप्रयुक्तदोषनिरास इत्यपि द्रष्टव्यम् । ननु स्वरूपेणैवैकस्यान्तर्भावबहिर्भावयो. कल्पने विरोधः, नतु किञ्चिदाकारविशिष्टरूपेण तत्कल्पने, इत्याशङ्क्य, कि केन चिदाकारेणान्तर्भावः आकारान्तरेण बहिर्भाव इत्यन्तर्भावबहिर्भावप्रयोजकाकारभेद इष्यते, उतैक एवाकार उभयप्रयोजक इति विकल्पमभिप्रेत्याद्य दूषयति– आकारभेदे ति । तयोरप्याकारयोरन्तर्भावबहिर्भावान्यतराङ्गीकारे तत्तत्पक्षोक्तदोषप्रसङ्गेन समुच्चयस्यैवाङ्गीकर्तव्यत्वात्, तत्र च विरोधपरिहाराय तत्राप्याकारभेदो वाच्यः, तत्रापि तथेत्यनवस्थेत्यर्थः । द्वितीयं दूषयति– आकारैक्य इति । अन्तर्भावबहिर्भावपदाभ्यामभेदभेदौ विवक्षितौ । तयोर्भेद एकेनाकारेण विरुद्धयोस्सामानाधिकरण्योपपादनासम्भवात्तयोरैक्यं स्यादिति भावः । किञ्चे ति । सा अविद्यानिवृत्तिः । नित्य मिति । कदा

भाव., हि मिथ्याभूतमविद्यादिकं सत्यभूतायास्तस्याः कारण सम्भवति, असत्यात् सत्योत्पत्तेरन्यत्र दूषणात् । नच सत्य ब्रह्मैव तत्कारणमस्त्विति वाच्यम्,— तदनादित्वप्रसङ्गेन प्रागुक्तोपद्रवात् । नहि विगलितशबलभाव ब्रह्मैव तत्कारणम्, शबलभावविगलनस्यैव कारणान्वेषणेनात्माश्रयप्रसङ्गात् । नन्वविद्या निवृत्तिर्न सती ब्रह्मव्यतिरिक्तत्वात्, नापि सदसदात्मिका, व्याघातादिदोषशतोन्मेषात्, नच सदसद्विलक्षणा, सदसद्विलक्षण निवृत्त्यात्मकत्वव्याघातात्, अत. परिशेषादसती वा, तामपि कोटिं परित्यज्य पञ्चमप्रकारो वा[2] भावाभावयोरेव हि सदसदादि प्रकारा निवृत्तयः । सदसद्विलक्षणज्ञानम्, तन्निवृत्तिश्च प्रमाण सिद्धेति सदसदनिर्वचनीयाज्ञानानुसारेण भक्षानुरूपो बलिरिति न्यायात् सदसदादिसर्वप्रकारविलक्षणा तन्निवृत्ति. कल्प्यत इति किं

प्यविद्यातत्कार्ययोरुपलम्भो न स्यादित्यर्थः । किंच ब्रह्मव्यतिरिक्तायाः पारमार्थिकाया जन्याया निवृत्तेरभ्युपगमेपि भिन्नसत्ताकायाः अविद्यायास्तया सह विरोधाभावान्निवृत्त्युत्पत्तावप्यविद्या तिष्ठत्येवेति अनिर्मोक्षप्रसङ्गः । व्याघातादीति । व्याघातपदेन सत्त्वासत्त्वयोस्स्वरूपतो विरोधो दर्शितः । आदिपदेनाद्वैतश्रुति विरोधादयो विवक्षिताः । नचे ति । मोक्षदशाया यावत्प्रपञ्चनिवृत्तेर्वक्तव्य तया निवृत्तेर्मिथ्यात्वे स्वप्रतियोगित्व वक्तव्यम्, तच्च व्याहतमित्यर्थः । ननु सत्त्वमसत्त्व मिथ्यात्व वा स्यात्, कथ पञ्चमप्रकारत्वमित्यत्राह— भावाभावयो रिति । सदसतोरित्यर्थः । आदिपदेन मिथ्यात्व विवक्षितम् । सतो घटादेस्सद्रूपा मिथ्यारूपा च, निरुपाख्यस्य निरुपाख्येत्यर्थः । ननु कथ सद्विलक्षणाया असद्विलक्षणायाश्च निवृत्तेस्सदसद्विलक्षणत्वम्, व्याघातादिति चेन्न,- सदसद्विलक्षणत्वेपि मिथ्यावैलक्षण्यसम्भवात् । ननु दृष्टानुसारेण सत्त्व मनिर्वचनीयत्व वा स्यात्, यदिच तथा नेष्यते, तर्हि निवृत्तिरसत्यैव स्यादित्यत्राह- तन्निवृत्ति रिति । सदादिरूपत्वस्यासम्भवात् ख्यातिबाधाभ्या प्रमा

नोपपन्नमिति चेत् ? अहो परापादनीयमात्मनः परिदमात्मनैवाविष्कृत्य वैदग्ध्यमभिनयसि । तथाहि- कोटित्रयस्यभवतैव दूषितत्वात् अलमेष कुत्र शत्रुकार्यम् । यत्त्वसतीवेत्युक्तम्, तत्र भावान्तराभावनयेन भावान्तरविवक्षया सद्वितीयत्वप्रसङ्गः । अतिरिक्ताभावविवक्षायाच सद्वितीयत्व तेनैव भावेन 'तत्प्रतियोगिना च सत्यत्वेन दुर्त्यजम् । अभाववादिना सत्यस्यैवाभाव प्रतियोगित्वात् । निरुपाख्यत्वविवक्षायांच तस्याश्शशशृङ्गादिवद कादाचित्कत्वप्रसङ्गः । ततश्च पूर्ववत् सर्वदैवाविद्यानिवृत्ति रनिवार्येत्यससारः । तस्यास्संसारस्य चाविरोधे अनिर्मोक्ष । परमार्थतस्सर्वदा ससाराभावात् तत एव परमार्थमोक्षाभावश्चेति नानिष्टप्रसङ्गाविमाविति चेन्न,— व्यावहारिकबन्धमोक्षव्यवस्था भङ्गस्यैव प्रसज्यमानत्वात् । तामपि व्यवस्थां परित्यजत. लौकिकवैदिकसर्वव्यवहारविलोपप्रसङ्ग· । किच अविद्यानिवृत्ते रसत्त्वे नित्यमविद्यासद्भावप्रसङ्गः । ननु घटप्रध्वसस्यासद्रूप त्वेपि घटादे कादाचित्कत्ववदविद्याप्रध्वसस्यासद्रूपत्वेप्यविद्याका दाचित्कत्वमुपपद्यत इति चेन्न,— घटप्रध्वसस्यासद्रूपत्वाभावात् । स ह्यभावात्मकोपि तत्कालीनतया प्रमाणतस्सिद्धः । अन्यथा घटनित्यत्वस्यापि दुर्निवारत्वात् । असद्रूपमेव घटप्रध्वसमभ्यु पेत्य दूषण ब्रूया इति चेन्न,— शमल भक्षय शापितोसि गुरु

णिकार्थविलक्षणानिर्वचनीयवत् तद्विरुद्धतत्त्वनिवृत्त्यङ्गीकारो युक्त इत्यर्थः । किम सतीत्यनेन भावरूपत्वम्, उत निरुपाख्यत्वमिति विकल्पमभिप्रेत्य आद्य दूषयति- तत्रेत्यादिना अभावप्रतियोगित्वा दित्यन्तेन । सद्वितीयत्वप्रसङ्ग इति । मिथ्यात्वस्य पूर्वोक्तन्यायेनासम्भवादिति भावः । तेनैवे ति । पूर्वोक्त न्याय एव विवक्षित । तत्प्रतियोगित्वे त्यत्र हेतुमाह- अभाववादिना मिति । ध्वसस्य निरुपाख्यत्वमनभ्युपगच्छता तदभ्युपगतसत्ताकस्यैव तत्प्रतियो

णेत्यादिवदशक्यत्वात् । शक्यत्वाभ्युपगमे वा त्वयैव दूषणमनुमतमिति किमस्माकं तत्समर्थनेन । पञ्चमी कोटिमाटीकमानस्यापि ते न काचिद्गतिः । साहि माध्यमिकगोष्ठीमध्ये भवन्तमध्यारोप्यानिर्वचनीयाग्रहविशिष्टच सदद्वितीय ब्रह्म विलुपन्ती त्रय्यन्तवादवारवाणमवधूयान्तर्गत प्रकाशयेत् । ते ह्येवमाहु.—"न सन्नासन्न सदसन्न चाप्यनुभयात्मकम् । चतुष्कोटिविनिर्मुक्तं तत्त्वं माध्यमिका विदु ॥" इति । नचैकदेशवैषम्याद्विशेषः, पञ्चम कोटिपरिग्रहस्य भिक्षुपादप्रसरणन्यायेन समस्तभवत्सिद्धान्तावस्कन्दात्। व्यवस्थाहेतूनामपि व्यावहारिकत्वेनाव्यवस्थितत्वस्यैव व्यवस्थितत्वात् । नच यक्षानुरूपो बलिरिति न्यायस्यात्रावकाश', आनुरूप्यस्याविरोधित्वरूपत्वे सदसदनिर्वचनीयाज्ञाननिवृत्तेरप्यनिर्वचनीयरूपत्वप्रसङ्गात् । विरोधिरूपत्वे त्वनिर्वचनीयत्वप्रत्यनीकत्वस्य

गित्वादित्यर्थः । **अशक्यत्वा** दिति । अभ्युपगमस्येति शेषः । **दूषणमनुमत**मिति । अभ्युपगममापादयता त्वया तथा स्वरूपानङ्गीकाराद्दूषणमनुमतमेवेत्यर्थः । यद्वा निवृत्तेर्ब्रह्मस्वरूपत्वतदतिरिक्तत्वपारमार्थिकत्वपञ्चमप्रकारत्वान्यतरपक्षमेव समर्थयता त्वया अविद्यानिवृत्तेरसत्त्वे दूषणमनुमतमेवेत्यर्थः । **अविशिष्ट** मिति क्रियाविशेषणम् । अविशेषेणेत्यर्थः । **अन्तर्गत** मिति । त्वत्स्वान्तान्तर्गत त्वद्गुरुपक्षपक्षपातमित्यर्थ । यद्वा कञ्चुकपिहित, बौद्धत्वमित्यर्थः । **नचे** ति । किंचित्साम्यमात्रात्तन्मतप्रवेशापादनेऽतिप्रसङ्ग इति भावः । **व्यवस्थाहेतूना** मिति । प्रातिभासिकव्यावृत्तव्यावहारिकव्यवस्थासिद्धये हि व्यावहारिकसत्यत्वमिष्यते, तदङ्गीकारेपि व्यवस्थाया असिद्धेर्न प्रपञ्चस्यापि व्यावहारिकत्वमेष्टव्यम्, तन्निवृत्तिवदेव पञ्चमप्रकारत्वसम्भवादित्यर्थः । **आनुरूप्यस्ये** ति । **अविरोधित्वम्**– सजातीयत्वम् । **विरोधिरूपत्व** इति । विजातीयत्वरूपत्व इत्यर्थः । निवृत्तेस्सदसदनिर्वचनीयाविद्याकल्पनप्रत्यानुकूल्य विजातीयत्व एव सिद्धयति सजातीयत्वे याचन्मिथ्यावस्तुनिवृत्त्यभावप्रसङ्गादित्यर्थः ।

किञ्च निवृत्तेः प्रतियोगिसमानसत्ताकत्वाभावे तद्विरोधाभावादनिर्मोक्षप्रसङ्गः । नच निवृत्तित्वेनैव प्रतियोगिना साक्षं विरोधः, घटे विद्यमान एव प्रातिभासिक रूपायास्तन्निवृत्तेर्दर्शनात् । नच भिन्नसत्ताकत्वाभाव एव विरोधप्रयोजकः, लाघवेन तुल्यसत्ताकत्वस्येव प्रयोजकत्वात् । किंचास्या निवृत्तेरध्यस्तत्व पञ्चम प्रकारत्वभङ्गः, अनध्यस्तत्वे प्रकाशाभावप्रसङ्गः, स्वतस्सविद्रूपत्वविरहाच्चदध्य स्तत्वविरहाच्च, सविदतिरिक्तस्य दृग्दृश्यसम्बन्धनिराकरणेन सविदध्यासादेव हि प्रकाश ब्रूषे । यदि चाप्रान्यसम्बन्ध इष्यते, किं परार्थ घटादिना ।

अत्र पञ्चमप्रकारमुपपादयन् यदाह नवीनः— अविद्यानिवृत्तिर्नात्मा, अभावत्वात्, किन्तु पञ्चमप्रकारा, सा च न पुरुषार्थः, सद्विलक्षणत्वादसुख त्वाच्च, किंच आत्मैव परमानन्दः पुरुषार्थ, नचैवमविद्यानिवृत्तेरप्रार्थ्यत्वात्त दुपायज्ञानप्रयासो व्यर्थः, पुरुषार्थप्रतिबन्धकनिवृत्तित्वेन तस्याः काम्यमानत्वात् ; नन्वविद्या किं प्रतिबन्धाति ? नतावन्मोक्षस्वरूपम्, तस्यात्मस्वरूपतया सदानपायात् ; नापि तज्ज्ञानम् , तत एवेति चेन्न ,— आनन्दात्म स्वरूपो हि मोक्षः, अनर्थश्च दुःखात्मा तत्प्रतिकूलः, अविद्या च तद्धेतुः, एवञ्च आनन्दात्मकब्रह्मविपरीतानर्थदर्शनेन नित्यात्मभूतोपि मोक्षोऽसत्कल्पो नास्तीत्यादिव्यवहारयोग्यो बभूव, ततश्चाकृतार्थता, निवृत्ते चाज्ञाने निरस्तनिखि-लानर्थपरमानन्द आत्मा SS प्यत इवेत्यविद्यानिवृत्तिरपुरुषार्थोपि काम्यत इति । तत्र किमिदमाप्यत इवेति? किमपारमार्थ्यं विवक्षितम् , उत साद्दश्यम्? नाद्यः, ब्रह्मणो नित्यातत्वात्। पूर्वमनवाप्तत्वे सति इदानीमाप्तत्व नास्तीति चेत् ? तर्हीं दानीमाप्यत इति बुध्युत्पत्तये निवृत्तिः काम्यत इत्यायातम्। तत्र सा किं ब्रह्म स्वरूपमेव, उत वृत्ति.? नाद्यः, तस्य नित्यसिद्धत्वात् । न द्वितीयः, अविद्यायां निवृत्तावा कारणाभावेन वृत्त्युत्पत्तेरयोगात् । न द्वितीयः, आप्तत्वादेव । तस्मा त्पुरुषार्थसाधनत्वरहितायां निवृत्तेस्स्वतः पुरुषार्थत्वाभावे काम्यत्वमेव न स्या दिति श्रवणादौ न कश्चित्प्रवर्तेत । यदुक्तमनर्थदर्शनेन नास्तीत्यादिव्यवहारयोग्यो बभूवेति, तत्स्ववचनव्याहतम् , अविद्याधीनतिरोधानेन हि कर्तृत्वाद्यध्यासरूपा नर्थसम्बन्ध ब्रूषे, नास्तीति व्यवहारयोग्यतामेव च निरोधानम् ।

निर्वचनीयत्वेन सदसत्त्वसमुच्चयकोटिवहिर्भावायोगात् । तस्याश्च दूषितत्वात् । यदाच भवदभिमता सदसद्विलक्षणकोटिरपि निशित तर्कशूलकोटिमारोपिता तदा कैव कथा निर्विशेषपरब्रह्मनिष्ठानानिर्वच नीयभावरूपाज्ञानविक्षेपात्मकव्यतिरिक्तजडरूपाहमर्थाहङ्कारवृत्तिविशे षरूपमिथ्यास्वरूपतत्त्वमस्यादिवाक्यलक्षणप्रभवब्रह्मात्मैक्यविज्ञानकृ तसदसदनिर्वचनीयविश्वनिवृत्तिरूपाया गन्धर्वनगरगोपुराधिरूढगग-नारविन्दमकरन्दपानमदभरमन्थरवन्ध्यासुतशुभकरतलकलितखरवि-षाणकोदण्डकोटिघटितकमठरोमशिञ्जनीनिर्यन्त्रनिर्यदैन्द्रजालिकशर शलाकाकृतभविष्यद्देवदत्तपुत्रशिरश्छेदसोदराया दुरभिलपकारक ज्ञापकायाः पञ्चम्या कोटेरित्यलमपरिणतभणितिपरिहसनेनेति ॥

इति शतदूषण्या निवृत्त्यनुपपत्तिः

चतुश्चत्वारिंशो वादः ॥४४॥

अत्रायमस्मदाचार्याणा सग्रहः—

" निवृत्तेश्चेत्सदन्यत्वमनिर्मोक्षः प्रसज्यते ।
निवृत्तेर्यदि सत्यत्वमनिर्मोक्ष. प्रसज्यते ॥
सत्ताभेदाद्विरोधो न प्रतियोग्यनुयोगिनोः ।
मिथ्याकार्ये विना ऽविद्या न तिष्ठेत कदाचन ॥
यक्षानुरूपबलिना सत्तासाम्य न विद्यते ।
गौरवाद्धिसत्ताया विरहो न प्रयोजकः ॥

इति श्रीवाधूलकुलतिलकश्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्येन तदेकदेवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्ध महाचार्यापरनामधेयेन रामानुजदासेन विरचिताया शतदूषणीव्याख्याया चण्डमारुताख्यायां निवृत्त्यनुपपत्तिभङ्गो नाम

चतुश्चत्वारिंशस्स्कन्धः ॥४४॥

श्रीरस्तु ।

अथ पञ्चचत्वारिंशो वादः ।

——(*)——

यन्नामानि परोरजांसि गृणतां याद्दच्छिकैर्हेतुभिः
दुर्लंघोप्युपयाति गोष्पदतुलां ससारवारांनिधिः ।
दूरे नित्यमसीमभूमकतया वाचां यदाचक्षते
तद्वन्देमहि सर्वशब्दविषय त्रय्यन्तवेद्यं महः ॥

स्वार्हाभिधानमपनीय पराह्नुवानैरुत्सन्ननाम कथकैर्यदकारि मूर्खैः ।
तन्नामवर्गपरिरक्षणलब्धवर्ण सङ्कीर्तयामि सतत कविवादिसिंहम् ॥
समरतवचसा लक्ष्यमपि मुख्य समर्थयन् ।
चित्र ब्रह्म चिर जीयाच्छ्रीनिवासगुरुर्महान् ॥

यन्नामानी ति । **परोरजांसी**त्यस्य रजसो दूरे विद्यमानानीत्यर्थः । ' कर्तृकरणे कृता बहुलम् ' इति बहुलग्रहणात्समासः । परश्शतामित्यत्र बहुल ग्रहणात्समास इति कैयटोक्तेः । पर इति च व्यत्ययेनासिप्रत्ययः । परस्ता दित्यर्थः । " यत्र सप्तर्षीन् पर एवमाहु " रित्यत्र भाष्ये व्यत्ययेन परशब्दा दसिप्रत्यय इति भट्टभास्करेणैवाभिधानात् । अयश्च शब्दोऽव्यय वैदूर्यवचनम् । " परो दिवा पर एने " त्यत्र भाष्ये परशब्दोयमन्तोदात्तसकारान्तोऽव्यय वैदूर्य माचष्ट " इति भट्टभास्करेणैवाभिधानात् । वारा निधिरित्यत्र दिवस्पतिः याद सा पतिरित्यादाविव बहुलग्रहणात् षष्ठया अलुक् । अत्र पूर्वपक्षे सामान्येन वृत्तिविषयत्वम्, मुख्यवृत्तिविषयत्व बोध्यसमानसत्ताकमुख्यवृत्तिविषयत्व वा निराक्रियते । तत्र प्रथमयोजनाया– उपक्रमे वृत्तिशब्दनिर्देशः, द्वितीयतृतीय हेत्वोस्साधारण्यम्, शाखावदुपलक्षणत्वोक्ति, मौन मन्त्रजप इत्युक्ति, इत्यादि निबन्धनम् । द्वितीययोजनाया तु ' नहि निमित्तमन्तरेणे ' त्यत्र निमित्तपद स्वारस्य, अनुमाने वाच्यत्वप्रतिज्ञास्वारस्यम्, प्रत्यनुमाने अवाच्यमिति निर्देश स्वारस्यम्, अतो न वाच्यमित्युपसहारस्वारस्यम् । इत्यादि निबन्धनम्, तृतीय

यदूचिरे- निर्धूतनिखिलकल्पनाजाले स्वप्रकाशचिन्मात्रे ब्रह्मणि च कस्यचिच्छब्दस्य वृत्तिस्सम्भवति। नहि निमित्तमन्तरेण शब्दाः प्रवर्तेरन्, नचावेद्ये वेदकानामवकाशः। नच सर्वेषा मात्मसाक्षिकं प्रकाशमाने प्रकाशकापेक्षा। नचैवमुपदेशनैरर्थक्यम्, स्वतएव प्रकाशमानेपि स्वरूपे कल्पितोपप्लवप्रशमन

योजनाया तु सिद्धसाधनोद्भावन निबन्धनम्। तत्तद्योजनास्वरसवाक्यानामितर योजनाया निर्वाह तत्तद्वाक्यव्याख्यानावसरे वक्ष्यामः। वृत्तिविषयत्वादेरुप हिते अङ्गीकारात्स्वरूपे तन्निषेधार्थं स्वरूपमनुवदति- निर्धूते ति। अत्र विशेषणत्रय हेतुगर्भम्। अत्र निर्धूतनिखिलकल्पनाजाल इत्याद्यो हेतु। वृत्ति-निषेधपक्षे शक्तिनिषेधपक्षे च निखिलकल्पनाशून्य इत्यर्थ। कल्पनापद कल्पित परम्। अविद्याविवर्तस्याविद्योपहितगतत्वेन स्वरूपे निमित्ताभावान्न तत्र वृत्ति-रिति वा शक्तिरिति वा तात्पर्यम्। बोध्यसमानसत्ताकशक्तिनिषेधपक्षे च मिथ्या भूतकल्पनाजाल इत्यर्थ.। अस्मिंश्च पक्षे स्वरूपे निमित्तमस्त्येव, तथा च स्वरूपे निमित्तसत्त्वेपि तस्य बोध्यसमानसत्ताकत्वाभावान्न बोध्यसमानसत्ता-कशक्तिरिति तात्पर्यम्। स्वप्रकाश इत्यन्यो हेतुः। स्वप्रकाशपदेन सजातीयानपेक्षप्रकाशत्व गृह्यते, मात्रचा सजातीयापेक्षप्रकाशत्वाभावरूप हेत्वन्तर गृह्यते। इमे चाभ्युच्चययुक्ती। शाखाचन्द्रन्यायेन लक्षणया शक्त्यैव वा शब्दादेव स्वरूपोपस्थितेर्वक्ष्यमाणत्वात् उपक्रमे निषेधमात्रे ता-त्पर्यम्, नतु प्रकारान्तरेण बोधनेपि, तेन हेत्वोरुत्थानसम्भवः। सिद्धान्तिना वैयर्थ्यं आपादिते प्रकारान्तरेण तद्बोधन विना तत्परिहारासम्भवात् तद्व्युत्तर-त्राङ्गीक्रियते। आद्यहेतुमुपपादयति- नही ति। प्रवृत्तिनिमित्तलक्ष्यतावच्छेदक सादृश्यानि विना शब्दस्य वृत्तिरेव न सम्भवतीत्यर्थ.। यद्वा- प्रवृत्तिनिमित्ता भावात् शक्तिर्न सम्भवतीत्यर्थ.। यद्वा- बोध्यसमानसत्ताकनिमित्ताभावान्न तादृश शक्तिसम्भव इत्यर्थ.। मात्रचा विवक्षिता युक्ति विवृणोति- नचावेद्य इति। स्वप्रकाशपदोक्त हेतु विवृणोति। नच सर्वेषा मिति। कल्पिते ति। प्रशमनपद

मात्रार्थतया प्रतिपन्नार्थप्रतिष्ठापनार्थप्रत्यभिज्ञापकतया वोपदेशसा फल्यात् । अतएव वेदान्तानां ब्रह्मणि प्रवृत्तिरपि व्याख्याता । यद्यप्यविद्योपाधिकोपरागप्रशमनपरेषु वाक्येषु सद्रूक्षात्मज्ञानादि शब्दैर्ब्रह्म निर्दिश्यते, तथाप्युपलक्षणभूतैस्तैश्चन्द्रमस इव शाखया न ब्रह्मणस्संस्पर्शः ।

बाधपरम् । उपदेशेन प्रपञ्चमिथ्यात्वमेव बोध्यते, नतु ब्रह्मेत्यर्थः । प्रत्यभिज्ञापकतया वेति । स्वतः प्रकाशमानस्य पुनर्बोधनात् स्वरूपात्मकाभेदविषयत्वाच्च प्रत्यभिज्ञात्वोक्तिः । प्रत्यभिज्ञा विना स्वरूपप्रकाशमात्रात् नाविद्यानिवृत्तिरिति भावः । नचैव प्रत्यभिज्ञार्थं वृत्त्यङ्गीकारप्रसङ्गः, पूर्वाप्रतिपन्नवाक्यार्थे क्वचिद्गामानयेत्यादौ पदाना पदार्थे वृत्तिदर्शनात् वाक्यार्थस्यापूर्वत्व एव पदार्थस्य वृत्त्या बोधननियम., नतु वाक्यार्थस्य पूर्वं प्रतिपत्तावपि, अतो ब्रह्मणो वाक्यार्थस्य स्वप्रकाशतया प्रतिपन्नत्वात् तद्विषयप्रत्यभिज्ञायाश्च वक्ष्यमाणनीत्या शाखाचन्द्र न्यायेनापि सम्भवान्न वृत्त्यपेक्षेति पूर्वपक्षिणोभिमानात् । यद्यपी ति । धर्मिनिर्देशाभावे तत्र निषेधासम्भवेन उपरागप्रशमनमेव न सम्भवतीति भावः । तथापी ति। यथा शाखा सयोगादिक विनैव केनचित्सम्बन्धविशेषेण चन्द्र ज्ञापयति तथा शब्दोपि वृत्त्या विनैव ब्रह्म अन्येन केनचित्सम्बन्धेन ज्ञापयतीत्यर्थः । सस्पर्श शब्दो वृत्तिविषयत्वपरः । यद्वा शक्तया विना शाखापदवल्लक्षणया ज्ञापयतीत्यर्थः। सम्भवति हि काचिच्छाखापदेन चन्द्रलक्षणा । सस्पर्शशब्दः शक्तिविषयत्वपरः । व्यावहारिक शक्यत्वमङ्गीकृत्य पारमार्थिकशक्यत्वनिषेधपक्षे शक्तया बोधनमस्त्येव, तथाप्यन्येषामिव बोध्यसमानसत्ताकशक्तिमच्छब्देन निर्देशो वाच्च इत्याशङ्क्तिु र्भावः । शक्तया विनापि बोधदर्शनेन बोधमात्रे शक्तेरप्रयोजकत्वे विशिष्टाया स्सुतरामप्रयोजकत्वमिति परिहाराभिप्रायः । उपलक्षणशब्द. अन्यत्रैव शक्यसमानसत्ताकशक्तयभावादौपचारिकः । सस्पर्शशब्दो बोध्यसमानसत्ताकशक्तिपरः । यद्यपि ब्रह्मादिशब्दैस्स्वरूप शक्तया निर्दिश्यते, तथापि न पारमार्थिकशक्तया निर्देशः कार्यः, अन्यथापि प्रतीतिसम्भवादित्यर्थः । ननु त्वया ब्रह्मशब्देन ब्रह्म निर्दिश्य तदवाच्यमिति प्रतिज्ञातव्यम् , ततश्च त्वयैव शब्देन ब्रह्मणो बोधनात्

अत एव न ब्रह्मादिशब्दनिर्देशेन स्ववचनविरोधः । नच नामकीर्तनविधीना विरोधः, सगुणब्रह्मविषयत्वा त्तेषाम् । अतएव हि परस्मिन् ब्रह्मणि 'मौनम्मन्त्रजप' इत्या चार्याः । अन्यथा कथमसम्प्रज्ञातोपि समाधिस्स्यात् । नच विचित्रनामरूपभाक्त्वश्रुतिविरोधः, तस्यास्तत्कार्योपहितविषयत्वस्य युष्माभिरप्यङ्गीकारात् । नच शब्दतत्त्वमेव ब्रह्मेति स्वप्रका-शत्वे स्ववाच्यतया शब्दवाच्यता, शब्दब्रह्मणोपि ब्रह्मविवर्त मात्रत्वात् । अतएव स्मरन्ति– "शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छती" ति । आह च साम्बः "शब्दार्थत्वविवर्त

स्ववचनविरोध इति शङ्कापि उक्तयुक्तयैव निरस्तेत्याह– **अत एवे** ति । वृत्त्यभावे वा शक्त्यभावे वा बोध्यसमानसत्ताकशक्त्यभावे वा नामत्वमनुपपन्नमित्याशक्याह **नच नामे** ति । **मौनं मन्त्रजप** इति । वृत्तिनिषेधपक्षे स्पष्ट एवार्थः । शक्ति निषेधपक्षे सौदर्शनादिमन्त्रस्थपदाना सुदर्शनादाविव शक्त्या बोधनाभावात् त द्विषयं मन्त्रजपो मौनप्राय इत्यर्थः । यद्वा अन्यत्रैव मन्त्रस्थपदाना ब्रह्मणि श-क्त्यभावात्तद्विषये मौनमेव कर्तव्यम्, न मन्त्रजप इत्यर्थः । बोध्यसमानसत्ताक शक्तिनिषेधपक्षे तादृशशक्त्यभावान्मौनप्राय इति वा तत एव मौनमेव कार्यमिति वार्थः । **नच विचित्रे** ति । वृत्त्यभावस्शक्त्यभावो बोध्यसमानसत्ताकशक्त्यभावो वा विरोधहेतुः । ननु शब्दस्य ब्रह्माभेदस्त्वयाङ्गीक्रियत एव, ब्रह्मणस्स्वप्रकाश तया तदभिन्नशब्दस्यापि स्वप्रकाशत्व वक्तव्यम्, शब्दप्रकाश्यत्वमेव च शब्द वाच्यत्वमिति शब्दस्य शब्दवाच्यतया तदभिन्नब्रह्मणोपि शब्दवाच्यत्वमवर्जनीय मेवेत्याह- **नचे** ति । यद्यपि शब्दशक्तिविषयत्वमेव शब्दवाच्यत्व नतु प्रकाश्यत्व मात्रमिति अभेदे सत्यपि न शब्दवाच्यत्वसिद्धिः, तथापि अभेदे सत्येवहीय चिन्ता, स एव नास्ति, किन्तु ब्रह्माधिष्ठानकतया तत्तादात्म्यमात्रमित्याह– **शब्दब्रह्मण** इति । **अतएवे** ति । यतो भेदः, अत एव 'शब्दब्रह्म पर ब्रह्मे' ति भेदेन स्मरन्तीत्यर्थ. । **शब्दे** ति ।

मानपरमज्योतीरुचो गोपते " रिति । नच ब्रह्म शब्दवाच्यं वस्तुत्वात् घटवदित्यनुमानोदय , काल्पनिकवाच्यत्वेन सिद्ध साधनात् । तदतिरिक्तस्य तु दृष्टान्तेप्यस्मन्मतेनासिद्धे । घटादिषु च वस्तुत्वानभ्युपगमेन साधनविकलत्वाच्च । नच प्रकाश मानत्वादिमात्र वस्तुत्वमिति विवक्षितमिति वाच्यम्,— तथापि प्रकाशमानैश्शुक्तिरजताभिश्शशविषाणादिभिश्चानैकान्त्यात् । नहि तेषां पारमार्थिक वाच्यत्व वोपीष्टम् , स्वयमसत. परमार्थ

" शब्दार्थत्वविवर्तमानपरमज्योतीरुचो गोपतेरुद्गीथोऽयुदित' पुरोरुणतया यस्य त्रयीमण्डले । भास्वद्वर्णपदक्रमेगितततुस्सप्तस्वराश्चेर्वियद्विश्वास्यन्दनमुन्नयन्निव नमस्तस्मै परब्रह्मणे॥ " इति साम्बकृतसूर्यस्तोत्रस्याय प्रथमः श्लोकः । शब्द रूपेणार्थरूपेण च विवर्त्तमानमित्यर्थ । नचे ति । वृत्तिनिषेधपक्षेपि वाच्यत्व साधनशङ्का विरुध्यते, सामान्य विना विशेषासिद्धे', तस्यापि तत एव सिद्धे. । काल्पनिकेति। वाच्यत्वमङ्गीकृत्य बोध्यसमानसत्ताकशक्तिनिषेधपक्षे सिद्धसाधनमेव। वृत्तिनिषेधपक्षे शक्तिनिषेधपक्षे च ब्रह्म शब्दवाच्यमिति केपा चित्प्रतीत्या प्रातिभासिकवाच्यत्व ब्रह्मण्यभ्युपगम्य प्रौढया सिद्धसाधनोद्भावनमिति मन्तव्यम्। पारमार्थिकमेव शक्यत्व साध्यत इत्यत्राह- तदतिरिक्तस्ये ति । घटादिष्वि ति। व्यावहारिकसत्त्वन्तु स्वरूपासिद्धमिति भावः । नचे ति । आदिपदेन सत्त्व सामान्य विवक्षितम् । तथापी ति । सत्तसामान्यस्यापि शुक्तिरजतादावेव व्यभि चार इति भावः । नहीं ति । पारमार्थिकपद हेतुगर्भम् , नतु सत्त्वान्तरव्या वर्तकम् , सिद्धान्ते सत्त्वभेदाभावात् । एवञ्च वाच्यत्वस्य सिद्धान्ते पारमार्थिक त्वाच्छुक्तिरजतादौ तन्नेष्टम्, तथाच सिद्धान्ते शुक्तिरजतादौ व्यभिचार इति भावः । यद्वा पारमार्थिकवाच्यत्वमाधन एवेद व्यभिचारोद्भावनम् । प्रपञ्च पारमार्थिकत्व वदतामपि भवता शुक्तिरजतपारमार्थिकत्व नेष्टमित्यर्थः । अत्र च पक्षे मतद्वयेपि व्यभिचार एव । वोपीष्ट मिति । युष्माभिरपि नाभ्युपगम्यत इत्यर्थः । स्वयमसत इति । सिद्धान्तिन प्रति व्यभिचारोद्भावने भवद्भिश्शुक्ति रजतादेः प्रातिभासिकत्वानभ्युपगमात् तेषामसत्त्वमेवेष्टव्यम् , अतः कथमसतः

धर्मानाधारत्वात् । किंच यदि वाच्यत्व वाच्यम् , ततस्तस्यापि वाच्यत्वान्तरमेव तस्यापीत्यनवस्था । यदि पुनरवाच्यं नैनैवानैकान्त्य दुष्परिहरम् । ब्रह्म न शब्दवाच्य निर्विशेषत्वादिति, प्रत्यनुमानच । आगमे च परिपन्थिनि कथमनुमानगन्धः । तथाहि— " यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह । " " न शब्दगोचरो यस्य योगिध्येय पर पद " मित्यादिश्रुतिस्मृतिशतैर्बाधस्स्फुट एव । नच सामान्यपरत्वम् , ब्रह्मस्वरूपोपदेश परतयैव प्रवृत्ते । नच कतिपयशब्दनिषेधपरतया सङ्कोच, तथा सति सर्ववस्तुसाधारण्येनातिशयासिद्धेः । असङ्कोचे चास्म दुक्तविषयव्यवस्थायास्सङ्ग्राह्यत्वात् । तदेतत्सर्वमभिप्रेत्य भगवान् पराशर — " प्रत्यस्तमितभेदं यत् सत्तामात्रमगोचरम् । वचसा मात्मसवेद्य तज्ज्ञानं ब्रह्मसञ्ज्ञितम् ॥ " इति । अतो न ब्रह्म कस्य चिदपि शब्दवाच्यमिति ।

सदाधारत्वमित्यर्थः । पारमार्थिकवाच्यत्वव्यभिचारोद्भावने मतद्वयेपि व्यभिचारोपपादनमेव । किञ्चेत्या दि । अनवस्थाभयाद्वाच्यत्वे वाच्यत्वासम्भवादनेकान्त्यमित्यर्थ· । न शब्दवाच्य मिति । व्यावहारिकवाच्यत्वाङ्गीकारिणोपि तस्य मिथ्यात्वान्न शब्दवाच्यत्वमिति प्रत्यनुमानमुपपद्यते । घटो व्यतिरेक इति दृष्टान्तः। इतिशब्दः प्रकारार्थः । एवविधानुमानान्तराणि स्वप्रकाशत्वाद्यत्वशक्यतावच्छेदकधर्मवदन्यत्वादिलिङ्गानि विवक्षितानि । आगमबाधमाह— आगमेचे ति । आगमादेरपि वृत्तिनिषेधश्शक्तिनिषेधः पारमार्थिकशक्तिनिषेधो वार्थतया विवक्षितः । आसामर्थवादत्वमाशङ्क्य विधिशेषत्वाभावान्नार्थवादत्वमित्याह—नचे ति । तत्स्वरूपपरता च सिद्धान्तिनाप्यङ्गीक्रियत एवेति भाव । नच कतिपये ति । कतिपयशब्दवाच्यत्व ब्रह्मणोङ्गीकृत्य निषेधस्य कतिपयशब्दवाच्यत्वविषयतया सङ्कोचो न युक्त इत्यर्थः । नन्वसङ्कोचेन निषेधे निर्देशोनुपपन्न इत्यत्राह- असङ्कोचेन चे ति। असङ्कोचस्यैव कर्तव्यत्वे सिद्धे निषेधस्य वृत्तिविषयत्व शक्तिविषयत्व

अत्रोच्यते,– यदुक्तं समस्तविशेषरहिते ब्रह्मणि निमित्ताभावेन न शब्दप्रवृत्तिरिति, तत्र सविशेषत्वोपपादनादेव हेतुरसिद्धः । यथा च निमित्तं निमित्तान्तरमन्तरेण शब्दवाच्यं भवति तथा स्वरूपमपीति निरूपयता त्वया । येषां शब्दानां यत्र यन्निमित्तद्वारेण

पारमार्थिकशक्तिविषयत्वं वा ग्राह्यम्, तथाच शाखाचन्द्रन्यायेन लक्षणया व्यावहारिकशक्तयैव वा स्वरूपोपस्थितिसम्भवात् न कश्चिद्विरोध इति भावः । अत्रैव विकल्पेनान्यतरपक्षपरखण्डो ग्रन्थ इति व्याख्यातम् । अथवा खण्डशो वा तत्तत्पक्षपरो ग्रन्थः । तथाहि– वृत्तिमात्रनिषेधक आह निर्धूते ति । शक्ति निरासवाद्याह- नहीं ति । वृत्तिसामान्यनिषेधवाद्याह- नचावेद्य इत्यारभ्य स्ववचन विरोध इत्येतदन्तम् । नच नामे ति वाक्यं मतद्वयसाधारणम् । अतएवहीं त्यादिवाक्यं अन्यथे त्यादिवाक्यञ्च वृत्तिनिषेधकस्य । नच विचित्र त्यादि वाक्यन्तु साधारणम् । वाच्यत्वाभावपक्षादेव एकदेशी पारमार्थिकवाच्यत्वनिषेध वाद्याह– सिद्धसाधना दिति । साधनवैफल्योद्भावनम्, किञ्चेत्यादिकं सर्वं साधारणम् ।

तदेवं बहुधा निरस्तं पूर्वपक्षमनुवदति—यदुक्तं मिति । अत्र सिद्धान्तिना पारमार्थिकशक्तिरेव साध्यते । प्रवृत्तिनिमित्तानभावेपि न दोष इत्याह- यथे ति । निर्विकल्पकस्य शब्दे तज्जनकत्वस्य च त्वयाऽस्वीकारात्प्रवृत्तिनिमित्तं विनापि शक्त्य स्वीकारे न किञ्चिद्बाधकमिति भावः । युक्तं चैतदित्याह येषां मिति । येषां शब्दा नां निमित्तद्वारेण प्रवृत्तिः तेषां तदभावे निवृत्तिरित्युक्तेरसम्भवः, सर्वत्र कस्यचि न्निमित्तस्य सत्त्वात् । अत्र क्रमः– यन्निमित्तं ति । एवं सति निमित्ते प्रवृत्तिर्न स्यादित्यत उक्तम् यत्रे ति । अत्र निमित्तद्वारा प्रवर्तमानशब्दानामेव हि निमित्ता भावे निवृत्तिः, नतु निर्निमित्तकशब्दानामपि, अतो ब्रह्मणि निर्निमित्तकशब्द प्रवृत्तौ न विरोध इत्यतान्दिहोपजीव्यम् । शक्तिज्ञानवृत्तिप्रयोजकनिमित्तनिवृत्ति शिक्षण यत्रे त्यादिना क्रियत इति मन्तव्यम् । नन्विदं व्याहतमिव प्रतिभाति । यत्र यन्निमित्तपुरस्कारेण प्रवृत्तिस्तत्र तदभावासम्भवात्, इति चेन्न,– यत्रे ति ।

प्रवृत्ति तेषामेव हि तत्र तदभावे निवृत्ति । अन्याहशस्तु शब्दो ब्रह्मणि न दृश्यत इति चेत् ? किं कुर्म, सङ्केत्यता व्यवहाराय तथाविधशब्दोपि । यच्च- अत्रैव वेदकाना नावकाश,

---

यद्धर्मावच्छिन्न इत्यर्थस्य विवक्षितत्वात् । अत एव घटत्वनिमित्तपुरस्कारेण द्रव्ये प्रवर्तमानो घटशब्द, पटरूपद्रव्ये तदभावान्निवर्तते । घटत्वस्याद्रव्यत्वात्तत्र तदभावेपि न ततो निवर्तते । ननु यद्धर्मावच्छिन्न इत्यस्य यदि यद्धर्मवत इत्यर्थ, तदा प्रमेयत्ववति घटे घटत्वनिमित्तद्वारा प्रवर्तमानस्य पटशब्दस्य प्रमेयत्ववत्यैव घटत्वे निमित्तशून्येपि प्रवृत्तेर्व्यभिचार, किंच नानार्थेषु सैन्धवादिशब्दपु लवणत्वादिरूपनिमित्ताभावेपि तुरगादिषु प्रवृत्तेर्व्यभिचार, यदि धर्मस्य वाच्यतावच्छेदकत्व विवक्ष्यते, तदा द्रव्यत्वस्य वाच्यतावच्छेदकत्वाद्व्यासज्यसिद्धेः, इति चेन्न — यद्धर्मवति प्रवृत्तिर्यन्निमित्तद्वारैव तद्धर्मावच्छिन्ने तदभाव इत्यर्थस्य विवक्षितत्वात् । सच धर्मो द्रव्यत्वादिरेव । नतु प्रमेयत्वादि । नानार्थेषु तु तुरगादन्यत्वे सति द्रव्यत्वादि । तथा च यच्छब्दवाच्यत्व यद्धर्मसामानाधिकरण्यावच्छिन्नयादृशनिमित्तव्याप्यताक तद्धर्मवति तादृशनिमित्तनिवृत्तौ तच्छब्दवाच्यत्वनिवृत्ति । भवति हि व्यापकनिवृत्त्या विशेषणवति विशिष्टनिवृत्तौ विशेष्यनिवृत्ति । अतो द्रव्यत्वे सति घटपदशक्तिविषयत्वस्य घटत्वव्याप्यतया पटरूपद्रव्यान्निमित्तनिवृत्तौ घटपदशक्तिर्निवर्तते । ननु ब्रह्मादिशब्दास्सन्निमित्तका एव, " बृहति तृहयती " त्याद्यनुशासनात् । निर्निमित्तकस्तु शब्दो ब्रह्मणि नास्त्येवेति शङ्कते– **अन्याहशस्त्वि** ति । **संकेत्यता** मिति । **तथाविध** – निर्निमित्तक । नच सङ्केतस्य विषयोपस्थितिपूर्वकत्वात्तस्याश्च शब्दान्तराधीनत्वेनानवस्थेति वाच्यम्,— तेन तत्कोपस्थितेर्लक्षणाङ्गीकारेण तत्रैव सङ्केते बाधकाभावात् । वस्तुतस्तु उपहितशक्तेनैव पदेन तदन्तर्गतस्वरूपस्याप्युपस्थितौ तत्र सङ्केतसम्भवत्येव । नच उपहितशक्तेन पदेन लक्षणया स्वरूपव्यवहारसम्भवान्न सङ्केत इति वाच्यम् ,– निमित्तवदेव गुरुव्यार्थसम्बन्धादेरप्यभावेन लक्षणाया असम्भवात् । एव गत्यन्तराभावाभिप्रायेणैव **किं कुर्म**इत्युक्तम् । अत. स्वरूपे येन केनचित् यस्य कस्याप्युपस्थितस्य सङ्केतसम्भवेन

नच स्वयम्प्रकाशे प्रकाशकापेक्षेति, तच्च स्वप्रकाशस्यापि ज्ञानान्तरवेद्यत्वस्थापनादेव परिहृतम्, यच्चोपदेशाना वेदान्ताना च कल्पितोपप्लवप्रशमनमात्रार्थत्वमुक्तम्, तदपि तदा शोभते, यदि स्वरूपमनिर्देश्योपरागाशमयितु शक्येरन्। अन्यथा ब्रह्मणो निर्विशेषत्वमपि नोक्त स्यात्। ननु किं ब्रह्मणो निर्देशेन, विशेषा एव प्रतीयमाना मिथ्यात्वेन ज्ञाप्यन्ते, ब्रह्म तु स्वप्रकाश तिष्ठत्येवेति चेत्? तदपि न, "निर्गुण निरञ्जन" मित्यादीना ब्रह्मणो विशेषणतयैव प्रयोगात्। प्रकाशमानमात्रनिषेधे च ब्रह्मणोपि निषेधासङ्गात्। यदि ब्रह्मव्यतिरिक्तमिति विशेष्येत, तदापि सिद्धस्तन्निर्देश.। प्रतियोगितयेति तु विशेषः। यच्चोपदेशादे. प्रत्यभिज्ञापकत्वमिति, ततः किमायातमवाच्यत्वस्य?

तद्वाच्यत्वमवर्जनीयमेवेत्यपि द्रष्टव्यम्। ज्ञानान्तरवेद्यत्वस्थापना दिति। अवेद्यत्वभङ्गे ज्ञानान्तरवेद्यत्वस्य स्थापनादेव "अवेद्ये वेदकाना नावकाश" इत्ये तत्परिहृतम्। स्व प्रति स्वसत्तयैव प्रकाशमानत्वेपि पुरुषान्तर प्रति तदीय ज्ञानेनैव प्रकाशमानतया ज्ञानान्तरवेद्यत्वस्थापनादेव, "नच स्वप्रकाशो प्रकाशापेक्षे" त्येतच्च निरस्तमित्यर्थः। अपी ति– प्राधान्येन स्थाप्यमानत्व सूच्यते। ननु ब्रह्मज्ञानाभावे कथमविद्यानिवृत्ति.? ब्रह्मज्ञानस्यैव मोक्षसाधनतया श्रुत त्वादित्याह– ब्रह्मत्वि ति। विशेषमिथ्यात्वज्ञानसहकृतेन स्वरूपप्रकाशेन निवृत्तिरिति भाव। विशेषणतये ति। ततश्च ब्रह्मणो विशेष्यत्वमवर्जनीयमिति भाव.। किञ्च, किं प्रकाशमानमात्रस्य निषेध, उत ब्रह्मव्यतिरिक्तस्य? नाद्य इत्याह प्रकाशमानमात्रे ति। द्वितीये दोषमाह– यदी ति। प्रतियोगितये ति। अतस्तन्निर्देशाभावे तदतिरिक्तत्वप्रतीत्यसम्भवात्, तन्निर्देश आवश्यक इति भावः। विशेष इति। पूर्व ब्रह्म निर्दिश्य प्रपञ्चमिथ्यात्वबोधने सम्भवत्यपि निर्गुणमित्यादौ ब्रह्म निर्देशो दृश्यत इत्युक्तम्, इदानी त्वया ब्रह्मव्यतिरिक्तस्य मिथ्यात्वबोधना ङ्गीकारे ब्रह्मनिर्देशाभावे प्रपञ्चमिथ्यात्वबोधनमेव न सम्भवतीति पूर्वोक्तयुक्ते र्विशेषसिद्धयतीत्यर्थः। ततः किमायात मिति। प्रत्यभिज्ञापकत्वेपि वाच्यत्व

पूर्वप्रतिपन्नेपि शब्दप्रवृत्तिमात्रस्वानभ्युपगमात् । यत्तु शाखा चन्द्रन्यायेन सद्ब्रह्मादिशब्दैरुपलक्षणभूतैर्न ब्रह्मणस्स्पर्श इति, तदप्यसत् । उपलक्ष्योपलक्षणयोरपि बोध्यबोधकभावलक्षणस्स्पर्शस्य सर्वत्र दुस्त्यजत्वात् । तावतैव च शब्दवेद्यत्वसिद्धे । लक्षणामात्रन्तु तत्र न तु वाच्यत्वमिति चेत् ? किमत तावतापि शब्दवेद्यत्वस्य स्थितत्वात् । मुख्यार्थसम्बन्धादेश्च लक्षणानिमित्तस्य लाक्षणिकशब्देनाप्यपेक्षणीयत्वाच्च । एतावन्मात्र शब्दवेद्यत्वमिष्यत इति चेत् ? किमन्यन्नेष्यते ? न तावन्निमित्ताभावादे

निर्बाधमेवेत्यर्थ । तदेव विवृणोति- पूर्वे ति । पूर्वप्रतिपत्तिर्हि विधिविरोधिनी नतु शक्तिविरोधिनीति भाव. । गूढाभिसन्धिरुद्घाटयन्नेवाह- तदप्यस दिति । अभिसन्धिमजानानश्शङ्कते- लक्षणामात्र मिति । नहि वय शब्दबोध्यत्व निषेधामः, किन्तु वाच्यत्वमात्रम् , ततश्च शाखावद्वा लक्षणया वा बोधेपि न दोष इत्यर्थः । अभिसन्धिमुद्घाटयन्नेव पूर्वोक्त परिहार स्मारयति- किमत इति । ननु शाखा यद्बोधकत्वपक्षे कथ शब्दवेद्यम् , व्यक्तया बोधनाभावात् ? कथ किञ्चिद्बोधनमात्रेण शब्दवेद्यत्वे घटशब्देन गुणित्वेनानुमीयमानस्याप्याकाशस्य घटशब्दवेद्यत्वप्रसङ्गादिति चेत् ? शाखावद्बोधकस्यापि तत्तात्पर्यकतया वृत्तिमत्पदतुल्यत्वात् । ननु घटशब्देनायमाकाशमनुभिनोत्विति तात्पर्येण यदि घटशब्दः प्रयुज्यते तदा तस्यापि वृत्तिमत्पदतुल्यतया आकाशस्यापि तेनानुमीयमानस्य तद्वेद्यत्वप्रसङ्ग इति चेन्न,— घटपदेनानुमीयमानस्य घटपदसमभिव्याहृतपदान्तरार्थान्वययोग्यताविरहात् । चन्द्रवदुपलक्षितस्य ब्रह्मण पदान्तरार्थान्वयसत्त्वात् येनैव विशेषेण तद्योग्यता तेनैव शब्दवेद्यत्वसिद्धे' । दूषणान्तरमाह-मुख्यार्थे ति । ननु उपहितेनानुपहितस्य स्वाभाविकाभेदरूपस्सम्बन्धोऽस्तीति चेन्न,— तथामति वाच्यत्वस्यैवापत्त्या लक्षणाया असम्भवात् । आदिपदेन लक्ष्यतावच्छेदकं गृह्यते । लाक्षणिकेने त्येतदुपलक्षकस्याप्युपलक्षणम् । तावतापि शब्दवेद्यत्वस्य स्थितत्वादित्यत्र शङ्कते- एतावन्मात्र मिति । उपलक्षकेण वा बोधनमिष्यत इत्यर्थ. । अभिसन्धिमुद्घाटयति- किमि ति । शक्त्याबोधन कुतो नेष्यत इत्यर्थः ।

रित्युक्तम् । न च वाङ्मनसनिषेधश्रुतिर्लक्षणामनुजानातीति नियामकं पश्याम. । विरोधपरिहाराय वृत्तिविशेषविषयत्वेन व्यवस्था क्रियत इति चेत् ? तर्हि लक्षणावृत्तिरेव सिद्धयतु, नियामकाभावात् । अस्मन्नयेन सर्वप्रमाणाविरुद्धेनापरिच्छेद्यमाहात्म्य तदर्थमातिष्ठस्व । अतरसर्वप्रकारशब्दवेद्यत्वनिषेधस्य दुश्शक

शक्त्यनङ्गीकारे श्रुतिरेव हेतुरित्यत्राह- नचे ति । वाङ्निवृत्तिरेव हि श्रूयते, नतु शक्तिनिवृत्तिरितिभाव· । अनेन अभिसन्धिरुद्घाटितो भवति । ननु 'अप्राप्ये' ति शक्तिरव निषिद्ध इति चेन्न,- "मनसा गहे" ति श्रुतेर्मनस्साधारणसम्बन्धस्यैव वाच्यत्वात्, मनसो वृत्त्यात्मकशक्त्यसिद्धया परिच्छिद्यतद्बोधनसामर्थ्याभाव स्यैवाप्राप्तिशब्देन विवक्षणीयत्वात् । एतदभिप्रेत्यैव वाङ्निषेधश्रुतिरित्यनुक्त्वा वाङ्मनसनिषेधश्रुतिरित्युक्तम् । किंच, शक्तिरूपप्राप्तिनिषेधे लक्षणारूपप्राप्तिनिषेधोपि कथ न स्यात् ? ननु शक्तिर्हि शब्दार्थयोस्सम्बन्ध·, नतु लक्षणा, तस्या श्शक्यार्थसम्बन्धत्वेन परम्परासम्बन्धत्वादितिचेत् ? तर्हि सम्बन्धान्तरसत्त्वेपि शक्तिरूपसम्बन्ध एव निषिद्धयत इति कुतोवगम्यते ? शब्दस्यार्थबोधकत्वे शक्तिरूपसम्बन्धस्यैव प्रयोजकतया तदभावस्यैवार्थानवबोधरूपनिवृत्तिप्रयोजकत्वा दिति चेत्? तथासति लक्षणाया अपि बोधप्रयोजकत्वात् सापि निषेध्येति तुल्यम् । अन्यथा निवृत्यसिद्धे. । नच निवृत्तिपद शक्त्यधीनबोधाभावपरम्, सङ्कोच काभावात् । उपक्रमस्थत्वेन प्राधान्येनच तस्यैवानुरोद्धव्यतया तदनुसारेणैवा प्राप्तेर्वर्णनीयत्वात् । एतदेवाभिप्रेत्योक्त लक्षणामनुजानाती ति- नियामकं पश्याम इति । विरोधे ति । "यत" इति निर्देशस्य वाङ्निषेधस्य च विरोधपरिहारायेत्यर्थः । नियामकाभावा दिति । तथा च शब्दबोध्यत्व सामान्यमेव त्वत्पक्षे निषेध्य स्यादिति भाव· । श्रुतेः कथ निर्वाह इत्यत्राह– अस्मन्नयेने ति । एव शक्तिनिषेधासिद्धेरविद्योपरागप्रशमनपरेषु वाक्येषु स-दादिशब्दैरशक्त्यैव स्वरूपनिर्देशः कर्तव्य इति स्थितम्, उक्तहेतोरेव पूर्व पक्षोक्तस्ववचनविरोधोपि दुस्तर इत्याह– अत इति । स्वरूपमनिर्दिश्येति शेषः । एवं श्रुतेः शब्दवेद्यत्वसामान्यनिषेधपरत्वस्य त्वया वाच्यत्वादेव ब्रह्म श्रुतिबला

त्वात् स्ववचनविरोधो दुष्परिहार । यत्तु नामकीर्तनावधीनां सगुणब्रह्मविषयत्वेति, तत्तादृत्सत्यम् , यदि तदतिरिक्तं ब्रह्म नाभिसन्दध्याः । यश्चासौ 'मौन मन्त्रजप' इति व्याहतोपदेश, सोपि मौनप्रशंसापरश्चेदुपपद्यते, नतु मन्त्रजप विहित प्रतिषेद्धुं क्षमते । नचाधिकारिविशेषणविषयव्यवस्था, समाधिनिष्ठमधिकृत्यैव तद्विधानात् । असम्प्रज्ञातसमाधिरपि न शब्दवाच्यतावरोधी, अपितु केवल तदातनशब्दानुसन्धानपरिपन्थीति समाधिशास्त्रविद । यत्तु विचित्रनामरूपभाक्त्वश्रुतिस्तत्कार्योपहितविषयतयेति, तदस्माभिरपीष्यत एव, तथापि तत्तदुपहितब्रह्मण्यपि तत्तन्नामपर्यवसानविवक्षा दुर्वारा । अन्यथा "बहुस्या" मिति

च्छब्दवेद्य न भवतीति प्रतिज्ञाने प्रतिज्ञास्थब्रह्मपदनिषेधयोर्विरोध इत्यर्थ । यत्त्वि ति । यदि सगुणब्रह्मातिरिक्त किञ्चिन्निर्गुण ब्रह्म ब्रवा', तदा नाम कीर्तनविशेषस्सगुणब्रह्मविषयत्वमदुच्यत्वविधेर्निर्गुणविषयत्वमिति वक्तु शक्येत, नच तदस्ति, परमार्थतो निर्गुणस्यैव ब्रह्मणो मिथ्याभूतगुणाश्रयत्वाङ्गीकारादित्यर्थः । नाभिसन्दध्या इति पाठे सगुणपदव्यावर्तनीव निर्गुण ब्रह्म यदि नाभिसन्दध्या, किन्तु वस्तुतस्सगुणमेव ब्रह्म तादृशमेव च नामविषय इत्यभिसन्दध्या', तदास्मन्मतप्रवेशात्त्वदुक्त सम्यगेवेत्यर्थ. । विषयव्यवस्थे ति । जपविधेः मौन मन्त्रजप इत्यस्य चेति शेष. । मौन मन्त्रजप इत्यस्य समाधिनिष्ठमुमुक्षुविषयत्वात्स्वरूपे जपनिषेधविषयत्व जपविधे. काम्यविषयत्वात्सगुणविषयत्वमित्यर्थ । समाधी ति । "य पुनरेत त्रिमात्रेण ओमित्येतेनैवाक्षरेण परमपुरुषमभिध्यायीत, स तेजसि सूर्ये सम्पन्नो यथा पादोदरस्त्वचा विनिर्मुच्यते एव ह वै पाप्मभिर्निर्मुक्तस्स सामभिरुन्नीयते ब्रह्मलोक" "ओमित्यात्मान युञ्जीत" इत्यादिभिस्समाधिनिष्ठमधिकृत्यैव मन्त्रविधानादित्यर्थः । तत्तदुपहिते ति । उपधेयविशेष्यभूतब्रह्मस्वरूप इत्यर्थ । विवक्षे ति । नामरूपभाक्त्वश्रुतेरिति शेष· । दुर्वारे ति । ततश्च तदतिरिक्तब्रह्मणोसिद्धेरेवावाच्यत्व दुरुपपादमिति भाव. । अन्यथे ति । ब्रह्मणस्तत्कार्यवाचिशब्दे

सङ्कल्पस्य, "तन्नामरूपाभ्यां व्याक्रियते" त्यादेश्च दुर्निर्वहत्वात् । शब्दनत्त्वस्य ब्रह्मातिरेकसाधन त्विष्टमेव । विवर्तता तु प्रकृता नुपयोगिनी पराकृता च । यत्तु शब्दवाच्यत्वसाधने काल्पनिक वाच्यत्वाभ्युपगमात् सिद्धसाधनत्वमुक्तम् , तदपि स्वबाधपर्य वसितम् , घटाद्यविशेषप्रसङ्गात् । घटादीना शब्दवाच्यत्वमभ्यु पगम्य ब्रह्मणि तन्निषेधप्रवृत्तत्वात् । घटादितुल्यशब्दवाच्यत्वा भ्युपगमे च विवादाभावात् । नहि वय ब्रह्मणि लोकसिद्धातिरिक्तप्रकार वा वाच्यत्वमिच्छाम , येन तन्निषेधसिद्धि । नच वाच्यत्वमात्रस्य दुर्निरूपतया ब्रह्मणि तदभावः सामान्यतो दुर्निरूपत्वप्राक्रियाया प्रपञ्चमिथ्यात्वसाधकानं च निरस्तत्वात् । अत एव वस्तुत्वादिहेत्वसिद्धिरपि परिहृता । यत्तु प्रकाशमानत्वा दिति हेतोश्शुक्तिरजतादिभिरनैकान्त्यमिति, तत्रापि प्रकाशमानस्य सर्वस्याधिष्ठानारोप्यसम्बन्धादेश्शब्दवाच्यत्वसिद्धे. तदतिरिक्तस्य

वाच्यत्वाभावे तद्वाचकबहुशब्देन 'बहुम्गा' मिति सामानाधिकरण्यायोगात् , "तद्व्याक्रियते" ति नामरूपव्याकरणकर्मत्वप्रतिपादनायोगाच्चेत्यर्थ । स्वबाध पर्यवसित मिति । स्वाभ्युपगतावाच्यत्वपरित्यागपर्यवसितमित्यर्थः । घटाद्य विशेषेपि कथ बाधपर्यवसानमित्यत्राह– घटादीना मिति । ननु घटादितुल्य वाच्यत्व नास्माभिर्निषिध्यते, किन्त्वन्यादृशमेवेत्यत्राह– नहि वय मिति । ननु घटादितुल्यस्यैव वाच्यत्वस्य मिथ्यात्वाद्ब्रह्मणि तदभावस्साध्यते, घटादे श्चानधिष्ठानत्वान्न तत्र तदभाव इति न घटाद्यविशेषप्रसग इत्येकदेशिमतं दूषयति नचे ति । अथ च सिद्धसाधनोद्धार पारमार्थिकवाच्यत्वप्रतिषेधवादिनं प्रत्येव , मतान्तरे घटाद्यविशेषासिद्धे । अस्तु वा वाच्यन्तर प्रत्यपि, तत्र च यदि कल्पित वाच्यत्वमिष्यते तदा सर्वत्राधिष्ठानसत्ताया अविशेषाद्घटाद्यविशेष इत्येवम्भावो बोध्य । तत्रापी ति । तत्रापीत्यतः पूर्व तत्रेति पूरणीयम् । तत्र–शुक्तिरजतादौ। अन्यथाख्यातिमतेनाह– सर्वस्ये ति । अधिष्ठानस्यारोप्यस्य तत्सम्बन्धस्य च वाच्यत्वादित्यर्थः । आदिपदेन यथार्थख्यातिवाद्यभिमतशुक्तिसमुद्भरजतावयवो गृह्यते।

कस्यचिदस्माभिः प्रकाशमानत्वानभ्युपगमात्। असद्व्यवहारप्रसङ्ग स्यान्यत्र निस्तीर्णत्वात्। यत्तु वाच्यत्वधर्मेणानैकान्त्यमुक्तम्; तदप्यसत्, तस्यापि वाच्यत्वशब्देन वाच्यत्वात्। अन्यथा वाच्यत्वमिति वक्तुमशक्यत्वात्। नचानवस्था, घटादिगत वाच्यत्वस्य वाच्यत्वगतवाच्यत्वस्य च वाच्यत्वशब्दवाच्यसामान्य रूपेणैकतया तदतिरिक्तगवेषणाभावात्। प्रतिवस्तुनियतशब्द व्यापारभेदेपि दोषाभावात्। स्वपरनिर्वाहकसमाधिं च स्वप्रकाश वादादौ परिगृहीत किमत्र विस्मरसि? यत्तु निर्विशेषत्वादिति प्रत्यनुमानम्; तत्र केषाचित् स्वरूपासिद्धिः। सिद्धानामपि स्वयम्प्रकाशत्वादीना स्ववचनविरोधादिभिर्निरास·। ब्रह्मेति धर्मि निर्देशात्तत्पर्यवसितसाध्यहेतुनिर्देशाच्च। अन्यथा आश्रयासिद्धय नन्वयस्वरूपासिद्धयादिदोषप्रसङ्गात्। मुख्यवृत्तिनिषेधस्साध्यते, लक्षणया तु धर्मिस्वरूपादिनिर्देश इति चेन्न,- ब्रह्म न लक्ष्य निर्विशेषत्वादित्यपि वक्तु शक्यत्वात्।

शशविषाणादिभिरनैकान्त्यं परिहरति– असद्व्यवहारे ति। तत्रापि प्रकाशमानशशविषाणसम्बन्धाना सत्यत्वमेवेति भावः। नचानवस्थे ति। घटादौ प्रवृत्तिनिमित्तभेदाद्वाच्यत्वभेद, ततश्च घटादिगतवाच्यत्वे वाच्यत्वगतवाच्यत्वे च वाच्यत्वमेकमिति तेन रूपेणानुगतीकृतेषु वाच्यत्वशब्दवाच्यत्वमेकमेव, ततश्च घटादिवाच्यत्वगतमेव स्वस्मिन्नपि वाच्यत्वमिति नानवस्थेत्यर्थ। वाच्यत्व शब्दवाच्यत्वशब्दवाच्यसामान्य वाच्यत्वत्वम्, यदिच प्रवृत्तिनिवृत्ताभेदेप्याश्रयभेदाद्वाच्यत्वभेदः तदानीमपि प्रामाणिकत्वान्नानवस्था दोषायेत्याह– प्रतिवस्त्वि ति। नन्वेवमप्यात्माश्रय इत्यत्राह- स्वपरे ति। अन्यथे ति। आश्रयासिद्धिराश्रयाज्ञानात्, अनन्वयः साध्यविशिष्टपक्षप्रतिपादनाभावः पर्वतो धूमवत्त्वादीतिवत्, स्वरूपासिद्धिर्हेतो. पक्षे अज्ञानात्। असाधारण्य परिहरति–

सर्वस्य च ब्रह्मव्यतिरिक्तस्य येन केनापि शब्देन लक्ष्यत्वसिद्धेर्न सपक्षत्वप्रसङ्ग. । माभूल्लक्ष्यत्वमपीति चेत् ? तर्हि धर्मिनिर्देशादित्यागे कथमनुमानकथा । " यतो वाचो निवर्तन्त " इत्यादिक तु न ब्रह्मणश्शब्दवाच्यतां बाधते, तस्य शतगुणितोत्तरक्रमेण ब्रह्मगुणानन्त्य प्रतिपाद्य तथाविधापरिच्छेद्यत्वनिबन्धनवाङ्निवृत्तिप्रतिपादनपरत्वात् । 'आनन्दं ब्रह्मणो विद्वा'निति व्यतिरेकनिर्देशेन च गुणविषयत्व व्यक्तम् । अन्यथा वाच्यत्वमात्रनिषेधे त्वत्रत्ययच्छब्दादेम्समुद्रघोषत्वप्रसङ्ग. । एवच यत्र गुणप्रकर्षप्रसङ्गमन्तरेणैव शब्दवाच्यत्व निषिद्ध तत्राप्ययमेव शास्त्रार्थोऽनुगमयितव्य । नचैवविधा वाचोनिवृत्तिर्वस्त्वन्तरेषु विद्यते, येन कतिपयशब्दमात्रागोचरत्वे अतिशयासिद्धि शङ्केथा' । या पुनस्तवासक्कोचेन विषयव्यवस्थाभिमता, साप्याशामात्रसिद्धा, लक्षणावृत्तेर्ब्रह्मणि काल्पनिकवाच्यत्वस्य वा दुस्त्यजत्वात् । अन्यथा स्ववचनविरोधादे प्रतिपादितत्वात् ।

अवाच्यमिति वाच्य चेत् ब्रह्मवाच्यत्वमृच्छति ।
अवाच्यमित्यवाच्य चेत् ब्रह्मवाच्यत्वमृच्छति ॥

सर्वस्य चे ति । न ब्रह्मण इति । अस्वा' श्रुते' गुणविषयत्वादिति भाव' । वाच्यत्वनिषेधपरत्वमप्यसिद्धमित्याह– तस्ये ति । असङ्कोचेने ति । वाच्यत्व निषेधस्येति शेष । ब्रह्मणि, अनुपहित इति शेष' । धर्मिसमानसत्ताकवाच्यत्वाभावेपि विषमसत्ताकवाच्यत्व वा लक्षणा वाङ्नीकार्या, ततश्च वाङ्निवृत्तिश्रुते र्नासङ्कोचसिद्धिरित्यर्थ' । अनुपहितबोधनाङ्गीकारे बाधकमाह– अन्यथे ति । अवाच्य मिति । अनाख्यपदेनेत्यर्थ. । नचावाच्यमित्येतद्वाक्यमेव, नच तथापि अवाच्यमिति वाक्यैकदेशभूतनञ्वाच्य वमस्तीति वाच्यम्, नञ पर्युदासलक्षकत्वात्, इति वाच्यम ,– अवाच्यमित्यत्र प्रातिपदिकार्थमात्रे विहितप्रथमा वाच्यत्वस्यावर्जनीयत्वात् । इदञ्चोपलक्षण ल.यादिपदे प्रत्ययवाच्यत्वमात्रस्यक

यत्तु- " प्रत्यस्तमितभेद " मित्यादि, तदपि परिशुद्धात्म स्वरूपोपदेशपरमिति प्रकरणानुसारेण व्याख्यात भाष्ये। भवतु वा तस्य परब्रह्मविषयत्वम्, तथापि न सर्वशब्दवाच्यत्वनिषेधशङ्का, स्ववचनविरोधादेरत्रापि दुर्निरासत्वात्। येन महर्षिणैवमुक्तम्- " शुद्धे महाविभूत्याख्ये परे ब्रह्मणि शब्द्यते। मैत्रेय भगवच्छब्द स्सर्वकारणकारणे॥ तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वित। शब्दोयं नोपचारेण ह्यन्यत्र ह्युपचारत.॥ एवमेष महाशब्दो मैत्रेय भगवा निति। परमब्रह्मभूतस्य वासुदेवस्य नान्यग॥ " इति, स कथ ब्रह्मणश्शब्दवाच्यत्व प्रतिक्षिपेत्। नच त्वदुक्ता एव श्रुतिस्मृतय, " बृहति बृहयति तस्माद्उच्यते पर ब्रह्म " " तस्यो दिति नाम " " तस्योपनिषदहरित्यधिदैवत " " तस्योपनिषद हरित्यध्यात्म " " सर्वाधार धाम विष्णुसज्ञ " मित्यादिश्रुतिगतै स्तत्तच्छब्दानां ब्रह्मणश्च नामनामिभावेनैव व्यपदेशात्। " ओ मिति ब्रह्मे " त्यादिना प्रणववाच्यत्वम्। स्मरन्ति च " नतास्म सर्ववचसां प्रतिष्ठा यत्र शाश्वती " " वचसा वाच्यमुत्तमम् " इति। आहच स्वयमेव— " वेदैश्च सर्वैरहमेव वेद्यः " " सर्वे वेदा यत्पदमामनन्ती " त्यादि।

अतस्सर्वश्रुत्याद्यविरोधाय स्ववचनविरोधादिपरिहाराय मुमुक्षूपा देयब्रह्मनामवर्गसरक्षणायापरिच्छेद्यमाहात्म्यादिनिबन्धनैव ब्रह्मणि वाचोनिवृत्तिश्रुतिस्मृतिभिर्विवक्षितेति न ब्रह्मणि शब्दवाच्यत्व मात्र प्रतिक्षेप्तु शक्यमिति।

इति शतदूषण्यां शब्दावेद्यत्वनिरासः

पञ्चचत्वारिंशोवादः ॥४५॥

मित्यपि द्रष्टव्यम्। शुद्ध इति। नन्विय स्मृतिरुपहितविषयैव, नच शुद्धपदवि- रोध., अविद्यामनङ्गीकुर्वता भवता हेयगुणराहित्यपरत्वस्य वाच्यतया तस्यैव

मयाप्यङ्गीकारे दोषाभावादिति चेन्न,– अविद्यामङ्गीकुर्वता त्वया शुद्धपदस्य तदनुपहितपरत्वस्यैव वाच्यत्वात् , इति भावः ।

अत्रायमस्मदाचार्याणा निष्कर्षः—

" ब्रह्मण्यशब्दवाच्ये स्याद्वचसा वाच्यमुत्तमम् ।
इत्यादिमानविद्वेषो वाच्यतोपहितस्य चेत् ॥
स्वरूपस्यापि वाच्यत्व तदन्तर्भावतो भवेत् ।
उपधानेन शून्यस्याबाच्यत्वे व्याहतिर्भवेत् ॥
वाच्यत्व ब्रह्मणो वाच्येनुपधाने न लक्षणा ।
समानसत्ववाच्यत्वाभावे तौल्य घटादिना ॥
निमित्तोपहिते शब्दस्वरूप चेन्न गोचर. ।
यतो वाचो निवर्तन्ते श्रुतिस्तु गुणगोचरा ॥
स्वरूपगोचरत्वेपि कथ शक्तिर्निवार्यते ।
अप्राप्येति निषेधे तु कथ मृष्येत लक्षणाम् ॥
निर्देश्यवृत्तिमात्रस्य निषेधव्याहतिस्ततः ।
शक्तेर्निषेधश्चेत्तर्हि लक्षणा वा निषिध्यताम्॥
लक्षणाया निषेधे हि वाच्यत्वश्रुत्यनुग्रह. ।
तात्पर्यमपरिच्छेदे श्रुते· प्रकरणात्तत. ॥
मनसा सममाम्नानान्निवृत्तिर्दुर्वचा गिर· ।
इष्यते हि मनोवृत्ति. परैरपि परात्मनि ॥ " इति ।

अयमर्थः—ब्रह्मणश्शब्दवाच्यत्वाभावे " वचसा वाच्यमुत्तम " मित्यादिविरोधः। उपहितस्य वाच्यत्वे न विरोध इति चेत् ? कि तर्ह्यवाच्यम् ? अनुपहितमिति चेत् ? कि तदनुपहितम् ? कि स्वरूपमेव, उतोपधानशून्य स्वरूपम् , कि वा उपधानाभावः? आद्ये– उपहितस्य वाच्यत्वे स्वरूपस्यापि तत्प्रवेशेन वाच्यत्व मनिवार्यमेव । द्वितीयेपि किमुपहितस्वरूपमेवोपधानशून्य विवक्षितम् , कि वा ततोन्यत् ? आद्ये व्याघात. । यदि चोपहितस्याप्युपधानस्यापारमार्थिकतया पारमार्थिकोपधानशून्यत्वान्न व्याघात·, एवमपि तादृश ब्रह्म वाच्यमेवेति कथ मवाच्यता । द्वितीयमसिद्धमनङ्गीकृत च । एतेन तृतीयमपि निरस्तम् । ब्रह्मणो वाच्यत्वाविरोधाच्च । यदि चोपहितान्तर्भावेन स्वरूपस्य वाच्यत्वेपि घटादिवद्धर्मि

समानसत्ताकवाच्यत्वाभावमात्रेणावाच्यत्वसिद्धि मन्यसे, तर्ह्यवाच्यमिव ब्रह्म लक्ष्यमपि स्यात्। लक्षणावैयर्थ्यं च। यदि च प्रवृत्तिनिमित्तोपहितप्रतीतेः शक्त्यधीनत्वेपि स्वरूपमात्रप्रतीतेश्शक्त्यधीनत्वाभावात् स्वरूपमवाच्यम्, प्रवृत्तिनिमित्तस्य मिथ्यात्वेन तद्विषयकप्रतीतेरविद्यानिवर्तकत्वाभावात्, शब्दजन्य स्वरूपमात्रविषयकापरोक्षवृत्तये स्वरूपलक्षणेति ब्रूषे, तर्हि घटाद्यविशेषः। नहि घटत्वाद्युपहिता शक्तिस्तदनुपहित बोधयति। नच वाच्यत्वे ब्रह्मणो 'यतो वाचो निवर्तन्ते" इति श्रुतिविरोध, तस्या गुणापरिच्छेदतात्पर्यकत्वात्। स्वरूपानन्दविषयत्वेपि वाङ्मात्रनिवृत्तिप्रतीत्या कथ शक्तिनिवृत्तिः। ननु "अप्राप्य निवर्तन्त" इति शक्तिरूपसम्बन्धाभावाद्वाङ्निवृत्ति प्रतीयत इति चेन्न,– वृत्ति मात्रस्य शब्दार्थसम्बन्धतया लक्षणाया अपि निषेधप्रसङ्गात्। यत इति निर्दिश्य वृत्तिमात्रनिषेधे व्याघाताच्छक्तिर्निषिद्ध्यत इति चेन्न,– विपरीतस्य सुवचत्वात्। तथासति हि "वचसा वाच्यमुत्तम" मित्यादिश्रुतिविरोधश्च। किञ्चैव सङ्कोचे प्रकरणानुसारात् मानुषादीना प्राजापत्यपर्यन्तानामिवानन्दाना ब्रह्मानन्दस्य परिच्छेदाभावात् शब्दो न मानुषाद्यानन्दानिव प्राप्नोति-प्रकर्षेण सम्बन्ध्यते, न तथा बोधनसमर्थः, अतो निवर्तत इत्येव श्रुत्यर्थ एष्टव्य.। किञ्च मनोवृत्तिनिषेधासम्भवेन तन्निषेधस्य उक्तार्थपरत्वे वाच्ये वाङ्निषेधस्यापि तत्परत्वमेव युक्तमिति।

अन्येतु– न ब्रह्म सर्वशब्दावाच्यम्, अवाच्यशब्देनाभिधानात्, नच तेनापि लक्ष्यते, अवाच्यरूपमुख्यार्थस्याभावात्, भावे वा ब्रह्म वाच्यमेव अवाच्यपदवाच्यरूपमुख्यार्थसम्बन्धीति स्यात। मुख्यार्थहीनस्य ब्रह्मलक्षकत्वे घटशब्दोपि घटलक्षकस्स्यात्। एव निर्विशेष स्वप्रकाश परमार्थ सदित्यादिभिर्ब्रह्मोच्यते चेत् वाच्यत्वसिद्धि। नच तैर्लक्ष्यते, निर्विशेषस्वप्रकाशादिरूप मुख्यार्थस्यान्यस्याभावात्। एव लक्ष्यशब्देनोच्यते चेत्? वाच्यत्वसिद्धि। लक्ष्यते चेत् लक्ष्यत्वहानि, गङ्गाशब्दलक्ष्यस्यागङ्गात्ववल्लक्ष्यपदलक्ष्यस्यालक्ष्यत्वात्। ननु निर्विशेषादिशब्दाना विशेषाभावादिविशिष्ट वाच्यम्, तच्च न ब्रह्म, तस्य विशेषाभावाद्युपलक्षितत्वादितिचेत्? तर्हि विशेषाभावोपलक्षितशब्दवाच्यत्वम्। ननु विशेषाभावोपलक्षितत्वादिक तद्विशिष्ट वा निर्विशेषादिपदवाच्यम्, तच्च न ब्रह्म, किन्तु तदाश्रयव्यक्तिभूत

विशेष्य वा, एवच मुख्यार्थसिद्धि. , ब्रह्मणो निर्विशेषादिशब्दवाच्यत्वेपि निर्विशेषत्वाद्यहानिश्चेति चेन्न,– व्यक्तिश्शब्दार्थो जातिस्तूपधानमिति मते जातिविशिष्टा व्यक्तिश्शब्दार्थ इति मते च यत्र विशेष्ये निर्विशेषत्वादिक तस्य तत्पदवाच्यत्वायोगात् । 'जातिश्शब्दार्थ' इति मते तु घटादि व्यक्तेरपि घटादिशब्दावाच्यत्वेन ब्रह्मणस्ततो विशेषार्थं जातिवाचिभिश्शब्दैर्ब्रह्म जात्याधारव्यक्तिसम्बन्धितयैव लक्ष्यत इति वक्तव्यत्वेन मुख्यार्थाभावादिदोष तादवस्थ्यात् ; ' सत्य ज्ञानमनन्त ' मित्यादौ ब्रह्मणस्सत्यत्वादिधर्माश्रयतयैव लक्ष्यत्वाल्लक्ष्यघटादिवत्सखण्डत्वापाताच्च । निर्गुणस्वप्रकाशादेरब्रह्मत्वे यद्यद्ब्रह्म तयेष्यते तत्तदब्रह्मेति साधु समर्थितो ब्रह्मवादः । नन्ववाच्यादिशब्दास्समास रूपाः, लक्ष्यादिशब्दास्तु यौगिकाः, उभयेषामपि वाक्यतुल्यत्वान्न वाचकतेति चेन्न,– समासे पदार्थसमर्गस्य यौगिके प्रकृतिप्रत्ययार्थसमर्गस्य चानभिधेय त्वेपि पदार्थस्य प्रत्ययार्थस्य च वाच्यत्वेन तदर्थस्य ब्रह्मणो वाच्यत्वापरिहा रात् । यदिच ब्रह्म न पदार्थः, किन्तु पदार्थससर्गरूपम् , तर्हि सखण्ड स्यात् । यदि त्ववाच्यत्वमित्यादि न पदार्थद्वयाधिकरत्वार्थसमर्गपरम् , किन्तु ब्रह्ममात्रलक्षकम् , तर्हि न तेनावाच्यत्वादिसिद्धि. । तस्मान्निर्विशेषादिशब्द वाच्यत्व दुर्वारम् । ' यतो वाचो निवर्तन्ते ' ' अशब्दमस्पर्श ' इत्यादिश्रुतिस्तु अद्भुतत्वाद्यभिप्राया । ' नहीदृगितिविज्ञेय ' ' न वाच्य नच दृश्यते' ' पश्य न्तोपि न पश्यन्ति ' इत्यादिश्रुतौ तद्दर्शनात् । पराभिमते अर्थे अशब्दमि त्यादि शब्दवाच्यत्वस्यापि निषेधेन तदसिद्धेः । ' यतो वाच ' इत्यत्रापि 'मनसा सहे' ति श्रुतौ मनोवृत्तेरिव अन्तःकरणवृत्तिव्याप्ये ब्रह्मणि वाग्वृत्तेरपि निषेधा योगाच्च । आनन्दाद्यनेकशब्दमुख्यार्थत्वाय ' निवर्तन्त ' इत्येकस्यैवामुख्यार्थं त्वस्य न्याय्यत्वाच्च । ' अथ कस्मादुच्यते ब्रह्म ' ' यस्मादुच्यते पर ब्रह्म ' ' वचसा वाच्यमुत्तमम् ' इत्यादिश्रुतेश्च । वेदान्ततात्पर्यविषयो ब्रह्म वाच्यम् , वस्तुत्वाल्लक्ष्यत्वात्तीरवत् , परमार्थसदादिपद कस्यचिद्वाचक. पदत्वात्, घ टादिपदवत् , सत्यज्ञानादिवाक्य वाच्यार्थतात्पर्यवत् , वाक्यत्वात्, अग्नि होत्रादिवाक्यवत् , इत्यनुमानैश्च विरोधाच्च । विपक्षे लक्ष्यत्व न स्यात्, तथाहि लाक्षणिकशब्दो न श्रुत एवार्थान्तरधीहेतुः , तत्रागृहीतशक्तित्वात् ।

किन्तु स्ववाच्यार्थे अनुपपत्तिदर्शने सति तत्त्यागे स्वार्थसम्बन्धित्वेनावगतस्यैव बोधकः, गङ्गादिशब्दादौ तथा दर्शनात् । अन्यथातिप्रसगाच्च । तथाच ब्रह्मणोपि लक्ष्यत्वे वाच्यार्थसमर्पितया ज्ञेयत्वादौपनिषदस्य चाशब्देनाज्ञेयत्वात्, स्वप्रकाशतया नित्यसिद्धौ च शब्दवैयर्थ्यात्, अवाच्ये लक्षकस्यैतस्य वक्तव्यत्वात्, तत्रापि स्वार्थसम्बन्धित्वेन ज्ञेयत्वेनानवस्थेति कथमवाच्ये लक्षणा? नच वाचकस्यापि गृहीतसङ्केतस्यैव बोधकत्वात्, सम्बन्धग्रहणस्य च सम्बन्धिज्ञानाधीनत्वात्, तदर्थस्य च ब्रह्मणश्शब्दैकमेयत्वात्, तवाप्यनवस्थेति वाच्यम्,— यौगिकशब्दाना वाक्यतुल्यत्वेनानपेक्षणात् । ननु प्रवृत्तिनिमित्ता भावात्कथ वाच्यत्वम् ? नच गुणक्रियाजात्यन्यतमदात्मन्यस्ति. नच घटादाविवारोपितनिमित्तमस्तीति शङ्कनीयम्, आरोपिते श्रुतितात्पर्ययोगेन तात्पर्यविषयस्य वाच्यत्वायोगादिति चेन्न,— सत्यादिशब्दाना लक्षकत्वे सिद्धे निमित्ताभाव. तस्मिन् सिद्धे च लक्षकत्वमित्यन्योन्याश्रयात् । स्वरूपमात्रप्रश्नोत्तरत्वेन लक्षकत्वमित्यस्याखण्डार्थत्वभङ्ग एव निरस्तत्वात् । निर्विशेषवाक्यस्य स्वरूपमात्रपरत्वे विशेषाविरोधात्, तस्य निर्विशेषत्वविशिष्टपरत्वे तु निमित्तस्य सत्त्वेन निर्विशेषशब्दवाच्यतापातात्, अभावनिमित्तकशब्दवाच्यत्वे प्रामाणिकत्वाविशेषेण भावनिमित्तकशब्दवाच्यत्वस्यापि दुरपह्नवत्वात् । तस्मात् ब्रह्मणि सर्वेषा वेदान्ताना लक्षणेत्येतदयुक्तमिति ।

अत्र नवीनः— तात्पर्येण सत्यादिवाक्यप्रतिपाद्य ब्रह्म न तद्वाक्यस्थपदशक्यम्, तद्वाक्यार्थत्वात्, सम्मतवत्, "वेदैश्च सर्वैरहमेव वेद्यः" "औपनिषदम्" इत्यादिश्रुत्या च वाक्यार्थत्वसिद्धि. । नचान्विताभिधानवादे नियोगादौ व्यभिचारः, अन्वयविशेषस्य तद्विशिष्टस्य वा वाक्यार्थस्य तत्पदाशक्यत्वात् । नहि धात्वर्थविशेषपुरुषविशेषान्वितो नियोगस्तेन तदन्यतो वा केनचित्प्रतीयते ? अप्रतीतेः पदान्तरवैयर्थ्याच्च । नच प्रमेयो घट इत्यत्र प्रमेय घटाभेदस्य वाक्यार्थस्य प्रमेयपदाभिधेयत्वात् व्यभिचार इति वाच्यम् । प्रमेयत्वस्यैकस्यासम्भवेन तारादिशब्दवदनेकार्थत्वस्यैव वक्तव्यतया पदार्थवाक्यार्थयोरेकपदानभिधेयत्वात् । एव सम्बन्धपदार्थोप्येको दुर्वच इति दण्डस्सम्बन्धीतिवाक्यार्थे न व्यभिचारः ।

नच विशिष्टधीनियामकत्व सम्बन्धत्वम्, वैशिष्ट्यस्यैव सम्बन्धत्वेनान्योन्याश्रयात्। नापि विशेषणधीजन्यज्ञानासाधारणविषयत्व सम्बन्धत्वम्, असाधारणत्व यदि तदजन्यज्ञानाविषयत्व तदा असम्भवः, स्वरूपसम्बन्धाव्याप्तिश्च, विषयत्वस्या प्यननुगतत्वात्। तद्वाक्यस्थपदशक्यतावच्छेदकधर्मवदन्यत्वादिति वा हेतु'। शक्तिविषयत्वस्य च निषेधान्न साध्याविशेषः। नचासिद्धिः, वक्ष्यमाणन्यायात्। नचाप्रयोजकत्वम्, सत्यज्ञानानन्दात्मनि ब्रह्मणि सत्यादिपदस्यैकैकस्य शक्ता वेकपदेनैव तादृगुपस्थिते पदान्तरवैयर्थ्यस्य च प्रसङ्गात्। नच सिद्धान्ते ब्रह्मणस्सन्मात्रत्वात् सतश्च सत्पदात्प्रतीतेरनुपस्थिताशः कोपि नास्तीति वाच्यम्, सतो ज्ञानानन्दाद्यभेदसंशयविरोधिप्रतीतेरेवापादनात्। नचैकस्मात्पदात्सा दृश्यम्, तेन च तत्र जायमानेपि दोषादेव संशय इति वाच्यम्,— ज्ञानादिपदसामानाधिकरण्यप्रतिसन्धान विना तत्संशयनिवृत्त्यदर्शनेन तत्प्रतीते र्वाक्यकृत्यत्वात्। किञ्च सर्वपदाना तत्र शक्तौ सत्यज्ञानादिपदाना पर्यायता पत्तिश्च। प्रवृत्तिनिमित्तभेदे च सद्विशिष्टस्य धर्ममात्रस्य वा शक्यतापातात् नागमाभिमतब्रह्मणश्शक्यत्वम्। सत्यादिपदमपि न ब्रह्मवाचकम्, तत्प्रति पादकवाक्यैकदेशपदत्वात्, यद्यदर्थवाक्यैकदेशपद न तत्तद्वाचकम्। घटानय नादिससर्गप्रतिपादकघटमानयेतिवाक्यस्थघटादिपदवत्। वाक्यार्थस्य तदेकदेश पदार्थत्वे सहस्रशोनिखिलपदाना परस्परान्वितस्वार्थबोधकता व्युत्पत्तिसिद्धा बाध्येत। नच लक्ष्यत्वे ऽप्यय दोष प्राग्रस्त्यस्येव एकस्याप्यनेकपदलक्ष्यत्वसम्भ वात्। नच लक्ष्यस्यापि शक्यसम्बन्धितया पूर्वमवगमनीयत्वात् ब्रह्मणोऽपूर्वता क्षतिः, मानान्तर विनापि विचारेण शब्देन सत्यत्वादिविशिष्टेन लक्ष्यस्य विशे ष्यस्य तादात्म्यसम्बन्धावगमात्। किञ्चाभिहितान्वयवादिना अन्विताभिधान वादिना वा वाक्यार्थमात्र लक्ष्यमेव च वक्तव्यम्, अन्यथा तत्प्रतीत्यनुपपत्तेः। नच शक्तयैव पदार्थज्ञानद्वारा वाक्यार्थप्रमा, अपर्यवसानालभ्यस्य शक्तिजन्य ज्ञानविषयस्य शक्यत्वनियमात्। नहि जातिपदार्थवादिना व्यक्तिरिव पदार्थससर्गो पर्यवसानलभ्य', येन शक्तिजन्यज्ञानविषयत्वेपि वाच्यत्व न स्यात्। अन्यथा एकपदादपि ससर्गविशेषो भायात्। आकाङ्क्षाद्यपेक्षाभावप्रसङ्गाच्च। विनि गमकाभावेन पर्यायतापत्तेश्च। नच विनापि वृत्त्या पदानामाकाङ्क्षादिमहिम्नैव ससर्गबोधकत्वमस्तीति वाच्यम्,— प्रतिपादनसामर्थ्यस्य हि आकाङ्क्षादिसहकार्य

पेक्षणम् , सामर्थ्यञ्च शब्दस्यार्थे वृत्तिरेव । तथाच वाक्यार्थज्ञानं लक्षणाजन्यम् , शक्त्यजन्यत्वे सति शब्दजन्यत्वात् , सम्मतवत् । अन्यथा वाक्यार्थे शाब्दत्वं न स्यात् । नच लाक्षणिकत्वे पदाना ससर्गानुभावकत्व न स्यात् ; ससर्गस्यैव सर्वपदैर्लक्ष्यत्वात् , तस्य च पूर्वमननुभूतत्वात् । लाक्षणिकगङ्गापदस्याप्यन्वयप्रतियोग्युपस्थापकतया पदान्तरवदनुभवजनकत्वाच्च । पदस्यानुभावकत्वे ऽन्वयप्रतियोग्युपस्थापकत्वमेव तन्त्रम् , नतु शक्तत्वम् , अशक्तादपि तदुपस्थितिदशाया ततोनुभवदर्शनात् । समभिव्याहृतपदाना सम्भूयकारित्वव्युत्पत्तिविरोधाच्च । विभक्तेस्स्वप्रकृत्या सह स्वार्थान्वयबोधकत्वानुभवाच्च । नच वाक्ये शक्त्यभावात् कथ तेन ससर्गो लक्षणीय', शक्यसम्बन्धाभावादिति वाच्यम् ,– पदसमूहो हि वाक्यम् , समूहश्चैकधर्मावच्छिन्नपदान्येव, तानि च शक्तानीति तत्ससर्गस्तदर्थसम्बन्ध्येव । लाक्षणिकपदार्थससर्गोपि परम्परया शक्यसम्बन्ध्येव, अन्यथा अर्थवादपदसमुदाये लक्षणा न स्यात् । वाक्यार्थप्रतीत्युद्देशेन वाक्यप्रयोगानुपपत्तिर्लक्षणा बीजम् । नन्वेवमपि वाक्यार्थस्य शक्यसम्बन्धित्वेनानवगमात् कथं तत्र लक्षणेति चेन्न,– स्मृत्यर्थं हि पूर्वमनुभवापेक्षा, नहि वाक्यार्थस्य स्मृतिरपेक्षिता ?

नन्वेवमेकस्मिन् प्रयोगे पदेषु वृत्तिद्वय विरुद्धमिति चेन्न,– एकस्य ज्ञानस्य वृत्तिद्वयाजन्यत्वात् । गङ्गाया यादासि घोषश्चेत्यत्र तात्पर्यज्ञाने युगपदन्वयबोधस्य परैरभ्युपेयत्वाच्च । ननु ससर्गविशेष एव वाक्येन लक्षणीय', ससर्गे च विशेषः पदार्थ एवेत्यजहल्लक्षणा स्यात् , सा चानुपपन्ना, शक्यलक्ष्यसाधारणरूपाभावात् , इति चेन्न,– तीरत्वावच्छिन्ने तीर इव पदार्थविशेषावच्छिन्ने ससर्गे ऽजहल्लक्षणोपपत्ते' । एकधर्मावच्छेदेन पदार्थद्वयोपस्थितौ ह्यजहल्लक्षणा । अतो वाक्यार्थस्य ब्रह्मणो लक्ष्यत्वमविरुद्धम् । किञ्च— विशिष्टब्रह्मशक्तैः केवलधर्मशक्तैर्वा पदैर्निर्गुणब्रह्मप्रमितिसिद्धौ न तत्रापि शक्तिः कल्प्या, अन्यलभ्ये तदयोगात् । मुख्यार्थत्वाय शक्तिकल्पनाया गङ्गापदस्यापि तीरे शक्तिः प्रसज्येत । ततश्च ब्रह्मपद वृद्धिविशिष्टवाचकम् , वृद्धिश्चोपचयः, स चात्र सर्वात्मत्वयोग्यता, नत्ववयवोपचयः, नापि गुणाधिक्यम्, गुणाधिक्यमात्रस्य सर्वत्र

मुलभत्वात् , सर्वगुणवैशिष्ट्यस्य तदर्थत्वे सर्वात्मत्वस्याप्यन्तर्भावात् आत्मैक्यकत्वात् स्वरूपोपचयरूपत्वाच्च तदेव ब्रह्मशब्दार्थः । आत्मशब्दार्थोऽपि व्याप्तिरूपसातत्यविशिष्ट । एव सत्यादिशब्दार्थोऽपि बाधायोग्यत्वादिविशिष्ट । अतस्सत्यज्ञानाद्यात्मकब्रह्मणि ब्रह्मादिपदाना लक्षणैव । यत्तु लक्ष्यमवाच्य मित्यादिपदवाच्यत्वाद्ब्रह्मणो न सर्वपदलक्ष्यत्वमिति, तन्न, तत्र प्रमाणाभावात् । किं सर्वशब्दलक्ष्यत्वमुपपादयतु तस्य तत्पदवाच्यत्वम्, उत लक्ष्यादिपद प्रवृत्तिनिमित्तस्य ब्रह्मणि सत्त्वेन, त्वदुक्तानवस्थापरिहारायवा ? नाद्य , लक्ष्यादि पदवाच्यत्वे तदयोगात् । ननु ब्रह्मणो लक्ष्यादिपदवाच्यत्वाभावे कथ ब्रह्म सर्वपदलक्ष्यमिति प्रतिपादनीयमिति चेत् ? का तर्हि प्रतिपादनेनुपपत्ति ? न तावत् तेन विना योग्यताया अभाव , प्रत्युत तस्मिन् सत्येव न योग्यता, नापि लक्ष्यादिपदवाच्याप्रसिद्धया तल्लक्षणानुपपत्ति, तत्तत्पदलक्ष्यतोपादे. लक्ष्य पदार्थत्वात् । ननु लक्ष्यपदेनापि तस्य लक्ष्यत्वे कथ वाक्यार्थप्रतीति ? लक्ष्यपदवाच्यसम्बन्धत्वेन हि ज्ञाते लक्ष्यपदस्य लक्षणा, तज्ज्ञान च सिद्धान्ते लाक्षणिकपदेनैव नक्तव्यमिति तत्तल्लक्ष्यज्ञानार्थं तत्तल्लाक्षणिकपदापेक्षया अनव स्थानादिति चेत् ? तर्हि स एव दोषः । सत्र निरूप्यते । नापि द्वितीय, तत्तद्धर्मविशिष्टस्य ब्रह्मणो वाच्यत्वेपि तदधिष्ठानस्य विशेष्यस्य तदभावात् । विशेष्यस्य सर्वस्मादपि विशिष्टादन्यत्वात्तल्लक्ष्यते । अतएव यद्यद्ब्रह्मत्वेनोपेत्य तद्ब्रह्मेति परोक्तं निरस्तम् , विशेष्यस्य निर्धर्मकस्यैव ब्रह्मत्वात् । नन्वानन्दादि पदलक्ष्यस्य तद्वाच्याद्विशिष्टादन्यत्वे आनन्दत्वादिकं न स्यादिति चेन्न,— दण्डि देवदत्तादन्यत्वेपि विशेष्यदेवदत्ते देवदत्तस्वरूपस्येव विशेष्यानन्देपि तत्स्वरूपा नपायात् । सत्यादिपदलक्ष्ये वाच्यान्यस्वरूपे सत्यादिपदवाच्यत्व नाम कश्चि- द्धर्म , तद्विशिष्टमवाच्यशब्दार्थ इति तस्यापि विशिष्टवाचकत्वमेव । तथाच वाच्य पदमपि लक्षणयैव वाच्यार्थं ब्रह्मोपस्थापयति । अन्यथा यावद्वाच्यान्यत्वप्रतिपादका वाच्यपदस्य योग्यताया अभावात् । अतएवावाच्यपदलक्ष्यत्वे अवाच्य न भवेदिति निरस्तम्, अवाच्यस्वरूप एव व्यावहारिकावाच्यत्वस्य कल्पिततया अवाच्यपदलक्ष्य स्यापि ब्रह्मण तत्स्वरूपानपायात् । वस्तुतस्त्ववाच्यमिति वाक्यमेव, नञ् लक्षणया

ब्रह्मान्यत्प्रतिपादयति । ननु स्वरूपमात्रमेव लक्ष्यादिपदशक्य भवन्विति चेत् ? शक्त परमतेपि विशिष्टविषयत्वात् । नापि त्वदुक्तानवस्था, विचारादिना तस्य वाच्यसम्बन्धित्वेन निर्णीतत्वात् । लक्ष्यतावच्छेदक च नात्रापेक्षितम्, लक्ष्य स्वरूपस्य स्वता व्यावृत्तत्वादेकत्वाच्च । ननु लक्ष्यस्य लक्षकशब्दैरेव पर प्रतिपादनेनवस्थेति मूकतापत्तिरिति चेन्न,— ब्रह्मण उक्तविधया निर्धर्मत्व सत्यज्ञानाद्यात्मत्व तस्मिन् सत्यादिपदव्युत्पत्तिप्रकारमानन्दादिस्वरूपस्यैवानन्दादिपदलक्ष्यत्व मवगच्छत आनन्द एव ब्रह्मत्युपदेशादेव योग्यतानुसारेण धर्मिणोरेवाभेदावगम सम्भवात् । विशेषणभेदप्रयुक्तमेव भेद विशिष्टयोरवगच्छत. सदभेदप्रतीतिस्वरूपविषयत्वात् । प्रवृत्तिनिमित्तभावाद्पि न ब्रह्मणि पदाना शक्ति, पारमार्थिक जातिगुणक्रियादेरसम्भवात् । तदसम्भवश्च लक्षणा विनापि दृश्यत्वाद्यनुमानैर्निषेध वाक्यैश्च निरूपयितु शक्यत इति न त्वदुक्तान्योन्याश्रय । कल्पितगुणक्रियानैशिष्टये च वेदान्ततात्पर्ययोगात् । ननु वेदान्ततात्पर्यगोचरत्वविशिष्टब्रह्मणस्त्वप्रतिपादकवाक्यस्थपदाशक्यत्वसिद्धावपि न निशेष्यब्रह्मणस्तत्सिद्धिरिति चेन्न,— अनुमितिर्हि पक्षतावच्छेदकधर्माश्रयस्यैव शक्यान्यत्व विषयीकरोति, सर्वत्रापि साध्यस्य पक्षताश्रयवैशिष्ट्यस्यैवानुमितिविषयत्वात् । नन्वेवमपि वेदान्ततात्पर्यगोचर इति पदाद्विशेष्यस्यानुपस्थित कथ तत्पक्षकानुमितिरिति चेन्न,— निर्धर्मके ब्रह्मणि वेदान्ततात्पर्य विदुष. वेदान्ततात्पर्यगोचर इति पदाल्लक्षणया तस्यैवोपस्थितेर्वक्तव्यत्वात् । अन्यथा योग्यतासम्भवात् । अन्यथा त्वदीयानुमानमपि नास्मदभिमतब्रह्मणो वाच्यत्व विषयीकुर्यात् । ब्रह्मादिपद विशिष्टस्य धर्ममात्रस्य वा वाचकम्, पदत्वात्सम्प्रतिपन्नवत्, इति वानुमानमस्तु । एव " यतो वाचो निवर्तन्ते अप्राप्य मनसा सह " ति श्रुतिरपि शब्दस्य प्राप्ति वारयन्ती तस्य शक्तिं ब्रह्मणि निषेधति, शब्दस्यार्थेन शक्तेरेव प्राप्तित्वात् । लक्षणा तु शक्य सम्बन्धरूपा परम्परयैव शब्दसम्बन्ध इति अमुख्यप्राप्तिरेवेति तन्निषेधायागात् । लक्षणानिषेधे " सर्वे वेदा यत्पदमामनन्ति " इत्यादिश्रुतिविरोधाच्च । मनसा सहेति च मनस करणत्वमेव निषिध्यते, स्वरूपेण निषेधायोगात् वृत्तिमात्रस्य मनोजन्यत्वात । 'मनसै वानुद्रष्टव्यम्' इति श्रुतिविरोधाच्च । केवलमनोगम्यत्व वा

निषिध्यते। नन्वमेयगुणत्व 'यतो वाचो निवर्तन्ते' इति श्रुतेरर्थ इति चेत्[१] अमेयत्वं यदि गुणस्य मानागोचरत्व तदा निर्गुणमेव ब्रह्मेति वाच्यत्वनिषेधः प्रवृत्ति निमित्ताभावात्। अथ सख्याशून्यत्वम्, तन्न, "आनन्द ब्रह्मणो विद्वान्न बिभेती" ति वाक्यशेषेण ब्रह्मस्वरूपभूतानन्दस्यैव ज्ञानात् भयनिवृत्तिश्रवणेन गुणान्तरैर्विना ऽनुपपत्त्यभावेन लक्षणायोगात्। मुक्तिसाधनज्ञानाविषयस्य श्रुति प्रतिपाद्यत्वायोगाच्च। प्रत्युत वाक्योपक्रमे अनन्तगुण प्रक्रम्यानन्दज्ञानान्मोक्ष इत्युक्ते देवदत्तो वामेन चक्षुषा पश्यतात्युक्ते दक्षिणेन दर्शननिषेधवत् गुणान्तराणा मपुरुषार्थत्वमेव प्रतिपादित भवेत्। ततश्च ब्रह्मणोपि हेयगुणवत्त्वमिति साधु समर्थितस्तन्त्रसमयः। नचानन्दमित्यत्रापि गुणान्तरलक्षणा, सिद्धान्तेपि तच्छब्दे लक्षणाभ्युपगमादिति वाच्यम्,– आत्ममात्रज्ञानस्यैव सर्वत्र श्रुतौ मुक्तिसाधनत्वा वगमात्, त्वदुक्तलक्षणायोगात्। अस्मन्मतसिद्धलक्षणायास्तयैव श्रुत्याभ्युपेयत्वात्। किचास्मन्मतसिद्धलक्षणा श्रुतितुल्यैव, प्रसिद्धार्थानपायात्। यथा रेवतीवाक्ये एतच्छब्दस्य प्रकृतानिष्टधर्मलक्षणायामपि श्रुतितुल्यता। न वाच्यमिति त्वदुदाहृत श्रुतौ साक्षाद्वाच्यत्वनिषेधाच्च। यत्तु अनया श्रुत्या अद्भुतत्व प्रतिपाद्यत इति, तन्न,– तस्य पदार्थवाक्यार्थयोरन्यतरत्वाभावात्। नापि तत्र लक्षणा, तत्र न तावदन्वयानुपपत्त्याद्भुतत्वलक्षणा, वाच इत्यस्य तेनान्वयायोगात्। नापि यतोऽद्भुता वाचो भवन्तीत्यर्थः, भवन्त्यश्रवणात्। सृष्टेरतीतत्वाच्च। नापि तात्पर्यानुपपत्त्या सर्वपदलक्षणा, अद्भुतत्वस्य तस्मिन् प्रकरणे उपक्रमानवगतस्य तात्पर्यगोचरत्वायोगात्। सर्वपदलक्षणायाश्च तवाभावात्। तस्य सम्बन्धित्वेना प्रतीतेश्च। वाक्यशेषपर्यालोचनया तस्याप्यपुरुषार्थत्वेन श्रुत्या अप्रतिपाद्यत्वाच्च। 'अथ कस्मादुच्यते ब्रह्म' इत्यादि तु ब्रह्मशब्दतात्पर्यविषयत्वाभिप्रायम्, गङ्गा पदेन तीरमुच्यत इति प्रयोगात्।

तस्मादखण्डवाक्यार्थे सत्यज्ञानसुखात्मनि।
न कस्यापि पदस्यास्ति शक्तिरित्यात्मवित्स्थितिरिति॥

अत्रोच्यते—तात्पर्येण सत्यादिवाक्यप्रतिपाद्य ब्रह्मेत्यत्राखण्डार्थत्वपक्षे स्व रूपस्यैव वाक्यप्रतिपाद्यत्वात् व्यर्थ तात्पर्यविषयविशेषणम्। सत्यादिवाक्यप्रति

पाद्यत्वविशेषण च व्यर्थम् । तदप्रतिपाद्य व्यावृत्तयेतद्विशेषणमिति चेत् ? तद प्रतिपाद्य किं घटादि, उत ब्रह्म ? नाद्य., ब्रह्मपदादेव तद्व्यावृत्तिसिद्धेः । द्वितीयेपि किं तदभिन्न सत्यज्ञानादिवाक्यार्थापेक्षया उत भिन्नम् ? नाद्य , व्यावृत्तय सिद्धे', अव्यावर्तनीयत्वाच्च । द्वितीयेत्वसिद्धमेव । उपहित ब्रह्म सत्यज्ञानादि वाक्यार्थापेक्षया भिन्नमेवेति चेत् ? किं सत्यज्ञानादिवाक्यार्थोपि केनचित् उप हित., उत अनुपहित ? नाद्य , उपहितस्य वाच्यत्वस्य त्वदिष्टत्वात् । उपहित स्यावाच्यत्वसाधने स्वरूप्यावाच्यत्वासिद्धिश्च । न द्वितीय', तस्य स्वरूपमात्रतया उपहितस्य ततो भेदासिद्धे । किंचिदुपाध्युपहित उपाध्यन्तरोपहितापेक्षया भिद्यते नतु स्वरूपापेक्षयापि, तथा सति घटाकाशस्यानाकाशत्वापत्ते । किंचैवमौपा धिकभेदे सत्यपि स्वाभाविकाभेदस्थानपायात् विशेष्यशक्तेरनपायाद्बाधः । किंच तात्पर्यविषयपदेनापि स्वरूप लक्ष्यम् , अन्यथा योग्यताविरहात् । ब्रह्मपदेनैव च तत्सम्भवति । तस्माद्व्यर्थ विशेषणम् । किंच उपहितस्यानुपहितस्य ता- त्पर्यविषयादिपदेन लक्षणीयतया त्वयोच्यमानस्य पक्षतयाप्रसिद्धेराश्रया सिद्धि । वाक्यार्थत्व च किं विवक्षितम् ? किं पदार्थससर्गत्वम् , उत वाक्य जन्यप्रतीतिविषयत्वम् , वाक्यजन्यप्रतीतिविशेष्यत्व वा ? नाद्यः स्वरूपासिद्धेः । न द्वितीय , पदार्थे व्यभिचारात् । न तृतीय ,स्वरूपासिद्धे । सत्यादिवाक्यान्निष्प्र- कारकस्वरूपमात्रविषयप्रतीतेस्त्वयाङ्गीकारात् । पदार्थे व्यभिचाराच्च । नच तदन्यत्वेन विशेषणम् , पदजन्यप्रतीतिविषयान्यत्वविवक्षायामसिद्धे', पदानामेव वाक्यार्थबोधहेतुत्वात् । पदशक्तिविषयाभिन्नविवक्षाया साध्याविशेषात् ।

नच स्वविषयत्वावच्छिन्नकार्यताप्रतियोगिककारणताश्रयपदमात्रघटितस्वप्रति पादकवाक्यकत्वादिति हेतु , वाक्यार्थप्रतीतौ हि तत्पदार्थान्वयानुभवत्व तत्त त्पदजन्यतावच्छेदकमिति वाच्यम् ,– अधिकरणे अधिकरणत्वमित्यत्राधिकरण त्वस्य प्रकृतिप्रत्ययपदान्तररूपसकलप्रतिपाद्यत्वात् , नीलमुत्पलमित्यत्र पदद्वयं स्यापि विशेष्यवाचित्वेन विशेष्ये व्यभिचाराच्च । सयोगिदण्डवान् देव दत्त इत्यत्र व्यभिचाराच्च । घटान्यवान् घटः नित्यवदाकाश प्रपञ्चो मिथ्येत्यादौ व्यभिचाराच्च । ननु स्वप्रकारकस्वाविशेष्यकज्ञाननिष्ठत्वमपि स्व

विषयत्वावच्छिन्नकार्यतानिरूपितविशेषणमिति चेन्न,– सत्यज्ञानादिवाक्यजन्यप्रतीतौ ब्रह्मणो विशेष्यतया स्वरूपासिद्धे । नच वाक्यस्याखण्डार्थत्वात् तज्जन्यप्रतीतौ ब्रह्म न प्रकारो विशेष्यं वेति वाच्यम्,– तथासति प्रकृष्टप्रकाशादिवाक्यस्यापि तथात्वेन चन्द्रादिपदार्थे व्यभिचारात् । नच तत्रापि स्वरूपमात्रस्य वाक्यार्थत्वाच्चन्द्रत्वादिविशिष्टस्य शक्यत्वेपि स्वरूपस्याशक्यत्वात् न व्यभिचार इति वाच्यम्,— तथापि शब्दवदाकाशमिति लक्षणवाक्यार्थे आकाशे व्यभिचारात्, आकाशस्वरूपमात्रस्याकाशपदशक्यत्वात् । नच पदजन्यस्मृत्यविषयत्वे सति वाक्यजन्यप्रतीतिविषयत्व विवक्षितम्; विशिष्टस्यार्थत्वेपि स्वरूपस्यापि तदन्तर्भावेन हेत्वसिद्धेः, साध्याविशेषात्, विशेष्यवैयर्थ्याच्च ।

तद्वाक्यस्थपदशक्यतावच्छेदकधर्मवदन्यत्वादित्यपि न हेतुः, शक्यतावच्छेदकधर्माश्रयान्यत्वविवक्षाया यत्किंचिद्घटाभिन्नत्वाद्घटे व्यभिचारात् । शक्यप्रतियोगिकयावद्भेदविवक्षया सुन्दर मुखमित्यादौ बिम्बात्मनां मुखभेदस्य प्रतिबिम्बात्मनि तस्मिन्नेव सत्त्वाद्व्यभिचारः । धर्मिसमानसत्ताकान्यत्वविवक्षाया स्वरूपासिद्धिः । अतएवाभेदपरिष्कारान्यत्वविवक्षापि निरस्ता । व्यावहारिकान्यत्वविवक्षायामपि संयोगवति वृक्षादौ तद्भेदस्य त्वयाङ्गीकारात् वृक्षत्वाश्रयत्वावद्भेदसत्त्वाद्वृक्षे व्यभिचारः । ननु वाच्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिकान्योन्याभाववत्त्व विवक्षितम्, वृक्षे च न तादृशान्योन्याभावः, अन्योन्याभावस्य प्रतियोगितावच्छेदकेन विरोधादिति चेन्न– ब्रह्मणोपि प्रवृत्तिनिमित्ताश्रयत्वेनासिद्धेः । यावद्भेदाभावातिरिक्तसामान्याभावस्य त्वयानङ्गीकाराच्च । प्रवृत्तिनिमित्ते व्यभिचाराच्च । शक्यतावच्छेदकधर्मविशिष्टान्यत्वविवक्षाया व्यर्थविशेषणत्वम्, विशिष्टान्यत्वस्यैव व्याप्यत्वात् । आकाशे व्यभिचारश्च, आकाशपदशक्यत्वात् । आकाशपदस्य स्वरूपमात्रशक्तत्वाच्च पदपक्षकानुमानेपि बाधः । अनुपहितत्वविवक्षायामपि उपहितार्थस्य भेदासिद्धेर्बाध एव । अनुपधानशक्तत्वसाधने स्वरूपस्य वाच्यत्व निर्बाधमेव । तत्प्रतिपादकत्वंच यदि तद्विषयप्रतीतिजनकत्वम्, तदा व्यभिचारः । यदि पदजन्यस्मृत्यविषयतत्प्रतीतिजनकत्वम्, तदा स्वरूपासिद्धिः । यदि तत्तात्पर्यकत्वम्, तदानीमपि व्यभिचारः । प्राधान्येन तत्तात्पर्यकत्वविवक्षायामपि

यदि प्राधान्य विशेष्यत्वं तदा व्यभिचार एव । यदि पदार्थप्रतीत्यविषयत्व तदा स्वरूपासिद्धि । अप्रयोजकत्व च । नच सत्यज्ञानानन्दात्मनि ब्रह्मणि सत्यादिपदस्य एकैकस्य शक्तौ एकैकपदेनैव तादृगुपस्थिते. पदान्तरवैयर्थ्यस्य प्रसङ्गः, एकैकस्मात्तादृगुपस्थितेरिष्टत्वात् । तवापि सत्यज्ञानानन्दात्मक ब्रह्मण· सन्मात्रत्वात् सतश्च सत्पदेन प्रतीतेरेकस्मात् पदात्तादृगुपस्थितेरावश्य कत्वात्। यदुक्त– सतो ज्ञानानन्दाद्यभेदसशयविरोधिप्रतीतेरेवापादनादिति, किं तत्रा पादकम् ? सत्यत्वादिप्रकारत्रयविशिष्टार्थस्य सत्याद्येकैकपदशक्यत्वम् , उत वस्तुतस्तादृगस्वरूपस्य ? नाद्य.- असिद्धे·, तस्य त्वया वाक्यार्थत्वानङ्गीकारा च्च । न द्वितीय·, तत्प्रकाराविशिष्टस्वरूपप्रतीतेस्तादृगसशयविरोधित्वाभावात् । वस्तुतस्तादृगस्वरूपशक्ताद्वस्तुतस्तादृशविषयमेव ज्ञानमुत्पद्यते । स्वरूपमात्र प्रतीतिस्सशयविरोधित्वे धर्मिज्ञानाभावे सशयासिद्धे तस्मिन् सति तद्विरोधा देवासिद्धे· सशयमात्रोच्छेदप्रसङ्ग· । ननु वाक्यार्थभूतसत्यज्ञानानन्दा त्मकब्रह्मणि अवधारणरूपा प्रतीतिर्या वाक्यलक्षणया जन्यते सा शक्तिजन्या चे देवैकैकस्मात्पदात्तादृशप्रतीतेरुत्पत्ते पदान्तरवैयर्थ्य स्यादित्यापाद्यत इति चेन्न,– यथा तव एकस्मात् सदानन्दज्ञानात्मकस्वरूपप्रतीतावपि तद्विषयावधारणस्याजन नात् तादृगावधारणं लक्षणया वाक्यकृत्यम् , तथा ममापि शक्तपदसमुदाया देव तादृगावधारणोत्पत्तेर्वक्तु शक्यत्वात् । किंच सत्पदाद्ब्रह्मणोनुपस्थितांशः कोपि नास्तीति त्वयोक्तत्वात् बाधो दुर्वार ।

नच स्वगोचरसशयविरोधिज्ञानजनकतद्वाक्यस्थपदशक्तिविषयो नेति साध्यम्, अर्थान्तरत्वात् । शक्यत्वेपि शक्तेस्स्वगोचरसशयविरोधिज्ञानजनकत्वाभावेन सा- ध्यपर्यवसानात् । कश्चाय स्वगोचरसशय ? यदि स्वधर्मिकसशय:, तदा सत्य ज्ञानानन्दात्मकवाक्यार्थधर्मिकसशयविरोधिज्ञानजनकशक्त्यविषयत्वेपि सत्यस्य ज्ञानाद्यभेदसशयविरोधिज्ञानजनकशक्तिविषयत्वसम्भवेनार्थान्तरत्वम् । स्वको– टिकसशयस्त्वप्रसिद्ध । तद्वाक्यजन्यज्ञाननिवर्तनीयसशयविवक्षायामप्रसिद्धिः सत्यादिवाक्यजन्यज्ञाननिवर्तनीयसशयविरोधिज्ञानजनकतद्वाक्यस्थपदशक्तिविषया - प्रसिद्धे । वाक्यार्थमात्रस्य लक्ष्यत्वपक्षे सर्वत्राप्यप्रसिद्धेश्च । पदा र्थेपि तद्वाक्यजन्यज्ञाननिवर्तनीयसशयविरोधिज्ञानजनकशक्त्यसम्भवात् , पदार्थ स्मृतेस्सशयाविरोधित्वात् वाक्यार्थज्ञानस्य लक्षणाजन्यत्वात् ।

यदुक्तं विशिष्टस्य शक्यत्वे नागमाभिमतब्रह्मणश्शक्यत्वमिति । तन्न, आगमाभिमतब्रह्मणोपि विशिष्टान्तर्भावेन शक्यत्वात् । आगमाभिमत ब्रह्मस्वरूपमेव, न त्वन्यत् ।

यच्च द्वितीयानुमानस्याप्रयोजकत्वनिराकरणार्थमुक्तम्—वाक्यार्थस्य पदार्थत्वे सम्भूयकारित्वव्युत्पत्तिहानिरिति , तन्न, पदार्थसाधारणस्य वाक्यजन्यज्ञानविषयत्वमात्रस्य सम्भूयकारित्वाविरोधित्वात् पदार्थप्रतिपन्नससर्गबोधाय तदुपपत्तेः। वाक्यजन्यप्रतीतिविशेष्य-वस्याणि दण्डी देवदत्त इत्यादौ देवदत्तादिपदवाच्ये सत्त्वेन तदविरोधित्वात् । पदेभ्यो ऽप्रत्याय्यत्वे सति वाक्यप्रत्ययस्य वाक्यार्थ पदेन विवक्षाया तु इष्टापत्ति , तादृशस्य ससर्गस्यास्माभिर्वाच्यत्वानङ्गीकारात् । ब्रह्मण. पदेभ्यो ऽप्रत्याय्यत्वाभावेन वाक्यार्थत्वविरोधाच्च ।

यदप्युक्त– वाक्यार्थमात्र लक्ष्यमेवेति । तन्न, कल्पकाभावात् । आकाङ्क्षाद्युपेतव्युत्पन्नपदसमुदायादेव वाक्यार्थप्रतीत्युपपत्तौ गौरवेण वृत्तेरकल्पनात्

यदुक्त प्रतिपादनसमर्थस्य ह्याकाङक्षादिसहकार्यपेक्षणम् , सामर्थ्यच शब्दस्यार्थे वृत्तिरेवेति । किं तत् सामर्थ्यम् ? किं कारणत्वम् , उतान्यत् ? नाद्य , तत्र वृत्तिपद सङ्केत्य कारणत्वसमर्थने अस्मदिष्टत्वात् । न द्वितीयः, कारणत्वस्यैव सहकार्यपेक्षाप्रयोजकत्वेन तस्य तदप्रयोजकत्वात् । नच तदेवाकाङ्क्षादिसहकारिविशेषापेक्षाप्रयोजकमिति वाच्यम् , अनाभावात् । पदे तादृश सामर्थ्यसत्त्वेन पदार्थस्मृतौ आकाङ्क्षाद्यपेक्षाप्रसङ्गात् । पदे तदसत्त्वे च वाक्येपि वृत्तिरस्तसाधयिषिता पदादप्यपहृतेति महादेव कौशलम् ।

किचास्तु यत्किचित् सामर्थ्यम् , अस्तु च वृत्तिरेव तत् । तथापि तादृश सामर्थ्यवत एवार्थप्रतिपादने आकाङ्क्षादिसहकार्यपेक्षण कुत्र दृष्टम् ? येन तद्दृष्टान्तेन वाक्यार्थससर्गेपि सामर्थ्यात्मकवृत्ति कल्प्येत । न तावत्पदे, पदार्थस्मृतिदशायामसिद्धेः । नापि वाक्यार्थानुभवदशायम्, वाक्यार्थे अद्यापि वृत्तेरसिद्धेः । अथ मतम्– पदानि हि वाक्यार्थज्ञान जनयन्ति पदार्थाग्रे शक्त्यैव जनयन्ति, तथाच तत्र वृत्तिरूपसामर्थ्यवत एव तत्प्रतिपादने आकाङ्क्षादिसहकार्यपेक्षण पदाना पदार्थाज्ञानुभवे दृष्टमिति, तदपि मन्दम् ,

वृत्तिद्वयविरोधात् , पूर्वोक्तोपस्थितिभेदेन परिहारानुपपत्तेश्च , तीरत्वावच्छिन्ने तीर इव पदार्थविशेषावच्छिन्ने ससर्गे ऽजहल्लक्षणा, तथैव पदार्था अन्यवच्छेदकतया भासन्त इत्युक्तिविरोधाच्च ।

यच्च लक्षणाजन्यत्वे अनुमानमुक्तम् , तत्र हेतुरसिद्धः, वाक्यार्थज्ञानस्य शक्तिजन्यत्वात् । नचैवमन्वयस्य शक्यत्वप्रसङ्गः, शक्यत्वेपि दोषाभावात् । नचैकपदादपि ससर्गबोधापत्तिः, अन्वयव्यतिरेकाभ्या तद्वाक्यस्थपदशक्तिसमुदायस्यैवान्वयधीहेतुत्वकल्पनात् । नचान्वयेपि व्युत्पत्तिग्रहापेक्षाप्रसङ्गः, पदार्थे व्युत्पत्तिग्रहमात्रेण शक्तिसमुदायाद्वाक्यार्थप्रतीत्युपपत्तौ ससर्गे तदनपेक्षणात् ।

किञ्च किमिदं शक्यत्वम् ? किं शक्तिजन्यज्ञानविषयत्वमात्रम्, उत सम्बन्धविशेषः? आद्ये आपाद्यापादकयोरभेदप्रसङ्गः । न द्वितीयः, कल्पकाभावात् । नच शक्तिजन्यप्रतीतिविषयत्वमेव कल्पकम्, अप्रयोजकत्वात् । अथ शक्तेर्ज्ञानस्य च समानविषयत्वेन कार्यकारणभावः, तदा लक्षणायामपि तथा स्यात् । नचेष्टापत्तिः, शक्यार्थसम्बन्धरूपलक्षणायाः क्वचिदतीतादिरूपतया व्यभिचारात् । एवञ्च तज्ज्ञानस्य कारणत्वे वाच्ये तस्य संसर्गाशानुभवे व्यभिचारात् । संसर्गस्यापूर्वत्वात्तदर्थं लक्षणाज्ञानं समानविषयस्मृतौ हेतुरिति कल्पने शक्तावपि तथात्वापत्तेः ॥

इति श्रीवाधूलकुलतिलकश्रीनिवासाचार्यपादसवासेमधिगतपरावरतत्त्वयाथात्म्येन
तदेकदेवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्ध
महाचार्यापरनामधेयेन रामानुजदासेन विरचितायां
शतदूषणीव्याख्यायां चण्डमारुताख्यायां
अशब्दवेद्यत्वभङ्गो नाम
पञ्चचत्वारिंशस्स्कन्धः ॥४५॥

श्रीरस्तु ।

अथ षट्चत्वारिंशोऽवादः ।

(४६)

आविर्भावतिरोभावजन्मनाशविकल्पवत् ।
यस्यैतदक्षरं नित्यं जगत्तं विष्णुमाश्रये ॥

ये पुनस्सर्वशब्दानां कार्यपरत्व वदता मतमपि कटाक्षयन्त सिद्धरूपे ब्रह्मणि स्वतो निरतिशयपुरुषार्थरूपे ज्ञानजननमात्रेण प्रयोजनपर्यवसाने वेदान्तानां सम्भवत्यपि प्रत्यक्षाद्यबाधितनिरतिशयपुरुषार्थरूपब्रह्मज्ञाने रक्त प्रामाण्यमपि विस्मरन्तस्तत्प्रकाशविधयारि

आविर्भावे त्यादि । अनाद्यित्यत्वप्रतीतेः निष्पन्नीकरणासम्भवाद्वादार्थ सूचितः । येपुनरि ति । सर्वशब्दानां कार्य एव प्रामाण्याद्वेदान्तानामपि नियोगपरत्व वाच्यम्, सिद्धे प्रामाण्येपि प्रयोजनपर्यवसानार्थ तद्वाच्यम्, परम पुरुषार्थरूपब्रह्मपतिपादनेन सद्यः प्रीतिहेतुतया प्रयोजनपर्यवसानसम्भवेपि तत्प्रयोजनस्य काव्यनाटकादिवदतत्वप्रतिपादनेनाप्युपपत्तेः ब्रह्मणि प्रामाण्य न स्यादिति पराशयः, सच न युक्त, सिद्धेपि प्रामाण्यस्थापनात्, ब्रह्मणश्च निरतिशयानन्दरूपतया तत्प्रतिपत्तेः स्वयम्प्रयोजनत्वात्, प्रामाण्यस्वतस्त्वस्थापनेन प्रामाण्यस्यापि तत्र सिद्धेरित्याशयः । तथाविधे ति । यथा पूर्वतन्त्रे "सूक्तवाकेन प्रस्तर प्रहरती" त्यत्र द्वितीयाबलात् सस्कारकर्मत्व सूक्तवाकमन्त्रप्रकाश्यदेवतान्वयबलाच्चागरूपतया नियोगविषयत्वञ्च प्रहरणस्य, यथा स्वाहाकारप्रयाजस्य इष्टदेवतापतिपत्तिरूप नियोगविषयत्वम्, यथा वस्तुबलवादिविवरणमते अध्ययनस्य नियोगविषयेपि अनधिकारापेक्षित्वात् द्वितीयाबलात् साध्यत्वेन प्रतीत स्वाध्यायशब्देन विध्यधिकारिविशेषणतया स्वीकारात् सस्कार्यत्वम्, यथा आधानस्य नियोगविषयेपि द्वितीयाश्रुतिगतसाध्यत्वबलाद्गीनामधिकारिविशेषणत्वेन स्वीकारात्सस्कार्यत्वमुक्तम्, एवमिहाप्यविद्यानिवर्तकशुद्धब्रह्मशुद्धयर्थत्वेन सस्कार कर्मत्व कर्मान्तरानन्वयात् विधेन निष्पन्नीकरणस्य नियोगविषयत्वम् । नच भूतानामुपयोगाभावात् कथ ब्रह्मण, सस्कार्यत्वमिति वाच्यम्,— प्रयोजनान्व

निष्पन्नब्रह्मस्वरूपशुद्धयर्थं तस्य निष्प्रपञ्चताकरणनियोगविषयता माहुः, तेषां तथाविधनियोगादिधियाम्वासम्भवात् सपरिकरनियोगः सिद्धेश्च निर्मूल प्रलापः। तथाहि— न तावन्निष्प्रपञ्चं ब्रह्म कुर्या दिति विधिवाक्यमर्थीमहे। नच फलकरणदर्शनाद्विधि. कल्प्यते। नच स्मृत्याद्यनुसारेण तथाविधश्रुतिरनुमीयते। नच नित्यानुमेया श्रुतिरुपपद्यते। नच तदनुमितिलिङ्गतया निष्प्रपञ्चताकरणाचारः केनचित् कचिदपि दृष्टपूर्वः। नच निष्प्रमाणकोपि विधिरस्तीति वाङ्मात्रेणापि सिद्ध्यति। ननु किमनेन कदर्थनेन? नानात्व दर्शननिन्दावचनैर्नानात्वनिषेधकवचनैर्निर्गुणादिश्रुतिभिर्मायोपादानत्वा न्यथानुपपत्त्यादिभिश्चानुगृहीतो "न दृष्टेर्द्रष्टार पश्येरे" त्येव मादिको विधिरुपलक्षणपरस्सन् द्रष्टृदृश्यादिसमस्तभेदशून्यं दृष्टि मात्र ब्रह्म कुर्यादिति नियुञ्जानः प्रकृतार्थे परिपूर्ण प्रमाणम्, नित्य सिद्धस्यापि ब्रह्मणो निष्प्रपञ्चतारूपेण साध्यत्वमप्यविरुद्धमिति चेन्न,— अनुग्राहकत्वेनाभिमतानां सर्वेषा प्रत्येक विस्तरतो दूषणात्। विधिस्वरूपमपि न पश्यामः, कोऽत्र ब्रह्मवाचकशब्दः, कश्च तस्य निष्प्रपञ्चताकरणवाचीति? दृष्टि- मति- श्रुत्यादयश्शब्दाः संविद्रूपब्रह्मवाचकाः, द्रष्टृमन्तृप्रभृतिदर्शननिषेधो निष्प्रपञ्चताकरण वाचीति चेत्? किं व्युत्पत्तिसिद्धोऽयमर्थः उत तदनुपपत्त्या लक्षणादि

र्थं ह्यपयोगापेक्षा, शुद्धञ्च ब्रह्म स्वयमेव प्रयोजनमिति न तत्र तदपेक्षेति भावः। तस्ये ति। ब्रह्मणः। नियोगविषयत्व निष्प्रपञ्चीकरणद्वारा विवक्षितम्। एव दूषितमिम सपरिकरनियोगतत्प्रामाण्यासिद्ध्यापि दूषयति नचे ति। "तरति ब्रह्महत्या योश्वमेधेन यजत" इति अर्थवादे फलकरणदर्शनाद्विधि कल्प्यते, न तथेह दर्शनमित्यर्थः। स्मर्तृभिरुदृष्टा नित्यानुमेया श्रुतिरनुमीयत इत्यत्राह— नचेति। तदनुपपत्त्ये ति। वाक्यार्थानुपपत्त्येर्थः।

वशादङ्गीक्रियते, किंवा भवत्सैद्धान्तिकसङ्केतादिति ? न प्रथमः, दृष्टिमतिश्रुत्यादिशब्दानां तावद्ब्रह्मशब्दपर्यायत्वाभावात् । तत्तत्करणायत्तबुद्धिविशेषा एव तैरभिधीयन्ते । अन्यथा पुनरुक्तिस्स्यात् । द्रष्टृप्रभृतिदर्शननिषेधोपि तत्तज्ज्ञाननिवृत्तिमेव वदति, नतु तत्तन्निवृत्तिम् । नापि द्वितीयः, अनुपपत्तेरदर्शनात् । उचितार्थान्तरादर्शनमेवानुपपत्तिरिति चेन्न,— तथाप्यनुचितार्थान्तरकल्पनायोगात् । दृश्यते च अर्थान्तरमुचितम् । तथाहि "यदा दृष्टेरतिरिक्तं द्रष्टार न पश्ये" रित्यतिरिक्तपदाध्याहारेण योजना तदा द्रष्टुः पुरुषस्यापि स्वयंज्योतिषः स्वधर्मभूतदृष्टिमत्यादिशब्दाभिलप्यज्ञानसाजात्येन तदतिरिक्तत्वनिषेधोपपत्तेः न कस्यचिदपि मिथ्यात्वसिद्धिः; अनध्याहारे तु दृष्टे र्द्रष्टेति जीवात्मा निर्दिश्यते, ओदनपाकं पचतीतिवत्कर्तृत्वमात्रविवक्षया द्रष्ट्रादिशब्दः; तत्तत्करणायत्तज्ञानकर्तार जीवात्मान नोपासीथा.— अपितु तदन्तर्यामिण करणनिरपेक्षस्वाभाविकनिरतिशयज्ञानादिगुणगणं अशेषदोषवैदेशिकं परमात्मानमुपास्स्वेत्युक्तम्भवति । नच जीवस्यापि विशेषणतया उपास्यत्वाभ्युपगमात्तद्दर्शननिषेधानुपपत्तिरिति वाच्यम्; करणप्रवृत्तिलङ्घिस्वाभाविकविकासशालिपरिशुद्धस्वरूपजीवविशिष्टस्य परमात्मन उपास्यत्वात् । एवमर्थान्तराण्यपि कर्तृत्वाभिमानत्या

उचिते ति । ज्ञानस्याविधेयत्वेन तन्निषेधस्यापि विध्यनर्हत्वादित्यर्थः । तथापी ति । दर्शनवाचिपदानन्वयप्रसङ्गेन सम्भूयकारित्वव्युत्पत्तिविरोधादयमप्यर्थो ऽनुचित इति भावः । तदतिरिक्तत्वेति । इदमस्मान्नातिरिच्यत इत्यादावविशेषे ऽनतिरेकव्यवहारादतिरिक्तपद विशेषपरमिति भाव. । कर्तृत्वाभिमान.— स्वतन्त्रकर्तृत्वाभिमान. ।

गादिरूपाणि प्रत्यक्षाद्यविरुद्धानि समुचितानि कल्पयितु शक्यानि। अतो नानुपपत्तिलेशः। नापि तृतीय, अतिप्रसङ्गात्। पर सिद्धान्तसिद्धसङ्केतवशादपि भवत्पक्षस्य कात्स्न्येन भङ्गप्रसङ्गात्। एवं विधिवाक्यासम्भवो दर्शितः।

अथ सपरिकरनियोगासिद्धि ब्रूमः। तथाहि— नियोगवाक्यार्थ वादिना नियोगो नियोज्य· तद्विशेषणं विषय. करणमितिकर्तव्यता प्रयोक्ता च वक्तव्याः। तत्रासौ नियोगस्तावत्सामान्यतो विशेषतोपि प्रमाणादर्शनादेव निरस्तः। कश्चात्र नियोज्य. ? न तावद्ब्रह्म, त्वन्मते तस्याज्ञत्वात् अनियोज्यत्वात्। अस्मन्मते तु सर्वज्ञत्वादेव नियोक्तव्यत्वाभावात्। अतएव नाप्यविद्या। नाप्यहङ्कारादिकम्, तत्प्रतिफलितचैतन्यादिकं वा, तेषामपि विमृश्यकारिणा स्वोच्छेद करणे नियोक्तुमशक्यत्वात्। अविमृश्यकरणे तु न शास्त्रयोग्यता। नच निर्विशेषानुभूतिस्थितये निरूपको बालो वा कश्चित् स्वोच्छेद मनुमन्यते। अतएव तेषामधिकारित्वप्रयोक्तृत्वाद्यवस्थान्तरमपि भग्नम्। नच शास्त्रं वायूदकादिवद्विवक्षामनुत्पाद्यैव प्रवर्तयति, अशास्त्रत्वप्रसङ्गात्। ततोपि नियोगस्य मूलोच्छेदः। किं तावन्नि योज्यविशेषणम् ? ब्रह्मस्वरूपयाथात्म्यानुभव इति चेत् ? तत् किं निमित्ततया स्थित्वा नियोज्य विशिनष्टि, उत फलतया ? नाद्य·,- जीवनपुत्रजन्मादिवत्तस्यासिद्धत्वात्, सिद्धत्वे वा किं नियोगेन ? तत एव तत्फलसिद्धेः। अथ श्रवणजन्यः परोक्षानुभवस्सिद्धस्सन्

आदिशब्देन द्रष्टार नपश्येरिति परमात्मनि करणायत्तज्ञाननिषेध इत्यादिकं सङ्गृहीतम्। सामान्यत इति। "फलमत उपपत्ते" रिति सामान्यतो ऽपूर्वं निरस्तम्, निष्प्रपञ्च ब्रह्म कुर्यादिति वाक्य नार्थीमह इति पूर्वोक्तेरयं नियोगो विशिष्यापि निरस्त इत्यर्थः। अतएवे ति। "त्वन्मत" इत्यु क्तपरामर्शः। त्रिवक्षे ति ज्ञान विवक्षितम्। परोक्षानुभव इति। तथाचा

विशेषणमिति चेन्न,- श्रवणेन तथाविधानुभवजननस्यैव निष्प्रपञ्चीकरणरूपत्वात् । नहि ततो ऽतिरिक्त किंचिदत्र पुरुषव्यापार विषय पश्यामः । साक्षात्कारज्ञान तद्विषय इति चेन्न,— साक्षात्कारस्य नियोगसाध्यत्वाभ्युपगमात् ततः पूर्व तद सिद्धेः । तत्सिद्धौ वा किं नियोगेनेत्युक्तम् । अथ यदि नित्यब्रह्मस्वरूपप्रकाश एव निमित्तमित्युच्येत, न तर्हि तत्क-स्यचिद्विशेषणम् , अनन्यनिष्ठत्वात् । तस्यच निमित्तत्वे तन्नित्य त्वेन जीवननिमित्ताग्निहोत्रवन्नित्यं विषयानुष्ठानप्रसङ्ग' । नापि द्वितीय', तथापि हि यथात्म्यानुभवशब्दजन्यो वा, अक्षजन्यो वा, स्वरूपभूतानुभव एव वा ? आद्ये नियोगात्पूर्व सिद्धस्य कथं नि-योगफलत्वम् ? द्वितीये त्वसम्भव', नहि निष्प्रपञ्चताया सिद्धायां अक्षाणि तज्जन्य वा ज्ञानं सम्भवति। सम्भवे वा कथ निष्प्रपञ्चता? तृतीये तु कथ नित्यसिद्धस्य फलत्वम् ? स यदि साध्य', तदा स्वर्गादिवदनित्यस्यात् । प्रपञ्चनिवृत्तिरूपेण साध्यत्वमिति चेत् ? नह्यन्यरूपेणान्यत्साध्यस्यात् । अतः प्राक्निवृत्तिरेव साध्ये त्युक्त भवति । ततश्च हेतुसाध्ययोरैक्यप्रसङ्गः । किञ्चात्र नियोग

परोक्षज्ञानेनैवाविद्यानिवृत्तेर्न नियोगवैफल्यमिति भावः । तथाविधे ति । तस्य च विषयत्वान्न नियोज्यविशेषणत्वमिति भावः । साक्षात्कारस्ये ति । उत्पत्तिफलावच्छिन्नक्रियाक्षणनिचय उत्पादनम , तदेवात्र जननम् , तथा च साक्षात्कारो नियोगात्प्राक् स्यादित्यर्थः । आद्य इति । अपरोक्षज्ञानस्यापि निष्प्रपञ्चीकरणानन्तरमसम्भवात्तद्विषयनियोगस्य न फलत्वमिति भावः । नच श्रवणजन्यशाब्दानुभवस्य निष्प्रपञ्चताकरणरूपत्वादपरोक्षज्ञान फलमस्त्विति वाच्य, शाब्दापरोक्षनिरासात् , प्रपञ्चनिवृत्तिफलावच्छिन्नक्रियाक्षणनिचयस्य निष्प्रपञ्ची करणशब्दार्थत्वाच्चेति भाव. । प्रपञ्चे ति । तथा च निवृत्तेः प्रायश्चित्त

विषय.[1] किं ब्रह्मैव, उत निष्प्रपञ्चब्रह्म, अथ प्रपञ्चनिवृतिरेव ? न प्रथमः, तस्य नित्यत्वेनाभाव्यत्वात्, अभावार्थत्वाच्च । अत एव नद्वितीयः, नहि निष्प्रपञ्चमपि ब्रह्म भावार्थ । तथापि तस्य साध्यत्वं सम्भवतीति चेत ! किं तत ! नहि स्वर्गादिकं साध्यमित्येतावता विधिविषयो भवति । अतोत्रापि केवल फलत्वमात्र सम्भाव्येत, तत्रच प्राप्ताप्राप्तविवेकेन विशेषणस्यैव साध्यत्वमिति कथ ब्रह्मस्वरूपस्य विधिविषयत्वम् । अतएव न तृतीयः, तस्या फलत्वाच्च । नहि प्रपचनिवृत्ति रिक्तो कोऽपि नाम भवन्नते । किमर्थंच तया नियोगस्साध्यते ? नहि नियोगाभाव्य तदतिरिक्त किंचित् । कथञ्च सर्वप्रपञ्चनिवृत्तौ नियोगस्वरूपलाभ ? तस्याश्च नियोग विषयत्वे तया नियोगस्तेन च रेति परस्पराश्रयण च । उक्तन्या येन प्रपचनिवृत्ते. करणत्वमपि निरस्तम्, विषयकरणयोरतीव भेदाभावात् । स चायं नियोगः किं स्वयमेव प्रपच निवर्तयति, उत तत्वज्ञानमुत्पाद्य ? पूर्वत्र किं मिथ्याभूतस्य प्रपचस्य ज्ञानबाध्यत्वं परित्यज्य नियोगबाध्यत्वमङ्गीकरोषि ? तथासति प्रायश्चित्तनिवर्त्य

जन्यपापध्वसवदनन्तत्वान्नानित्यत्वमिति भाव । अभाव्यत्वात् । असाध्यत्वादित्यर्थः । अभावार्थत्वा दिति । भावार्थाधिकरणविरोधान्न विषयत्वमित्यर्थः । अभ्युपेत्य च ब्रह्मणः साध्यत्वमिदमुक्तम्, वस्तुनस्तदेवाशङ्क्याह– तत्रचे ति । निष्प्रपचत्वविशिष्टब्रह्मणीत्यर्थः । अतएवे ति । असाध्यत्वादेवेत्यर्थः । पारमार्थिकतया तस्या ब्रह्मस्वरूपत्वादिति भावः । विषये ति । कृत्यवच्छेदद्वारा कार्यावच्छेदकत्व विषयत्वम्, ज्ञानतया नियोगाख्यकार्यनिरूपककृतेर्विषयनिरूप्यत्वात्, नियोगकरणत्वन्तु नियोगोद्देश्यप्रवृत्तकृतिव्याप्यत्वमिति भेद. । स्वयमेवे ति तत्वज्ञानव्यापारकत्व व्यवच्छिद्यते, नतु तत्वज्ञानम् । किं तत्वज्ञानमनिवर्तक नियोग एव निवर्तक इत्यभिमतम्, कि वा नियोगतत्व ज्ञाभ्यां बाध्यत इति विकल्प हृदि निधायाद्यमनूद्य निराकरोति केमि

दुरितवत्सत्यता प्रपंचस्य । अन्यथा तत्त्वज्ञानेनैव बाध्यत्वे नियोगकृत्य न पश्यामः । उत्तरत्राप्याकाक्षादित्रयवता वाक्येनैव तत्त्वज्ञानं जायत इति कि नियोगात् । तेनैव च तत्त्व ज्ञानेन ब्रह्मव्यतिरिक्तसमस्तबाधात्कथं सपरिकरानियोगोत्पत्तिश्च ? परोक्षापरोक्षनिवर्तकज्ञानयोरविशेषोपपादनादिकमन्यत्र ग्राह्यम् ।

किच प्रपचनिवर्तकोय नियोगो न तावद्ब्रह्मस्वरूपम् , निवर्तकस्य नित्यतया नित्य प्रपंचाभावप्रसङ्गात् , नित्यस्य विषयानुष्ठानसाध्यत्वायोगाच्च । अतो ब्रह्मस्वरूपव्यतिरिक्त एष्टव्यः । सच कृत्स्नप्रपंचनिवृत्तिरूपविषयानुष्ठानेन प्रयोक्तुरपि नष्टत्वान्निराश्रय. कथमुत्पद्येत ? आश्रयस्थितौ वा कथ विषयलाभः ? निराश्रयोत्पत्तावपि नियोगाख्यमिथ्यापदार्थस्थितौ कथं कृत्स्न प्रपंचनिवृत्तिः ? सिद्धावपि किमन्यन्नियोगसाध्यं मोक्षाख्यं फलमिति ।

किच करणभूतायाः प्रपचनिवृत्तेः का नामेतिकर्तव्यता ? न काचिदिति चेन्न,– अनुपकृतस्य करणत्वायोगात् । यथाहुः–

" नहि तत्करण लोके वेदे वा किचिदीदृशम् ।
इतिकर्तव्यतासाध्ये यस्य नानुग्रहेऽर्थिता ॥ " इति ।

त्यादिना । प्रत्याह अन्यथे ति । केवलनियोगस्यानिवर्तकत्वकोटावित्यर्थः । तेनैवे ति । प्रथम वाक्योत्पन्नज्ञानेनैवेत्यर्थः । ननु प्राथमिकज्ञानस्य परोक्षत्वम् , न तेन प्रपञ्चनिवृत्ति', किन्तु नियोगसाध्यापरोक्षज्ञानादेवेत्यत्राह परोक्षे ति । परोक्षञ्चा परोक्षनिवर्तकज्ञानञ्चेति द्वन्द्वः । अविशेषे ति । स्वरूपप्रकाशानधिकविषयत्व मवश्यम्भावि, अन्यथा भ्रान्तित्वप्रसङ्गात् , ततश्चानिवर्तकत्वमित्यर्थः । आदि

अस्तु वा काचिद्भावरूपेति चेन्न;—सा हि सन्निपत्योपकारिका वा स्यात् , आरादुपकारिका वा[2] नाद्य.,—कृत्स्नप्रपञ्चनिवृत्तिरूपकरणशरीरनिवर्तकस्य कस्यचिददर्शनात् । अद्वैतज्ञानं दृश्यत इति चेन्न,—तेनैव प्रपञ्चनिवृत्तिरूपमोक्षसिद्धौ करणादिनिष्पाद्या सिद्धिप्रसङ्गात् । नापि द्वितीय., कृत्स्नप्रपञ्चनिवृत्तिरूपकरणस्वरूपासिद्धेः । तत्सिद्धौ तदनुग्राहकाशानवस्थानमित्युभयतः पाशारज्जुः। अथाभावरूपानुग्राहकस्थितौ न विरोध इति मन्यसे ! तन्न, तस्य कृत्स्नप्रपचनिवृत्त्यन्तर्गतत्वेन करणेतिकर्तव्यताभेदासिद्धेः ।

तदेतदभिप्रेत्याह— "अभावरूपत्वे चाभावादेव न करणशरीरं निष्पादयति, नाप्यनुग्राहक" मिति । अभावात्—कृत्स्नप्रपंचनिवृत्त्यन्तर्गतत्वेन करणात्पृथगभावाभावादित्यर्थ' । केचित्तु अस्य भाष्यस्यैवमर्थमाहुः,- अभावत्वादेव न हेतुत्वमित्युच्यत इति, तत्र शब्दास्वारस्यार्थानौचित्यादिकं च द्रष्टव्यम् ।

तदेवं विधायकादर्शनात् सपरिकरनियोगानुपपत्तेश्च निष्प्रपंचब्रह्म विषयो विधिर्न सम्भवतीति सिद्धम् ।

इति शतदूषण्यां निष्प्रपञ्चीकरणनियोगभङ्गः

षट्चत्वारिंशोवादः ॥

शब्देनापरोक्षत्वासम्भवो विवक्षितः । अनुग्राहकांश.— इतिकर्तव्यतासाध्यः करणोपकारः ।

इति श्रीवाधूलकुलतिलकश्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्येन तदेकदेवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्ध महाचार्यापरनामधेयेन रामानुजदासेन विरचितायां शतदूषणीव्याख्यायां[1] चण्डमारुताख्यायां निष्प्रपञ्चीकरणनियोगभङ्गो नाम षट्चत्वारिंशस्स्कन्धः ॥६४॥

श्रीरस्तु ।

अथ सप्तचत्वारिंशो वादः ।

——(*)——

ससारसागरोत्तारकारण वारणाचले ।
अविकल्पविकल्पाभ्यामध्यक्षितमुपास्महे ॥

यदुच्यते—विप्रतिपन्नो विकल्पो मिथ्याविषयः विकल्पत्वात्, यथा शुक्तिरजतविकल्प, नासौ जात्यादिविशिष्टप्रत्यय इति सर्वस्यापि भेदस्य विकल्पविषयतया मिथ्यात्वे परिशेषाद्द्वैतसिद्धि

निर्विष्टेषु हरेर्गुणादिषु गलद्रोम्बान्तरैरागमै
र्यन्मत्याभिनिविष्टया बहुतपस्सिद्धा. परेषा धियः ।
त्रस्यन्ते स्फुटनिर्विकल्पगणना वाधूलवश्चोद्भव
त श्रीवासगुरु प्रमोदभरिताक्रतास्सदोपास्महे ॥

हरिगुणमणिपूरितान्तराले श्रुतिगणदुग्धपयोनिधौ गभीरे ।
मतिमथमनिजाङ्घ्रिका दधानो मनसि विभातु ममागमान्तसूरिः ॥

अविकल्पे ति । निर्विकल्पकसविकल्पकभेदेन समाधिशास्त्रे प्रतिपादिताभ्या समाधिभ्यामित्यर्थ. । न्यूनाकारविषय निर्विकल्पकम्, अधिकाकारविषयच्च सविकल्पक स्वाभिमतम् । **विप्रतिपन्न** इति । ननु एकस्य विषयस्य मिथ्यात्व मात्रेणापि उक्तसाध्योपपत्ते. कथ परिशेषाद्द्वैतसिद्धिरिति चेन्न, ब्रह्मान्यावत्स्वविषय विषयकत्वस्य पक्षतावच्छेदकतया सर्वविषयमिथ्यात्वसिद्धेः । ब्रह्मान्यत्वञ्च परमते वाववाग्णार्थम् । यद्वा मिथ्याभूतयावत्स्वविषयकत्व साध्यम् । न च ब्रह्मणस्सत्यत्वाद्बाध, दृष्टान्ते च साध्यवैकल्यम्, शुक्तेर्मिथ्यात्वासिद्धेरिति वाच्यम्;— यत्किंचित्स्वविषयापेक्षया अन्यूनसत्ताकेतरत्वस्य यावत्स्वविषयविशेषणत्वात् । नन्येवमपि अय घट इत्यादिविकल्पेपि स्वविषयभूतघटाद्यन्यूनसत्ताकत्वेन घटस्य तदन्यस्य च घटत्वादेर्निश्चितत्वात् बाध इति चेन्न;— तत्समानसत्ताकत्वेनानिश्चितत्वस्य इतरप्रतियोगिविशेषणत्वात्, तथाच मिथ्याभूतयत्किंचित्स्वविषयान्यून

रिति। तदेतत् सविकल्पकमपि प्रत्यक्षविभागतयोदाहरद्भिर्भाष्यकारै र्निरस्तप्रायम्। तद्विस्तृणीमहे। तत्र तावत्पक्षादयो न निर्विकल्पकविष यतया सिद्धा', तथा सत्यभिलापसम्बन्धानर्हत्वप्रसगात्। विकल्प विषयतया सिद्धौ तु, य एते पक्षादिग्राहिणो विकल्पाः, किं तेपि पक्षीक्रियन्ते, उत तद्व्यतिरिक्ता.? इति। न प्रथम', व्याघातात्। विकल्पानां विसवादित्वविकल्पस्य विसवादे पुनस्तेषामपि सवादपर्य वसानात् आश्रयाद्यसिद्धिप्रसगात्। अविसंवादातिरिक्तायाश्च तत्सि द्धेरनिरूपणात्। विसंवादेपि वा तत्सिद्धौ सर्वत्र विशिष्टार्थसिद्धे र्दुर्निवारत्वात्। नापि द्वितीयः, तैरेवानैकान्त्यात्। अविसवादोपि

सत्ताकतत्समानसत्ताकत्वेनानिश्चितेतरयावत्स्वविषयकत्वं पर्यवस्यति। यत्किञ्चि त्स्वविषयान्यूनसत्ताकच तत्तत्समानसत्ताकत्वेनानिश्चितचेति कर्मधारय.। तच्छ-ब्देन प्रकृतस्य यत्किञ्चित्स्वविषयपदस्यार्थः परामृश्यते। मिथ्याभूतशब्दस्य कृत्ले-नोत्तरखण्डेन बहुव्रीहि.। नच शुक्तिरजतविकल्पे रजतान्यूनसत्ताकब्रह्मेतरशुक्तौ मिथ्यात्वासिद्धेः साध्यवैकल्यमिति वाच्यम्,—इतरपदेन सामान्याभावस्य विव-क्षितत्वात्। नचैवमपि स्वविषयीभूतशुक्त्यन्यूनसत्ताकतत्समानसत्ताकत्वेनानिश्चित ब्रह्मेतरशुक्तौ मिथ्यात्वासिद्धेस्साध्यवैकल्य शङ्कयम्, स्वविषयीभूतरजतान्यूनसत्ता कब्रह्मशुक्तीतर रजतमादाय साध्यसत्त्वात्। एतदर्थमेव यत्किञ्चित्स्वविषयेत्युक्तम्। **तदेत** दिति—॥*॥ स्तम्भादिप्रत्ययो मिथ्या प्रत्ययत्वात्, तथाहि य.। प्रत्यय स्स मृषा दृष्टस्वप्नादिप्रत्ययो यथा॥*॥"इति बौद्धोक्तमिदमनुमानमिति प्रत्यभिजा नाति। **तथासती** ति। निर्विकल्पकस्य प्रवृत्तिनिमित्ताद्यविषयकत्वादिति भाव। **पक्षादी** त्यादिशब्देन साध्यानुमितिहेतुपरामर्शादयो गृह्यन्ते। व्याघातमेव विवृ-णोति। **विकल्पाना** मिति। विकल्पाना विसंवादित्वग्राहिण्या अनुमितेरित्यर्थः। दोषान्तरमाह **आश्रयादी** ति। आश्रयग्राहिविकल्पस्य मिथ्याविषयत्वे आश्रया सिद्धिः। आदिशब्देन हेतुग्राहिविकल्पस्य विसवादित्वे स्वरूपासिद्धिरित्यादि विवक्षितम्। **सर्वत्रे** ति। द्वयेपि बाध्यादिना बह्वयनुमित्या बाह्यसिद्धिप्रसङ्ग इति भाव.। **अविसंवादोपी** ति। विकल्पस्य मिथ्याविषयत्वानुमिते. प्राक् पक्षादि

तेषामनिश्चित इति चेन्न;—तथापि सन्दिग्धानैकान्त्यस्य स्थितत्वात् । अन्यतस्तेषां विसंवादसाधने ऽप्युक्तदोषानुधावनात् । यदि च सर्वे विकल्पा विसंवादिनः, कथमनुमानादिविकल्पास्ते प्रमाण भवेयुः । परम्परया अर्थप्रतिबन्धादिति चेत् ? तुल्यं विकल्पेपि । माभूत्तेषां प्रामाण्यमिति चेत् ? तथापि कथमेतदनुमानं समीहित साधनायोदाहरसि । लोकव्यवहारसिद्धतया परमतसिद्धतयेति चेन्न;-आत्मघातिनामीदृशानां बालिशैः परीक्षकैश्च साध्यसिद्धयंगत्वानभ्युपगमात् ।

किंच निर्विकल्पकस्यापि संवादः किं विकल्पगृहीतः, उत निर्विकल्पकगृहीतः ? नाद्य, निर्विकल्पकस्य विसवादित्वप्रसगात् । अन्यथा क्वचिद्विकल्पप्रामाण्यानभ्युपगमेऽनैकान्त्यादिदोषात् । न द्वितीय-

---

ग्राहिविकल्पेषु विसवादित्वस्यानिश्चयादित्यर्थः । पूर्वोक्त व्याघात विस्मृत्य या व्यभिचारपरिहारशङ्का तामनूद्य पूर्वोक्तव्याघातेन परिहरति **अन्यतस्तेषा** मिति । यद्वा तस्मिन्नप्यनुमाने पक्षादिग्राहिविकल्पानां पक्षीकरणापक्षीकरणयोः पूर्वानुमानोक्तदोषप्रसङ्ग इति **उक्तदोषानुधावनादित्य** स्यार्थः । अस्यानुमानस्य बौद्धोप देशलब्धत्वात्तेन चानुमानस्य प्रामाण्याङ्गीकारात्तदन्तेवासिनामपि तदेवमतमापाद्य दूषयति **यदिचे** ति । "स्वलक्षणप्रसूतनिर्विकल्पकजनिते" त्यादिवक्ष्यमाण वाक्यानामप्ययमेवाशयः । **तुल्यमि** ति । प्रत्यक्षविकल्पस्याप्रामाण्यमनुमानविकल्पस्य तु प्रामाण्यमिति विभागो न सिद्धयेदिति भावः । **तथापी** ति । यथानुमानादेः प्रामाण्याङ्गीकारे तेषामप्रामाण्यप्रसङ्गात्सर्वविकल्पाप्रामाण्यसाधकानुमानस्यासम्भवः, तथानुमानाद्यप्रामाण्येप्येतदनुमानासम्भवः, स्वस्याप्यप्रमाणत्वादिति भावः । **निर्विकल्पकस्ये** ति । तदविसवादिग्राहिविकल्पस्यापि विसंवादित्वादिति भावः । **अन्यथे** ति । निर्विकल्पकाविसवादित्वग्राहिविकल्पस्य प्रामाण्य इत्यर्थः । **अनैकान्त्यादी** ति । क्वचित्प्रामाण्याङ्गीकारे तुल्यन्यायतया विकल्पान्तरेपि प्रामाण्यप्रसङ्ग इत्यादिशब्देन विव

यः, स्वस्यापि संवादित्वग्रहणे स्वस्यानधिकारात्। अधिकारे वा विकल्पत्वप्रसंगात्। तेन विकल्पवन्निर्विकल्पकस्यापि प्रामाण्यनिर्मूलना दप्रयत्नविजयिनो माध्यमिकाः।

कश्चायं विसंवादः? किं संवादिज्ञानान्तरराहित्यम्, आहोस्वित् अर्थक्रियास्थित्यभावः, बाधकज्ञानान्तरोदयो वा, यद्वा अनर्थभूतत्वम्, अथवा अनर्थविषयत्वम्, यद्वा अन्वस्यान्यारमनोल्लेखः, अन्यद्वा किंचित्? इति। न प्रथमः,— क्वचिद्बाधात्; क्वचिदिष्टप्रसङ्गात्, अकिंचित्करत्वाच्च। संवादकाभावे कथमध्यवसाय इति चेत्? यथा संवादकस्येति पश्य। परस्परसंवादादुभयाध्यवसाय इति चेन्न;— शुक्तिरजतबोधधारा बाह्यिकसन्ततौ तदसिद्धेः। अर्थक्रियाविरहव्यवसायविसंवादात्तत्र सर्वत्राप्रमात्वमिति चेत्? एतेन द्वितीयः कल्पः परिजिघृक्षितः। सोपि न, सर्वासामर्थक्रियाणां विकल्पोपज्ञत्वात्।

क्षितम्। अनधिकारा दिति। असामर्थ्यादित्यर्थः। निर्विकल्पकेनाविसंवादित्वग्रहे बाधमाह अधिकार इति। इष्टापत्तिशङ्कायामाह तेने ति। निर्विकल्पकप्रामाण्यग्राहिणोपि विकल्पत्वेन तद्विषयीभूतनिर्विकल्पकप्रामाण्यस्य मिथ्यात्वादित्यर्थः। ब्रह्मविषयनिर्विकल्पकस्यापि अप्रामाण्यात् सर्वशून्यता स्यादिति भावः। साध्ये मिथ्याविषयत्व विसंवाद इति तं विकल्पयति कश्चाय मिति। अनर्थभूतत्वम्— अनर्थाद्भूतत्वम्, अनर्थजत्वमिति यावत्। इष्टप्रसङ्गा दिति। सिद्धसाधनादित्यर्थः। अकिंचित्करत्वा दिति। संवादिज्ञानाभावेपि बाधाभावे याथार्थ्यक्षतेरिति भावः। अध्यवसायः— तत्प्रामाण्याध्यवसायः। ततश्च प्रामाण्यासिद्धेः तद्विषयो न परमार्थ इति भावः। शुक्ती ति। बाधे सति परस्परसंवादेपि प्रामाण्यानध्यवसायादित्यर्थः। अर्थक्रिये ति। अर्थक्रियाविरहव्यवसायरूपो विसंवाद इत्यर्थः। एतेने ति। अर्थक्रियाविरहव्यवसायः— अर्थक्रियाविरहप्रमा, तथाच अर्थक्रियाविरहो विसंवाद इत्यत्र पर्यवसितमिति भावः। सर्वासा मिति। विकल्पेन तद्विषये प्रवृत्तौ अर्थक्रियादर्शनाद्विकल्पविषयस्यैवार्थक्रिया

नहि निर्विकल्पकेन कश्चित्प्रवर्तते। नच विकल्पतः प्रवृत्तस्यार्थक्रिया न सम्भवति । मणिप्रभाविषयमणिविकल्पप्रवृत्तस्येव स्वलक्षणप्रसूत निर्विकल्पकजनिततदारोपितार्थोल्लेखविकल्पप्रवृत्तस्यापि पारम्पर्येणार्थ सम्बन्धात् निर्विकल्पकनिदान एव संवाद इति चेन्न; नियामका भावात् । बाधितत्वमिति चेत् [2] ततस्तृतीयः पक्षः स्वीकृतः । सोप्यसारः, असिद्धेः । अतएवानुमानात्तत्सिद्धिरिति चेन्न, - अद्यापि तत्प्रामाण्यानिश्चयात् । अर्थजत्वात्तत्सिद्धिरिति चेन्न;- साक्षादसिद्धेः । परम्परया त्वविशेषात् । अतएव न चतुर्थः । नच जात्यादिविशिष्टस्य जात्यादिविशेषणस्य वा दृढोपलम्भसिद्धस्या बाधितस्याप्यनर्थत्व निश्चिनुमः , यतस्तत्प्रसूतस्य विकल्पस्या नर्थत्वम् ।

त्वम् , ततश्चानुमाने बाध इति भाव. । सर्वासा मित्यनेन निर्विकल्पकस्या प्रामाण्यप्रसङ्गो विवक्षितः । एतदुपपादयति –नही ति । बाधमुपपादयति— नचे ति । शङ्कते– मणिप्रभे ति । जनितान्त विकल्पविशेषणम् । तदारो पितः– स्वलक्षणाध्यस्त', उल्लेखात्मको विकल्पः । निर्विकल्पकनिदान इति । स्वलक्षणविषयनिर्विकल्पकजन्यत्वादेव स्वलक्षणारोपितार्थोल्लेखित्वम् , ततश्च विकल्पविषयस्य स्वलक्षणारोपिततया स्वलक्षणरूपार्थसम्बन्धाद्विकल्पस्य पारम्पर्ये-णार्थसम्बन्धित्वम् , तथाच निर्विकल्पकविषय एवार्थक्रियालक्षणसवाद इति सविकल्पकविषयो ऽर्थक्रियाशून्य एवेत्यर्थः । निगूढाभिसन्धिराह असिद्धेरि ति। अभिसन्धिमजानानश्चोद्यति अतएवे ति । एतदनुमानादेवेत्यर्थः । अभिसन्धि मुद्घाटयति । अद्यापी ति । अनुमितरपि विकल्पत्वेनाप्रामाण्याद्विकल्पस्य बाधि तत्व न सिद्ध्यतीत्यर्थः । यद्वा असिद्धे रिति । बाधस्यानुपलब्धिबाधितत्वादि त्यर्थः । इदानीं बाधानुपलम्भेपि कालान्तरीयबाधो नानुपलब्धिबाध्य इत्याह अतएवानुमाना दिति । अतएव ने ति । साक्षात्परम्पराविकल्पयोरुक्तदूषणा दित्यर्थः । दूषणान्तरमाह नचे ति। अनर्थत्वम्–अपरमार्थत्वम् । प्रत्युत पारमार्थ्य

अतएव न पञ्चम', अनुमानादिनिर्मूलनाच्च । षष्ठोपि स्वलक्षणाकारतयैव जात्यादिसिद्धेर्निरस्तः । नचाशब्दात्मार्थः शब्दात्मना विकल्पे भातीति वाच्यम् ; सर्वेषु विकल्पेषु शब्दानुवेधाभावात् । यत्र च शब्दानुवेधः तत्रापि शब्दोर्थात्मना प्रतिभाति, अशब्दात्मनैव पूर्वमेवाध्यवसायात् । नच गौरित्यत्र गकारौकारविसर्जनीयात्मकोयमिति मन्यते, अपितु गोशब्दप्रवृत्ति निमित्तभूतगोत्वाश्रय इति । एकार्थानेकशब्देष्वनैकार्थैकशब्देषु च शब्दानामर्थानाच परस्परविरोधादेव नैकतादात्म्याध्यवसाय सम्भवः । नचात्र साम्यसन्निकर्षादिकमध्यासनिमित्तं पश्याम. । नच चाक्षुषनीलादिप्रत्यये श्रावणनीलादिशब्दात्मनोल्लेखो युक्तः । नच विकल्पास्सर्वे समाना., मानसबाह्येन्द्रियव्यापारान्वयव्यतिरेकानुविधानविरोधात् । नच गोशब्दात्मना खण्डशब्दात्मना च गोव्यक्तौ विकल्पितायां जातिव्यक्तिशब्दविभागनिमित्तं स-

---

मेव निश्चिनुम , अतो बाध इत्यर्थः । अत एवे ति । अनर्थत्वानिश्चयादित्यर्थः । अनुमानादी ति । अनुमानादेरपि जात्यादिविषयत्वेन विसवादे एतदनुमानमप्य प्रमाण स्यादित्यर्थः । स्वलक्षणे ति । परमार्थतयेत्यर्थः । अन्यस्यान्यात्मना भान मस्तीति शङ्कते । नचाशब्दे ति । शब्दात्मना प्रतिभानाभावं विशेषदर्शनानुप लम्भेन चोपपादयति अशब्दात्मनैवे त्यादिवाक्यद्वयेन । अपित्वि ति । इदमुप लक्षणम् , क्वचिद्गोशब्दवाच्य इत्यपि भासत इति भावः । शब्दार्थभेदग्रहस्या वश्यकत्वमाह एकार्थेत्या दिना । कारणाभावाच्च न शब्दाध्यासस्सम्भव इत्याह— नचे ति । नच विकल्पा इति । एकेन्द्रियग्राह्यत्वात् भारोप उपपद्यत इति भाव. । नच निर्विकल्पके तदुपक्षयः, मनसोपि तथा प्रसङ्गादिति भावः । नच गोशब्दा त्मने ति । जातिव्यक्तिवाचकत्वनिबन्धनत्वात्तद्विभागस्येति भावः । शब्दाध्यास पक्षे वाच्यवाचकभावग्रहो न समयग्रह., समयग्रहाभावे विकल्पे शब्दानुवेधा भावेन तस्य शब्दानुवेधोपयोगित्वात् , शब्दाध्यासरूपशब्दानुवेधे च पूर्वं शब्द

म्भवति । नच जातिशब्दो व्यक्तौ नाध्यस्यत इति वाच्यम्;- गौरयमित्येव प्रतिभासात् । तथाच व्यक्तिशब्दस्यापि तुल्य न्यायतया नाध्यासः । अतस्तटस्थ एव शब्दस्स्वविषयमावेदयति वस्त्वन्तराच्च व्यवच्छिनत्तीति न शब्दाध्याससम्भवः । नापि सप्तम.,- बाधपर्यवसितस्य कस्यचिदन्यस्यानुपलम्भात्, अन्यादृशस्य साधनेपि विरोधाभावादिति ।

नच संस्कारप्रसूततामात्रेण विकल्पस्याप्रामाण्यम्, स्मृति प्रामाण्यवादिषु तस्य दुर्वचत्वात्, संस्कारमात्रासाधारणकारणस्य

तादात्म्यग्रहस्यैव उपयोगितया तस्यैव समयग्रहत्वात्, अतो जातिवाचित्वादि विभागो नास्तीति तात्पर्यम्। नचजाती ति । जातिशब्दो जातिवाचक एव, तदितरश्च व्यक्तिशब्द इति विभाग इति भावः । गौरि ति । सादृश्या प्रतीत्या त्वया क्वचिच्छब्दाध्यास उच्यते तादृश्येवेय प्रतीतिरिति जातिशब्दस्याप्यध्यासो दुर्वार इति भावः। अस्तु तर्हि जातिशब्दस्याध्यासः, व्यक्तिशब्दस्य तु माभूत्, अतस्सिद्धो विभाग इत्यत्राह– तथाचे ति । अतइ ति । ततश्शब्दाध्यासे प्रत्यक्षादिविरोधादिः, अतश्शब्दस्तटस्थस्सन् विषयानन्तर्भूत एव व्युत्पन्नमर्थं बोधयति, प्रत्यक्षादिष्वपि क्वचिद्वाच्यवाचकभावसम्बन्धेन विशेषणतया भासमानो वस्त्वन्तरादृष्यवच्छिनत्तीत्यर्थः । उपसहरति– इति न शब्दाध्याससम्भव इति । सप्तमोपि किं बाधपर्यवसितः, उत नेति विकल्प्याद्य दूषयति– बाधे ति । ननु संस्कारप्रसूतायास्स्मृतेरप्रामाण्यदर्शनात्संस्कारजन्यत्वमप्रामाण्यप्रयोजकम्, अतस्तादृशत्वाद्विकल्पस्याप्रामाण्य वाच्यमित्यत्राह– नच संस्कारे ति । संस्कारजन्यत्वच परेण स्वमतानुसारेणोक्तम् । अस्युपगमेन परिहारः । न वयमयाथार्थ्यलक्षणमप्रामाण्यमापादयाम', परन्तु स्मृतित्वलक्षणाप्रामाण्यमित्यत्राह– संस्कारमात्रेति। मात्रपदं प्रत्यभिज्ञायामतिव्याप्तिवारणाय । असाधारणपदमसम्भववारणार्थम् ।

स्मृतित्वात्। स्मृत्यनुभवात्मकपक्षेप्यंशे स्मृतित्वलक्षणमप्रामाण्यं प्रसज्येत, न पुनर्विसंवादत्वलक्षणम्। विकल्पत्वादिति हेतुश्च विशिष्टप्रत्ययत्वमात्रम्' तद्विशेषो वा ? नाद्यः; निर्विकल्पकस्याप्यस्मन्मतेन यत्किञ्चिद्विशिष्टप्रत्ययत्वेनाऽनैकान्त्यात्; तस्यापि पक्षीकारे तदतिरिक्तनिर्विकल्पकस्याऽनुपपत्त्या सर्वप्रत्यक्षोच्छेदप्रसङ्गात्। नापि द्वितीयः, प्रथमाक्षसन्निपातजविशिष्टप्रत्ययदुपरितनविशिष्टप्रत्ययस्य कारणदोषादिविशेषाभावात्; संसारसम्भेदादेश्चाऽदोषरूपत्वस्थापनात्। अतो विशिष्टप्रत्ययमात्रप्रामाण्यवादिनः सर्वप्रत्यक्षानेर्मूलने, पारशेषोपि शून्यतत्त्वमुपस्थापयेत्-न पुनरद्वैतम्। किञ्च कल्पितबाह्यविषयनिर्विकल्पकस्य त्वन्मतेन मिथ्याविषयत्वात् तदृष्टान्तेनाऽद्वैतविषयनिर्विकल्पकस्यापि मिथ्याविषयत्वमनुमेयमिति।

किञ्च— विकल्पाविषयत्व चेत् ब्रह्मणः प्रतिपाद्यते।
श्रोतव्यादिविधीनां स्याद्श्रोतव्यत्वमेव ते॥

अतो न निर्विशेषस्यापि ब्रह्मणो विकल्पाविषयत्वमपीति।

इति शतदूषण्या विकल्पप्रामाण्यभङ्गः सप्तचत्वारिंशो वादः॥

स्मृत्यनुभवेति। स्मृत्यनुभवात्मकत्वाङ्गाकारेणेत्यर्थः। तद्विशेष.—विशिष्टप्रत्ययत्वव्याप्यः प्रथमाक्षसन्निपातजप्रत्ययोत्तरविशिष्टप्रत्ययत्वादिरित्यर्थः। किमुभयसम्मतिपन्नो विकल्पः पक्षः? उत विशिष्टप्रत्ययमात्रम्? आद्ये दोषमाह, निर्विकल्पकस्यापीति। अनैकान्त्यात्—सन्दिग्धाऽनैकान्त्यात्। पक्षसमत्वे च वक्ष्यमाणप्रत्यक्षोच्छेदो द्रष्टव्यः। द्वितीये दोषमाह तस्यापीति। उच्छेदः अप्रामाण्यम्। द्वितीये अप्रयोजकत्वमाह प्रथमाक्षेति। सर्वप्रत्यक्षेति। निर्विकल्पकाभिमतस्य ब्रह्मप्रत्यक्षस्यापि विशिष्टप्रत्ययत्वात् प्रत्यक्षमात्र निर्मूलमिति भावः। श्रोतव्यादीति। श्रवणादीनां विशिष्टप्रत्ययत्वेन विकल्पाविषये ब्रह्मण्यसम्भवात् श्रवणादिविधीनामप्रामाण्येनाऽनुपादेयत्व स्यादित्यर्थः। अत इति। अश्रोतव्यत्वप्रसङ्गादित्यर्थः। ततो ब्रह्मणोपि मिथ्यात्व स्यादिति भावः।

इति श्रीवाधूलकुलतिलकश्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्येन
तदेकदेवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्ध
महाचार्यवरनामधेयेन रामानुजदासेन विरचिताया
शतदूषणीव्याख्यायां चण्डमारुताख्यायां
विकल्पप्रामाण्यभङ्गो नाम
सप्तचत्वारिंश स्कन्धः॥४७॥

श्रीरस्तु ।

अथाऽष्टाचत्वारिंशो वादः ।

गुणविभूतिविशेषविचित्रित निगमसीमनि यत्समधीमहे ।
स्मृतिपुराणशतैरुपबृंहित तदिदमस्तु सदा हृदयेषु नः ॥

यदुच्यते—निर्विशेषचिन्मात्रब्रह्मात्मैक्य त्रय्यन्तसिद्ध स्मृतिपुराणादी न्युपबृंहयन्तीति ; तत्र तावत् तत्तत्प्रकरणादिपरामर्शेन भाष्यकारैरेव तेषा यथावस्थितोऽर्थः प्रदर्शित । सामान्यतः किञ्चिदुच्यते ।

यदा शब्दमात्रस्य निर्विशेषबोधनसामर्थ्यं नास्तीत्युपापीपदाम तदा कैव कथा तद्विशेषाणाम्' यदा च श्रुतिपरिषदशेषापि विशिष्टविषयेति निरणैष्म,

---

उपनिषदुपबृंहणप्रतीपप्रशमपटूरमृतस्रुते रसिष्ठाः ।
इयमुखहृदयङ्गमा पिवेम भवणपुटै. कविवादिसिंहवाच. ॥
इयत्तानालीढाखिलगुणविभूर्ति स्मृतिमुखैः
सह क्रोशन्तीना हयमुखमिदङ्कारमनिशम् ।
भुतीना प्रत्यूहानसुरजनमोहाय विहितान्
निरुन्धन् शैवादीन् स जयति भृश श्रीनिधिगुरु ॥

गुणविभूतीति । अनेनानुक्तविशेषै·सहावगतार्थव्यक्तीकरणमुपबृंहण स्व—मते उपपद्यते, परमते तु तद्वैधर्म्यमिति सूच्यते । तेन वादार्थःसङ्गृहीतो भवति। **निगमसीमनि**–वेदान्त इत्यर्थः । इह तत्तद्वाक्याना प्रकरणादिपर्यालोचनया स-विशेषपरत्वोपपादनमुखेन निर्विशेषवस्तूपबृंहणासम्भवानुपपादने हेतुमाह **तत्र तावदिति** । अनेन प्रकरणादिविरोधान्न निर्विशेषोपबृंहकत्वमि सूच्यते । यद्वा निर्विशेषोपबृंहणासम्भवे हतुमाह **तत्र तावदिति** । "भाष्यकारैः प्रदर्शित" इत्यनेन निर्विशेषे प्रकरणादिविरोधस्याविचाल्यत्व मिहानुपपादने हेतुश्च सूच्यत । इत्यन्तर प्रतिजानीते **सामान्यत इति**। किमर्थ

तदा कथं तदुपबृंहणानि तत्प्रतिपादकानि प्रतिपद्येमहि। वदा पुनः निर्विशेषपरा सेति पश्यासि, तदा तत्रोपबृंहणं नाम किं यथोक्तानुवाद मात्रम् उत तद्भक्तीकरणम् अथानुक्तवस्त्वन्तरवर्णनम् अन्यद्वा किञ्चित्? इति।

न प्रथम'—अनुवादमात्रेषूपबृंहणत्वप्रसिद्ध्यभावात्, प्रयोजना भावाच्च। ज्ञातस्थिरीकरणं प्रयोजनमिति चेन्न,—श्रुतिप्रामाण्ये तदर्थे च यथावन्मीमांसिते तदनुवादमात्रेण तदतिरिक्तास्थिरीकरणासम्भवात्। यदि तत्रानाश्वासः, तदा कैव कथा सम्भवद्भ्रमप्रमादादिदोषेषु पौरुषेयेषु वाक्येषु। न च साक्षात्सौगतमतमाश्रित्य संवादात्प्रामाण्यमनुमन्तुमर्हसि! नचैवमुपबृंहणान्तरसापेक्षम्, अनवस्थाप्रसङ्गात्। न च तन्निरपेक्षम्, श्रुति वदेव तव तत्राप्यनाश्वासप्रसङ्गात्। परस्परसंवादादुभयत्राश्वास इति

निश्चय एव स्थिरीकरणम् उतान्यत् किञ्चित्? नाद्य, तस्य निश्चितप्रामाण्येन मीमांसि तेन श्रुतिवाक्येन सिद्धतयाऽनुवादनैरपेक्ष्यात् न द्वितीय', अनुवादात् स्थिरीकरणाख्य स्यान्यस्य कस्यचिद्दर्शनादित्याह न श्रुतिप्रामाण्य इत्यादिना। तादृश्यपि श्रुत्या अर्थानवधारणे हेतुमाह यदी ति। तत्र ति। कैव कथे ति। अर्थनिश्चयहेतुवैष्क स्येपि श्रुतेरर्थनिश्चयाभावे सन्देहहेतौ जागरूके स्मृत्यादिना अर्थनिश्चय सुतरा न सम्भवतीति भावः। ननु संवादादेव शब्दस्य प्रामाण्यनिश्चय, ततश्चोपबृंहणसंवा दात्प्राक् श्रुतेरर्थनिश्चयाभावादुपबृंहणाधीनमेवात्रार्थावधारणात्मक स्थिरीकरणमित्य त्राह नचे ति। साक्षा दिति। बाह्यत्वप्रच्छादन विनेत्यर्थ.। तथा च संवादेन वेदप्रामाण्योक्तौ सौगनमतप्रवेशापत्तिरिति भाव'। संवादात्प्रामाण्ये दोषान्तरमाह नचैव मिति। किं संवादिवचनान्तरप्रामाण्यनिश्चयाधीन आश्वासः किं वा संवाद मात्राधीनः? नाद्यः- अन्योन्याश्रयप्रसङ्गादित्यभिप्रेत्य द्वितीये दोषमाह

चेत्; मास्तु, असकृदनुसंहितैकश्रुतिवाक्यमात्रजन्मनि तत्प्रत्यक्षप्रवाहेपि तस्य कर्तुं शक्यत्वात्, अतिप्रसङ्गश्च तदेति ।

नापि द्वितीयः—निर्विशेषपक्षे तदयोगात् । तथाहि—यन्निर्विशेषं श्रुतिं तच्छ्रुत्यैव व्यक्तम् । तदतिरिक्तप्रकाशने तु सविशेषत्वावश्यम्भावादुपबृंहणोपबृंहणीयवैषम्यम् । मिथ्याभूतातिरिक्तकारबोधनेऽपि कथं तत्त्ववेदकस्यातत्त्ववेदकमुपबृंहणं स्यात् ? अथ श्रुतौ कस्यचिदप्रतिपन्नं कस्यचित्प्रतिपन्नं ब्रह्मस्वरूपमेवात्र व्यज्यत इति मन्यसे, तदपि न, श्रुतिप्रत्यनङ्गत्वप्रसङ्गात् । तदाभिमुख्यजननात्तदङ्गत्वमिति चेत् ? तत्फलसिद्धौ किं तदाभिमुख्येन ? असिद्धौ वा कुतस्तत् ?

नापि तृतीय—अनुपबृंहणत्वप्रसङ्गादेव । अन्यथा परस्परभिन्नार्थानां वेदभागानामेव परस्परोपबृंहणत्वप्रसङ्गात् ।

नापि चतुर्थ—अत्यन्तभिन्नार्थत्वस्याभिन्नार्थत्वेऽन्यूनानतिरिक्त

असकृदनुसंहिते ति । तस्येति । आश्वासस्येत्यर्थ । न च प्रमाणान्तरत्वाद एवाश्वासहेतुरिति वाच्यम्, अनिश्चितप्रामाण्यत्वाविशेषे स्वसंवादादप्याश्वासस्य वादिति भावः । अतिप्रसंगश्चे ति । वाक्यागमानामपि परस्परसंवादात्प्रामाण्यप्रसङ्ग इति भावः । किं निश्चयमात्रं व्यक्तीकरणम् उत सामान्यतः प्रतिपन्नस्य विशेषाकारनिश्चयः । १ आद्य दोषमाह यन्निर्विशेष मिति । द्वितीये तदतिरिक्ताकारः किं सत्य उत मिथ्या ? आद्य आह तदतिरिक्ते ति । द्वितीये मिथ्याभूते ति । अतो ति । उपबृंहण इत्यर्थ । श्रुतिप्रती ति न श्रुत्या प्रतिपन्नेऽपि विशेषबाधनेन श्रुतौ संशयितार्थव्यक्तीकरणादिना वा भृत्युपकारकत्व एव उपबृंहणत्व स्यात्, न तु स्वातन्त्र्येण कञ्चिन्प्रति बोधकत्वमात्रेणेति भावः । तदाभिमुख्यजनना दिति स्वमूलभूतश्रुतौ प्रवर्तनेनेत्यर्थः । तत्फले ति फलमर्थावधारणम् । असिद्धावि ति तत् श्रुत्याभिमुख्यम् । उपबृंहणावधारितस्यार्थस्य उपादेयत्वबुद्धया हि तत्प्रतिपादकश्रुतौ तन्मूलभूताया प्रवृत्ति. स्यादिति भावः । अनुक्तवस्त्वन्तरमात्रवर्णनमिति तृतीयः पक्षः, स दूषणात नापि तृतीय इति । नापि चतुर्थ इति । अन्योपबृंहणत्व यत्कि-

विषयत्वस्यातिरिक्तविषयत्वेपि सत्यमिथ्यार्थत्वयोर्दूषितत्वात् न्यूनबोधनमव शिष्यते। न च तदाप्युपबृंहणता, उक्तांशस्य तुल्यतया नैरपेक्ष्यात्। अनुक्ताशेऽनुक्तेरेवोपबृंहणत्वगन्धाभावादिति।

किञ्च—यच्चाधिक श्रुतौ बोध्यते तत्सत्यत्वे सविशेषता, तन्मिथ्या त्वे श्रुतिरतत्त्वावेदिका, पुवाक्यं तु न तथेत्यापन्नम्।

नच माभूदुपबृंहणमिति वाच्यम्, शारीरकाधिकरणेषु तत्र तत्र स्मृति संवादोदाहरणादिविरोधात्। अन्यथा चेदनुग्राहकतर्कस्यापि प्रहाणप्र सङ्गात्। तत्प्रहाणे पुन "आर्षं धर्मोपदेश" मित्यादिपर्षिवचनविरोध।

क्षित्, तथाप्युपबृंहणत्वेनाभिमतमत्यन्त उपबृंहणीयेन भिन्नार्थं अभिन्नार्थं वा? अभिन्नार्थत्वेपि अतिरिक्तविषय न वा? अतिरिक्तविषयत्वेपि सत्यविषय मिथ्याविष य वा? अतिरिक्तविषयत्वाभावेपि अन्यूनानतिरिक्तविषय न्यूनविषय वा? तत्र पक्षान्तरयोरुपबृंहणत्वस्य त्वया वक्तुमशक्यत्वाच्चरम पक्ष परिशिष्यत, तत्राप्युपबृंहणत्व न सम्भवति तथाहि—किं स्मृत्यादि स्वप्रतिपाद्य श्रुत्यर्थांशमुपबृंहयति उत स्वाप्रतिपाद्य श्रुत्यर्थांशम्? नाद्य.-स्वोक्तांशो यथा श्रुत्या प्रतिपाद्यते तथैव स्वेनापि प्रतिपाद्यमानो दृश्यते नत्वाकारावशेषेणेति तस्य स्वनैरपेक्ष्यात्। न द्वितीय, तद्ध शस्य स्वाविषयत्वादित्यर्थ.। यच्चाधिक मिति उपबृंहणस्य न्यूनविषयत्व। श्रुतेस्त दधिकविषयत्वादिति भाव:। न च उपबृंहणविषयोऽशो मिथ्या, तद्विषयस्तु सत्य इति, ब्रह्मोपबृंहणत्वस्य तथासत्यनुपपत्त.। उपबृंहणविषयांशेनैव श्रुतेरतत्त्वावे दकत्वप्रसङ्गाच्च।

इयता ग्रन्थेन पूर्वं परोक्तयानूदित निर्विशेषचिन्मात्रोपबृंहक त्व दूषितम्। यदि कश्चिदुपबृंहण क्वापि नापेक्षितमिति ब्रूयात्तमपि प्रसङ्गान्निरा करोति न च माभूदिति। अन्यथा चे दिति अन्यथोच्यते चेत्, उपबृंहणापेक्षा नास्तीति चेदित्यर्थ। श्रुत्यनुग्राहकतया प्रसिद्धयोस्तर्कोपबृंहणयोरन्यतरस्य त्वामे तर्कोपि त्याज्य. स्यात्। ननु भवतामपि स्मृतिर्न श्रुतिप्रतिपन्नार्थस्योपबृंहणम्, तदज्ञे

नचैवमस्मन्मते प्रसङ्ग, श्रुतिप्रतिपन्नस्यैव ब्रह्मणोऽनन्तगुणविभूते रप्रतिपन्नानन्तगुणविभूतिवैशिष्ट्यबोधनेन व्यक्तीकरणोपपत्ते । नचाप्रतिपन्नस्यांशस्यावेदार्थत्वम्, [वि] प्रकीर्णानन्तशाखे महति वेदवृक्षे बत्र क्वचित्कोटरे तस्यापि लीनत्वात्, तस्य चारुपभागश्रावित्रियोगिभिरधिगन्तुमशक्यत्वात्, तत्कृते च योगिभिरुपबृंहणप्रणयनोपपत्तेः । कति

भवदुक्तन्यायेन वैयर्थ्यात्, न च श्रुत्यप्रतिपन्नाश, तद्विषयत्वे श्रुतिमूलत्वाभावेना प्रामाण्यप्रसङ्गात्, तस्माद्भवन्मतेऽप्युपबृंहणानुपपत्तिस्तुल्येत्याशङ्क्य परिहरति **नचैवमि** ति । [वि] **प्रकीर्णे** ति तथा चाधीयमानश्रुत्यर्थस्य श्रुत्यन्तरप्रतिपाद्यविशेष **स्यह** प्रतिपादनमुपबृंहणमिति भाव. । **उपबृंहणप्रणयनेति** ।

ननु कथमत्र समास ? " उभयप्राप्तौ कर्मणी " ति ह्यत्र षष्ठी, अन्यथा कर्मण्येवेति नियमाभावे " कर्तृकर्मणो " रिति षष्ठीप्रसङ्गे योगिभिरिति कर्तरि तृती यानुपपत्ते, तस्याश्च षष्ठ्या. 'कर्मणिचे' ति समासो निषिद्ध इति चेत्, उच्यते, शेषषष्ठीयम्, अत. समासोपपत्ति । न च तृतीयानुपपत्ति, 'उभयप्राप्तौ कर्मणी' त्यस्य नैवमर्थ, कर्तरि कर्मणि चोभयस्मिन् कारके विवक्षिते "कर्तृकर्मणो" रिति षष्ठी कर्मण्येव न कर्तरीति, यनाथ दोष, स्यात् यदि कर्तृकर्मोभयविवक्षा तदानम नियमेन कर्तृकर्मणोरिति षष्ठया भाव मू, तस्याश्च समासो निषिद्ध, यदि तु न विवक्षा तदा उभयप्राप्तावि नियमाभावात् " कर्तृकर्मणो " रिति षष्ठीप्राप्त्या तृतीयानुपपत्तिरिति । किन्तूभयत्र कर्तरि कर्मणि च षष्ठी यत्र प्राप्नोति, प्रसज्यते, भवितुमर्हतीति यावत्, तत्र कर्ता यदि विवक्षित तत्र षष्ठी न भवति कर्मणि तु विवक्षिते षष्ठी भवतीति इदमेव प्राप्तिग्रहणस्य प्रयोजनम्, अत एव "अन्तर्द्धौ येनादर्शन" मिति निर्देश. । अत्र तु यद्यपि कर्तृकारक विवक्षित कर्मकारकमवि वक्षितम्, तथापि कदाचिदुभयविवक्षाया सामुभयत्र षष्ठी भवितुमर्हतीति नियमोऽय वर्तते, तेन तृतीयोपपद्यते । कर्मकारकन्वविवक्षितमिति कृत्वा न तत्रानेन षष्ठी नापि समासनिषेध. । शेषार्थन्तु विवक्षित इति तदाश्रया षष्ठी । तस्याश्च समासो भवति ।

कति च न दृश्यन्ते अधीयानास्वपि शाखास्वप्रतिपन्ना रूपाश्चेत्राश्च उपबृंहणाधीनाश्चावसायाः सन्त्यर्थाः ? अन्यथा कथं वेदार्थे वादिनां मतभेदसमुत्थानम् ? नचोपबृंहणानां मिथो विरोधान्निर्णयाभिधित्सा, उपबृंह

ननु यद्युभययोग्यतामात्रादय नियमः, नतूभयोपादानमपेक्ष्य तदा 'अथ शब्दानुशासन' मित्यत्र "आचार्यस्य कर्तुः प्रयोजनाभावात्तदनुपादानाच्चोभययप्राप्तौ कर्मणि त्यनन षष्ठी" ति कैयटविरोध इति चेन्न,—यत्र कर्तृकर्मणोरुभयोरपि तात्पर्यविषयत्व तस्यैवोभयप्राप्ति, आचार्यस्य कर्तुः प्रयोजनाभावात्तदनुपादानाच्च तात्पर्यविषयत्वाभावाच्चोभयप्राप्तिरित्येव कैयटतात्पर्यात्। अन्यथा "येनादर्शन" मिति प्रयोगानुपपत्ते। "येनादर्शन" मित्यत्र आत्मन इति व्याख्या तत्वात् तत्र तात्पर्यमवगम्यते। "योगिभिरुपबृंहणप्रणयनोपपत्ते" रित्यत्र कर्तृकर्मोभयसम्बन्धस्यापि तात्पर्यविषयत्वादस्त्युभयप्राप्ति। इयानवानयोर्विशेष. 'येनादर्शन' मित्यत्र कर्मस्वरूप तस्य कारकत्वमित्युभयञ्च न शब्दत प्रतिपाद्यते, प्रकृते तु वस्तुत. कर्मभूतोपबृंहणस्वरूप शब्दत उपादीयते, तस्य कर्मकारकत्वन्तु शब्दतो न प्रतिपाद्यते किन्तु शेषविवक्षाया सम्बन्धमात्र प्रतिपाद्यत इति। कर्मकारकत्वस्य तात्पर्यविषयत्व उभयत्रापि विशिष्टमिति।

यत्तु पदमञ्जर्याम्—" यदा उभयप्राप्ताविति नियमेन कर्तरि तृतीया तदा कर्मणिचेति निषेधात्पाणिनिना सूत्रकृति', 'आचार्येण शब्दानुशासन' मित्यसाधु.समास " इति, तदापि यदा कर्मणि षष्ठी तदा न साधुरित्यभिप्रायम्। शेषषष्ठ्यान्तु साधुरेव। तत्रैव प्राप्तिग्रहणाच्च प्राप्तिमात्रे नियम इति कर्मणोऽप्ययोगेपि कर्तरि तृतीया भवति, यथा "अन्तर्द्धौ येनादर्शनमिच्छ" तीति। कर्मापि यदा शेषत्वेन विवक्ष्यते तदा तत्रापि शेषषष्ठी भवत्येव। तस्याश्च " कर्मणिचे " ति निषेधाभावात् समासो भवतीति चोक्तत्वात्। तस्मान्निरवद्य एवञ्जातीयकः प्रयोगः।

ननूपबृंहणापेक्षाया श्रुत्या निर्णयो न सिद्धयेत्, उपबृंहणाना परस्परविरोधात्, अन्यतरपरित्यागे नियामकाभावादित्याशङ्क्य निराकरोति नचोपबृंहणाना

णीयविरोधाविरोधाभ्यां विशेषात् । अत एव हि शारीरकस्मृत्यधिकरणे कपिलादिस्मृतिर्निरस्ता । उपबृंहणीयाविरुद्धमन्वादिस्मृतिस्त्रेधा तद्वरुद्धकपिलादिस्मृतेरप्रमाणत्वान्न तैरुपबृंहणं नाप्युपबृंहणीयबाध इति हि तत्रार्थः । तेन तामसरागसंकीर्णपुराणादिभिर्वेदोपबृंहणं पुराणविवेकपरिज्ञानशून्यनामविवेकितानिबन्धनमेतत् तन्नादरणीयम् । उक्तं हि मात्स्ये—" अग्नेः शिवस्य माहात्म्यं " मित्यारभ्य—

" सात्विकेष्वथ कल्पेषु माहात्म्यमधिकं हरेः ।
तेष्वेव योगसंसिद्धा गमिष्यन्ति परां गतिम् ॥ "

इत्यन्तम् । तदेतत्सर्वमर्थतो निदर्शितं भाष्ये—" उपबृंहणं नाम विदित सकलवेदतदर्थानां स्वयोगमहिमसाक्षात्कृतवेदतत्वार्थानां वाक्यैः स्वावगतवेदवाक्यार्थव्यक्तीकरणम् , सकलशाखानुगतस्य वाक्यार्थस्य स्वल्पभागश्रवणदुरवगमत्वेन तेन विना निश्चयायोगादुपबृंहणं हि कार्यमेवे " ति ।

एवञ्च सामान्यतो निर्विशेषतया उपबृंहणासम्भवेऽनुपबृंहितेन वेदेनार्थनिश्चयायोगाद्वेदविप्लावक एव निर्विशेषवादः । स्मरन्ति च—

" इतिहासपुराणाभ्यां वेद समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति ॥ " इति ।

इति शततूषण्यामुपबृंहणवैघट्यवादः

॥ अष्टाचत्वारिंशो वादः ॥

मिति ।

इति श्रीवाधूलकुलतिलक श्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्येन
तदेकदेवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्ध
महाचार्यापरनामधेयेन रामानुजदासेन विरचिताया
शततूषणीव्याख्याया चण्डमारुताख्याया
उपबृंहणवैघट्य नाम
अष्टाचत्वारिंश स्कन्ध ॥४८॥

श्रीरस्तु ।

॥ एकोनपञ्चाशो वाद. ॥

त्रिविधचिदचिदन्तर्यामिता प्राप्य तिष्ठन्
निखिलनिगमनिष्ठैर्नित्यमैक्योपदेशै. ।
भ्रमलमकलिया यो वारयत्यैकभक्त्या
भवतु शरणदाणी तत्पदे शाश्वती न. ॥

यदाहु.—" तत्त्वमसि " " क्षेत्रज्ञ चापि मा विद्धी " त्यादै क्योपदेशान्यथानुपपत्त्या परिशुद्धे ब्रह्मण्येवाज्ञान भेदभ्रमश्चावश्य कल्प नीयम्, नचात्रैक्य न प्रतीयते, नचाविवक्षितम्; सामानाधिकरण्यस्य

त्रिविधे ति । अन्यभक्तया सहितैरैक्योपदेशादिशास्त्रै शरीरा म्भावनिबन्ध नै.शुद्धभावगताना स्वनिष्ठत्वभ्रम स्वरूपैक्यभ्रम च यो वारयति, तस्य जनार्दन स्य, पदे, न , भगवत फलप्रदानोत्तरमिवाद्यापि चरितार्थम्मन्यतामापादयन् मम शरणवाणी भवत्वित्यर्थः । इह अन्तर्यामिब्राह्मणादि " शुद्धभाव गत. " " ऋण प्रवृद्धमिव मे " इत्यादीनि विवक्षितानि । त्रिविधे त्यादिना अन्य थोपपत्तिरुक्ता। भ्रमं वारयती त्यनेनान्यथैवोपपत्तिरुक्ता, तेन वाद र्थसग्रह । यदाहु रित्य ऐक्योपदेशो हि तत्त्वज्ञानद्वारा मोक्षार्थ· । नचैतदैक्यस्यापारमार्थ्य उपपद्यते, अत· श्रुतिसिद्धस्य जीवब्रह्मैक्यस्य पारमार्थ्यात् तदनुपपत्त्या भेदज्ञानस्य भ्रमत्व परिशुद्धेपि ब्रह्मणि भ्रमोपपादकमज्ञान तन्निवृत्तया उपदेशस्य सप्रयोजनत्वञ्च क— ल्पनीयमित्यर्थः । भेदभ्रमनिवृत्तिरूपमोक्षणोपदेशस्य सप्रयोजनत्व चेत्यपि विवक्षि तम् । " अतो जीवपरयो " रित्यादिना तस्याप्युपसहरिष्यमाणत्वात् । ' नपुस कमनपुसकेने " त्येकशेषात् कल्पनीय मिति निर्देशः । भेदप्रतीतिबलात् ऐक्यो पदेशोऽन्यपर इत्याह नचात्रैक्य मिति। सम्भाव्यमानान्यथा सिद्धेः प्रत्यक्षाद सम्भा- मानदोषगन्धा श्रुतिर्बलीयसीत्यभिप्रायेणाह सामानाधिकरण्यस्ये ति । एवमविव

तन्निष्ठत्वात् विशिष्टैक्यवादिनाप्यैक्यमात्रस्यारिभतत्वाच्च, नचेदमारोपवृत्त्या सामानाधिकरण्यम्, तत्त्वोपदेशप्रकरणविरोधात्, न च सम्बन्धाद्विद्वारोपचारः, बाधकाभावात्; यद्यप्यस्मन्मतेपि लक्षणा, तथापि प्रधानभूतसामानाधिकरण्यप्रतिपाद्यस्य मुख्यस्यैक्यस्यापरित्यागात्, तत्संरक्षणाय च स्वरूपोपलक्षणभूतनिमित्तपात्रप्रहाणादिक न दोषाय भवति। न च भेदाभेदसमुच्चय, व्याघातात्, अत एव नोभयत्याग.,

---

क्षणामपासिद्धान्तयति विशिष्टैक्ये इति। आश्रितत्वादि इति। श्रुतितात्पर्यविषयतया स्वीकारादित्यर्थः। "समुद्र. कुण्डिकानिष्ठो" "वर्द्धीतक" मित्यादाविव स्तुत्यर्थमारोपोस्त्विति सामानाधिकरण्यस्यान्यथासिद्धमाशङ्क्य विशिष्टत्वाभावाच्चै वमित्याह नचेदमिति। न च सम्बन्धे इति। आदिशब्देन मुख्यार्थानुपपत्तिर्विवक्षिता द्वारशब्द प्रयोजकपर.। क्वचित्सम्बन्धमादायेत्येव पाठः। बाधकाभावा दिति। मुख्यार्थेनुपपत्त्यभावादित्यर्थः। ननु बाधकाभावात्तत्रापि लक्षणा न स्यात्, यदि च विशिष्टाभेदबोधानुपपत्तिर्बाधिका, तर्ह्यस्माकमपि जीवब्रह्मसामानाधिकरण्यानुपपत्त्यैव लक्षणास्त्वित्यत्राह यद्यपी ति। तथापी ति। वाक्यं हि पदात्प्रधानम्, अतस्तदर्थ एवानुरोध., समानाधिकरणवाक्यस्य च मुख्यविशेष्यैक्ये मुख्यतत्त्वं पदार्थविषयः— तद्भागे त्वमुख्यार्थपरमिति सर्वसम्मतम्, अतस्तत्त्वमस्यादिवाक्ये त्वदभिन्नतोपचारस्वीकारे मुख्यार्थैक्यपरित्यागो दोष., अस्मन्मते तु मुख्यैक्यापरित्यागान्न लक्षणा दोषः। किञ्च निमित्तग्रहणेन स्वरूपलक्षणा मुख्यैक्यसिद्ध्यर्थमेवाङ्गीक्रियते, तव तु न तदर्थम्, अतोपि स्वरूपलक्षणा न दोषः प्रत्युत मुख्यैक्यार्थत्वात् अनुकूलैवेत्यर्थः। भेदाभेदाङ्गीकारात् न भेदज्ञानस्य भ्रमत्व कल्प्यमिति क यांचिद्योग निरस्यति न च भेदे ति। भेद प्रतीतेरभेदाभावो विषयः, ऐक्योपदेशस्य च भेदाभावो विषय, अतो भेदाभेदो भयत्यागे न दोष इत्यत्राह अतएवे ति। अन्यतरनिषेधस्यान्यतरविधिनान्तरीयक त्वेन व्याघातादित्यर्थः। एव भेदाभेदयोः परस्परभावात्मकत्वपक्षे दोष उक्तः।

तात्पर्यविरोधस्योक्तत्वाच्च, अन्यथा शून्यतैव पर्यवस्येत्। नचैष दृष्टि विधिः ; उपासनैकवाक्यत्वाभावात्; तत्सद्भावेपि तल्लिङ्गाभावाच्च, अतो जीवपरयोरैक्ये तद्भेदे च प्रतीयमाने द्विचन्द्रदर्शनमूलभूतदोषवदात्मभेददर्शनहेतुरविद्या,भ्युपगन्तव्या, तन्मूलभेदभ्रमोन्मूलनेन सप्रयोजन ह्यैक्योपदेश यथैकश्चन्द्र इति, इति ।

अत्र ब्रूमः—यद्यैक्योपदेशोऽन्यथानुपपन्नः स्यात्तदैवं परिशुद्धे ब्रह्मण्यज्ञानभेदभ्रमादयः कल्प्येरन्, स त्वन्यथाप्युपपन्न· अन्यथैवोपपन्नश्च । तथा हि— शरीरात्मभावनिबन्धन सामानाधिकरण्य व्युत्पादित मन्यत्र । नचात्र द्वयो. स्वरूपैक्य विवक्षितु शक्यम् । विरुद्धयोस्तदसम्भवात् । अन्यथा यूपादित्यैक्यवाक्येपि भेदभ्रमहेतुदोषकल्पनप्रसङ्गात् ।

यदि भेदाभेदयोः भावाभावात्मकत्वाभावः, तदा दूषणमाह तात्पर्ये ति । भेदाभावापेक्षया लाघवादैक्य एव तात्पर्यमिति भावः । उक्तत्वा दिति । "तथापि प्रधानभूते" त्यादिवाक्य इत्यर्थः । उभयत्यागे दोषान्तरमाह अन्यथे ति । तत्सद्भाव इति । क्वचिदुपासनैकवाक्यतेपि ऐहिकामुष्मिकफलादिरूपलिङ्गाभावा दित्यर्थ. । तद्भेद इत्यतः पूर्व सिद्धे इति शेष· । जीवपरयोरैक्ये तत्त्वत इति क्वचित्पाठ. । सप्रयोजन ह्यैक्योपदेश इति । एवकारो भिन्नक्रमः । भेदभ्रमोन्मूलनेनैव सप्रयोजन इत्यन्वयः । क्वचित्सप्रयोजनतवैक्योपदेश इति पाठ । तदा नीमभ्युपगन्तव्य इत्यनुषङ्ग. । यदी ति । आदिशब्देन भ्रमोन्मूलन विवक्षितम्, अन्यथापी त्यभ्युपगम्यवादः । सामानाधिकरण्यार्थानिर्वाहात् । तत्रार्थमाह अन्यथैवोपपन्न इति । वस्तुतस्त्विति शेष । तथाही ति । शरीरात्मभावनिबन्धन सामानाधिकरण्यमित्यन्यश्रोपपादितत्वात् तथा निर्वाहे सम्भवति अत्यन्तविरुद्धार्थयोरैक्य न विवक्षितु योग्यमिति ह्यैक्योपदेशः शरीरात्मभावनोपपाद्य., न तु शरीरे ब्रह्मणि भ्रमादिकल्पनेन । अन्यथे ति । अविरुद्धगतिसामान्येपि विरुद्ध

विरोधादेश्च समानत्वात् । न च लाक्षणिकसामानाधिकरण्येप्यैक्यं परित्यक्तम्, यया कयाचिद्वृत्त्या एकस्मिन्नेव वृत्तेरङ्गीकृतत्वात् । अत सामानाधिकरण्यस्य सम्भवति गत्यन्तरे परिशुद्धब्रह्मणि तन्मूलविरुद्धाज्ञानादि परिकल्पन निर्मूलम् । अज्ञानमूलभेदभ्रमवादे च उपदेश एव नोपपद्यत इति स्थितमन्यत्र । नचानुपपन्नत्वस्योपपादकतया स्वयमनुपपन्नान्तर कल्प्यम्, नह्यविद्यादेः स्वरूपमुपपत्तिमदिति दर्शितम्। यदि च दूरं गत्वा दुर्घटत्वमेव भूषणमिति दर्शसि, तर्ह्यैक्योपदेशनैवादौ दुर्घटमभिमन्येथा । अप्रामाण्यं तर्हि तस्य स्यादिति चेत्, अस्मन्मतप्रतिपादितप्रकारेण

कल्पने । एव शरीरात्मभावेनान्यथासिद्धिरुक्ता, इदानीं पूर्वपक्षिणा दूषितमुपचार पञ्चमुद्धरति न च लाक्षणिक ति । भागत्यागलक्षणया गोण्या वा वृत्त्या एकस्मिन्नेव वृत्त्यङ्गीकारात् समानाधिकरणवाक्यप्रधानार्थस्यैक्यस्यापरित्यागादुपचारो न दोषायेत्यर्थ । ननु भागत्यागलक्षणाया स्वारसिक मुख्यविशेषैक्यपरत्व न सिद्ध्यतीत्युक्तमित्यत आह अत इति । अविरुद्धगत्यन्तरे सति विरुद्ध मुख्यविशेषैक्यमपि त्याज्यमेव अन्यथा निमित्तमपि न त्यज्येत यूपादित्यवाक्येपि भ्रमहेतु दोषश्च कल्पेतेत्यर्थः । तन्मूले ति । सामानाधिकरण्यमूलमज्ञानादिपरिकल्पन मित्यर्थः । न केवलमविरुद्धगत्यन्तरसद्भावात् भेदभ्रमकल्पनस्योपपादकत्वाभावमात्रम्, प्रत्युत प्रतिकूलत्वञ्चेत्याह अज्ञानमूले ति । अविद्यास्वरूपस्यैवानुपपन्नत्वात् तैर्नैक्योपदेशोपपादनमितिदूषणान्तरमाह नचानुपपन्नस्येति । स्वयं स्वेनरूपेणेत्यर्थ. । स्वयमनुपपन्नेत्यत्र "स्वय क्तेन" ति तृतीयासमास । दर्शित मिति । स्वरूपानुपपत्तिनिबन्धनानुपपत्तिबाह्यप्रकाशानुपपत्तिश्चित्यर्थ । ऐक्योपदेश मिति । अविद्यायामिव उपपादकाभावेन दुर्घटत्व उपदेशस्य भूषणमेवास्त्वित्यर्थ । ननु भेदस्य मिथ्यात्वादेरकल्पने ऐक्योपदेशाप्रामाण्यं स्यादिति शङ्कते अप्रामाण्य मिति । अस्मन्मते ति । यदि प्रामाण्यार्थमुपपादकापेक्षा, तर्ह्यस्म

प्रामाण्यस्य सिद्धत्वात्। यदि वा माभूत्प्रामाण्यम्, यदज्ञानादिपरिकल्पने ऽप्यन्ततः फलति तच्चेदादौ तदप्रामाण्य सिद्धचति, कि दूर धावसि ?

किञ्च—भेदोपदेशान्यथानुपपत्त्या परमार्थभिन्नेऽप्यात्मन्वैक्यभ्रम मूलमज्ञान किं न कल्प्यते ? ऐक्यश्रुतीनामबलत्वावेदकत्वप्रसङ्गभयादिति चेत्, तर्हि भेदश्रुतीनां तत्प्रसङ्गभयात् भेदज्ञानमपि न कल्पय। नचैका श्रुतिरितरस्या दासी, येन तदर्थं तासुद्भवेम। प्रत्यक्षादिसवादाच्च भेदश्रुतेरेव बलीयस्त्वम्। न च भेदस्वरूपं दुर्निरूपमिति तदप्रामाण्यस्वीकार, अभेदस्वरूपस्यापि तथाविधयुक्तिभिर्दुर्निरूपतया तत्प्रतिपादकानां तत्स्वीकारदुरवस्थानात्।

किञ्च त्वदुक्तदैवानुपपत्त्या नानात्वेन भेदप्रतीतिरिति कि न कल्प्यते ? प्रत्यक्षादिविरोध इति चेत्,

---

दमितेन सुघटेन शरीरान्तभावेनैवोपपाद्यतम्, कि दुर्घटादिद्यादिनेत्यर्थः। यदि वे ति। यद्वेत्यर्थः। यदि ति। भेदश्रुतीतिमिथ्यात्वादिकल्पने उपदेशप्रामाण्यरूपभेदस्यापि मिथ्यात्वेन प्रामाण्यभ्रमत्वलक्षणमप्रामाण्य फलतीत्यर्थः। तदप्रामाण्य मिति। तस्य उपदेशस्य अप्रामाण्यम्। तत्परिकल्पितस्याप्रामाण्यस्य सिद्धौ 'अर्के चेन्मधु विन्देत किमर्थं पर्वत व्रजे' दिति न्यायात् दूरधावनमनुचित मित्यर्थः। किञ्चे ति। न च भेदज्ञानवदैक्यज्ञानाय लोके असिद्धत्वात् कस्य मूलमज्ञान कल्प्यत इति वाच्यम्, तव श्रुत्यैकजन्यायां अपि सार्वज्ञ्यादिभेदप्रतीतेः भ्रमत्वेनाज्ञानमूलत्वव्यवस्थितिजन्यस्यैक्यज्ञानस्य भ्रमतया तन्मूलाज्ञानस्य कल्प्यत्वादिति भावः। ननु भेदश्रुतिर्निषेध्यापकतया ऽभेदश्रुतितो दुर्बलेत्यत्राह न चैके ति। अस्त्येकगम्यस्य सार्वज्ञ्यादिभेदस्य च निषेधार्थमनुवादत्वसम्भवात् प्रत्यक्षादिसिद्धभेदस्य च निषेधासम्भवाच्च भेदश्रुतिर्निषेधार्थानुवाद इति भावः। बलीयस्त्व मिति। तत्त्वावेदकत्वाध्यवसाय इत्यर्थः। किञ्चे ति। ऐक्योपदेशानुप

तर्हि निरवद्यभेदश्रुतिविरोधे दृष्टिपातय । भ्रान्तिसिद्धे भेदेऽप्यैक्योपदेशा द्विचन्द्रादिष्विव घटत इतिचेत्, अज्ञानादिरहितेपि ब्रह्मणि भ्रान्तिसिद्धैक्येन तदुपदेशोपि सम्भवत्येव ।

अस्तु ब्रह्मण्यभिन्नत्वभ्रमः किमर्थमुत्पाद्यत इति चेत्, अभिन्ने ब्रह्मणि भिन्नत्वभ्रम. किमर्थमुत्पाद्यते ? अथोपासनेन फलविशेषार्थमिति चेत् ? तुल्यम्। उपासनविध्येकवाक्यत्व दृष्टिलिङ्ग वात्र न दृश्यत इति चेत्तुल्यम् । दूरानुकर्षात्र दृश्यत इति चेत् न किमत्रापि ?

अपि च ब्रह्मणः शुद्धत्वान्यथानुपपत्त्यैव तस्य जीवैक्योपदेशो नास्त्येवेति वा सत्यध्वन्यपर इति वा तत्सरोपि भ्रान्तिमूल इति वा कल्प यितु युक्तम् । नचाशुद्धिर्मिथ्यात्वेनाविरोध , उपदेशो मिथ्यात्वेन तदुपपादकाभावेप्यविरोधप्रसङ्गात् ।

पश्यं भेदप्रतीतिस्वरूपमेव नास्तीत्युच्यताम्, कृत तस्य भ्रमत्वकल्पनेने-त्यर्थः । तर्हीति । यदि प्रत्यक्षादिविरोधान्न भेदप्रतीत्यपह्नव शक्यः, तर्हि निर्दोषभेदश्रुतिविरोधात् तद्भ्रमत्वकल्पनमप्ययुक्तमित्यर्थः । भेदप्रतीतेः प्रामाण्यत्यागमात्रादैक्यो पदेशसम्भवान्न धर्मिस्वरूपनिह्नव इति शङ्कते भ्रान्तिसिद्ध इति । अज्ञानादिति । ऐक्योपदेशस्य भेदज्ञानप्रामाण्यत्यागेनैव स्वप्रामाण्यत्यागेनापि सम्भवान्नाज्ञानादि कल्पना गौरवादित्यर्थः । अदेशान्तरे उपासनविधे सत्त्वात्तदेकवाक्यतया दृष्टिविधि रुपपद्यत इति शङ्कते दूरे ति। अत्रापि तथा किं न स्यादित्याह न किमि ति। अविरोध इति । शुद्धत्वस्येति शेषः । उपदेशे ति । ऐक्योपदेशेत्यर्थः । उपपादकत्वेन कल्पिताविद्यादिषु दौर्घट्यान्नैरपि आदौ दौर्घट्यपरिहारस्य सुवचत्वादितिभावः ।

यश्चासौ " क्षेत्रज्ञं चापि मां विद्धी " ति तत्वविज्ञानसापेक्षस्त दुपदेशः, तेनैव च तदज्ञानं कल्प्यत इति चित्रम् । तदेतच्छ्रीमद्गीता भाष्येपि स्पष्टमाह । तथा भाष्येप्वदर्शयत्— " नाप्यैक्योपदेशान्यथानु पपत्त्ये " त्यादिना ॥

इति शतदूषण्यां ऐक्योपदेशान्यथानुपपत्तिभङ्गः

एकोनपञ्चाशो वादः ॥

ऐक्योपदेशान्यथानुपपत्तिं दूषयित्वा स्मार्तोपदेशानुपपत्तिं दूषयति यदचासा विति ॥

इति श्रीवाधूलकुलतिलक श्रीनिवासाचार्यपादसेवासमधिगतपराधरतत्त्वयाथात्म्येन तद्देवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्ध महाचार्यापरनामधेयेन रामानुजदासेन विरचितायां शतदूषणीव्याख्यायां चण्डमारुताख्यायां ऐक्योपदेशान्यथानुपपत्तिभङ्गो नाम एकोनपञ्चाशत्स्कन्धः ॥४९॥

श्रीरस्तु ।

॥ पञ्चाशो वादः ॥

हताशेषक्लेशा निरवधिमहानन्दघनिगो
वयं भूयास्मेति स्थिरमनघवर्त्मन्यधिकृताः ।
अनाघ्रातद्वन्द्वा ह्यनुलसपदद्वन्द्वरुचयः
स्वदन्तां मे सन्तः श्रुतेजलधिमुष्टिन्धयधियः ॥

साधनचतुष्टय पूर्ववृत्तमिति वदद्भिर्मुमुक्षुत्व तावदधिकारिविशेषण मित्यङ्गीकृतम् । सा च मुमुक्षा मोक्षो मे स्यादित्येवमाकारा । तथाविधा सा कस्याधिकारिणो विशेषणमिति कथयन्तु कथयन्तु कलिग्रस्तमीमासकाः , किं नित्यमुक्तस्वभावस्य सविदात्मन , उत तस्यैवाविद्यासाक्षिता मापन्नस्य, उतान्त करणप्रतिफलितचिदाभासस्य, तद्वृत्तिसमारोपिताक्रिया त्वस्य वा चैतन्यस्य, अन्त करणस्यैव वा, अथ यस्य कस्यचिदनभिलप्यस्य, न वा कस्यचित्' इति ।

न प्रथमः, विरोधात्; तस्य नित्यमुक्तत्वादेव मोक्षेच्छाविरहात्, अन्यथा नित्यमपि तत्प्रसङ्गात् । मुक्तमप्यात्मान बद्धमिवाभिमन्य मुमुक्षतीति चेन्न, तस्य तथाविधाभिमानेप्यनधिकारात्, तत्सद्भावे वा नित्यमुक्तत्वव्याघातात् । भ्रान्त्या वस्तुवृत्त्या च द्वयोरविरोध इति चेन्न,—

अत्र वयं भूयास्मेत्यधिकृता इत्यनेन एतादृशीच्छाधिकार इति लभ्यते, तेनाहमर्थविनाशपक्षे तदसम्भव. सूच्यते। तेन वादार्थसंग्रह· । कथयन्त्विव ति । "चापले-द्वे भवत इति वक्तव्य"मिति [चापले च] द्विर्वचनम् । त्वरा—चापलम्। अन्यथे ति । इदानीमपि तस्य नित्यानित्यविवेकाद्यसम्भवेन मुमुक्षायास्तदनपेक्षत्वात् कारणाभावादपि मुमुक्षाभावो न वक्तु शक्यत इति भाव. । तथाविधे ति । अभिमानस्यैव ससारत्वादिति भावः । इममभिसन्धिमजानानो बद्धाभिमान सत्वेऽभिमानविरहबन्धसत्वान्मुक्तत्वव्याघात उक्त इति भ्रान्त्या शङ्कते भ्रान्त्ये ति।

भ्रान्तेरेव तद्विरोधितया तदनधिकारस्योच्यमानत्वात्। सापि भ्रान्तिसिद्धेत्यविरोध इति चेन्न, दूरं गत्वापि तद्भ्रान्तेर्दुस्त्यजत्वात्।

न द्वितीय, भवत्पक्षे साक्षित्वानुपपत्तेः, अविद्यानुभवानुपपत्तेश्च पृथगुपपादनात्। अस्तु वा साक्षित्वम्, तस्याप्यत्यन्तमन्यवस्थतयोदासीनस्वभावस्यानुकूलप्रतिकूलपक्षपातविरहात् संसारोद्वेगतन्मूलमोक्षेच्छातदायत्तश्रवणमननादिप्रवृत्तासम्भवात्, न तरामधिकारः। सर्वसाक्षिणश्च तस्य मुमुक्षायां युगपत्सर्वात्ममोक्षश्च प्रसजति। नचैतन्नानाजीववादिभिरिष्यते एकजीववादिनोपि शुको मुक्तो वामदेवो मुक्त इत्यादि प्रतिनियतमोक्षोपदेशः प्रतिनियतमोक्षेच्छाधीनः, साचेच्छा यदि साक्षिण, तदा शुकादिमोक्षदशायामेव सर्वमोक्षे संसारानुवृत्त्यसम्भवः। अथ स्वमदृष्टस्येव साक्षितया कल्पितस्य कस्यचित्[1] तर्हि मिथ्याभूतस्य मोक्षो नामात्यन्तभवनिवृत्त्यात्मा स्वरूपनिवृत्तिपर्यवसित इति साधु मोक्ष

अभिसन्धिमुद्घाट्य परिहरन्ति भ्रान्तेरिति। सापीति। भ्रान्तेरपि मिथ्यात्वाद्वास्तवनित्यमुक्त्या न विरोध इतिभावः। दूरं गत्वेति। अनवस्थाभयेन क्वचित्सत्यभूतभ्रान्तेर्दुस्त्यजत्वादितिभावः। उदासीनेति। औदासीन्यबोधाभ्यां साक्षात्त्वमिति त्वदिष्टत्वादितिभावः। सर्वेति। सर्वपुरुषसाधारण्याविद्यानुभवरूपसाक्षिण इत्यर्थः। इष्टापत्तिं परिहरति नचैतदिति। ननु यत्सत्य ब्रह्मस्वरूपं कल्पितसाक्षितामापन्न तस्य मुमुक्षां न ब्रूमः, किन्तु अन्यस्य स्वरूपतः कल्पितस्य साक्षिणः, तथा च न तन्मुक्त्या सर्वमोक्ष इत्याशङ्क्य निराकरोति साचेत्यादिना। साध्वि ति। आश्रयाभावान्मोक्षो न स्यादितिभावः। मोक्षेच्छाश्रयस्य कल्पितसाक्षिणो नाशेपि मोक्षाश्रयतयान्यस्येवेष्यमाणत्वान्नोक्तदोष इति शङ्कते

समर्थितं । अथ स्वस्मिन् विनष्टे अज्ञाने स्वसाक्षीभूतायाः संविदः साक्षित्वेऽप्यतिक्रान्ते स्वप्रकाशानन्दपात्ररूपा संविदवशिष्यत इति तदर्थमयमपवर्गारम्भ इति चेत्, प्रेक्षावत्प्रवृत्तेस्तथात्व सम्भवात्। तदाहु.—

" निरस्ताखिलदुःखोहमनन्तानन्दभाक् स्वराट् ।
भवेयमिति मोक्षार्थी श्रवणादौ प्रवर्तते ॥
अहमर्थविनाशश्चेन्मोक्ष इत्यध्यवस्यति ।
अपमर्षदृशौ मोक्षकथाप्रस्तावगन्धत ॥
मयि नष्टेपि यत्तोन्या काचिज्ज्ञप्तिरवस्थिता ।
इति तत्पातये यत्न. कस्यापि न भविष्यति ॥ " इति ।

अत एव न तृतीय —तस्यापि चिदाभासत्व देव विनाशावश्यम्भावात्। प्रतिबिम्बस्य नाशेपि बिम्बात्मनावस्थानवदन्त करणप्रतिफलितरूपविनाशेपि ब्रह्मात्मना स एव तिष्ठतीति चेन्न, प्रतिबिम्बस्य मिथ्याभूतस्य सत्यबिम्बात्मनावस्थान सम्भवात्। बिम्बप्रतिबिम्बयोर्भेदनिषेधे स्वरूपमेकमेव भवतीति चेन्न;—सत्यमिथ्यार्थयोर्भेदनिषेधस्यैवासम्भवात्। सम्भवे वा सर्वसत्यत्वं सर्वशून्यत्व वानैकान्तवादो वा प्रसज्येरन्।

अथेति। स्वसाक्षीति स्वकल्पकसाक्षिरूपसत्यसविद इत्यर्थ.। अहमर्थेति अहमर्थविनाशाकरोत्र उक्तसाक्षिविनाशेपि तुच्छ इत्यभिप्रायेण एतच्छ्लोकपादानम्। किञ्चैव मुमुक्षाधिकारो न स्यात्, सगानकर्तृकेच्छाया एव मुमुक्षात्वात्, न च मुमुक्षाशब्देन इच्छामात्रमत्र लक्ष्यत इति वाच्यम्, 'मुमुक्षुर्वै शरणमहं' मित्यादि मुमुक्षाधिकारबोधकश्रुतिस्मृत्यादिविरोधात्। दृष्टान्तमुखेन शङ्कते प्रतिबिम्बस्ये ति। दृष्टान्तासप्रतिपत्त्यापहरति प्रतिबिम्बस्ये ति। ननु मदीयमेतद मुख दर्पणे दृश्यत इत्यादि प्रत्यभिज्ञया तदभेदसिद्धे र्भेदनिषेधात् प्रतिबिम्बस्यापि सत्यत्वं बिम्बाभेदश्च युज्यत इति शङ्कते बिम्बे ति। दर्पणे मुख नास्तीति बुद्ध्या बाधितस्य मुखस्य शुक्तिरजतादिविशेषेण मिथ्यात्वात्तयाभेदानषेध एव न सम्भवति, प्रत्यभिज्ञा तु मिथ्यार्थानभ्युपगमपक्षे उपपद्यते, तदभ्युपगमपक्षे तु कर्दमलग्नपादप्रतिमुद्राया मम पादाविति प्रत्यभिज्ञा

अस्तु वात्र भेदनिषेधः, तदा प्रतिफलितचिदाभासस्य ब्रह्मणश्च स्वरूपैक्ये ब्रह्मण एव सर्वोपरागप्रसङ्गात् प्रतिफलनादिकल्पनाऽपि निरर्थिका। प्रतिफलनादिकं च दुरुपपादमिति स्थितमन्यत्र।

न चतुर्थः—तस्य क्रियात्वेनैव प्रकाशमानस्य मोक्षेच्छातदर्थप्रयत्नाद्याश्रयत्वस्य तद्भ्रमस्य वा दूरनिरस्तत्वात्। अत एव वृत्तिमदन्तःकरणभेदाग्रहणात्तस्य तदभिमान इति निरस्तम्।

न पञ्चमः—अपवर्गेऽन्तःकरणस्यापि स्वरूपोच्छेदाभ्युपगमात् सुषुप्तिप्रलयादिषु स्वयमेव नश्वरतयाभ्युपगतस्य किं मोक्षार्थेन महता प्रयासेन? नचान्तःकरणाख्यस्य द्रव्यस्य ज्ञानेच्छादिसम्भवः। ज्ञातृत्वाध्यासश्च न सम्भवतीति सिद्धमन्यत्र।

नापि षष्ठः, तस्यापि मिथ्यात्वेन विनाशावश्यम्भावात्, सत्यत्वे ब्रह्मस्वरूपान्तर्भावबहिर्भावयोरनधिकारत्वसद्वितीयत्वादिप्रसङ्गात्। नचानभिलपनीयंमोक्षाधिकारिस्वरूपमपरिज्ञायैव स्वयमधिकरोतीति वाच्यम्, अविदि

वदुपपाद्या, मावोपपादीति भावः। अस्त्वेवे ति। अस्त्वन्यत्र मिथ्यार्थाभ्युपगमेऽप्यत्र तदनभ्युपगमः, किन्तु बिम्बप्रतियोगिकभेदमात्रस्य मिथ्यात्वं ततश्च प्रतिबिम्बस्य बिम्बात्मनावस्थानमित्यर्थः। तदे ति। ब्रह्मणो बन्धाश्रयत्वे अवद्यप्रसङ्गपरिहारार्थं हि जीवस्य तदाश्रयस्य प्रतिबिम्बत्वकल्पनम्, प्रतिबिम्बस्य बिम्बाभेदे तदपरिहारात्तत्कल्पनं व्यर्थमित्यर्थः। अतएवे ति। क्रियात्वेन प्रकाशमानस्य तदाश्रयान्तःकरणाद्भेदस्यैव गृहीतत्वादित्यर्थः। ननु उच्छेद एव पुरुषार्थ इत्यत आह सुषुप्ती ति। द्रव्यस्ये ति। जडत्वमभिप्रेतम्। ननु जीवस्यैव किञ्चिन्मोक्षाधिकारिस्वरूपमस्ति तच्च दुर्विज्ञेयत्वादनभिलपनीयम्, जीवश्च तदज्ञात्वैव प्रवर्तत इत्यत्राह नचे ति। स्वय मिति। ब्रह्मकल्पितस्याविकारिण स्वगताधिकरि

ताधिकारिस्वरूपाय क्वचिदप्यनधिकारात् । विदितत्वेपि इक्षुक्षीररसादि वद् दुरभिलषत्वं तस्येति चेन्न ; अहमर्थातिरिक्तस्य कस्य चिन्मुमुक्षो. स्वात्मसाक्षिकोपलम्भादर्शनात् । उक्तं हि--" निरस्ताखिलदुःखोह " मित्यादिना ।

नापि सप्तम --अधिकारितद्विशेषवर्णनप्रयासनैष्फल्यात्, तन्मूल श्रवणादिप्रवृत्त्यनुपपत्तेः, शास्त्रारम्भभङ्गप्रसङ्गाच्च । नास्त्येव वस्तुत कश्चिदधिकारी, तथापि सन्निव भातीति । तस्य मुमुक्षा विशेषणमिति चेत् ' कस्यासौ सन्निव भातीति वक्तव्यम् । न कस्यचिदिति चेत् ' तर्हि कथ सन्निव भातीति । ब्रह्मण इति चेन्न ,-तस्य परानुसन्धानादि सामर्थ्यविरहस्योक्तत्वात् । तत्सद्भावेपि ब्रह्मैवेद विशेषणमित्यनुसन्दध्यात् स्वयमनुसन्धानाभावे च न प्रवृत्ति. । अधिकारतन्मूलप्रवृत्त्यादिविशिष्टतयैव ब्रह्मणा तदनुसन्धानमिति चेत् ' किमत ' नहि तावतापि स्वनाशरूपेऽपवर्गे ब्रह्मदृष्टस्य तस्य मुमुक्षोपपादिता भवति । स्वनाशमविदित्वैव स्वावस्थानाभिमानेन तस्य मुमुक्षापि जायत इत्येव रूपोयं ब्रह्मण स्समोह इति चेन्न, एव रूपस्य समोहस्यापि शास्त्रतोवसाये स्वनाशवेद नसिद्धौ पुनरप्रवृत्तिप्रसङ्गात् ।

ननु यदि स्वनाश एवापवर्ग इति तत्त्वम्, तदा तदपेक्षायां को विरोध इति चेन्न,--माध्यमिकवदौपनिषदै. स्वनाशापत्तिर्मोक्ष

विशेषणप्रतिसन्धानाभावात्प्रवृत्तिर्नस्यादित्यर्थः । ननु अधिकारतदनुसन्धानत-मूल प्रवृत्तिविशिष्टतया ब्रह्मणा कल्पितत्वात्तस्य मोक्षार्थप्रवृत्त्युपपत्तिरित्याशङ्कते। अधिकारे ति । नहितावते ति । अधिकारतदनुसन्धानसिद्धावपि मुमुक्षानुपपत्ते. प्रवृत्तिर्न स्य दित्यर्थ. । स्वनाशाज्ञानमुमुक्षयेऽपि ब्रह्मकल्पिततया सर्वोपपत्तिरिति शङ्कते स्वनाश मिति । शास्त्रतोवसाय इति । अनवसाये तु मिथ्यात्वज्ञानाभावादवि

इत्यनभ्युपगमात्। अभ्युपगमे वा कथमस्य पुरुषार्थत्वमुपपादयिष्यसि? दुःखात्यन्तनिवृत्तिरूपत्वादिति चेन्न,— "रसं ह्येवायं लब्ध्वानन्दीभवती" त्यादिश्रुतिशतकोपप्रसङ्गात्। अस्तुवा स्वनाश्यः पुरुषार्थः, तथापि तदर्थाप्रवृत्तिरस्य न सम्भवति, ब्रह्मज्ञाननिवृत्तिमन्तरेण तत्कल्पितस्वरूपनिवृत्तेर्दुस्साधत्वात्। ब्रह्मज्ञानमपि तत्प्रवृत्त्यैव निवर्त्तत इति चेत्? तर्ह्येकमोक्षे सर्वमोक्षप्रसङ्गात् ब्रह्मदृष्टेषु जीवेषु बद्धमुक्तव्यवस्थाभङ्गः। तत एव च प्रतिनियतमुमुक्षाद्यसम्भवः। स्वभावत एवास्मदादीनां कश्चिदेव मुमुक्षादिसमेतः कदाचिद्ब्रह्मज्ञानं निवर्तयतीति चेत्? तर्हि किमर्थमिदानीं भवद्भिः प्रत्येकममुमुक्षादिपूर्वकं शास्त्रमारभ्यते। न वयं वस्तुतश्शास्त्रमारभामहे,- किन्तु अस्मदारम्भस्तस्य ब्रह्मण एवाय समेत इति चेन्न, ब्रह्मण एव शास्त्रारम्भजन्यज्ञानादिपरिज्ञाने तावतैवापवर्गसिद्धौ पुनस्संसारानुवृत्त्यभावप्रसङ्गादिति दुर्वचस्ते शास्त्राधिकारी।

ननु भवतोपि समानोयम् दोषः, ईश्वरस्य कारणावस्थस्य कार्यावस्थस्यावनारावस्थस्य च नित्यमुक्तत्वादेव तस्य मुमुक्षाद्यसम्भवात्, जीवस्यापि स्वतोपहतपाप्मत्वादिस्वभावत्वमभ्युपगमेन तस्यापि

वानिवृत्त्यर्थप्रवृत्तिर्न स्यादिति भावः। तत इति। एकमोक्षे सर्वेषां मोक्षसम्भवादन्यस्य मुमुक्षादिकं व्यर्थमित्यर्थः। ननु बद्धमुक्तव्यवस्थाभङ्ग इष्ट एव, इदानीञ्च संसारोपलम्भः कस्यापीत पूर्वमुक्तत्वादुपपन्नः, इतः परञ्च कल्पान्तरादिषु कल्पिता मुमुक्षवः संसारनिवृत्तिपर्यन्ता भविष्यति स्वभावात्, न त्विदानीं कल्पिता, अतः स्वभावोपपत्तिरित्याह स्वभावत इति। ननु भुक्तवति परेण कल्पितं भोजनं यथा प्रयोजनाभावपर्यनुयोज्यमेवं तथास्माकं ब्रह्मणा कल्पितशास्त्रारम्भजन्यज्ञानादि कमिति शङ्कते नन्वय मिति। शास्त्रारम्भादिकं सर्वं ब्रह्मणा कल्पितमिति परिज्ञाने तत एव सर्वमिथ्यात्वज्ञानात् तस्य एव मोक्षः स्यात्, नच कालान्तरभाविज्ञानस्य

तदसम्भवादिति चेन्न,—स्वत उष्णस्य वह्नेर्मणिमन्त्रादिवशात्प्रतिबन्धवत् स्वतश्शुद्धियोगिनेपि जीवस्य कर्मवशात्ससारे तन्निवृत्त्यपेक्षापत्तेः । नहि वय तन्निवृत्तिर्नित्येति वदाम, येन नित्यमुक्तत्वादिचोद्यावकाश. । नवात्मान ज्ञप्तिमात्ररूपं, येनेच्छाप्रयत्नाद्यनुपपत्तिस्स्यात् । नच सर्वदा सर्वज्ञ येन मुमुक्षुणार्थाद्यभिलाषासम्भवे कर्मशास्त्रस्य निर्मूलता भवेत् । अतो नित्यमुक्तब्रह्मात्मैकत्ववादे दुर्लभो मोक्षशास्त्राधिकारीति ॥

इति शतदूषण्यां परमतशास्त्राधिकारिभङ्गः

पञ्चाशो वाद. ॥

एतस्मात्कश्चिद्विशेषो मिथ्यात्वपक्षे युज्यत इत्यभिप्रायः । स्वत उष्णस्ये ति । आनन्दात्मकज्ञानविकासरूपा पापनिवृत्तिश्शुद्धिः, सा चात्माधारणकारणान्तरानिरपेक्षत्वात् स्वाभाविकी, स्वतश्शुद्धियोगित्वञ्च तादृशशुद्धियोग्यता, सा च सर्वदा विद्यमानापि कर्मप्रतिबन्धान्न शुद्धिरूपफलोपहितेत्यर्थः । परमते नित्यमुक्तत्वात् निर्विशेषत्वेन मुमुक्षाद्याश्रयत्वानुपपत्तेश्च हि दोष उक्तः । स्वमते तदभावमाह नहि वय मिति । स्वतोपहतपापत्वप्रयुक्तमोक्षानधिकारशङ्काया परिहृताया प्रसङ्गात् स्वाभाविकज्ञानवत्त्वप्रयुक्ता कर्मानधिकारशङ्का परिहरति । नच ति । परमते च सर्वज्ञेश्वराभेदात् कर्मशास्त्राधिकारोपि न स्यादिति फलितम् ॥

इति श्रीवाधूलकुलतिलकश्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्येन

तदेकदैवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्ध

महाचार्यापरनामधेयेन रामानुजदासेन विरचिताया

शतदूषणीव्याख्याया चण्डमारुताख्याया

शास्त्राधिकारभङ्गो नाम

पञ्चाशस्स्कन्ध. ॥५०॥



श्रीरस्तु।

एकपञ्चाशो वादः।

अनुकूलतया सर्वे पश्यन्त्वा मुक्तसंविदः।
आन्ध्यं निर्विषयत्वेन वदतोऽर्थान्निरुन्ध्महे॥

"धीसन्ततिस्फुरति निर्विषयोपरागे" ति सौगतोपदिष्टमेव सन्ततिशब्दप्रहाणमात्रेण संगृह्णन्तः श्रुतिभिस्तावद्बाह्यतया रुध्याप्यन्ते। तथाहि-"ब्रह्मविदाप्नोतिपरं" मित्युपक्रम्य "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते" ति ब्रह्मवेदनफलत्वेन विभूतिगुणविशिष्टब्रह्मानुभव एव

यत्कटाक्षा वितन्वन्ति जीवान् ब्रह्मस्वधर्मण।
श्रीनिवासगुरौ तस्मिन्ननन्या भक्तिरस्तु न॥
मुक्तानिव परं ब्रह्म स्वैरसाधनमित्यलं गुणैः।
मोदयन्नियमध्यास्ता मम वेदान्तदेशिकः॥

ब्रह्मविदिति। अत्राच यैरनुगृहीतम्। "ब्रह्मविदाप्नोति परमि" ति ब्राह्मणे ब्रह्म तद्वेदन प्राप्ति प्राप्यञ्चेति चतुष्टयमुक्तम्, एतद्विवरण "सत्य ज्ञानमि" त्यादिमन्त्रेण क्रियत इति श्रुतिरेवाह "तदेषाभ्युक्ते" ति। तदेव ब्रह्माभिमुखीकृत्य ऋगेषाऽभ्येतृभिरुक्तेत्यर्थः। "सत्य ज्ञानमनन्त ब्रह्मे" ति ब्रह्मशब्दो विवृतः, "यो वेद निहित गुहायामि" ति विच्छब्दः, "परमे व्योमन् साप्नुत" इति प्राप्तिः, "सर्वान् कामानि" त्यादिना प्राप्यमिति। ब्रह्मानुभव एवे ति। "सह ब्रह्मणे" त्यत्र सहशब्दस्य भोग्यसाहित्यपरत्वादिति भावः। तथाच भाष्यम्। ब्रह्मणा सह तद्गुणान् सर्वानश्नुत इत्यर्थः। दहरविद्याया "तस्मिन्यदन्तस्तदन्वेष्टव्यमि" तिवत् गुणप्राधान्य वक्तु सहशब्द इति। एतच्चप्रकाशितमाचार्यैः। "अस्य वाक्यस्य प्राप्यवाचिपरशब्दविवरणरूपत्वात् 'सर्वान् कामान् सह ब्रह्मणे' ति भोग्यवाचिपदेनाव्यवहितप्रयोगत्वारस्याच्च सहशब्दो भोग्यसाहित्यपर इति। उक्तयुक्तेः, "परस्य विपश्चितो ब्रह्मण" इति पूर्वभाष्येण

प्रपञ्चयते । "यदा पश्य" इत्यादौ "निरञ्जनः परमं साम्यमुपैती" तीश्वरपरमसाम्यापत्तिवचनाच्च सार्वज्ञ्यादिकं मुक्तस्य सिद्धम् । "मम साधर्म्यमागताः" इति च भगवान् स्वयमेवाह । "ब्रह्म वेद ब्रह्मैव भवती" त्यादिकमपि "वैष्णव वामनमालभेत स्पर्धमानो विष्णुरेव भूत्वे" त्यादाविव साधर्म्यमात्रविषयमेव । नहि स्पर्धमानस्य यागविशेषमात्रेण साक्षाद्विष्णुत्वोपपत्तिः[2] जयरूपञ्च फलान्तर स्फुटमभिधीयते । "इदवद्वेदमेवे" ति च नैघण्टुका । प्रकारैक्येच

मन्त्रस्थविपश्चिदब्रह्मशब्दयोर्भोग्यवाचिब्राह्मणस्थपरशब्दव्याख्यानपरत्वख्यापनाच्च, श्रुतेर्भोग्यसाहित्यपरत्वे उदाहृतभाष्यस्य तात्पर्यमवगम्यत इत्याचार्यस्य भाव. ।

एव भाष्यतात्पर्यनिर्णये हेत्वन्तरमप्याहाचार्यः "गुणप्राधान्यं वक्तुमित्यनेनापि भोग्यसाहित्यपरत्व सिद्धम्, अन्यथा भोक्तृप्रधान्य हि सिध्येत् नतु भोग्य गुणप्राधान्यमि" ति । भोक्तृशब्दा जीवविषय. । यदा पश्य इति । मुक्तोपसृप्यस्य ब्रह्मणो ज्ञानादियोग परमसाम्यप्रतियोगित्व मोक्षदशास्व च रूप वक्तु यदापश्य इत्यादावि त्युक्तम् ।

परकल्पितार्थमपि निराकुर्वन् प्रमाणान्तरमाह ब्रह्मवेदे ति । वैष्णव मिति साम्यमात्रे दृष्टान्तः, नतु परमसाम्ये । नही ति । भोग्य फलकामेनानुष्ठित तदनुरूप च कर्म तत्फल जनयेत् नचाय तत्कामी शत्रुजयस्यैव काम्यत्वात् नचेद क्षुद्रफल साधन कर्म तथोक्तम्, नापि तत्साधयितु शक्यमन्यस्यान्यत्वमित्यर्थः । ततश्च यथा सा श्रुतिस्साम्यपरा तथैवापि जीवस्य ब्रह्मभावस्य सिद्धासिद्धौ च साध्यत्वात्सम्भवात्साम्यपरैवेति भाव ।

नन्वेवकारस्साक्षात्तत्त्वमेवावेदयतीत्याशङ्क्य, एवकार उभयत्रापि इवार्थ इत्याह इवे ति । अवधारणार्थत्वेऽपि न दोष इत्याह प्रकारैक्ये चे ति । यथा मुख्यार्थे प्रयोगो नापह्नवार्हो लोकसिद्धत्वात्, तथाऽमुख्यार्थे प्रयोगोऽपि ततएव नापह्नवमर्हति, अन्यथा ब्रह्मपदस्य लाक्षणिकत्वोक्तिविरोधात्, परन्त्वमुख्यप्रयोगो

त्वव्यवहारो मुख्यवत्प्रसिद्ध एव। एवकारादिश्च साधर्म्यातिरेकादमुख्ये मुख्यार्थोपचारद्योतको द्रष्टव्यः।

यथा "नेदं मुखमिदं पद्मं न नेत्रे भ्रमराविमौ।
एतानि केसराण्येव न च दन्तावलिस्तव॥" इत्यादिषु।

नच तद्रूपस्य तद्रूपप्रापत्तिः फलं, सिद्धत्वात्। नाप्यतद्रूपस्य, अप्रसिद्धान्तात्; अशक्यत्वाच्च। यथोक्तं भगवता पराशरेणापि "परमा

मुख्यार्थबाधापेक्ष स चानुपदमेव वक्ष्यते। एवकारस्तत्समानार्थोन्यश्च अमुख्ये प्रयोगस्य सौसादृश्यनिबन्धनत्वद्योतको द्रष्टव्यः॥ तस्मादेवकारस्यावधारणार्थत्वेऽपि वाक्यस्य सौसादृश्यपरत्व सिध्यत्येवेत्यर्थः।

यद्वा एवकारस्येवार्थवशम्भवात् सौसादृश्यपरत्वसम्भवमात्रमेव न परन्तु सादृश्यपरत्वमेव वाक्यस्य युक्तम्। नत्वभेदपरत्वम्, ब्रह्म भवतीत्यावतैव तात्सिद्धौ एवकारस्य व्यर्थत्वात्, नच भेदबाध्यापादितब्रह्मभावानुपपत्तिनिरासार्थ एवकारः, तथासति भवत्येवेति व्यवहितान्वयप्रसङ्गात्; न च ब्रह्मैव भवति न ब्रह्मणो भिन्न इत्येवमाविद्यकभेदनिवृत्तिपरत्वादस्य वाक्यस्य नयकारवैयर्थ्यमिति वाच्यम्, ब्रह्म भवतीति ब्रह्मभावसाध्यत्वप्रतीतिस्वारस्यभङ्गापत्तेः, भेदनिवृत्तेर्ब्रह्मस्वरूपान्तर्भावबहिर्भावयोरनुपपत्तेरविद्यानिवृत्त्यनुपपत्तिवादे प्रपञ्चितत्वाच्च, नच सादृश्यपरत्वेऽमुख्यवृत्त्यङ्गीकारो दोषः, त्वन्मतेऽपि ब्रह्मपदस्य स्वरूपलक्षकत्वात्, पदान्तरवैयर्थ्याय जघन्यवृत्तेरेव ज्यायस्त्वाच्च, तस्माद्वाक्यस्यायोग्यार्थत्वप्रसङ्गपरिहाराय सादृश्यपरत्वाङ्गीकारेऽपि सौसादृश्यसिद्धेस्तत्पर एवकारस्यार्थ इति, तस्माद्ब्रह्मैव भवति नान्य इति वैसादृश्यनिषेधपरेणैवकारेण वाक्यस्य सौसादृश्यपरत्वमेव युक्तम्, तथैव लोके दर्शनादित्यभिप्रायेणाह प्रकाशैक्ये चेति। नेदमिति। एवकारसमानार्थवाक्यस्य सादृश्यद्योतकत्वोक्तौ एवकारस्यापि तत्सिध्यत्येवेति भावः। अभेदस्यैव साध्यत्वपक्षे दोषमाह नच्चेति। यथोक्तमिति। अत्रानुगृहीतमाचार्यैः

' योगशब्द ऐक्यपरः, अन्यथा अन्यद् द्रव्य हि तद्द्रव्यतां नैतीति प्रतिक्षेपानुपपत्ते' । ननु मिथ्यैतदित्युत्तरवाक्यम्, अन्यद्द्रव्य तद्द्रव्यता नैतीत्येतन्मिथ्येत्यर्थ इति चेत्,—नैवम्, अन्यस्यान्यद्द्रव्यतानापत्तेः सत्यत्वात् इतरथा जडा जडयोस्तादात्म्यप्रसङ्ग' । 'ब्रह्मयज्ञुरसामनिरूपाद्य यज्ञकर्म मतन्तवे' त्यत इत्यत इत्यनेन पूर्वार्धोक्तार्थस्य परामर्शद्योतनात् । अन्वेष्यत इति पदशेषत्वात् । किञ्च " परमार्थस्तु भूपाल अद्वैतोपाधयोऽमिता " इति वक्ष्यमाणपक्षखण्डनोक्तखण्डनस्य निराकरणपरत्वाच्च प्रकरणस्य । एतच्लोकपूर्वार्धैक्यसमर्थनपरत्वमुत्तरार्धस्य नोपपद्यते, 'वर्णाश्रमादयो' इत्यादिभिर्भेदोक्तेस्तदर्थानां परमार्थत्व हि निरस्यते । स्वतः प्रकृतौ स्वरसस्य एतच्छब्दस्य प्रकृतार्थे सत्यपि वक्ष्यमाणपरत्वाश्रयणमस्य युक्तम् । अन्यद्द्रव्य तद्द्रव्यता नैतीति यत् एतन्मिथ्येति हि तदानीं स्यात्, तथा च सति यतश्शब्दस्यारस्यप्रसङ्ग यतोऽन्यद्रव्य हि हेतुपरत्व स्वरससिद्धम्, ननु यच्छब्दवत् प्रकृतार्थशरीरमात्रपरत्वम् । अन्यद्द्रव्य तद्द्रव्यता नैतीत्येतन्मिथ्येति यत स्तत ऐक्य परमार्थ इत्यन्ये इति शब्दस्य व्यर्थत्वप्रसङ्गः, सचाध्याहारेण निर्वाहे सम्भवति नोपपद्यते । यद्युच्येत पूर्वं पृथक्भूतयो. परमात्मात्मनोरैक्य परमार्थ इतीष्यत इति चेत्, मिथ्यैतत् अन्यद्द्रव्य हि द्रव्यता नैतीति यत. तस्मात् पूर्वमपि परमात्मात्मनोर्भेदो नास्तीति, नैव पूर्वं भ्रान्त्या पृथक्भूतयोरित्यस्याश्रुतत्वेनाध्याहारवैयर्थ्यात् । स चानध्याहारेण निर्वाहे सम्भवति नोपपद्यते । किञ्च तस्मात् पूर्वमपि भेदो नास्तीति अश्रुतवाक्यान्तराध्याहारेण वाक्यस्य पूरणीयत्व स्यात्, तच्च तन्निरपेक्षनिर्वाहे सम्भवति नोपपद्यते । तस्मात् प्रागपि भेदो नास्तीति वाक्य नाध्याहर्तव्यं पूर्वं भिन्नयो. परमात्मात्मनो. पश्चादभेद इति पक्षनिराकरणमात्रपरत्वात् ग्रन्थस्येति चेत् ! किमत्र प्रयोजनम् ? पूर्वमप्यैक्यसिद्धिरिति चेन्न,—पूर्वं पृथक् भूतयोः पश्चादैक्ययोगेऽभिहिते सति पश्चादपि भेदसिद्धेः । अतः स्वरससिद्ध एवार्थः स्वीकार्यः " इति ।

स्वारानोयोगः परमार्थ इतीष्यते। मिथ्यैतदन्यद्रव्यं हि नैति तद्द्रव्यतां यतः॥" इति। अत्र योग इति तादात्म्यमुच्यते। "नैति तद्द्रव्यतां यत" इति तादात्म्यस्योत्तरत्र निषेधात्। नथादिभरतमृगत्ववत् तज्जातीयतापत्तिः, तथापि साधर्म्यमात्रे पर्यवसानात्। वस्तुतश्च ब्रह्मणस्सर्वं विजातीयत्वात्। नच तद्रूपत्वैव सत्तातद्गतताप्रादुर्भाव इह विवक्षित इति वाच्यम्,—तथापि वाक्यस्यागुख्यार्थतात्पर्यविशेषात्। अतो वर साम्यश्रुत्याऽविरोधेन यथोक्त एवार्थः।

ननु "ब्रह्म भवती" ति तज्जातीयतामात्रमेव प्रतिपाद्यते, तथा च ब्रह्मादमसु रूयार्थमेवेति कस्यचिन्मतमपाकरोति नचेति। अमुगस्यैव सतो मुनन्यप्रतिपादिभरतत्वात् आदिभरतोपादानम्। तथापीति। ननु तथापि लक्षणा इति भावः। तत्र हेतुमाह वस्तुत इति। जगत्कारणत्वादिभिरसर्वविजातीयतया ब्रह्मशब्दप्रवृत्ति निमित्तस्यान्यत्र कथमुपचारादित्यर्थः। तथापीति। प्रादुर्भावस्य स्वरूपबहिर्भावान्तर्भावयोरनुपपन्नत्वात् योऽनुपपन्न एव, किन्न प्रादुर्भावस्यापनादिसिद्धत्वात् सार्वत्रिकी, नच जीवस्य ब्रह्मरूपताप्रादुर्भावः पूर्वमसिद्ध इति वाच्यम्,—जीवदेव स्वरूपविवक्षायामसिद्धे, विशेषणविशिष्टान्यतरापेक्षावा पुत्तरकालमप्यसिद्धे, एवमपि कथञ्चित्तात्पर्यवत्त्वकल्पनेऽपीत्यर्थः। वाक्यस्थे ति। ब्रह्मपदेन तत्प्रादुर्भावस्य लक्ष्यत्वादित्यर्थः। साम्ये ति। 'निरञ्जनः परमं साम्यमुपैति" "मम साधर्म्यमागताः" इत्यादि विवक्षितम्।

ननु मोक्षदशायां विषयदर्शननिषेधानुकूलविदर्शनविषयत्व नोपपद्यते, "न त्वेव तदशक्तौ" स्युपक्रमानुकूलविषयत्वमवगम्यते, दृष्टिनिरोधस्य द्रष्टुर्नित्ये

" तत्क्षेण क पश्येत्, नहदेर्द्वारं पश्येदि " त्यादिकं तु भाष्य एव सुव्यक्तं व्याख्यातम् । "सर्वं ह पश्यः पश्यती " त्यादिश्रुतयश्च मुक्तस्य साक्षात्सर्वज्ञता स्फुटतरमुपपादयन्ति । "यथा न क्रियते ज्ञेत्या मलप्रक्षालनान्मणेः " इत्यारभ्य—" तथा हेयगुणध्वंसादवबोधादयो गुणाः । प्रकाश्यन्ते न जन्यन्ते नित्या एवात्मनो हि ते ॥ " इति च स्मर्यते । तथाच " पश्चादुद्भूतबोधाग्नेः " त्यादि । सूत्रञ्च " जगद्व्यापारवर्जमि " त्यादौ " भोगमात्रसाम्यलिङ्गाच्चेति । " अतः श्रुति स्मृतिसूत्रानुवर्तिनामीश्वरपरमसाम्यापत्त्या सार्वज्ञ्यमेव मुक्तस्य स्फुटम् ।

किञ्च—स्वप्रकाशैकस्वरूपस्य ब्रह्मणः कदाचित्स्वेतरविषयत्व क्वचिच्च निर्विषयत्वमिति (त्वन्नो) उभयमपि किं तत्त्वम्, उभयमप्यतत्त्वम्, उतान्यतरत्तत्त्वम्-अन्यतरदतत्त्वम्? इतिन प्रथम.-विषयविषयितत्सम्बन्धादि भेदस्य सत्यत्वप्रसङ्गात् । न द्वितीय -उभयस्वरूपमात्रनिषेधे व्याघातात्, कालोपश्लेषेण निषेधो द्वयोरपि नित्यतामापादयेदिति पुनरपि व्याघात. । अथ कालावच्छिन्नान्यतरनिषेधार्थोऽन्यतरानुवाद इति मन्यसे, तदा

धाच्च न सर्वद्रष्टृत्वेन सार्व्यसंभव', इत्यत्राह तत्क्षेने ति । कदाचित्सविषयत्व क्व चिन्निर्विषयत्वमित्येतदुभयमप्यतात्त्विकमिति द्वितीयः पक्षः किं विशेष्यद्वयनिषे धात्तयो काद्याचित्कत्वरूपविशेषणनिषेधादेति ' विकल्पमभिप्रेत्याद्ये दूषणमाह उभय ति । भावाभावयोरन्यतरनिषेधेन्यतरस्यावर्जनीयत्वादित्यर्थः । द्वितीयमनू द्य दूषयति काले ति । कादाचित्कत्वरूपविशेषणमात्रनिषेधे विशेष्यसंस्सविषय त्वेनिर्विषयत्वयोर्नित्यत्वपर्यवसा ।द्व्याघात इत्यर्थः । व्याख्यज्ञप्तिधर्मपुरस्कारेण निषेध इति शङ्कते अथे ति । घटवति भूतले घटपटौ न स्त इत्यत्र यथा घटनिषे धार्थ एव घटानुवाद तद्वत् कादाचि-कसविषयत्वकादाचित्कनिर्विषयत्वयोर्भध्ये व्याख्यज्ञप्तिधर्मपुरस्कारेण न्यतरनिषेधार्थस्यादितरानुवाद इत्यर्थः ।

तृतीयः पक्षः परिशिष्यते। सविषयत्वस्य कालानवच्छेदेन सात्त्विकत्वे प्राक्तदोषाः प्रादुष्युः। निर्विषयत्वस्य नित्यत्वे संसाराभावप्रसङ्गात् उपलम्भविरोधोपदेशवैयर्थ्यशास्त्रानुद्धारायसिद्धान्तस्ववचनविरोधवादानर्थकारादिदोषशतमप्राज्यम्। वस्तुतो विषयाभावेपि सविषयता भातीति संसारादिसमुद्भवान्न दोष इति चेन्न;—विषयाभावेपि सविषयत्व तात्त्विकमिति त्वयाभ्युपगन्तव्यत्वात्। अन्यथा निर्विषयत्वस्यातिप्रसङ्गात्।

तृतीयः पक्षः इति। सविषयत्वस्य निर्विषयत्वं चात्त्विकमिति पक्षस्य दूषितत्वात्तदन्यतरावधारणाभावाच्च व्याख्यव्यृक्षेधर्मोपुरस्कारेण निषेधस्येति भावः। यदि कादाचित्कसविषयत्वकादाचित्कनिर्विषयत्वयोर्मध्येकादाचित्कसविषयत्वमतात्त्विकम् तदपि कादाचित्कत्वरूपविशेषणाभावादित्यत आह, तदा दोषमाह। सविषयत्वस्येति। सविषयत्वरूपविशेष्यभावात् कादाचित्कसविषयत्वस्य अतात्त्विकत्वे निर्विषयत्वस्य नित्यत्व इत्यनुपदमेव वक्ष्यमाणदूषणं बोध्यम्। निर्विषयत्वस्येति पूर्वत्र कादाचित्कत्वरूपविशेषणविरहात् कादाचित्कनिर्विषयत्वस्यातात्त्विकत्वे इदं दूषणम्। निर्विषयत्वरूपविशेष्याभावात् तथात्वे तु सविषयत्वनित्यत्वपक्षदोषः स्मर्तव्यः।

यद्वा, कादाचित्कसविषयत्व कदाचिन्निर्विषयत्वमित्येतदुभयमप्यतत्त्वमित्यनेन तदुभयमपि न निषेध्यते, किन्तु कादाचित्कसविषयत्वमेव वा कादाचित्कनिर्विषयत्वमेव वा, तस्यान्यतरनिषेधे कर्तव्ये तदितरकादाचित्कत्वकीर्तन निषेध्यस्य वाचित्कत्वानुवादान्तर्गतम्, भवति हि कदाचिन्निर्विषयत्वमित्येतत्सविषयत्वस्य कादाचित्कत्वानुवादान्तर्गतम्, कादाचित्कत्वस्य किञ्चित्कालसम्बन्धित्वे सति किञ्चित्कालासम्बन्धित्वरूपत्वेन कदाचिन्निर्विषयत्वकीर्तनस्य सविषयत्वकादाचित्कत्वघटकीभूतकिञ्चित्कालासम्बन्धित्वाकीर्तनरूपत्वात्, एव कदाचिन्निर्विषयत्वे निषेध्ये कदाचित्सानिषयत्वकीर्तनमौत्सर्गिकाभिप्रायेण शङ्कते अथ कस्मे ति। अपसिद्धान्त अभ्युपगमविरोध। स्वयञ्चलविरोधः संसारप्रतिपादकस्ववचनविरोध। वादानधिकार प्रमातृप्रमाणाद्यभावात्। आदिशब्देन प्रमाणाभावात् ब्रह्मणोऽप्र

नहि शुक्तिकारजतादिसंविदा रजतविषयतायां बाधन्ते बाधकाः । अबाधतस्यास्ते मिथ्यात्वमित्यतिसाहसम् । अस्तु वा नित्यविषयगोचरत्वलक्षणं सविषयत्वं ब्रह्मणस्तात्त्विकं किं तच्छिन्नमिति चेन्न,—तन्नित्यत्वे नित्यसंसारप्रसङ्गात् । तदनित्यत्वे तात्त्विकत्वपरिग्रहायोगात् । नन्वनित्यमपि किञ्चित्कालं तात्त्विकं भवन्तो मन्यन्ते । स्वरूपानुप्रवेशात्तात्त्विकमिति न दोष इति चेन्न,—स्वरूपस्याप्यनित्यत्वप्रसङ्गात् । तन्नित्यतया तदात्मना तन्नित्यत्वे पुनर्नित्यसंसारप्रसङ्गात् ।

किञ्चानादिकालं सविषयायाः संविदो निर्विषयता कुत आगता ? विषयग्रहणसामग्रीसन्तानात्यन्तोच्छेदादिति चेत्,—किं नित्यायास्तस्या अपेक्षया संविदन्तरसिद्ध्यर्थं सेति चेत् ? किं संविद्रूपमङ्गीकरोषि ?

सिद्धिरित्यादिकमुक्तम् । बाधाभावश्च सविषयत्वं तात्त्विकमित्याह नहीति । तात्त्विकसविषयत्वाङ्गीकारे तस्य नित्यत्वावश्यम्भावेन नित्यसंसारप्रसङ्ग इत्याह नेति । तात्त्विकत्वे कथं नानित्यतेत्यत्राह । नहीति । सत्यस्य ज्ञानानिवर्तनीयत्वात्, असत्येन च सत्यनिवृत्त्ययोगात्, सत्यान्तरस्य चानङ्गीकारात् तदङ्गीकारे च तदनाश्वासेनानिवृत्तिप्रसङ्गात्, तन्नाशस्य चोक्तरीत्या सत्यान्तरेण वाच्यतया तस्यापि तथेत्यनवस्थाप्रसङ्गान्न परमार्थस्याप्यनित्यत्वाङ्गीकारः परस्योपपद्यत इति भावः । अनित्यस्यापि ब्रह्मस्वरूपान्तर्गतत्वाङ्गीकारात् पारमार्थिकत्वं युज्यत इति शङ्कते । स्वरूपानुप्रवेशादिति । विश्वं ब्रह्मणो नित्यतया तदभिन्नस्य मिथ्याविषयत्वस्थापि नित्यतया नित्यसंसारप्रसङ्ग इत्याह तदिति । विषयग्रहणेति । विषयावगाहनं विवक्षितम्, अन्यथा पूर्ववाक्योक्तदूषणपरिहारस्वानुपपत्तेः । ग्रहणशब्दाभावारण्य मात्रेण किं ग्रहणशब्देन संविद्विवक्षिता उत विषयावगाहनमिति विकल्पमभिप्रेत्याऽऽह किमनादिसिद्धा संवेदेव विवक्षिता उत संवेदन्तरात्तात विकल्प्याद्य दूषयति किं नित्यायाः इति । संविद्रूपेति । भेदः—नानात्वम् । द्वितीयपक्षं शङ्कते

विषयानवगाहनार्थं सेति चेत्? किमिदमवगाहनं संवित्स्वरूपम्, उत अन्यत्? पूर्वत्र नैरपेक्ष्यमेव, उत्तरत्र, किमसौ विषयिधर्मः, उत विषयधर्मः, उतोभयधर्मः, यद्वा विषयत्वरूपमेव। आद्ये सविशेषत्वम्। मिथ्याधर्मप्रलयप्रसङ्गस्तु स्वरूपान्तरेऽनुसन्धेयम्। द्वितीये—तदुत्पत्तावपि रूपाद्युत्पत्तिवत् संविदस्तत्तत्सम्बन्धाभावेन तादवस्थ्यमेव। तृतीयेऽपि—सविकारत्वमवर्जनीयमेव। चतुर्थे सम्बन्धसिद्धिः। विषयग्रहणसामग्र्या विषयोत्पादनमिति हास्यास्पदम्। सिद्धे हि विषये प्रकाशार्थं सा आन्तो तु तदुत्पत्तिरिष्यते इति न भेद इति चेत्,—आत्मरूपवदप्रसङ्गात्। अत एव हि विषयग्रहणार्थं प्रमाणकल्पनं व्यावहारिकमपि शङ्करेणोपेक्षितं, अन्यथा क्षणभङ्गनिराकरणस्याप्ययोगात्, अतस्सा

विषये इति। स्वरूपान्तरे मिथ्यात्वभङ्गे। मुक्तिदशायां सर्वविषयत्वनिवृत्तेः ब्रह्मस्वरूपतदतिरेकविकल्पजालाद्यनिरूपितत्व दोषस्तूष्णीं चानुसन्धेयम्। विषयधर्म इति पक्षेऽपि किं संविद एवंविधस्वरूपकत्वमस्ति उत नेति आद्ये पूर्ववत् सविशेषत्वादिकमित्याभिमेत्य द्वितीयं दूषयति। द्वितीय इति। तादवस्थ्य मिति। विषयधर्मात्मकावगाहनोत्पत्ते प्रागिवदवस्थत्वमनन्तरमपि तदवस्थत्वमेवेत्यर्थः। प्रागिव पश्चादपि निर्विषयत्वमेव स्यादित्याशयः। सविकारत्वं सविशेषत्वमित्यर्थः। चतुर्थ इति। संविदि तद्विरूपकत्वस्य पूर्ववदभावादित्यर्थः। विषयग्रहणे इति। साक्षात्कारात्मकविषयग्रहणसामग्र्या विषयस्यापि प्रविष्टत्वेनात्माश्रयप्रसङ्गात्। सर्वथापि ज्ञानसामग्र्या विषयानुत्पत्तेः, अतीतादीनां ज्ञानस्थेऽप्यतीतादिविषयस्य पुनरुत्पत्तिप्रसङ्गाच्च। हास्यत्वमित्यर्थः। यदि हि ज्ञानात्प्रागेव विषयोसिद्धस्स्यात्, तदानीं हि विषयग्रहणसामग्री विषयार्था न स्यात्, भ्रान्तौ तु विषयस्य प्रागसत्त्वात् सा ग्रहणसामग्र्यास्तादर्थ्यमविरुद्धमिति शङ्कते। सिद्धे हीति। आत्मरूपेति। ज्ञानार्थयोरभेदादिति भावः। सिद्धान्ते विरोधमप्याह। प्रागिति। अन्यथेति। इन्द्रियसन्निकर्षस्य प्रत्यक्षे कारणत्वादिन्द्रियसंयोगदशायामपि विषयस्य वाच्यत्वादेव हि क्षणभङ्गनिराकरणमिति भावः। अत इति। संविदः स्वरूपेण प्रकाशः

सम्रीनिरपेक्षसवित्स्वरूपप्रकाशवादिनस्ते न निर्विषयदशा सिद्ध्यति । अस्तु तर्हि विषयविनाशादेव निर्विषयतासिद्धिरिति चेन्न,—नष्टस्यापि विषयत्वाविशेषात् । अन्यथा अतीतादिविषयस्मृत्यनुमानादिभङ्गप्रसङ्गात्।

संवित्स्वरूप प्रकाश., प्रकाशो भासमानता । सामग्रीनिरपेक्षस्य उपपादितत्वान्न सामग्रीसन्तानोच्छेदान्निर्विषयदशोपपादनसम्भव इत्यर्थः । माभूत्सामग्रीविरहान्निर्विषयदशा, विषयाभावात्तु स्यादिति शास्त्रासिद्धान्तमेवाशङ्कते । अस्त्वि ति । निर्विषयता विषयानुल्लेखः । नष्टस्यापी ति । ततश्च निर्विषयत्वाभावस्सञ्चारश्च प्रसज्येते इति भावः ।

एतेनेदं निरस्तम्, यदाह नवीनः स्वतः शुक्लस्यापि पटस्य रक्तद्रव्योपरागे रक्तत्ववत् स्वतो निर्विषयस्य प्रकाशरूपात्मनो विषयोपरागे सविषयत्व तदपाये रक्तद्रव्यापाये पटशौक्ल्यवत् स्वाभाविकनिर्विषयप्रकाशस्वरूपत्वमेव, तथाच स्वरूपज्ञानस्य स्वसृष्टार्थमात्रप्रकाशकत्वान्मुक्तौ नातीतविषयोपलम्भ., अतएव च न तस्य मुक्तौ विषयानुल्लेखेऽपि निस्स्वभावत्वप्रसङ्ग., अर्थप्रकाशत्वस्य उपलक्षणत्वात् ; स्वयाप्येवमेवाभ्युपगन्तव्यत्वात्, अन्यथा त्वदभिमतेश्वरज्ञानस्य नित्यस्य स्वविषयापायदशाया निस्स्वभावत्वप्रसङ्गात्, नचातीतमपि बुद्धिविषयीकरोतीति वाच्यम्, ईश्वरज्ञानस्यातीतार्थसम्बन्धाभावेन तदविषयत्वात्, अतीतादेश्च तव मते निस्स्वरूपत्वेन स्वरूपद्वयात्मकस्या स्वरूपसम्बन्धस्यापि वक्तुमशक्यत्वात् ; तस्यापि सस्वरूपत्वे प्रागभावध्वसाभ्या प्रतियोगिन एककालत्वप्रसङ्गात्, ततश्च तदानीमसत्त्वे वाच्ये निस्स्वरूपत्वस्यावश्यकत्वात् , नचातीतादेरभाव एव न त्वसत्त्वमिति वाच्यम्,—अनिर्वचनीयानङ्गीकारिण असत्त्वनिषेधे सत्त्वापत्ते , एतेन कालविशेषे तस्याभावप्रतियोगित्वमेव न त्वसत्त्वमिति निरस्तम् , असत्त्वनिषेधे सत्त्वापत्तेः, अभावप्रतियोगित्वस्याभावविरहात्मकप्रतियोगिस्वरूपत्वेन प्रागभावादिनैककालत्वापत्तेश्च , तथा चेश्वरज्ञानमर्थसम्बन्धाभावात् कथमर्थप्रकाशस्यात् कथ तर्हि ईश्वरस्य सर्वार्थ जगन्निर्माण वा, भूतभाविप्रतिसन्धानाभावादिति चेत्, स्वात्मानमुपालम्भस्व, यस्त्वमीश्वरेऽतीताद्याकारामविद्यावृत्तिन स्वीकुरुषे , नच शास्त्रसम्बन्धात् कथमतीतादिक विषयीकुर्यादिति वाच्यम् । अनिर्वचनीयवादे

आमोक्षान्निरन्वयविनाशाभावात् असत उत्पत्त्यभावाच्च दुर्निरूपसूक्ष्मरूपेण पदार्थमात्रस्यातीतादिकालेऽपि विद्यमानतया कल्पितसम्बन्धेन सार्वज्ञ्याद्युपपत्तेरिति।

अत्र यदुक्तम्—स्वतो निर्विषयस्यात्मनो विषयोपरागे सविषयत्वमिति। तन्न, उपाधिसम्बन्धाद्धि उपाधिगतो धर्मस्तत्संसर्गिणः भासते नच सविषयत्व विषयगतम्, येन तदुपरागात् सविषयत्वं स्यात्। किं च को नाम सविषयत्वोपपादको विषयोपरागः? न तावत्सम्बन्धमात्रम्, रक्तद्रव्यसंसृष्टपटस्य रक्तद्रव्यविषयतापत्तेः। नापि विषयविषयिभाव एव, आत्माश्रयप्रसङ्गात्।

यच्चोमीश्वरज्ञानस्य सर्वविषयस्यापि कार्यविरहकाले तदविषयत्व त्वयापि वक्तव्यम्, असता तेन सम्बन्धाभावादिति। तन्न, अतीतादिगतस्य ज्ञानविषयत्वस्येदानीमसत्वेपि तत्काले सत्वात्तन्निरूपितविषयीकरणस्य च नित्येश्वरज्ञाने सर्वदा सत्वात्। अतीतादिविषयकास्मदादिज्ञानेऽपि विषयकाले ज्ञाननिरूपित विषयत्व ज्ञानदशायां च तस्मिन्विषयित्वमिति न कश्चिद्दोषः॥ नच विषयकाले एतज्ज्ञान विषयत्वप्रतीतिप्रसङ्गः, तदानीमेतज्ज्ञाननिरूपकस्याप्रतीतेः इदानीं च ज्ञानोपस्थितेस्तद्विषयत्वम्। तत्कालेऽपि भूतभविष्यज्ज्ञानोपस्थितिर्यस्यास्ति तेन विषयत्व ज्ञायत एव ज्ञातो घटो ज्ञास्यते घट इति। नह्यत्र विषयत्वस्य भूतत्वभावित्वे प्रतीयेते, धात्वर्थगतभूतत्वभविष्यत्वयोरेव निष्ठाल्टोर्विधानात्। प्रतीतेरिदानीन्तनत्वादेव च इदानीमतीत प्रतीतिविषय इत्यादिप्रतीतिः॥ कथमन्यथा ईश्वरस्य सार्वज्ञ्यं जगन्निर्माणं वा, भूतभाविप्रतिसन्धानाभावात्।

यत्तूक्तमविद्यावृत्त्या विषयस्यानिर्वचनीयत्वाच्च स्वमत एव तदुपपत्तिरिति। तन्न, अनिर्वचनीयस्य सूक्ष्मरूपस्य विद्यमानस्य विषयत्वेऽप्यविद्यमानस्य सूक्ष्मरूपस्याविषयतया सार्वज्ञ्यायोगात्। सूक्ष्मरूपस्यविद्यमानत्वे अविद्यावृत्या परिहार वैयर्थ्यम्, प्रकाशस्यैव तद्विषयत्वसम्भवात्॥ किञ्चैवमनिर्वचनीयस्य सम्बन्धस्या सत्याप्यङ्गीकर्तुं शक्यत्वात् सूक्ष्मरूपान्तरकल्पनया परिहारवैयर्थ्यम्। शुक्तिसाक्षात्कारात्तद्ज्ञानतत्कार्यरजतादेर्निरन्वयविनाशो नानाजीववादे तत्तज्जीवाना ब्रह्मसाक्षात्कारेण तत्तत्संसारस्य तदज्ञानान्तःकरणादेर्निरन्वयविनाशो ईश्वरस्यास्मदादेर्वा त-

तद्विषयत्वे स्थितेऽपि तन्नाशान्न संसारादिप्रसङ्ग इति चेत्? किमसौ नाशो ऽप्रकाशात्मा उत प्रध्वंसात्मा ? आद्ये तद्विषयत्वे स्थितेऽपि तन्नाशादिति स्ववचनविरोध । द्वितीये निवर्त्यसत्यत्व निवृत्या सद्वितीयत्वमित्यादिदोष प्रसङ्ग । निवृत्तान् निवृततया विषयीकरोतीति न दोष इति चेत् ? विषयीकरणं किं स्वरूपम्, उत तदतिरिक्तम्? स्वरूपपक्षे संसारदशाया

ज्ञानाभावप्रसङ्ग । किञ्च मुक्तसविद ससारिसविद्भिरीश्वरसविदा चाभिन्नतया सर्वविषयत्वमवर्जनीयम् । तस्या निर्विषयत्वे "यस्मिंस्तु संसारिणि दुःखमस्ति तदपि तन्निष्ठत्वेन ब्रह्मीभूतो मुक्तोऽनुगच्छती" ति स्ववचनविरोधाच्च ॥

यत्तु मोक्षे तु खादितादात्म्याभावादेव तदस्फुरण न तु स्फुरणविरहादिति । तन्न, तादात्म्य ह्यभिन्नसत्ताकत्वम्, तच्च दुःखदशायामिव मुक्तदशायामप्यस्त्येव । किञ्च वृत्तेस्तदाकारत्व तन्निरूपणाधीननिरूपणार्हत्वमित्युक्तम्, ततश्चेद् ज्ञान एव तद्विषयात्मकमस्तु, अत एवेश्वरादिज्ञानानामतीतादिविषयत्व चोपपद्यते ।

तद्विषयत्व इति । आदिपदेननिर्विषयत्वाभावो गृह्यते । मुक्तसविदस्तद्विषयत्वे सत्यप्यतीतविषयकत्वेन तदानीं विषयाभावादेव निर्विषयत्वव्यपदेशोऽपि घटत इति भाव. । अत्र इति । प्रकाशस्य नित्यतया तत्प्रकाशाभाववचनस्य तद्विषयत्वाभावपर्यवसन्न इति भावः । द्वितीय इति । मोक्षदशायामपि विद्यमानस्य ध्वंसस्याधिकत्वाभावेन सत्यत्वात्तद्वैरोधिनो निवर्त्यस्य समानसत्ताकयोरेव विरोधात् सत्यत्वं निवृत्या सद्वितीयत्व च प्रसज्यत इत्यर्थः । आदिपदेन निवृत्ते ब्रह्मस्वरूपत्वे तस्यामाय्यत्वेन श्रवणादिवैयर्थ्यम् । भिन्नसत्ताकत्वेन ब्रह्मस्वरूपेणा विरोधित्वात् पूर्वमिवोत्तरकालमपि ससारप्रसङ्ग इत्यादिक ग्राह्यम् । नष्टस्यापि विषयत्वाविरोधादित्यत्र पुनश्चते । निवृत्ता निति । अनिवृत्ततयाभेददर्शनमेव स ससार. अतो न संसारप्रसङ्ग , निवृत्ततया विषयीकरणमेव निर्विषयत्वमिति भावः । स्वरूपपक्ष इति । तत्रश्च ससारदशायामपि ससारभावनिर्विषयत्वे प्रसङ्ग इति

मपि नित्यं निवृत्ततया विषयीकारप्रसङ्ग., सर्वत्र स्वरूपस्य तद.नीमपि विद्यमानत्व त्। अतिरिक्तमक्षे तर्कि सत्यम्, उतमिथ्या[1] सत्यत्वे सद्वितीयत्वादिप्रसङ्गः। मिथ्यात्वे तु तस्यैव दृगधीनसिद्धेः प्रकाशात्तत्कारणा विद्यानुवृत्त्यावश्यम्भावाच्च पुनरपि संसारानुच्छेदः। तावन्मात्र क्षम्यत इति चेन्न;—तस्य तस्य.श्चानिवर्त्यत्वेन सत्यत्वप्रसङ्गे सद्वितीयत्वादि प्रसङ्गात्, तुल्यन्यायात् प्रपञ्चबाधादिमूर्खप्रलापानां निरोधप्रसङ्गात्। अतस्सविदि नित्यायां सामग्रीनिवृत्त्या विषयनिवृत्त्या वा निर्विषयत्वापादनं तथा वक्तुं न शक्यम्।

ननु भवतामात्मस्वरूपस्य सविद्रूपत्वेपि यथा निर्विषयत्वं तथा स्माकमपि स्यात्[2] न स्यात्, अस्माकमात्मस्वरूपस्य प्रतीच' कदाचिदपि बाह्यार्थगोचरत्वानभ्युपगमात्। भवतस्तद्विषयाया एव तद्विषयत्व निवृत्तेर्दुर्वचत्वात्। अस्तु तर्हि भवतां धर्मभूतज्ञानवत्कदाचित्स विषयत्वम्, कदाचिच्च निर्विषयत्वमिति चेन्न; अस्माभि परमार्थाकारान्त रास्वीकारात्, भवतां तु तदनभ्युपगमात्तदयोगात्। अतो नित्य सवित्स्वरूपप्रकाशनात्राधीनसिद्धीना सर्वेषामपि पदार्थानां नित्यत्वमपि प्रसज्येत। तदधीनसिद्धित्वाभावे तु सिद्धिनिषेधे तुच्छत्वम्। तादधीन्यनिषेधे तु सत्यत्वम्। अतस्तन्मात्राधीनसिद्धयभ्युपगमे तद्वदेव तदधीनत्वापि नित्यत्वमनवर्जनीयमेव। तथा च सति सर्वः प्रपञ्चस्सत्य इति

भाव'। सद्वितीयत्वा दीति। आदिपदेन नित्यत्व गृह्यते। मिथ्यात्वेत्वि ति। अविद्याविषयीकरणयोर्निवृत्तत्वेनाविषयीकरणादिति भाव.। तस्य—विषयीकर णस्य। तस्या —अविद्यायाः। आदिपदेनाविद्यायास्सत्यत्वे तन्मू*कप्रपञ्चस्य पि सत्यत्व ज्ञानानिवर्त्यत्वमित्यादि विवक्षितम्। तुल्यन्यायात् इति। मिथ्यात्वेऽप्य विद्याविषयीकरणयोर्ज्ञाननाश्ये तुल्यन्याय त्। प्रपञ्चबाधकवादोऽपि निरुध्येते त्यर्थः। आदिपदेनशुक्त्यादिज्ञानाद्रजतादिबाधो विवक्षितः। अस्माभि रिति। आकारान्तरम्—विषयीकरणम्। भवतांत्वि ति। स्वरूपातिरिक्तस्य परमा

जितं यथार्थवादिभिः । तद्व्यात्सविन्नित्यत्वपरित्यागे साक्षात्सौगतत्वादि प्रसङ्गः । अतएव स्वापगदमूर्च्छादिषु निर्विषया संनिदित्यपि भवद्भिर्दुर्वचमेव, निर्विषयनिराश्रयसवित्प्रकाशस्तदानीमनुभूयत इति कस्यचिदपि सावधानस्यापि समस्तसंस्कारतिरस्कारकदेहविगमादिक्लेशाभावेपि न परामर्शोरित । किं तु अहमपि न विनष्टः, विषया अपि स्थिताः, प्रकाश एव सुषुप्त्यादौ निवृत्त इति सर्वे प्रत्यवमृशन्ति । " नाह खल्विव " त्यादिश्रुतिरपि ज्ञाननिषेधपरैव, नजानार्मात्यत्रैव तात्पर्यात् । अस्माभिस्तु विषयप्रकाशलक्षणावस्थाविशेषरहितज्ञानद्रव्यमात्रसत्ता ' न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यत ' इत्यादिश्रुतिबलादभ्युपेयते । नचास्ति तत्र प्रत्यक्षविरोधः, विषयप्रकाशव्यतिरिक्तदशायां तस्याः स्वप्रकाशायोग्यत्वात्, ज्ञानान्तरस्य तु तदानीं सामग्र्यभावादेवानुदयात्, तावतापि तदातन ज्ञाननिषेधश्रुतेश्चरितार्थत्वात् । अतस्त्वत्पक्षे ज्ञानस्य कदाचिदपि निर्विषयदशा दुरुपपादा । मुक्तौ तु सुतरामिति यथाश्रुति सार्वज्ञ्यमेव तदा

स्यानभ्युपगमात् स्वरूपमेव विषयीकरणमिति वक्तव्यम् । तस्य च निवृत्तिर्दुर्वचेत्यर्थः ।

ननु स्वापादिषु प्राक्तनविषयाया एव संविदो निर्विषयत्ववन्मुक्तौ निर्विषयत्व स्यादित्याह । अतएवे ति । न केवल भवता दुर्वचत्वम्, निर्विषयनिराश्रयसंविदो मानाभावात् बाधाच्च तदानीमसिद्धिरेवेत्याह निर्विषये ति ।

ननु " नाह खल्वि " ति श्रुतौ " सम्प्रत्ययमहमस्मी " ति सुषुप्तौ सविषयत्वस्य निषेधा दा संवेन्निर्विषयेत्यत्राह नाहे ति । विषयीकरणस्य ज्ञानस्वरू

स्वीकार्यम्। अन्यपरास्ताः श्रुतय इति चेन्न,—परब्रह्मोपासनप्रकरणात् तत्फलप्रतिपादनपरत्वेन च सांसारिकफलित्वायोगात्, तत्र तत्रैव च निवृत्तसमस्तपुण्यपापत्वादिप्रतिपादनात्, विध्यपेक्षिते फले समर्प्यमाणे केवलार्थवादत्वकल्पनायोगात्। अन्यथा श्रुतहानाश्रुतकल्पनादिदोषसमुद्भवात्। अतःसिद्धं न कथंचिदपि मुक्तिदशाया सर्वविषयवैमुख्यलक्षणमान्ध्य संविदश्शङ्कनीयमिति ॥

इति शतदूषण्यां मुक्तसंविन्निर्विषयत्वभङ्गः

एकपञ्चाशो वादः ॥

पत्वस्यैव वाच्यतया सविषयत्वविशिष्टज्ञाननिषेधस्य न जानामीत्यत्रैव पर्यवसानेन ज्ञाननिषेधपरत्वस्यैव त्वया वाच्यत्वादित्यर्थः।

इति श्रीवाधूलकुलतिलक श्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्येन तदेकदैवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्ध महाचार्यापरनामधेयेन रामानुजदासेन विरचितायां शतदूषणीव्याख्यायां चण्डमारुताख्यायां मुक्तसंविन्निर्विषयत्वभङ्गो नाम एकपञ्चाशस्स्कन्धः ॥५१॥



श्रीरस्तु ।

द्विपञ्चाशो वादः ।

सत्वानीव विरुद्धजातिजनुषां सिद्धान्तिनां सिद्धाश्रमे ।
वैरं यत्र मिथस्त्यजन्ति विषयव्यस्थैर्निषेधैस्सह ।
तद्ब्रह्मेशयमङ्गसङ्गिकमलालक्ष्म्येश्वरप्राक्रिया
शान्तावद्यमनन्तमङ्गलगुणं ब्रह्म प्रपद्येमहि ।
निर्गुणश्रुतिभिः केचिद्बाधन्ते सगुणश्रुती ।
तासामन्योन्यसौहार्दमाहुर्यतिवराश्रयाः ॥

अस्ति तावदुपनिषत्सु ब्रह्मण्येव सगुणवादो निर्गुणवादश्च । यथा— " यस्सर्वज्ञस्सर्ववित् " " परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च, " ' सत्यकामस्सत्यसङ्कल्प ," "ब्रह्मणा विपश्चिते" त्याद्याः परस्सहस्रास्सगुणश्रुतयः । एव " निर्गुण निरञ्जन निष्कल निष्क्रियंशान्तं,अपहतपाप्मा विजर',यत्तद्द्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुश्श्रोत्रं तदपाणिपादं, अस्थूलमनण्वि" त्याद्या. निर्गुणश्रुतय । आसामन्योन्यविरोधस्तावदायातत. प्रतीयते, न च सिद्धे वस्तुनि विकल्पसम्भव' । तत्र विरोधस्थिरीकरणेन बाध्यबाधकभाव इति नीचाः, विषयव्यवस्थया सन्धिरिति साधव. ।

ननु कथ विषयव्यवस्था ? सा ह्याश्रयभेदेन वा शीतोष्णवत्; देशभेदेन वा, चित्रे नीलपीतादिवत्, कालभेदेन वा, पाकजपरमाणुगुणवत्[1] समुच्चयेन वा, प्रदेशवर्तिसयोगतदभाववत्; प्रतिसम्बन्धिभेदेन वा,

---

तत्र इति । अत्र साधुनीचपदाभ्या " नीचा कलहमिच्छन्ति सन्धिमिच्छन्ति साधवः " इति न्यायो द्योत्यते । कालभेदेने ति । घटादिषु पाकजनीलरक्तादीना प्रदेशभेदेनापि व्यवस्थासम्भवात् परमाणुग्रहणम् । समुच्चयेने ति । यथा संयोगस्य स्वाभाववविरोधपरिहारः स्वावच्छेदेन कालभेदेन, प्रदेशान्तरे तु

पितृत्वपितृत्ववत्; ग्रहकभेदेन वा, रूपस्पर्शवत्; गृहीतृभेदेन वा, जातिव्यवस्थितभोगादिवत्; विधेयनिषेध्यभेदेन वा, ब्रह्महत्याग्नीषोमीयादिवत्; अन्येन वा केनचित्, श्वेतपीतादिबोधवदिति? न तावदाद्यः—परेण ब्रह्माधिकृत्य सगुणनिर्गुणश्रुत्योरुदयात्; न च जीवविषय कश्चित्, अन्यास्तु परविषया इति विवेक्तुं शक्यं, विशेषाभावात्; न च सर्वज्ञत्वादिश्रुतीनां जीवविषयत्वं, प्रत्यक्षविरोधत्; संसारोच्छेदप्रसङ्गाच्च; नचेद् यौगिक सार्वज्ञ्यं, नित्यसर्वज्ञत्वोक्ते, नापि निर्गुणश्रुतीनां, तत एव; उपलभ्यते हि बुद्धिसुखादिम-

---

देशभेदेन, एवमिहापि देशकालभेदाश्रया विरोधपरिहार इत्यर्थः। गृहीतृभेदेनेति। "परिव्राट्कार्मुकशुनामेकस्या प्रमदातनौ। कुणपङ्कमिनां भक्ष्यमिति तिस्रो विकल्पना." इत्युक्तरीत्या एकस्यामेव प्रमदातनौ मनुष्यत्वादिजातीयभोक्तृभेदाद्भेदव्यावैलक्षण्य इष्ट तद्वदिति भाव.। आदिशब्देन परिव्राट्कार्मुकयो. गुणव्यक्तिभेदेन भेदव्यवहारौ गृह्यते। विधेये ति। यथा अग्नीषोमीयहिंसाविधे. "न हिंस्यादि" ति हिंसानिषेधस्य च ब्रह्महत्याग्नीषोमीयाभ्या व्यवस्था तद्वदित्यर्थः। अन्येनवे ति। श्वेतपीतबोधयोस्तावदस्ति विरोध, एकस्यैव पुरुषस्य एकस्मिन्नेव विषय एकस्मिन्नेव काले श्वेतः पीत इति बोधादर्शनात्, एव च श्वेतः पटः पीतो घटः इति समूहालम्बनस्य स्वेनापि विरोधप्रसङ्गे उक्तप्रकारेभ्योऽन्येनैव व्यवहारेणोच्यते, तत्र चान्य. प्रकारो घ पटरूपविषयभेद, तद्वदिहाप्युक्तप्रकारेभ्योऽन्यो य. कश्चित् प्रकारो व्यवस्थापकोऽस्त्वित्यर्थ.।

ननु विरोधादेरेवविषयत्वासम्भवादेव भिन्नविषयता कल्प्यते, तत एव तत्र करणस्थब्रह्मश्रावणलिङ्गादिकमपि अन्यथा नीयत इत्यत्राह नचजीवे ति। न केवल जीवपरोयमिति निर्धारणासम्भव, द्विविधयेरपि श्रुत्योर्जीवपरत्वमसम्भवि चेत्याह नचे ति। संसारे ति। मोक्षावनतत्त्वज्ञानस्य सत्त्वादिति भाव.।

ननु योगार्थिनं सार्वज्ञ्यं श्रुतिप्रतिपाद्यम्, तस्य चेदानीमभावाच्च प्रत्यक्षविरोधादित्याशङ्क्या नचेद् मिति। नापि निर्गुणे ति। जीवविषयत्वमित्यनुषङ्गः। ततएवे ति। प्रत्यक्षविरोधप्रसङ्गादित्यर्थः। तदुपपादयति उपलभ्यते हि

त्तया जीवः, तदभावे च तस्य संसरण निर्बीजम् ; न द्वितीयः—स हि सम्बन्धिदेशभेदो वा स्यात् स्वप्रदेशभेदो वा ? आद्ये रूपाद्यवच्छिन्न प्रदेशभेदेन सगुणत्वनिर्गुणत्वयोर्व्यवस्थेति स्यात् , तत्र तावदेकस्यैव पुसः क्वचित्सर्वज्ञत्व क्वचिदान्ध्यमिति स्यात् ; तत्तु व्याहतम्, धर्मिभेदाभावात् । प्रदेशवर्तिगुणोत्पत्तिवदेवेति चेन्न—प्रदेशवर्तिनोपि ज्ञानस्य सर्वविषयीकरणे तद्धर्मिणः कात्स्न्येन सर्वज्ञत्वानपायात् , यद्यपि प्रदेशान्तरे तस्य समवायो नास्ति, तथापि तत्र भ्रान्त्यादियोगित्व क्वचित्केनापि सार्वज्ञ्येन विरुद्धमेव, यथावत्प्रकाशमाने अध्यासाद्यसम्भवात्: औपाधिक ब्रह्मभेदाभेदवादनिराकरणेन चायमर्थो व्यक्तमनुसन्धेयः ; प्रादेशिकगुण समवायाभावकथनेन च न ब्रह्मण. कश्चिदतिशय., सर्वद्रव्यसमत्वात्, एतेनैव स्वप्रदेशभेदोपि निरस्तः, स ह्यौपाधिकस्तावन्निरस्त एव,

---

त्यादिना । **तदभावेचे** ति । ज्ञातृत्वकर्तृत्वभोक्तृत्वाभावात् ससरण निर्बीज मित्यर्थ· । **सम्बन्धिदेशे** ति । सम्बन्धो यो देशस्तद्भेद·, उपाधिभेद इति यावत् । **उपाध्यवच्छिन्नेत्या** दि । सम्बन्धिवस्त्वन्तरभेदमात्राद्यवस्थाया अयोगात् । भिन्नोपाध्यवच्छेदेन वृत्तया भिन्नदेशत्वादेव व्यवस्था वक्ष्यमेति भावः । **धर्मिभेदे** ति । औपाधिकप्रदेशभेदे सत्यपि वस्तुतो धर्मिण एकत्वादित्यर्थः । ननु स्वतो धर्म्यभेदे सत्यपि सयोगतदभाववदौपाधिकप्रदेशभेदेनैव व्यवस्थास्त्वित्यत आह **प्रदेशे** ति । **कात्स्न्येने** ति । कात्स्न्येन सार्वज्ञ्ये यत् कार्य कृत्स्नेऽपि प्रदेशे भ्रमासम्भवरूप भवति तदेकदेशवर्तिनापि सार्वज्ञ्येन भवतीत्यर्थः । अयमेवार्थो **यद्यपी** त्यादिना स्पष्टीकरणार्थमुच्यते **यथावदि** ति । ज्ञान स्वाश्रये भ्रमविरोधि न तु स्वावच्छेदेन, गौरवादिति भावः । **प्रादेशिके** ति । कात्स्न्येन गुणनिषेधे ह्यद्वितीयत्वसिद्धेरतिशयसिध्यति, नैवमेकदेशानिषेधे तत्र गुणसामान्यनिषेधे हेय गुणस्यापि निषेधादतिशयो वक्तव्यः, नचैकदेशे हेयगुणा न सन्ति इत्युक्तया कश्चिदतिशयसिध्येत् , हेयगुणाकरद्रव्यस्याप्येकदेशे तदभावोपपत्तेः, पादाद्यवच्छेदेन दुःखितोऽपि जीवस्य प्रदेशान्तरे तदभावदर्शनादित्यर्थ । **एतेने** ति ।

स्वाभाविकोपि तुल्यन्यायतया निरस्त एव; न च स्वाभाविकोंशस्तत्र सम्भवति, निरवयवत्वश्रुतिविरोधात्; निरवयवत्वमशभेदेन सम्भवतीति चेत्? अशनिरवयवत्वादशिनोपि निरवयवत्ववचने सर्वस्याप्यवयविनो निरवयवत्वाविरोधेन सावयवत्वलक्षणनिषेध्यासिद्धौ निषेधासिद्धे, समुदायेषु सांशतया तत्सिद्धिरिति चेन्न; अत्रापि तत्सम्भवात्तन्निषेधासिद्धेः; एकदेशस्य त्वेकदेशत्वनिषेध इति निरर्थोक्ति; नापि तृतीयः,—प्रागुक्त

उपाधिगत एव भेद उपाधिसम्बन्धिनि धर्मिणि परम्परासम्बन्धेन भेदकार्यनिमित्तमित्येक मतम्, उपाधिभेदेन धर्मिणि भेद उत्पद्यत इत्यपर मतम्, तत्र पूर्वं प्रागुक्तं द्वितीयमधुनोच्यत इति भेदः। एव भेदे सत्यौपाधिकभेदशब्दवाच्यत्वादुभयाः पूर्वपक्षनिरासेनैवाय पक्षो निरस्तः इत्युक्तम्।

नन्वेकस्मिन्नेव सगुणत्वनिर्गुणत्वयोरप्यशभेदेन यथा व्यवस्थेष्यते एवं सावयवत्वनिरवयवत्वयोरप्यशभेदेन व्यवस्थेष्यत इत्याशङ्कते निरवयवत्व मिति। सर्वस्ये ति। घटादेरपि निरवयवावाशसम्भवे तदंशेन निरवयवत्वात् सावयवानामप्यशाना निरवयवाशकत्वे निरवयवत्वप्रसङ्गे तदवयविनो घटादेस्तैरप्यशैर्निरवयवतया तदवच्छेदेनापि सावयवत्वासभवात् घटादावपि सावयवत्वाप्रसिद्धेस्तन्निषेधायोग इत्यर्थः।

ननु प्रत्येकांशावच्छेदेन निरवयवत्वेऽपि घटादीना निरवयवाशसमुदायावच्छेदेनैव सावयवत्वात् निषेध्यप्रसिद्धिरिति शङ्कते। समुदायेष्वि ति अत्रापी ति। निरवयवत्वसावयवत्वव्यवस्थापकाशाभ्यामेव ब्रह्मणः सावयवत्वादित्यर्थः।

ननु समुदायस्य सावयवत्वेऽपि सावयवत्वनिषेधस्य तदेकदेशविषयत्वान्न निरवयवत्वश्रातिविरोध इत्याशङ्क्य, तस्य सावयवसर्वद्रव्यसाधारणत्वान्न तन्निषेधेन ब्रह्मणः कश्चिदतिशय इत्याह एकदेशस्ये ति। प्रागुक्ते ति। आश्रयभेदेन व्यवस्थेति प्रथमकल्पे यथा कस्मिन् आश्रये गुणः कस्मिन् तदभाव इति विकल्पः,

विकल्पायोगात्, पूर्वमत्यन्तनिर्गुणत्वे पश्चादपि कारणाभावेन गुणोत्पत्त्ययोगात्, पश्चान्निर्गुणता हेतुत सम्भवन्त्यपि सर्वविशेषमिथ्यात्वाभावे नात्यन्तायं स्यात्, वस्त्वन्तरसत्यत्वे तत्संयोगादिलक्षणस्यावर्जनीयत्वात्, वस्त्वन्तराणां च मिथ्यात्वमन्तरेणात्यन्तोच्छेदासम्भवात्, सत्कार्यवादसमर्थनेन निरन्वयविनाशादिनिराकरणात्; अत एव चतुर्थोपि निरस्तः, प्रत्येकपक्षोक्तदोषस्य समुच्चये समुच्चयस्याप्यपरिहार्यत्वात्; न हि ब्रह्मांशस्य कदाचित्संसरणं कदाचिदपवर्ग इति भास्करयादवप्रकाशमताद्वी य, दूषितश्चैतत् कालावच्छिन्नसार्वज्ञ्यदूषणादिना, यथोक्तम् ।

" सार्वज्ञ्यसर्वशक्त्यादिगुणकः केन सिद्ध्यति ।
नेश्वरस्त्वापि विज्ञेयः स्वतः सर्वगुणश्रुतेः ॥
सार्वज्ञ्यादिस्वतस्त्वे तु विवादो यदि कल्प्यते ।
सत्यत्वादौ विवादः किं न स्यान्निर्गुणवादिनाम् ॥ इति;

एवमिहापि कस्मिन् काले गुणः कस्मिन् तदभाव इति विकल्पः कार्य इत्यर्थः । तदेवोपपादयति पूर्वं मिति । कारणाभावेन ति । द्रव्यान्तरस्य कारणत्वे पूर्वं तत्संयोगप्रसङ्गः, तद्गतगुणस्य कारणत्वेऽपि स एव दोषः । पूर्वस्वगतगुणानामुत्तरगुणहेतुत्वस्वीकारे न कार्येत्यभिप्रायेण त्यन्तनिर्गुणत्व इत्युक्तम् । स्वस्यैव स्वगुणहेतुत्वे पूर्वमेव गुणोत्पत्तेर्गुणत्वानुपपत्तिरिति भावः । अत्यन्ताय कार्त्स्न्येनेत्यर्थः । वस्त्वन्तरे ति । द्रव्यान्तरसत्यत्व विवक्षितम् । तस्य च मूर्तत्वे विभागः संयोगादी त्यादिपदेन विवक्षितः । सत्कार्यवादे ति । ततो द्रव्यस्यावस्थान्तरयोगः कार्यतेति समर्थनात् कार्यस्य ततो नाशोऽप्यवस्थान्तरमेव स्यात् । अतोवस्थान्तर विशिष्टं द्रव्य तिष्ठेदेवेत्यर्थः । प्रत्येके ति । यत्रप्यस्मिन् पक्षे पूर्वं निर्गुणप्रदेशस्यापि द्रव्यान्तरतद्गुणादिना पश्चाद्गुणोत्पत्तिः सम्भवति, न च प्रागपि तत्प्रदेशस्य तत्संयोगादिना सगुणत्वापत्तिः, प्राक् प्रदेशान्तरस्थितेनापि निर्गुणप्रदेशे पश्चात्तयो गाद्युत्पादनसम्भवात्, एव पूर्वं सगुणस्य पश्चान्निर्गुणतायामपि नोक्तदोषः, निर

न पञ्चमः—पितृत्वापितृत्वादिवत्सगुणनिर्गुणत्वयोः प्रतिसम्बन्ध्युपाधिकृत्वाभावात्; नीलपीतादिवन्निरपेक्षत्वेनैवोपलम्भात्; न हि तत्त्वतो नीलमेव कञ्चित् प्रति पीतम्; पुरुषभेदेनोऽनुष्णश्च कृष्णवर्त्मा कदाचिद्भवतीति चेन्न; तत्रानुष्णत्वाभावात्, प्रतिबन्धकबलेन तु कश्चिदुष्णत्वं नोपलभते, तत्कार्यं च स्फोटादिकं तदा न जायते; "शीतो भव हनूमतः" "तत्रैष वह्निः पवनेरितोपि न मां दहत्यत्र समन्ततोऽहम्। पश्यामि पद्मास्तरणास्तृणानि शीतानि सर्वाणि दिशां मुखानि॥" इत्यादि कथमिति चेत्? इत्थम्, तत्र हि प्रभावविशेषप्रतिबद्धतया दाहकत्वाभाव एव हि तात्पर्यम्; यद्वा चान्द्रमसमहस इव देवताप्रभावोपनीतसलिलाप्यवयवनिवहसवलनवशादनुद्भूतौष्ण्यस्य दहनस्योपलभ्यमानशीतिमारोपेण शीतव्यपदेशः, नापि षष्ठः—ग्राह्यभेदस्य ग्राहकभेदा-

---

न्वयविनाशाभावेऽपि द्रव्यस्य प्रवाहरूपोत्तरावस्थायाः प्रदेशान्तरे वृत्तिसम्भवात् गुणप्रदेशावच्छेदेनात्यन्तनैर्गुण्योपपत्तेः, तथापि यत्प्रदेशे द्रव्यत्वस्य तत्प्रदेशे संवेगस्यावर्जनीयत्वात् सगुणप्रदेशत्वमेव स्यात्, तथा च प्रदेशभेदेन व्यवस्थाया अयोगः, अत समुच्चयपक्षे निर्गुणप्रदेशे न कदापि द्रव्यसम्भव इति सगुणप्रदेश एव प्राग्वा पश्चाद्वा द्रव्यस्य सत्त्ववाच्यम्, तथाचोक्तदूषणद्वयमव्याहतमिति भावः। किं रूपादीना धर्म्यनतिरेकपक्षे रूपोपलम्भेऽपि स्पर्शानुपलम्भार्थं रूपस्पर्शयोर्भेदो वाच्यः, तथा च रूपात्मकस्य धर्मिणस्त्वन्द्रियत्वविरोधे प्रसक्ते ग्राहकभेदाद्व्यवस्थोच्यते— चक्षुषा गृह्यमाण रूपात्मक त्वचा गृह्यमाण तदनात्मकम्, किन्तु स्पर्शात्मकमिति, तद्वदत्रापीत्यभिप्रायः? किं वा रूपस्य विजातीयरूपान्तरेणैव स्पर्शेनाप्यसामानाधिकरण्यात्मकविरोधे प्रसक्ते ग्राहकव्यवस्थया विरोधपरिहारो वाच्यः, तद्वदत्रापीत्यभिप्रायः? इति विकल्प हृदि निधायाद्य दूषयति ग्राह्यभेदस्ये ति।

धीनत्वे रूपस्पर्शादिभेदविलयप्रसङ्गात् , हिसाऽहिंसावाक्ययोरेकस्मिन्नेव क्रतावन्वयेपि विरोधाभावप्रसङ्गाच्च , न च भिन्नकरणग्राह्यरूपस्पर्शयो रिव सगुणत्वनिर्गुणत्वयोरविरोधः, भावाभावरूपत्वात् , रूपस्पर्शयोस्तु सहानवस्थानहेतोः कस्यचिदप्यदर्शनात् ; नापि सप्तमः—आनुकूल्यप्रातिकूल्यादेः सप्रतिसम्बन्धिकत्वेन जातिव्यवस्थितभोगाद्युपपत्तेः, सगुणत्वनिर्गुणत्वयोस्तु तदभावेनानुपपत्तेः ; उपपत्तौ वा ब्रह्मणोऽव्यवस्थितस्वभावत्वप्रसङ्गात् ; नचाष्टमः—निर्गुणश्रुतीनां सर्वगुणनिषेधपरत्वेन विधेयगुणविशेषपरिशेषासिद्धेः ; गुणविधिवशादेव निर्गुणश्रुतयः सङ्कोचमर्हन्तीति चेन्न , असकुचितनिर्वाहे सति सङ्कोचानुपपत्तेः , तथा सति सगुणश्रुतीनामप्रामाण्य प्रसज्येतेति चेन्न,—अपच्छेदनयेन प्रमाणत्वेपि

रूपे ति । ग्राह्यभेदादेव ग्राहकभेदस्य कल्पनीयतया ग्राह्यभेदस्य ग्राहकभेदाधीनत्वे अन्योऽन्याश्रयादिति—भावः । नीलपीतशीतोष्णाद्यवान्तरभेदोऽत्र विवक्षितः । हिंसे ति । एकस्यैव ग्राहकभेदेन धर्माधर्मात्मकत्वसम्भवादिति भावः । द्वितीयं दूषयति नचे ति ।

ननु भावाभावयोरिव प्रसक्तविरोधयोः रूपस्पर्शयोः कथ तर्हि सामानाधिकरण्यमित्यत आह रूपस्पर्शयोस्त्वि ति । कस्यचिदि ति । भावाभावरूपत्वस्य चाभावादित्यर्थः । आनुकूल्ये त्यादि । आदिशब्देनानुकूलप्रातिकूलानात्मकत्व गृह्यते । द्वितीयादिशब्देन भोगाभावः । तदभावेन— सप्रतिसम्बन्धिकत्वाभावेनेत्यर्थ. । अभ्युपगम्याप्याह उपपत्तौ वे ति । आनुकूल्यादिक प्रतिसम्बन्धिभेदेन व्यवस्थितमिति भावः । अव्यवस्थितेति पदच्छेदः ।

ननु प्रमाणत्वेऽपि यदि बाध्यत्व तदा विपरीतो बाध्यबाधकभावः कुतो न स्यात्, तथा च कथ निर्गुणत्वं तात्विकमित्यत आह अपच्छेदनयेने ति ।

बाध्यत्वोपपत्तेः ; पौर्वापर्ययोगेनापच्छेदनयानवतार इति चेन्न ; अपच्छेदनये प्रमाणपौर्वापर्यस्य निमित्तपौर्वापर्यमात्राधीनत्वात्, अत्राप्यर्थतो विधिनिषेधयो पौर्वापर्यसिद्धेः। विधिर्ह्यन्यानपेक्षतया पूर्वो भवति, निषेधस्तु निषेध्यप्रसङ्गसाकांक्षतया परः। एवं सति हिंसाविधिनिषेधवाक्ययोरप्यपच्छेदनयावतार इति चेन्न, तत्र विधिवाक्यस्यात्यन्ताप्रामाण्यप्रसङ्गात्, अत्र तु सगुणवाक्यानां विद्यादिविषयाणामपि दृष्टिविशेषणोक्तिन्यायेनतत्तत्फलाभिलाषबम्भ्रम्यमाणपुरुषविशेषविषयोपासनविधिशेषतयापि प्रामाण्योपपत्तेः। अत उभयोः प्रामाण्येपि बाध्यबाधकव्यवस्था। अत एव तत्वतो निर्गुणत्व च सिद्ध्यतीति न निर्गुणश्रुतीनां सङ्कोचहेतुमुपलभामहे। अत एव नवमोपि दत्तोत्तरः— अस्मत्सिद्धान्तनीतिमन्तरेणोभयप्रामाण्यनिर्वहणासिद्धे. । उभयाप्रामाण्यस्य वैदिकैः सामान्यतस्तावदनभ्युपगमात्, उभयोरप्यान्यपर्यवादिनां निरीश्वरमीमांसकनिगमतरुवन्द

पौर्वापर्ये ति। न हि सगुणनिर्गुणवाक्ययो· पाठक्रमोऽस्तीति भाव। निमित्ते ति। मात्रपदेन पाठक्रमो व्यावर्त्यते। निमित्तपौर्वापर्यस्याप्यत्राभावात् कथमपच्छेदनयावतार इत्यत आह अत्रापी ति। प्रमाणपौर्वापर्यमात्र हि तन्न्यायापेक्षितम्, तच्च निमित्तपौर्वापर्यादिव प्रकारान्तरेणापीति भावः। तत्रे ति। अपच्छेदे प्रयोगान्तरे प्रामाण्य सम्भवति। सगुणवाक्यानामपि वक्ष्यमाणरीत्या तदुभयव्यावृत्यर्थमत्यन्त पदम्।

ननु सगुणवाक्यानामप्यत्यन्ताप्रामाण्यं स्यात्, न च व्यावहारिकविषयतया प्रामाण्यम्। मिथ्यार्थप्रतिपादने प्रयोजनाभावेन तात्पर्याभावात्तत्राप्रामाण्यात्, सत्यत्वे तु तत्त्वज्ञानेन मोक्षफलसम्भवादित्यत आह अत्रापि ति। निर्गुणत्वस्य तात्त्विकत्वासिद्धौ अभिनिवेशवत शङ्का परिहरति उभये ति। उक्ताभिनिवेशवत एव कर्मविधिशेषतया आन्यपर्यशङ्का परिहरति उभयोरि ति। तत्त्व-

कानां सिद्धार्थतात्पर्यसंमर्थनादिभिरुन्मूलितत्वात् । अन्यतराप्रामाण्यपक्षे प्यन्ततोऽस्मन्नयभन्तरेण गत्यभावात् । न हि निर्गुणवाक्यमेव बाधितुं युक्तम्, तदुपदेशनैष्फल्यप्रसङ्गात् ; न च स्वरूपपराणां वाक्यानामुपासनविधिशेषत्वेन यथाकथञ्चन नेयता शङ्क्या, त्रय्यन्तराद्धान्तापराधप्रसङ्गात् ; अतः पारिशेष्यान्निर्गुणवाक्यैः सगुणवाक्यानामेव बाधः ; यद्यपि सत्यज्ञानादिवाक्यं स्वरूपपरमपि सामानाधिकरण्यं पदसाधारण्यम्,

---

न्यतरदेवतास्तु प्रमाणम्, एवचोभयोः प्रामाण्यनिर्वाहाय न त्वसिद्धान्तानुसरणम्, तथाच निर्गुणवाक्यस्यैवाप्रामाण्यसम्भवान्न सगुणत्वविरोध इत्यलाह अन्यतरे ति । तदुपदेशे ति । नचेष्टापत्तिः, " तमेव विदित्वातिमृत्युमेति " " तमेवैक जानथात्मान " "एकधैवानुद्रष्टव्यमि" त्यादिना निर्गुणज्ञानान्मोक्षश्रवणात्, नच सगुणवाक्यानामप्रामाण्ये नैष्फल्यप्रसङ्गदोषः, तस्य फलाश्रवणेन इष्टापादनत्वात् । न च तदुपासनादपि फलं श्रूयत इति वाच्यम्, तथात्वारोपितेनापि उपासनोपपत्त्या गुणानां तात्त्विकत्वासिद्धया तेन निर्गुणवाक्यस्य बाधायोगादिति भावः ।

नन्वस्तूभयोः प्रामाण्यम्, तथापि निर्गुणवाक्यानां उपासनाविधिशेषतया प्रामाण्यं सगुणवाक्यानां तत्त्वपरतयेति विपरीतं कुतो नेष्यत इत्याशंक्य निराकरोति नचे ति । निर्गुणज्ञानस्य हि ब्रह्मैक्यावाप्तिः फलमिति सिद्धान्त, तत्फलश्रवणात्, न च तत्त्वतो यद्भिन्न तेनाभेदः सम्भवति, तथाचाभिन्नस्यैवाभेदः फलमिति वाच्यम्, इदं च न भेदमिथ्यात्वमन्तरेण, न च मिथ्याभूतभेदोपमर्देन पूर्वसिद्धा भेदाबाधितस्तत्त्वज्ञानादन्येन भवति, अतस्तादृशफलहेतुज्ञानं तत्त्वज्ञानमेव—न त्वारोपितविषयमुपासनमिति निर्गुणवाक्यस्य नोपासनविधिशेषतासम्भव इति भावः । ननु " सत्यं ज्ञानमनन्तं ब्रह्म " " विज्ञानमानन्दं ब्रह्मे " त्यादिवाक्यानामुपासनेपरत्वाभावस्य सर्वसम्प्रतिपन्नत्वात् सामानाधिकरण्यनिर्वाहाय तैर्गुण्यसिद्धिर्दुर्निवार्येत्यलाह यद्यपी ति । निर्विशेषपरमेव सविशेषपरत्वेन यद्यपि सामानाधिक

शरणयद्भि. भवद्भिस्तत्तत्प्रवृत्तिनिमित्तविशिष्टस्वरूपपरमित्युपपादितम्, तथापि ज्ञानानन्दादिशब्दाबगतं ब्रह्मस्वरूपं न ज्ञातृत्वानन्दित्वादिविशेष सहमित्युपपद्यते; न हि ज्ञानस्व ज्ञानमानन्दस्यानन्दो वा गुणपक्ष पातिभिरपि भवद्भिरभ्युपजिगमिष्यते; अत शब्दादर्थाच्च गुणनिषेधसिद्धिः। न च वाच्यं सुखमात्ररूपत्वे तद्भावापत्तेर्मोक्षस्य पुरुषार्थता न स्यात्, न हि सुखं स्यामिति कश्चिदिच्छति, अपि तु सुखी स्यामित्येव। अतः सुखसम्बन्धेन वैशिष्ट्यमवर्जनीयमिति सुखापरोक्षमात्रेण पुरुषार्थता—

रण्यबलादुच्यते, अथापि सामानाधिकरण्यस्यान्ययोपपन्नत्वादर्थतो गुणनिषेधप्रती तेश्च गुणनिषेधपरत्वमेव सत्यादिवाक्यस्य अन्यथासिद्धिश्चाखण्डार्थबाधने द्रष्टव्येति भाव। शब्दा दिति दृष्टान्तार्थम्। यद्वा शब्दतो गुणनिषेधकश्रुतिभिर्बाध मुक्त्वा अर्थतो गुणनिषेधकश्रुत्यावि सार्वज्ञ्यादिगुणश्रुतेर्बाधमाह यद्यपी त्यादिना। वस्तुतोऽखण्डार्थबादोक्तरीत्या स्वरूपपरमेवेदम्, त्वदुक्तन्यायेन विशिष्टपरत्वाभ्युपग मेऽपि ज्ञानानन्दादिगुणनिषेधसिद्धे. सर्वज्ञत्वादिश्रुतेर्बाध सिद्ध इत्यर्थः। उक्तमुभ यथा गुणनिषेधमुपसंहरति अत शब्दा दिति। आर्थनिषेधो हि तर्कमूल, तस्मिंश्च तर्के बलवत्प्रतितर्के निरस्ते श्रुतेरार्थनिषेधपरत्वमेवाविरुद्धमिति शङ्कां निराकरोति नन्वे ति। सुखमात्रे ति। ब्रह्मणः सुखित्वे तद्भेदे स्वस्यापि सुखाभावात्तेस्तद्भावा पत्तिः पुरुषार्थो भवति, सुखरूपत्वे तु ब्रह्माभेदेऽपि सुखानवाप्तेः पुरुषार्थो न स्यादित्यर्थः। वैशिष्ट्यं—विशिष्टत्वम्, सविशेषत्वमित्यर्थः। सुखापरोक्षमात्रेणे ति। आपरोक्ष्यम्—अपरोक्षम्, स्वार्थेऽञ्। आत्म न सुखाप रोक्षमात्रेण सुखस्य पुरुषार्थतासिद्धौ सुखसम्बन्धः पुरुषार्थतायामप्रयोजकः, तथाच ब्रह्मणि तत्कल्पनमयुक्तमित्यर्थ.। नन्वेवमपि सुखापरोक्ष्यसम्बन्धाभ्युपगमप्रसङ्गः सर्वत्र ज्ञानस्यात्मस्वरूपत्वसमर्थनात्, य प्रति सुखमपरोक्षं त प्रति पुरुषार्थः, तद्भेदेऽप्यविरुद्धम्, निर्गुणश्रुतेस्तर्कसहकृतसगुणगुणश्रुत्य बाध इत्यभिप्रा

सिद्धौ सम्बन्धस्याप्रयोजकस्य कल्पनायोगात् ; द्रव्यत्वोपादानत्वादिभिः स्वगुणत्वमनुमीयत इति चेन्न , द्रव्यशब्देन वस्तुत्वादिमात्रविवक्षायां मुख्यामुख्यविकल्पे न दोषात् , अन्ततस्तयोरपि परिहरणीयत्वात् । एतेनोपादानत्वमपि निरस्तम् ; आत्मत्वमध्यात्मभेदानभ्युपगात् दृष्टान्त हीनम् , तथात्मशब्देन आत्मत्वजातिचैतन्यादिगुणविशिष्टाकारविव— क्षाया असिद्धिः, ज्ञानत्वविवक्षायां अप्रयोजकत्वम्, विरोधो वा, एवम न्यदपि दूष्यम् , न च वाच्यं—अहं जानामीत्यादिप्रत्यक्षेणैव बुद्धि सुखादिविशिष्ट एवात्मा प्रतीयत इति, तत्तद्वृत्तिविशेषविशिष्टस्यैवाह— ङ्कारस्य तथा प्रतीते , अन्यथा स्थूलोऽहमित्यादिप्रत्यक्षेण स्थौल्यादि गुणवैशिष्टयस्यापि प्रसङ्गात् , देहव्यतिरेकसाधनात्तन्निषेधे अहङ्कारव्य तिरेकसाधनात्तद्धर्मनिषेधस्यापि सिद्धेः ; अतः प्रत्यक्षाद्यप्राप्तार्थप्रतिपादक

येण शङ्कते द्रव्यत्वे ति। आत्मत्व मिति। अभेदे दृष्टान्तत्वासम्भवात् ब्रह्मभिन्नो जीवो दृष्टान्तो वाच्यः, तादृशस्य चानभ्युपगमाद्दृष्टान्तहीनमित्यर्थः। विरो धोवे ति । ज्ञानत्वस्य गुणाभावव्याप्तेर्घटज्ञानादिषु दर्शनाद्विरुद्धो हेतुरित्यर्थः।

ननु ईश्वरः सदावाप्तसमस्तकल्याणगुणः तत्प्रेप्सुत्वे सति तत्र शक्तत्वात्, ब्रह्म स्वज्ञानाबाध्यधर्मवत् विचार्यत्वादित्यादिकमाशङ्क्य निराकरोति एवमन्य-दपी ति । प्रेप्सावत्वे प्रमाणाभावात् प्रथमहेतोरसिद्धिः, सत्तानवधारणात्मकस्वरू पज्ञानादेव विचारोपपत्तेः स्वरूपसत्तानिश्चयस्यैव विचारफलत्वोपपत्तेश्च द्वितीयहेतो रप्रयोजकतेति भावः । प्रत्यक्षविरोधान्निर्गुणश्रुतिर्दुर्बलेत्यभिप्रायवतः शङ्कान्निराकरो ति न च वाच्य मिति । तत्तद्वृत्तिः—बुद्धिसुखदुःखाद्यात्मवृत्तिः । अन्यथे ति । एतादृशप्रतीतिबलात्तत्सिद्धाविति यर्थः । अहंकारव्यतिरेके ति । नचाहमर्थस्य द्वि रूपत्वादात्मधर्म एवाहङ्कारे प्रतीयत इति कुतो न स्यादिति वाच्यम्, " काम सं कल्पो विचिकित्सा श्रद्धाश्रद्धाधृतिरधृतिर्ह्रीर्धीरित्येतत्सर्वं मन एवे " ति श्रुत्याहङ्का रधर्मत्वसिद्धेरित्यभिप्रायात्। निर्गुणश्रुतेः प्राबल्ये कारणान्तर वदन्नेवोपसहरति अत इति । प्रत्यक्षाद्यप्राप्ते ति । सर्वज्ञत्वादिक तु जगत्कारणत्वाद्याधिसमिति

निर्गुणश्रुतिसामर्थ्यादेव निर्गुणे ब्रह्मणि सिद्धे, मायावच्छिन्नमिथ्यागुण विशिष्टेश्वरगोचराः सगुणश्रुतय इति।

अत्रोच्यते। यदुक्तं सगुणनिर्गुणश्रुतीनामाश्रयभेदादिना निर्वाहे दूषणम्, तदस्माकमपीष्टमेव। यत्तु विधेयनिषेध्यभेदेन विषयव्यवस्थाया मुक्तम्—'असंकुचितनिर्वाहे सति सङ्कोचोनुपपन्न' इति; तत्तदा शोभेत यदि सगुणश्रुतिबाधमन्तरेणासंकुचितनिर्वाहः स्यात्। बाधात् सङ्कोच एव न्याय्यः। सङ्कोचोपि क्वाचित्कबाध एवेति चेत्; सत्यम्, न तु सार्वत्रिकः, तत एव तस्य संग्रहणीयता। अन्यथा उत्सर्गापवादनय एव निर्मूलः स्यात्।

यच्चोक्तमपच्छेदनयेन प्रमाणत्वेपि बाध्यत्वमुपपद्यत इति। तदपि मीमांसा मांसलितचेतसां जुगुप्सनीयम्, अनियताविरोधपौर्वापर्ये ह्यपच्छेदनयः,

---

न तत्र श्रुतेस्तात्पर्यम्, सगुणवादिनैव सगुणत्वे प्रत्यक्षाद्युपन्यासाच्च न श्रुतेस्तत्र तात्पर्यमिति भावः। अन्यथेति। सार्वत्रिकबाधस्य सङ्कोचादपि ग्राह्यत्वे हिंसा निषेधकश्रुत्यसङ्कोचाय पश्चालम्भश्रुतेर्बाधः स्यादित्यर्थः।

ननु सगुणवाक्यस्य सार्वत्रिकबाधेऽपि व्यावहारिकविषयतया सर्वत्र स्वविषये प्रामाण्य सम्भवति, सङ्कोचे तु निर्गुणवाक्यस्य यस्मात् सङ्कोचः तत्र न कथचिदपि प्रामाण्यमिति बाधात् सङ्कोचाद्बाध एवात्र न्याय्यः, हिंसावाक्यस्य तु अत्यन्तबाधे न कथञ्चिदपि प्रामाण्यम्, प्रातिभासिकस्य विधानायोग्यत्वात्, अहिंसा वाक्यसङ्कोचे तु प्रामाण्यमिति बाधात् सङ्कोचस्तत्र न्याय्यः, इति चेत्, उच्यते, सगुणवाक्याना बाधे तेषामुत्सर्गप्राप्त तत्त्ववेदकत्वलक्षणप्रामाण्य हीयेत, निर्गुणवाक्याना सङ्कोचे सर्वेषा सगुणनिर्गुणवाक्याना तत्त्ववेदकत्वमेव सिध्यति, तत्त्ववेदकत्व यदि नौत्सर्गिक तदा निर्गुणवाक्यानामपि तत्त्ववेदकता न स्यात्।

ननु निर्गुणवाक्यानां सङ्कोचे यस्मात् सङ्कोचः तत्र प्रामाण्य न स्यादिति चेत्, एवमपि सर्ववाक्यानां तत्वावेदकत्वसिद्धये तदपि सोढव्यमेव । किञ्च यदि तत्राप्रामाण्य दोषः तर्हि निर्गुणवाक्यानां गुणविषये प्रामाण्याभावेऽपि दोषः स्यात् ।

ननु तद्वाक्यार्थतया प्रतीयमाने अप्रामाण्य दोष इति चेन्न, —लक्षणाद्यच्छेद प्रसङ्गात् । तस्मान्निर्गुणवाक्ये निषेधप्रतियोगिपदसङ्कोचमात्र सर्वेषा प्रामाण्य—सिद्धेर्युक्तम् ।

ननु सगुणवाक्यानां निषेध्यानुवादकत्वेन निषेधतात्पर्यात्तत्त्वावेदकत्वमस्तु ; आह च नवीनः " एकवाक्यत्वस्याऽवर्हितत्वात् सगुणवाक्यानां गुणानुवादकतया निर्गुणवाक्यैरेकवाक्यत्वमेव युक्तम् , किञ्च परमते क्वचित्प्रमितब्रह्मानुवादेन किं तत्र सर्वज्ञत्वादिगुणा विधीयन्ते ? किंवारुणैकहायनीन्यायेन युगपत्सर्वगुणविशिष्टं ब्रह्म वेदान्तैः प्रतीयते ? नाद्यः, उद्दिश्यानेकगुणविधाने वाक्यभेदप्रसङ्गात्, चित्राज्यनयवत् , तत्र हि " चित्रया यजेत पशुकाम " इत्यादिवाक्ये अग्नीषोमीयपशूद्देशेन गुणविधिमाशंक्य उद्दिश्य स्त्रीत्वचित्रत्वगुणद्वयविधौ वाक्यभेदात् नामधेयत्व चित्रापदस्य समर्थितम् , नापि द्वितीयः, अगृहीते ब्रह्मपदार्थे वाक्यार्थप्रतिपत्तेरयोगेन सत्यादिवाक्येन तत्प्राप्तेर्वाच्यतया ब्रह्मपदेन तदनूद्य सार्वज्ञ्यादि विधानमित्येव स्यात्, न तु विशिष्टविधानम्, तथा च वाक्यभेदो दुर्वारः , किञ्च प्रयोजनाभावात् श्रुतेर्न गुणे तात्पर्यम्, निर्गुणज्ञानस्य तु मोक्षः फलम्, जगत्कारणत्वाद्याक्षिप्तत्वाच्च न सर्वज्ञत्वादिश्रुतेस्तत्र तात्पर्यमिति निषेधार्थत्वमेव युक्त " मिति, तन्न, तथा सति ब्रह्मणि सार्वज्ञ्यादीना व्यावहारिकत्वस्याप्यसिद्धिप्रसङ्गात्।

ननु क्वचिद्विद्यमानस्यैव निषेधात् सार्वज्ञ्यादेश्चान्यत्रासम्भवात् ब्रह्मण्येव विद्यमानता वाच्येति चेन्न;—सर्वविषयकैकज्ञानाप्रसिद्धावपि तत्तद्वस्तुज्ञानाना प्रसिद्धतया तत्समुदायनिषेधोपपत्तेः । किञ्च " अथात आदेशो नेति नेति " इति निषेधेन सत्यादिवाक्यमनुवादतया एकवाक्य स्यात्, तथा च शून्यवादावतारः । किञ्च अप्राप्तत्वाच्च ब्रह्मणि गुणाना नानुवादः, जगत्कारणत्वादिना कथञ्चित्सार्वज्ञ्यादिप्राप्तावपीतरेषामप्राप्तेस्तेषामपि स्वाभाविकत्वाद्यप्राप्तेश्च । अन्यथा अनुभूति

निर्विशेषेत्याद्यनुमानैस्त्वदुक्तधर्मधर्मिभावखण्डनतर्कैश्च निर्गुणत्वस्यापि प्राप्ततया तद्विधानमनुपपन्नम्। प्रत्युत निर्गुणत्वसाधकतर्काणा प्रामाण्यस्य त्वदभिमतत्वात् सगुणत्वस्य न्यायाप्राप्तत्वात् तत्रैव तात्पर्यं युक्तम्। किञ्चाधिष्ठानत्वाक्षिप्ते ब्रह्मण· सत्यत्वे ज्ञाननिवर्त्यत्वाक्षिप्ते जगतो मिथ्यात्वे जीवब्रह्मणोरभेदे च श्रुतेस्तात्पर्यं भावप्रसङ्गः। एवञ्च यदुक्तं सर्वज्ञवाक्यं जगत्कारणस्य ज्ञप्तिस्वरूपप्रतिपादनार्थमिति तदपि न स्यात्, प्रपञ्चमिथ्यात्वेन ब्रह्मणो वित्तिरूपस्याक्षेपात्। न हि वित्तेर्ब्रह्मस्वरूपाद्यन्यत्वे ब्रह्मसिद्धिसम्भव·, तस्या अपि मिथ्यात्वात्।

यच्चोक्तं प्रयोजनाभावान्न श्रुतेर्गुणे तात्पर्यमिति। तन्न, ब्रह्मणः फल प्रदत्वौपयिकगुणप्रतिपादनेन ब्रह्मोपासने प्रवृत्त्यौत्कट्यसिद्धेः। एव प्राप्योत्कर्ष— त्वाच्च सार्वज्ञ्यादेः तज्ज्ञाने प्रवृत्त्यौत्कट्यसिद्धेः। सार्वज्ञ्यादेरुपास्यत्वाच्च तत्प्रति पादन सप्रयोजनमेव। "तमेव विदित्वे" ति व्यवच्छेदान्न तस्योपास्यतेति चेत्, सजातीयदेवतान्तरस्यैव निषेधात्, "त" मिति प्रकृतकारण-वादिगुण विशिष्टस्यैव ब्रह्मणः परामर्शात्, "तमेव विद्वानमृत" इत्येवशब्देन प्रकृत प्रकारपरामर्शाच्च।

यदुक्तम् अत्रापि 'पुरुष एवेदं सर्वं' मिति प्रस्तुतसार्वात्म्यमेवशब्दार्थ., विराडादिप्रपञ्चसृष्टेः तदर्थमेवाभिधानात्, तच्च सार्वात्म्य जडप्रपञ्चस्य परमार्थत्वे चिद्रूपात्मनो वस्तुतस्तद्भावत्वायोगात् मिथ्याप्रपचस्य अधिष्ठानब्रह्ममात्रतया परिशेषादेव भवति, अन्यथा प्रस्तुतपृथिव्यादिज्ञानस्यापि मुक्तिहेतुत्वाभिधाने "तमेवे" त्येवकारविरोधादिति। तन्न, किं "पुरुषएवे" ति अधिष्ठानत्व मयुक्तं सर्वतादात्म्यमेव प्रतिपाद्यते? किं वा सार्वात्म्योपपादकसर्वाधिष्ठानत्वसिद्धं सर्वाभावस्वरूपम्? आद्ये अतत्त्ववेदकत्व स्यात्, तस्यैव "एव विद्वा" निति परामर्शादतत्त्वज्ञानान्मोक्षश्च। द्वितीये अनेन वाक्येन ब्रह्मस्वरूपे कस्यचिद्विशे षस्याप्रतिपन्नत्व "एव" मिति परामर्शासम्भव·। स्वरूपमात्रपरामर्शश्च 'त' मित्येव सिद्धः। अशक्यश्च प्रकारवाचिना एवशब्देन स्वरूप— परामर्शः।

अन्यतरापच्छेदे बाधकाभावेन प्रामाण्यसिद्धेः, युगपदपच्छेदे विकल्पत उभयो. प्रामाण्यसम्भवात्, क्रमेणापच्छेद एव केवलं "पूर्वाबाधेन नेतरोत्पत्तिरुत्तरस्य हि सिध्यती" ति न्यायेन पूर्वबाधः । तथापि प्रयोगान्तरे प्रामाण्य सिध्यत्येव, नियतविरोधपौर्वापर्ये तूपक्रमाधिकरणन्यायेन परानुत्पत्तिरेव । ततश्चोत्सर्गापवादन्यायस्यैव सगुणनिर्गुणश्रुत्यो र्विषयता, अतो विहितव्यतिरिक्तगुणविषयो निषेधः ।

यच्चोक्तं सगुणवाक्यानां मिथ्याविषयाणामपि दृष्टिविधिवत् फल विशेष थेंपासनार्थतया प्रामाण्यमिति । तदपि न, तत्रैव मोक्षाख्यस्य फलस्य बहुलमुपलब्धेः । पुण्यपापप्रहाणपूर्वकस्वाभाविकरूपाविर्भावरूप फलविशेषस्य सांसारिकत्वोक्तिः साहसिकेभ्य एव स्वदते । अस्तु तर्हि मिथ्यार्थविषयसगुणोपासनेनापि विधिबलान्मोक्ष इति चेन्न, तथा सति निर्गुणवाक्यानामेव मिथ्यार्थविषयत्वकल्पनं किं न स्यात् ? तत्ववेदनस्यैव मोक्षहेतुत्वमिति नियमनिष्कासनात् । तथा च तत्वोपदेशश्च

ननु मा भूद्गुणश्रुतिरनुवाद, किन्तु विधिरेव, एव च निषेधस्य प्रसङ्ग स काङ्क्षतया गुणविधायकानामपि निषेध्यगुणप्रसञ्जनद्वारेण निषेधतात्पर्यकतया निषे धैकवाक्यत्वेन तत्त्ववेदकत्वमिति चेन्न,—पश्चाल्लभ्भवाक्यस्यापि प्रसङ्गकत्वप्रस ङ्गात् । प्रसङ्गकान्तरसद्भावस्तु उभयत्र तुल्यः । व्यर्थहिंसाया इवात्रापि हेयगु णाना प्रसक्तत्वात् । हेयगुणप्रसक्तिश्चात्मत्वादिसाधारणधर्मात् । सर्वज्ञत्वादीनामप्रस क्तत्वात् तत्प्रसक्तयर्थं सगुणवाक्यमिति यदि, तदा अग्नीषोमीयपश्वालम्भस्याप्रसक्त त्वात् तत्प्रसक्तयर्थं तद्वाक्यमित्यपि तुल्यम् । सर्वज्ञत्वादिकं कारणत्वेन प्रसक्तमिति त्वयैवाभिहितम् । किं च यदि सार्वज्ञादिकमप्रसक्तं तर्हि प्रश्नालनादितिन्यायेनाप्रस ञ्जनमेव वरम् । किंचैवं 'नेति नेती' ति निषेधार्थं सत्यादिवाक्यस्य प्रसञ्जकत्वेनैक वाक्यत्वं स्यात् । तस्मान्न निषेधैकवाक्यवसम्भवः ।

किन्तर्हि निर्गुणश्रुतेरत्यन्तबाध एवेष्यत इत्याकाङ्क्षायामाह **ततश्चे** ति।

तत्रैव ति । मोक्षस्य सत्यज्ञानसाध्यत्वान्नारोपितविषयमुपादानमिति भावः ।

ननु तत्त्ववेदने श्रूयमाण फल न मोक्ष इत्यत्राह **पुण्यपापे** ति । दोषा न्तरमाह **तथाचे** ति । तत्त्ववेदनस्यैव मोक्षहेतुत्वमिति नियमाभावादित्यर्थः ।

निष्प्रयोजनः स्यात्, अन्यथापि मोक्षसिद्धेः। अतो विषयव्यवस्थयै-वोभयप्रामाण्यासिद्धिः। अतो नवमस्य कल्पस्यानवतार एव।

यत्पुनरुक्तं न ज्ञानस्य ज्ञानमानन्दस्यानन्दो वा जाघटीतीत्यर्थतो गुणनिषेधसिद्धिरिति। किं तत्र धर्मस्य धर्मान्तराभ्युपगमेनानवस्थादि रभिप्रेतः? उतैकजातीययोर्धर्मधर्मिभावो नोपपद्यत इति? यद्वा ज्ञानान-न्दाद्यवान्तरजातीयस्य तत्तदवान्तरजातीयाश्रयत्व न दृष्टमिति? अथ ज्ञानानन्दयोरज्ञानानन्दरूप एवाश्रयो दृष्ट इति? अथ वा ज्ञानानन्दरू-स्यात्मनो ज्ञानानन्दादिक शशादेरिव शृङ्गादिकमुपलम्भाधितमिति? नाद्य, अनुक्तोपालम्भरूपत्वात्। न हि वय धर्मभूतचैतन्यादेश्चैतन्या-न्तरादिकं ब्रूमः। धर्मस्य चोपलम्भादेव धर्मान्तराभ्युपगमे कथमन-वस्था? नापि द्वितीय., धर्मधर्मिणो. सर्वत्र सत्तादिभिर्यत्किञ्चिदेक जातीयत्वावश्यम्भावत्। प्रमाप्रमावदादिषु विशेषतोपि सजातीययोर्धर्म

ननु कथं तत्त्वोपदेशस्य निष्प्रयोजनत्वम्? मित्थ्यार्थविषयोपासनवत्तत्त्व ज्ञानस्यापि मोक्षार्थत्वात्, सगुणविद्यानामनेकासाधुपदेशात्, अन्यथातत्त्वोपदेशा-दपि मोक्षसिद्धौ मिथ्यात्वोपासनस्यापि उपदेशो निष्प्रयोजन. स्यादिति चेन्न;-तत्त्वज्ञानादेव मोक्ष इति नियमानङ्गीकारे तत्त्वोपदेशात्तत्त्वोपदेशविभागो न स्यादि त्यत्र तात्पर्यात्। अनवस्थादि रिति। धर्म धर्ममङ्गीकृत्य तस्मिन् धर्मे धर्मव्यव हारसिद्धये धर्मिण एव स्वधर्मगतत्वाङ्गीकारेऽन्योन्याश्र., धर्मे धर्मव्यवहारस्य स्वरूपविषयत्वाङ्गीकारे पृथमधर्मस्याप्यभावप्रसङ्गः इत्यादिरादिशब्देन विवक्षितः। अथ ज्ञाने ति। ज्ञानस्य ज्ञानाश्रयत्वं ज्ञानाश्रयस्य ज्ञान-त्वाभावदर्शनबाधितमि त्यर्थः। धर्मस्य धर्मान्तराभ्युपगमेऽनवस्थामभ्युपगम्य परिहार उक्तः, इदानीन्तद भ्युपगमे ऽप्यनवस्था नास्तीत्याह धर्मस्यचे ति। यद्यपि भूतलघट्योरपि सजातीय धर्मधर्मि भावे निदर्शनत्व सम्भवति, तथाप्यपृथक्सिद्धधर्मधर्मिभाव. सजातीययो

धर्मिभावो दृष्टः । अवयविवादे च परमाणुद्व्यणुकादिष्वाश्रयिषु पार्थिवत्वादिविशेषसाजात्यमिष्टम् । नापि तृतीयः , अन्यत्राद्दष्टेरन्यत्र निषेधकत्वाभावात् । अन्यथातिप्रसङ्गात् । तत्र दृष्टान्तेनानुमाने तु श्रुत्यादिबलेन कालात्ययापदेशात् । नापि चतुर्थः, असिद्धेः । ननु किं ज्ञानतया आनन्दतया च ज्ञात्रोपलभ्यत इति चेत् ; किं वा जडतया दुःखतया चोपलभ्यते ? तदपि नास्तीति चेत् ? कस्तर्हि विरोधः ? सन्दिग्धस्व रूपत्वमिति चेन्न , तावता विरोधहेतुत्वासिद्धेः । शास्त्रादिभिस्तु विशेष निष्कर्षात् । पञ्चमस्तु प्रत्यक्षश्रुतिभ्यामेव प्रतिक्षिप्यत इति नानुपपत्तिं पश्यामः ।

यत्तूक्तं सुखापरोक्ष्यमात्रेण पुरुषार्थ(ता)सिद्धौ सम्बन्धस्याप्रयोजकस्य कल्पनमयुक्तमिति । तदपि निजहृदयविसंवादि जल्पितम् ।

नेति विशेषणेऽपि दूषणार्थं मवयविवाद इत्याद्युक्तम् । अन्यथे ति । शशशृङ्गानुपलब्ध्या शश इव गव्यपि शृङ्गाभावनिश्चयप्रसङ्गादित्यर्थः ।

नन्वन्यत्र ज्ञानस्यानुपलब्धे प्रत्यक्षमहकारितया वा स्वातन्त्र्येण वा ऽत्मनि ज्ञानाभावसाधकत्वं न विवक्षितम् , किन्त्वयं घट इत्यादिज्ञाने ज्ञानत्वस्य ज्ञानाभावव्याप्तिग्रहोपयोगितयेत्यत्राह दृष्टान्तेने ति । श्रुत्या दीति । ईश्वरे "यः सर्वज्ञ" इत्यादिश्रुतिबाधः जीवे 'एषहि द्रष्टे' त्यादिश्रुत्या जानामीत्यादिप्रत्यक्षेण च बाध इत्यर्थः । विरोध इति । विरोधहेतुरित्यर्थः ।

ननु साधकबाधकाभावेन नित्यसशयान्न कदापि ज्ञानत्वनिर्णयसम्भवः, अतः कथ विरोधहेतुत्वासिद्धिरित्यत्राह शास्त्रादिभि रिति । 'एष हि द्रष्टा श्रोता घ्राता रसयिता बोद्धा कर्ता विज्ञानात्मा पुरुषः,' 'आनन्दो ब्रह्म' 'आनन्दं ब्रह्मणो विद्वा' नि ति श्रुतिः । आदिशब्देन सुखमहमस्वाप्समिति परामर्शहेतुभूतसौषुप्तिकाहमर्थानुभवः प्रत्यक्त्वस्वयम्प्रकाशत्वानुकूलत्वादिविशिष्टविषयो गृह्यते । प्रत्यक्षश्रुतिभ्या मिति । प्रत्यक्षेण श्रुत्या च ज्ञानानन्दत्वोपलम्भात्तदभाव

तथा हि। न हि परस्य सुखापरोक्ष्यमात्रेण स्वयमपि लब्धपुरुषार्थो भवति, तथा सत्येकस्य सुखस्य दुःखस्य सर्वार्थत्वप्रसङ्गेन प्रत्यक्षानुमान शास्त्रादिसमस्तप्रमाणक्षोभप्रसङ्गात्। स्वरसतश्च परोपकारापकारयोरपि प्रवृत्तिनिवृत्तिप्रसङ्गात्। अतः स्वसम्बन्धितयैव सुखमपरोक्षतयार्थनीयं भवति। स्वरूपस्य तर्हि भवतां कथ सुखत्वमिति चेत्; सच्चिदानन्द रूप आत्मेति वदता भवता नैवं चोदनीयम्। स हि सदात्मा सुखत्व विशिष्टाकारेण प्रकाशात्मतया सम्बध्यत इति निपुणं चिन्तय।

स्यासम्भवात् त प्रत्यक्षमसिद्धमित्यर्थ.। **न ही** ति। यदि स्वसम्बन्धि वा स्वास म्बन्धि वा सुखे आपरोक्ष्यमात्रेण पुरुषार्थ. तदा सुखमात्र किंचित्प्रत्यपरोक्षतः प्रकाशत इति सर्वान् प्रति पुरुषार्थः स्यात्, एव दुःखमपि, न च यस्यापरोक्ष— विषय. तम्प्रति पुरुषार्थ., मुक्तस्य सुखप्रत्यक्षराहित्येनापुरुषार्थत्वप्रसङ्गादिति भावः। **अनुमाने** ति। सुखविकारादिना सुखदुःखादिक परस्मिन्ननुमीयते। **शास्त्रे** ति। 'स्वर्गकामो यजेत' 'योपगुरुते त शतेन यातया' दित्यादि। आदिपदेन पराभिमतार्थापत्त्यभावौ विवक्षितौ। **स्वरसत** इति। परोपकारेऽपि प्रवर्तन्ते परापकारादपि निवर्तन्ते साधव इत्याशङ्कावारणार्थमिदमुक्तम्। स्वप्रयो— जनोद्देशेन परोपकारे प्रवर्तन्ते स्वदुःखभयादेव परापकारान्निवर्तन्ते इति भावः। परिहारसाम्याभिप्रायेण हि प्रतिबन्धद्वात्रनम्, न च प्रकृते तत्सम्भवति, सत्यत्व चित्त्वानन्दत्वादिधर्मशून्यस्वरूपमात्रश्रादिनस्तव तदवलम्बिपरिहारायोगादित्यभि— प्रायेणाह **सच्चि** दिति। **स ही** ति। आकार.—स्वरूपम्। आत्मा सुखत्वविशि ष्टाकारेण **प्रकाशात्मतया सम्बध्यते** प्रकाशतया आत्मतया च सम्बध्यते, प्रका शत्वेन रूपेण सम्बन्धात् सुखस्य प्रकाशः प्रकाशत्वेन रूपेण सम्बन्ध्यात्मा सुखी, एवञ्च स्वरूपसुखस्य स्वकीयत्व स्वप्रकाशात्मनस्तस्यैव सुखप्रकाशत्वञ्च सिद्धमिति स्वसम्बन्धिसुखापरोक्षसिद्धेः स्वरूपसुखस्य पुरुषार्थतोपपन्नेत्यर्थः। सुखापरोक्षप्रति बन्धित्वमपि आत्मत्वेनैव, तेन सुखस्य स्व प्रत्यपरोक्षत्वमिति भावः। सम्बन्धिभेदा भावेऽपि सम्बन्धितावच्छेदकभेदात्सम्बन्ध उपपद्यते, घटस्य स्वरूपमित्यादौ तथा

यत्तु सगुणत्वानुमाने दूषणमुक्तम्—न तेनास्माकं चेतसि चमत्कारः । जीवेश्वरयोः प्रत्यक्षागमाभ्यां सगुणत्वसिद्धेः । यत्तु अहज्ञानामीत्यादिप्रत्यक्षस्य वृत्तिविशेषविशिष्टाहङ्कारविषयत्वमुक्तम्, तत्तु अहमर्थात्मत्वसमर्थनादौ परिहृतं द्रष्टव्यम् । अतो जीवस्य सर्वगुणशून्यत्ववचनं प्रत्यक्षादिसर्वप्रमाणविरुद्धम् । ईश्वरस्य तु आगमैकसमधिगम्यस्यागमविरुद्धम् ।


एतदुक्तं भवति—निर्गुणश्रुतिवदेव सगुणश्रुतयोपि तत्त्वविषयाः प्रमाणभूताश्च, अत एव न तासां मिथो बाध्यबाधकभावः । उत्सर्गापवादनयाच्च विहितव्यतिरिक्तविषयोऽत्र निषेधः, अतो भिन्नविषयत्वान्न विरोधगन्धः । विरोधाभावाच्च न बाध्यबाधकभावः । तदभावाच्चोभयप्रामाण्यं यथार्थरूपं स्वतः प्रतीयमानमनपोदितमिति । उक्तं च श्रीवरदगुरुभिस्तत्त्वसारे—

" यद् ब्रह्मणो गुणशरीरविकारजन्म
कर्मादिगोचरविधिप्रतिषेधवाचः ।
अन्योन्यभिन्नविषया न विरोधगन्ध
मर्हन्ति तन्न विधय प्रतिषेधबोध्याः ॥ " इति ।

इति शतदूषण्या सगुणनिर्गुणश्रुतिव्यवस्था
द्विपञ्चाशो वादः ॥

दर्शनादिति भावः । प्रत्यक्षादीति । उपादानत्वादिहेतुकानुमानदूषणं यद्यप्यनुपदमेवाभ्युपगतम्, तथापि सुखविकासादिहेतुकानुमानस्य सम्भवात् सर्वप्रमाणविरुद्धमित्युक्तम् ।

इति श्रीवानमूलकुलतिलकश्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्येन तदेकदैवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्ध महाचार्यपरनामधेयेन रामानुजदासेन विरचितायां शतदूषणीव्याख्यायां चण्डमारुताख्यायां सगुणनिर्गुणश्रुतिविषयव्यवस्था नाम द्विपञ्चाशः स्कन्धः ॥५२॥



श्रीरस्तु ।

॥ विपञ्चाशो वाद ॥

सद्ब्रह्मादिमुखैः पदैः श्रुतिषु यत्तत्वं समुद्घोषितं
स्यामित्येव चराचरं जगदिदं सृष्ट्वा प्रविश्याभवत् ।
तस्मै विस्मयनीयमङ्गळगुणस्थेम्ने सदा स्वायिने ·
सर्वावस्थसमस्तवस्तुवपुषे धाम्ने परस्मै नमः ॥

अस्तु तर्हि ब्रह्मोपादानत्वान्यथानुपपत्त्या विश्वमिथ्यात्व सिद्धिः । तथा हि—

केवलनिमित्तेश्वरवादप्रतिक्षेपेण (मुखेन) ब्रह्मण एवोपादानत्व मपि " प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधा " दित्यादिभिः समर्थितम् ।

स्यामित्येवे ति । ' बहु स्या ' मिति सङ्कल्पयैव, ननु बहु स्यादिति स ङ्कल्प्य, इत्यर्थः । अनेनोपादानत्वमुक्तम् । अभव दिति । यथाभङ्कल्प बहुभव दित्यर्थः । उपादानत्वेऽपि चेतनाचेतनगतदोषासस्पृष्टत्वमाह विस्मयनीये त्यादि । दोषाणा विशेषणगतत्वप्रदर्शनार्थमुपादानत्वोपादेयत्वसिद्धयर्थं इदसदादिपदाना पर-मात्मपरत्वसिद्धयर्थं चाह सर्वावस्थे ति । केवले ति । ब्रह्म न जगदुपादानम् , ईक्षापूर्वकसृष्टृत्वात्, अचेतनाशुद्धजगद्रूपत्वाच्चेति प्राप्ते—सिद्धान्तितं ' प्रकृ—तिश्च प्रतिज्ञादृष्टान्तानुपरोधा ' दिति । प्रकृतिश्च उपादानकारण च, ब्रह्माभ्युप गन्तव्यम् , प्रतिज्ञादृष्टान्तानुपरोधात् । प्रतिज्ञा तावत् ' येनाश्रुत श्रुत भवती ' त्यादिका, सा चोपादानकारणत्व एव युज्यते, तज्ज्ञानेन सर्वस्य तत्कार्यस्य ज्ञानात् ; दृष्टान्तोऽपि ' यथा सोम्यैकेन मृत्पिण्डेने ' त्यादिरुपादानगोचर एवाम्नायते ; स चोपादानत्व एव ब्रह्मणो युज्यते । किञ्च ' यतो वा इमानी ' ति पञ्चम्युपा दान एव, ' जनिकर्तुः प्रकृति ' रित्युपादानसज्ञाविधानात्, तस्मात् ब्रह्मोपा दानम् । ' सोऽकामयत बहु स्या ' मिति बहुभवनकामनाविषयत्वोपदेशाच्च, ' तदात्मानं स्वयमकुरुते ' ति आत्मन एव जगद्रूपेण कृतिश्रवणाच्चेति ।

ननु नात्र पञ्चम्योपादानत्वसिद्धिः, तस्या अनेकार्थत्वात्, अपादानार्थत्वेऽपि 'ध्रुवमपायेऽपादान' मित्यपादानसञ्ज्ञासिद्धेः, 'जनिकर्तुः प्रकृति' रित्यनेनापादानसञ्ज्ञायामपिप्रकृतिग्रहणस्य कारणमात्रार्थत्वेनोपादानत्वासिद्धेः,अन्यथा पुत्रात्प्रमोदो जायत इत्यत्रानुपपत्तेः, अत एव न्यासकृता 'ध्रुवपदानुवृत्त्या जनिकर्तृसम्बन्धिनोऽपादानसञ्ज्ञाया प्रत्यासत्त्योपादानस्यैव स्यात्, प्रकृतिग्रहणात्सर्वत्र भवति, तेन पुत्रात्प्रमोदो जायत इत्यादि सिद्धयती' त्युक्तम्, अत एव 'यदिन्दोरन्वेति व्यसनमुदय वा निधिरपामुपाधिस्तत्लाभं जयति जनिकर्तुः प्रकृतिते' ति मुरारिणा कारणमात्रे प्रकृतिपद प्रयुक्तम्, नापि 'सोऽकामयत बहु स्या' मिति श्रुत्या तत्सिद्धिः, तस्याः 'यदेकमव्यक्तमनन्तरूप' मिति श्रुतिसिद्धानन्ततत्त्वपदार्थप्रेरकानन्तरूपै. बहुभवनसकल्पपरत्वात्, 'सच्च त्यच्चाभव' दिति च सत्त्वादिगुणाभिव्यक्तिपरम्, सृष्ट्यनुप्रवेशानन्तरभावित्वात्, अन्यथोपादानस्य सङ्कल्पपूर्वकमुपादेयं सृष्ट्वा तदनुप्रविश्य पुनस्तद्भवनायोगेन वाक्य अयुक्तार्थं स्यात्, एतेन 'तदैक्षत बहु स्या प्रजायेये' त्येतदपि व्याख्यातम्; एतेनैव 'तदात्मानँ स्वयमकुरुते' त्येतदपि व्याख्यातम् । "तदात्मान सृजाम्यहम्" इतिवदुपपत्तेः, नह्यात्मान प्रपञ्चात्मनाकुरुतेति श्रूयते इति । उच्यते, जनिकर्तृसूत्रं प्रत्याचक्षाणो भाष्यकार एव सूत्रस्येमर्थं प्रत्याह । 'ध्रुवमपाये पादान' मिति सूत्रेण एतद्विषयसिद्धया हीदं सूत्रं प्रत्याचख्यौ। "अयमपि योगः शक्यो ऽवक्तुम्, कथम्? गोलोमाविलोमभ्यो दूर्वा जायत इति अपक्रामन्ति तास्तेभ्य" इत्यादि प्रत्याख्यानभाष्यम्, यदिहीदं हेतुमात्रार्थं स्यात्तदा पुत्रादौ 'ध्रुवमपाय' इति सूत्राप्रवृत्तेः सूत्रस्य तदर्थत्वान्न प्रत्याख्यानावकाशः । पुत्रात् प्रमोद इत्यत्र का गतिरिति चेत्? प्रक्रियामञ्जरीपदमञ्जर्यादि घूक्तो 'विभाषा गुणे स्त्रिया' मित्यत्र विभाषेति योगविभागः । नन्वेव तत एव 'यतो वे' त्यत्रापि पञ्चम्यस्त्विति चेन्न,—योगविभागस्योन्नेयत्वेन प्रत्यक्षसिद्धयपेक्षया दुर्बलत्वात् । तद्विषयत्वमपि प्रयोगान्यथानुपपत्तिकल्प्यम्, बाहुळकविधिविषयत्ववत्, इह च 'जनिकर्तुः प्रकृति' रिति प्रत्यक्षशास्त्रसिद्धापादानविषयत्वोपपत्तेः नान्यथानुपपत्तिः । मुरारिप्रयोगात्प्रकृतिपदं कारणमात्रार्थमिति त्वयुक्तम्,

चन्द्रस्य सप्तद्वैकदेशपरिणामत्वेऽपि बाधकाभावात् । यथाकथञ्चिद्रसोत्पत्त्यर्थकक्काव्य प्रयोगमात्रादर्थसिद्धौ ' कलशे निजहेतुदण्डजः किमु चक्रभ्रमकारितागुण ' इति श्रीहर्षप्रयोगाच्चक्रभ्रमहेतुत्वस्य गुणत्व दण्डस्य समवायिकारणत्वञ्च स्यात् । यच्चोक्तम्, ' ध्रुवमपायेऽपादान ' मित्यपादानसञ्ज्ञेति । तन्न, अपायहेतुक्रियां प्रत्यवधित्वेन कारकस्यापादानसञ्ज्ञाविधानात्, अत्र च तादृशक्रियाया अश्रवणादपायाभावाच्च ।

न च शृङ्गाच्छरो जायत इत्यादावपि अपरिज्ञतभागसत्वात्तस्यापायावधित्वादपादानत्वमिहापि तद्वदेव सम्भवतीति वाच्यम्,—तद्वदेवैकदेशोपादानत्वसिद्धेः विभोरात्मनोपायायोगाच्च । ' सोऽकामयत बहु स्या ' मित्यत्र यदि विग्रहद्वारा बहुभवन विवक्षित तदा ब्रह्मशरीरतया श्रुतिशतसिद्धप्रकृतत्वदभिमतप्रपञ्चरूपविग्रहद्वारा बहुभवने कः प्रद्वेषः ? किंच ' बहु स्या ' मिति विग्रहसृष्टिसङ्कल्पाभिधाने असङ्कल्पितप्रपञ्चसृष्ट्यभिधानं सङ्कल्पितविग्रहस्य सृष्ट्यनभिधानचायुक्तम् ।

" सच्च त्यच्चाभव " दिति च सत्त्वादिगुणाभिव्यक्तिपरमित्य प्ययुक्तम् ब्रह्मणः सत्त्वादिगुणासिद्धे. । न च सृष्ट्यनुप्रवेशानन्तर सद्भवनाभिधानानुपपत्तिः; सृष्ट्यभिधानेन विवर्तत्वासिद्धया तत्सिद्धयर्थं सत्यद्भवनाभिधानात्, पूर्वकालत्वस्य चाविवक्षितत्वात् । एतेन ' तदैक्षत बहु स्या ' मित्येतदपि व्याख्यातम् ॥

ननु तेजःप्रभृतिरूपेण त्वया बहुभावो वाच्यः, तेजः प्रभृति चेतनमीक्षणादिश्रवणात्, न च चेतन प्रत्युपादानत्व ब्रह्मणः सम्भवतीति चेन्न,—अत्र हि योग्यतावशात् प्रथमतेज.पदेन भूतात्मक तेजो गृह्यते, द्वितीयेन तदवच्छिन्नमुत्तरकार्यस्य निमित्तमपादानञ्च ब्रह्मोच्यते, उभयत्र भगवत्पर्यन्तमेव वा । ' तदात्मानँ स्वयमकुरुत ' त्यत्रापि विग्रहसृष्टिपरत्वमनुपपन्नम्, तदित्यसतः परामर्शात् ।

ननु ' सोऽकामयते ' त्युक्त आत्मा ' ततो वै सदजायते ' ति तच्छब्देन परामृश्यते, तदेव ' तदात्मान ' मित्यत्रापीति चेन्न,-तदिति नपुसकलिङ्गानुपपत्तेः । इद सर्वमभिप्रेत्य सूत्रकारेण समर्थितँमिति ।

तदेतदुपादानत्वं किं मृद्घटादिवत् स्वरूपतः[1] उत बाल्युवादिवत् सूक्ष्म-चिदचिद्विशिष्टवेषेण[2] अथवा रज्जुसर्पादिवदविद्यावैचित्र्यनिबन्धनभ्रान्त्या यनि । न तावत् प्रथम., निर्विकारत्वनिरवद्यत्वश्रुति[कोप]क्षोभप्रसङ्गात् । नच्चांशभेदेन कालभेदेन वा विषयव्यवस्था, निरवयवस्याकाल कालत्यत्वादिस्वभावविरोधप्रसङ्गात् । न च सावयवत्वादिरूपमपि तथैव व्यवस्थाप्यम् तथापि तदात्मके ब्रह्मण्येव समस्तदोषप्रसङ्गस्य दुष्परिहरत्वात् । न च ब्रह्मज्ञानं ब्रह्मणो ऽन्यन्तभेद वा ब्रह्माध्यस्तत्व वा स्वीकुर्व्यङ्गीकरोषि । श्रुतिबलादेव ब्रह्मणि सर्वात्मके सावयवत्वनिरवयवत्व सदोषत्वनिर्दोषत्वोपादानत्वादि सर्वमभ्युपगच्छाम इति चेन्न , व्याघातो स्मादे पूर्वपक्षस्यापि अप्रतिक्षेप्यत्वात् । तथाचाल ब्रह्ममीमांसानिरूपण क्लेशेन । नापि द्वितीय., विशिष्टस्योपादानत्वे प्राप्ताप्राप्तविवेकेन विशेषणस्यैवोपादानत्वापत्तात् । यदि पुनर्विशिष्टमुपादानमित्यत्र विशेषण विशेष्य चेत्तुभयमप्युपादानमिति विवक्षितम्, तदा विशेष्यस्यापि सविकारत्वप्रसङ्गो दुर्वार. । तथा च किं विशषणवैशिष्ट्यवृथाग्रहेण[3] किञ्च. यदि चिदचिदीश्वरं सम्भूय जगदारभ्य कार्यमारभ्यते, तदा कार्याणा

अकालकाल्ये ति । 'कालकालो गुणी' ति श्रुत्याऽकालकाल्यत्वमर्थात् सिद्धम् । तथे ति । अवयवकालभेदाभ्यामित्यर्थः । सावयवत्वनिरवयवत्वव्यवस्थापकावयवभेदस्यापि सङ्कोचकाभावेन श्रुत्या निषिद्धत्वादवयवादिभेदेन व्यवस्था न सम्भवति, अभ्युपेत्य तूच्यत इति भावेन तथापी त्युक्तम् । अज्ञाना ब्रह्मणो भिन्नत्वादवस्तुत्वाद्वा तद्गततदोषैर्न ब्रह्मणो निरवद्यत्वश्रुतिविरोध इत्याह नच्चे ति। उपादानत्वा दीत्यादिपदेन उपादेयत्वग्रहः । किञ्च यदी ति । त्रिवृत्करणानन्तर

सर्वेषां त्रिस्वभावत्वप्रसङ्गः, यथा शुक्लकृष्णरक्ततन्त्वारब्धे पटे शुक्लकृष्ण रक्तस्वभावत्वम्, सीसताम्रारब्धकार्यस्येव वा तृतयोत्तीर्णस्वभावत्वप्रसङ्गः, लाक्षारसावसिक्तकार्पासकुसुमरागवत् रुमाप्रक्षिप्तकाष्टलावण्यवद्वा विश्वस्याप्यनभिभवनीयेश्वरस्वभावत्वापत्तिः। किञ्च विशिष्टस्योपादानत्वं किं श्रौत उत कल्पितम्? न पूर्वः कारणवाक्यस्थसद्ब्रह्मात्मादिशब्दानां ब्रह्मस्वरूपमात्रे रूढत्वात्; उक्तं च भवतां भाष्येऽपि—"शरीरीभूतपरमात्माभिधायिभिः सद्ब्रह्मादिभिः शब्दैः" रिति। न च स्वरूपे च विशिष्टे च शक्तिरित्यनेकार्थताकल्पनं, कल्पकाभावात्; कल्पनागौरवोपहतत्वाच्च। एवं "ब्रह्म वन ब्रह्म स वृक्ष आसीत्" "तदात्मानं स्वयमकुरुत" "यद्भूतयोनिं परिपश्यन्ति धीराः" इत्यादिभिरपि ब्रह्मस्वरूपस्यैवोपादानत्वं श्रूयते। नाप्युत्तरः, कल्पकाभावात्; प्रत्युत समस्तभेदरहितस्यैकरूपस्यैव कारणवाक्यावधारणात् तद्विरोधिविशेषणकल्पनं वाक्यतात्पर्यविरुद्धं च। अत इदमितिनिर्दिष्टकूटस्थप्रपञ्चरूपेण 'बहु स्या' मिति स्वरूपस्यैव बहुभवनसङ्कल्पपूर्वकोयं विश्वारम्भः। मृद्घटादिदृष्टान्तानुसाराच्च स्वरूपस्यैवोपादानत्वं सिद्धमिति स्वरूपनिर्विकारश्रुतिविरोधपरिहारे तृतीयपक्षः परिशिष्यते। यथा चैकस्मिन् रज्जुः सर्पभृदलनाबुधारादिरूपेण भ्रमादनुवर्तते, यथा चैकस्मिन्नेव निरवयवे गगने युगपदनन्त

भाविकार्याणां चिदचिदीश्वरसघातारब्धत्वात्तदभिप्रायेण सर्वेषा मित्युक्तम्। यथे ति। केषाञ्चित् चित्स्वभावत्वमेव केषाञ्चित् अचित्स्वभावत्वमेव दृश्यत इति भावः।

ननु भाष्ये स्वरूपरूढिरुक्ता, न तु विशिष्टशक्तिर्निषिद्धा, अत उभयत्र शक्तिकल्पने, स्यादित्यत आह नच ति। कारणवाक्यस्थसदादिपदानां ब्रह्मस्वरूपपरत्वस्य भाष्येऽभिहितत्वात् न विशिष्टशक्तावपि किञ्चित्प्रयोजनमित्यपि हृदयम्।

जगत्कारणाविषयाणि वाक्यानि कारणवाक्यशब्देन पूर्वं विवक्षितानि, अथ सिद्धे जगत्कारणे तद्विशेषादिपराणि वाक्यान्युदाहरति एव मिति।

भेदभिदुरगन्धर्वनगरारम्भः, यथा च मुखचन्द्रादेः दर्पणतरङ्गाद्युपाधिभेदेन मुखचन्द्रगतनानात्वोपलम्भः, तथा निरंशेपि निर्विशेषस्वप्रकाशे स्वत. शुद्धे ब्रह्मण्यसम्भवद्विकारे दुर्निरूपदोषमूलविकल्पासहविचित्र चिदचिदात्मकजगदध्यास इत्यभ्युपगन्तव्यमिति तत्वावेदकनिर्विकार जगदुपादानश्रुतितात्पर्यम् । अविद्यया च सर्वमन्यत्प्रपञ्चसत्यत्वग्राहकं ग्रहवन्निग्राह्यमिति ।

अत्र प्रतिविधीयते—स्वरूपपरिणामपक्षदूषणं तावदस्माकमपि सम्मतमेव । तथापि बहुप्रमाणोपस्थापितबहुमुखव्याघातशतसादिताद्भवन्मतात् त्रिचतुरविरोधसितासितभास्करादिमतानुरोधेन कार्यकारणसंरक्षणमेव समुचितम् ।

यत्तु विचिष्टपक्षे प्राप्ताप्राप्तविवेकेन विशेषणस्यैवोपादानत्वमापन्नमिति। तत्र विशेषणस्य साक्षाद्विकाराश्रयत्वप्रसङ्ग इष्टः, विशेष्यस्यापि परम्परयाश्रयत्वेऽप्याश्रयत्वमात्राविशेषादुपादानशब्दवाच्यत्वप्रतिक्षेपस्त्वशक्यः ।

विकल्पासहः-सत्त्वासत्त्वविचारासहः । त्रिचतुरे ति । भास्करमते निर्विकारत्व श्रुतिविरोधः निरवद्यत्वश्रुतिविरोधः भेदाभेदसमावेश इति त्रयः स्थूलदोषाः, यादवप्रकाशमते एतैः सह जीवाद्यनादित्वभङ्ग इति चत्वारो दोषाः। कार्यकारणसंरक्षणम्- कार्यत्वकारणत्वयोरबाध्यत्वकल्पनम् । साक्षा दिति । साक्षादाश्रयत्वमद्वारकमाश्रयत्व, परम्परयाऽश्रयत्व सद्वारकमाश्रयत्वम् । यथा यागस्य सद्वारक स्वर्गकारणत्वं प्रोक्षणादेश्च सद्वारकमपूर्वविशेषत्वम् । अशक्य इति । अवस्थाश्रयत्वमेवोपादानत्वम्, न तु साक्षादवस्थाश्रयत्वम्, गौरवात्, आश्रयत्वे सति साक्षात्त्वविरहेणानुपादानत्वादर्शनाच्चेति भावः ॥

ननु यदि कचित्सद्वारकाश्रयत्वमुपलभ्येत तदोपादानत्वश्रुतेर्निविकारत्व श्रुत्यविरोधेन तद्विषयता स्यात् ; न च कारणत्वशेषत्वादिवत्तदुपलभामहे, इति चेन्न;— " तदभावो नाडीषु तच्छ्रुतेरात्मनि चे " युक्तप्रासादस्खट्वान्यायेन सद्वा

यथा भवतोप्यविद्याया एव साक्षाद्विवर्ताश्रयत्वेपि तस्या एव साक्षिभूतब्रह्माधीनसत्ताकत्वात् ब्रह्म विवर्तत इत्युक्ति., तथा परिणामस्यापि साक्षात् ब्रह्मशरीरभूतद्रव्यगतत्वेपि तस्य तदारब्धतया तदधीनतामात्राद् ब्रह्म परिणमतीति वक्तुं शक्यम्। नैतावता विशेष्यस्य साक्षाद्विकाराश्रयत्वप्रसङ्गः। परम्परया श्रयत्व तु भवत इवास्माकमपि सम्मतमदोषावहं च। यथा बालो युवा जात इत्यादौ विशेष्यभूतात्मस्वरूपस्य निर्विकारत्वे विशेषणे साक्षाद्बाल-त्वाद्यवस्थायोगेन आत्मपर्यन्तो बालयुवशब्दप्रयोगः तद्वदत्राप्युपादान कार्यशब्दयोः प्रयोग इति न दोषः। एवं विशेष्यस्य निर्विकारत्वं विशिष्टग्रहणशक्तिश्चेत्युक्तं भवति। अन्यथाङ्गवर्षत्वब्राह्मणत्वादीनामात्मा

रकाश्रयत्वस्य लोकसिद्धेः। खट्वाया पर्यङ्के शयनेऽपि प्रासादे शेत इति हि प्रती-यते॥ न च निर्विकारत्वश्रुतेः साक्षात्सम्बन्धविषयतानियामकाभाव·, उपादान त्वश्रुतेरेव नियामकत्वात्। किञ्च निर्विकारश्रुतेर्हेयसम्बन्धनिषेधपरत्वाद्येन सम्बन्धे नान्यत्र हेयत्व दृष्ट तेनैव सम्बन्धेन प्रसक्तौ तत्सम्बन्धनिषेधस्यैव स्वरसत्वात्। किञ्च विकारो हि स्वरूपान्यथाभावः, तस्यैव निषेधान्न विरोधशङ्कालेशः। एकदे-शिमतेन प्रतिबन्ध्यभिप्रायेण दृष्टान्तमाह यथे ति। साक्षा दिति। द्रव्यगतत्वे ऽपीत्यनेनान्वयः। साक्षाद्ब्रह्माभितत्वाभावेऽपीति भावः। तदारब्धतये ति। ब्रह्मोपादानत्व सम्प्रतिपन्नम्, परिणामविवर्तयोरेव विवादः। अनेन स्वापृथक् सिद्धावस्थाश्रयताद्वारत्व द्वार्यपृथक्सिद्धस्यैवेत्युक्तं भवति। अनेन घटस्य भूतलता दधीन्यात्तदाश्रयभूतलस्य घटावस्थाश्रयत्वप्रसङ्गः प्रत्युक्तः। एतावता-परिणामा-श्रयत्वमात्रेण।

ननु विवर्तपक्षे मिथ्यात्वान्न दोषावहत्वम्, परिणामपक्षे सत्यत्वाद्दोषावहत्वं स्यादित्यत्राह यथा बाल इति। उपसंहरति एव मिति। विशिष्टे ति। विशि-ष्टस्योपादानत्वेन ग्रहणमस्माभिः कर्तुं शक्यत इत्यर्थः। यद्वा उपादानशब्दस्य

सम्बन्धेनोपनयनादिविधीनामप्रवृत्तिरिति कर्मब्रह्ममीमांसयोरारम्भ एव कापेयकल्प. स्यात् । तथापि कथमवस्थाद्वयरहितस्वरूपे कस्य चिदुपादानोपादेयवाचो युक्तिश्चित्तमारोहेदिति चेन्न,— विशेषणवद्विशेष्येप्यवस्थाद्वययोगात्, तत्तदवस्थतत्तद्वैशिष्ट्यानामागन्तुकत्वेनावस्थात्वात्, मिथो भिन्नत्वाच्च; आत्मनो बालयुवदेहवैशिष्ट्यवत् ।

आगन्तुरपृथक्सिद्धो धर्मोऽवस्थेति कीर्त्यते ।
विशेष्येपि च वैशिष्ट्यभेदोऽवस्थान्तरायते ॥

एतेन स्वभावसङ्करादयो दोषा न प्रसङ्गमर्हन्ति । न हि बालस्य युवभावे देहदेहिनो· प्रतिनियता. स्वभावा· सङ्कीर्यन्ते । न च शुक्लकृष्णरक्ततन्त्वारब्धे स्वभावसङ्कर । विभक्तदशायामिव संसर्गदशायामपि शौक्ल्यादीनां यथास्व प्रतिनियतांशविषयत्वात्, एवमत्रापि विशिष्टकार्ये यथास्वमंशप्रतिनियतत्रिस्वभावत्वे प्रसज्यमाने अस्माकमिष्टप्रसङ्ग· । अत एवोत्तीर्णस्वभावत्वोद्भूतस्वभावत्वमित्यादिचोद्यमपि परिहृतम्, ब्रह्मस्वरूपस्य निर्विकारत्वात्, जगदात्मकपरिणामदशायामपि व्यव-

---

विशिष्टबोधनशक्तिरिति वार्थः । पारिप्लवमत्यनुग्रहार्थं शङ्कापूर्वकं मतान्तरमाह तथापी ति । अवस्थाद्वययोगमुपपादयति तत्तदवस्थे ति । अवस्थात्वोपपादनार्थं मिथो भिन्नत्वा दित्युक्तम् । वैशिष्ट्यभेदः—वैशिष्ट्यविशेषः । एतेने ति । सविकारत्वस्य साक्षाद्विशेषणगतत्वाश्रयणादित्यर्थः । त्रिस्वभावत्वस्य स्वभावसङ्करपर्यन्ततयैव दोषत्वात्तदुक्तेन तदप्युक्तम् । आदिपदेनोत्तीर्णस्वभावत्वेश्वरस्वभावत्वे गृह्येते । अत एवे ति । व्यवस्थितत्रिस्वभावत्वाङ्गीकारादित्यर्थः । उत्तीर्णस्वभावत्वोद्भूतस्वभावत्वानङ्गीकारे हेतुमाह ब्रह्मे ति । निर्विकारत्वात्, स्वस्वभावपरित्यागेन स्वभावान्तरग्रहण न सम्भवति, व्यवस्थितस्वभावत्वात् स्वसृष्टे स्वभावापत्तिहेतुत्व च न सम्भवतीत्यर्थः । शुक्लकृष्णतन्त्वारब्धे स्वभावसाङ्कर्ये नास्तीत्युक्तम्, इदानीं तदङ्गी

स्थितस्वभावत्वात्। न च दृष्टान्तमात्रेणार्थसिद्धि, नचात्र व्याप्तिसम्भव, अन्यथा त्वत्पक्षेप्यविद्य विशिष्टब्रह्मविवर्ते स्वभावसङ्करादयस्तदवस्था.।

यदुक्तम्–विशिष्टस्योपादानत्व किं श्रौतं उत कल्पितमिति। तत्र क्वचिच्छ्रौत क्वचित् श्रुतार्थापत्तिकल्पितमिति वाक्यशेषशाखान्तर–नयसिद्धमिति वा विभागः। तथा हि–" तद्धेद तर्ह्यव्याकृतमासीत्तन्नाम रूपाभ्यां व्याक्रियते " त्यादिषु कारणवाक्येष्वव्याकृतादिशब्देन न ब्रह्म स्वरूपमात्रं प्रतिपाद्यते ब्रह्मादिशब्दवत् ब्रह्मस्वरूपे रूढ्यभावात्, " तन्नामरूपाभ्या व्याक्रियते " त्यनेनैव योगविवक्षाया स्पष्टत्वाच्च। अत इदमर्थस्यैव प्रलयकाले नामरूपव्याकरणनिवृत्तिमात्रं विवक्षितम्। इदमर्थाश्चिदचिदात्मकः प्रत्यक्षादिसिद्ध, स एव कदाचित् सूक्ष्मावस्था प्राप्त्या व्यष्टिसमष्टिरूपविकाररहित इत्युक्तं भवति। एवं स्थिते प्रलय दशायामपि सूक्ष्मयोश्चिदचिद्वस्तुनो सद्भाव उक्तो भवति। तर्हि ब्रह्मण स्तत्र कथं प्रसङ्ग इति चेत्; 'तम एकीभवती' त्यादिप्रतिपन्नस्य सूक्ष्म तमसोपि " यस्य तम शरीर " मित्यादिभि ब्रह्मशरीरत्वप्रतीते का रणवाक्यान्तरेषु ब्रह्मावस्थानप्रतीतेश्च अव्याकृतशब्द एवाव्याकृतचिदचि-द्विशिष्टब्रह्मपर इति निश्चीयते। एवं " असद्वा इदमग्र आसीत् " " असदेवेदमग्र आसीत् " इत्यत्राप्यसच्छब्देन स्थूलाकारप्रध्वंसाय–

कृत्याह न च दृष्टान्ते ति। स्वभावत्व साङ्कर्यव्याप्तमित्यत्राह नचात्रे ति। बालस्य युवभावे साङ्कर्यादर्शनादित्यर्थ.। अन्यथे ति। स्वभावसाङ्कर्यव्याप्त्यङ्गीकारे स्व-भावत्वमङ्गीकृत्य स्वभावसाङ्कर्यानभ्युपगमेन परिहारस्यासम्भवे अस्मत्पक्षोक्ता दोषा स्तव स्युरित्यर्थः। ' तम एकीभवती ' त्यादि। तमस. शरीरत्वोक्तिस्तद्वाचका व्याकृतशब्दस्य ब्रह्मपरत्वसम्भवद्योतनार्था। कारणे ति। ' ब्रह्म वा इदमेक एवाग्र आसी ' दिति ब्रह्मण. अप्ययस्य नत्वेनावस्थानप्रतीतेरित्यर्थ.। ततश्च वाक्यद्वये नाव्याकृतब्रह्म गोरुभयोरपि लयस्थानत्वप्रतीतेरव्याकृतस्य ब्रह्मशरीरतयाऽव्याकृतश-ब्दस्य ब्रह्मपर्यन्ताभिधानसामर्थ्याच्चाव्याकृतशब्दस्य विशिष्टपरत्वात्। 'तद्धेद तर्ही' ति श्रुतिर्विशिष्टोपादानत्वे मानमिति सिद्धम्। असच्छब्देने ति। ' असद्वा

मानसूक्ष्माकारविशिष्टचिदचिच्छरीरकं ब्रह्माभिधीयते, न तु केवलं ब्रह्म, असत्त्वविरोधात्; नापि प्रागभावमात्रम्, "तदसदेव सन्मनोकुरुत स्या मिति" "तदात्मानँ स्वयमकुरुते" त्यादिवाक्यशेषविरोधात् । सूत्रित च—" असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषाद्युक्ते· श ब्दान्तराच्च" इति । अत एव "तदात्मानँ स्वयमकुरुत" इत्य— त्रापि नात्मशब्दो ब्रह्मस्वरूपमात्रविषय, असच्छब्दनिर्दिष्टसूक्ष्मद्रव्य विशिष्टविषयत्वात्, यथा खल्वव्यतिरेकविवक्षया विशेष्ये स्वशब्दपर्यायो यमात्मशब्द तथा धर्मविशिष्टेपि विशिष्टाव्यतिरेकविवक्षया तत्प्रयोगो युज्यते । अत एव हि शरीरविषयेऽप्यात्मानमवलोकयतीत्यादिरभि

इदमग्रआसी ' दिति वाक्यस्य लयपरत्वात् पूर्वस्थूलाकारप्रध्वसायमानत्वमुक्तम्, तच्च वास्तव [त्व] न त्वसच्छब्दार्थः, ' इदमसदासी ' दित्येतत्प्रतियोगिकत्वावगमात् । प्रध्वसशब्देनाभावमात्र वा विवक्षितम् । इदमग्रेऽसदासीदिति प्राग— भावमात्र प्रतीयते न ब्रह्मेत्यत्राह नापी ति । एतेन सूक्ष्मावस्थचिदचिन्मात्रमु— च्यत इत्यपि निरस्तम्, मनस्कारासम्भवात् । ' असद्वा इदमग्र आसी ' दिति कार्यस्य प्रागसत्त्वव्यपदेशात् कार्यकारणयोरन्यत्व नेति चेन्न,—पूर्व सत एव कार्य स्वरूपस्य स्थूलावस्थाविरोधिसूक्ष्मावस्थारूपधर्मान्तरेण योगादसत्त्वव्यपदेशः ; कुत इदमवगम्यते ? ' तदसदेव सन्मनोकुरुत ' 'तदात्मानँ स्वयमकुरुत ' इति वाक्यशेषात् । युक्ते पिण्डावस्थाया घटो नास्तीति व्यवहारस्य पिण्डावस्था विषयस्य दर्शनात् । शब्दान्तरात्— ' सदेव सौम्येदमग्र आसी ' दिति शब्दा न्तराच्चेति सूत्रार्थः । असच्छब्दनिर्दिष्टे ति । तच्छब्दस्यासद्विषयत्वात्तत्समान विषयत्वादात्मशब्दस्यैत्यर्थः । स्वरूपशब्दवदात्मशब्दस्य विशेष्यपरामर्शित्वं स्वर सेमि यन्नाह यथाखल्वि ति । अत एवही ति । अत्रावलोकयतीत्यत्र चाक्षुषज्ञान विषयत्व गम्यते, तच्छरीरस्यैव साक्षादिति तद्वारैव शरीरिणोऽवलोकनविषयत्वम्, अतोऽवलोकनकर्तृपरामर्श्यात्मशब्दो विशिष्टपर एवेति भावः। शरीरविषयेऽपीति।

युक्तानां प्रयोगः। न चात्र भ्रमो निदानम्, परिशुद्धात्मवेदिभिरपि तथा प्रयोगात्। न च तत्रोपचार., निमित्तैक्ये सम्भवति तत्कल्पनानुपपत्ते.। अस्तु वा ब्रह्मस्वरूपवाची तत्रात्मशब्दः, तथापि वैशिष्ट्य दुस्त्यजम्, यथा भगवान् श्वेत इत्यत्र विग्रहद्वारा सिध्यति तथात्रापि 'अकुरुते' त्यादिसामर्थ्याच्छरीरद्वारेति सिध्यत्येव। अतः 'ब्रह्मवन' मित्यादि नोपादानत्वोद्देशोपि विशिष्टविषय'। मृत्तत्कार्यदृष्टान्तादिक च विशिष्टप्रदर्शनार्थमेवेति न ततोपि विरोधः। एवं च सति ब्रह्मस्वरूपवाचि ब्रह्मात्मादिशब्दै. कारणनिर्देशोपि निर्विकारश्रुत्यन्यथानुपपत्त्या विशिष्टस्योपादानत्वं कल्प्यताम्।

विशेषणीभूतशरीरविषयेऽपीत्यर्थ। निमित्त मव्यतिरेकः। अत इति। विशिष्टोपादानतया उपादानत्वविधिवाक्यप्रसिद्धत्वादुपादानत्वोद्देशोऽपि विशिष्टविधानार्थ इत्यर्थः। ततश्चोपादानोद्देशेन ब्रह्मत्वविधिपरो ब्रह्मशब्दः सूक्ष्मचिदचिद्विशिष्टपर इत्यर्थः॥

ननु दृष्टान्ते साक्षादवस्थाश्रयमृदाद्युक्तया दार्ष्टान्तिकेऽपि साक्षादवस्थाश्रयत्वेनोपादानत्व प्रतीयते, तत्कथ विशिष्टोपादानत्वसिद्धिरित्यताह मृत्तत्कार्येति। दृष्टान्तवाक्यं विशिष्टस्य उपादानभावमुपपादयितुं प्रसिद्धोपादानमाह, नैतावता साक्षाद्विकाराश्रयत्वप्रसङ्ग, तदंशे दृष्टान्तविवक्षाया अभावात्। एकविज्ञानेन सर्वविज्ञानप्रसिद्ध्यर्थमुपादानोपादेयभावेनैक्यमात्र हि दृष्टान्तेन साध्यते। ब्रह्मस्वरूपवाची ति। 'इदं ब्रह्मासी' दिति कृत्स्नस्यापि कार्यवर्गस्य ब्रह्मभाव. प्रतीयते, 'अग्र' इत्युक्तया अय ब्रह्मभावोपदेशो न स्वत.सिद्धशरीरात्मभावनिबन्धनः—किन्तूपादानोपादेयभावनिबन्धन इत्यवगम्यते, स्वरूपेण चोपादानत्वं निर्विकारत्वश्रुतिविरुद्धम्, अतोऽद्वारकसाधनत्वस्य सद्वारकसाधनत्वस्य च लोके दर्शनात् साक्षात्साधनत्वस्यासम्भवेन श्रुतसाधनत्वान्यथानुपपत्त्याऽपूर्वद्वारकत्ववदुपादानत्वस्यापि चिदचिद्द्वारकत्वङ्कल्प्यते। अद्वारकाश्रयत्वस्य सद्वारकाश्रयत्वस्य च

यद्वा वाक्यशेषशाखान्तरादिसिद्धानुप्रवेशसर्वशरीरत्वादिवशेनात्रापि 'इद' मिति निर्दिष्टस्य 'अग्र' इति निर्दिश्यमानकालविशेषोपलक्षितसूक्ष्मावस्थस्य तदानीमब्रह्मात्मकत्वप्रतिक्षेपाय ब्रह्मादिशब्दसमानाधिकरणनिर्देश इति सिध्यतीति न स्वरूपपरिणामवादस्य विवर्तवादस्य वा कश्चिदवकाशो दृश्यते ।

यत्तु—समस्तभेदरहितस्यैकस्यैव कारणवाक्ये अवधारणात् तद्विरुद्ध विशेषणकल्पनमित्यादि । तदपि स्वपक्षमपरामृश्योक्तम्, प्रलय-

---

लोके दर्शनात् अवस्थाश्रयत्व सद्वारक कल्प्यते, घटेनाश्रीयमाणस्योदकस्य देव दत्तोऽप्याश्रय एव, अन्यथा श्रमानुपपत्तेः । एव सद्वारकाश्रयत्व प्रासादे खट्वाया शेत इत्यादौ प्रसिद्धमेव । एवञ्च ब्रह्मभावश्रवणसहितनिर्विकारत्व श्रुत मन्यथानुपपद्यमान विशिष्टोपादानत्वकल्पकम् । यद्वे ति। तृतीयान्तस्य सूक्ष्मावस्थस्येत्यनेनान्वयः । वशेन लब्धस्य कालविशेषे पलक्षितसूक्ष्मावस्थस्येत्यर्थ' । इममभ्रे एक सदासीदित्यनेन इदशब्दनिर्दिष्टस्य स्थूलावस्थाप्रहीणब्रह्मभाव प्रतीयते, एकशब्दस्य स्थूलावस्थाप्रहाणार्थत्वात्, स्थूलावस्थाश्रयत्वस्य च साक्षात्परया च सम्भवात्, तत्प्रहाणमपि तथा, तत्र ब्रह्मणः साक्षात्परम्परया वा स्थूलावस्थाप्रहाणमित्यपेक्षाया 'अनेन जीवेनात्मनानुप्रविश्ये' ति तेजः प्रभृतिकार्यस्यानुप्रवेशश्रवणादनुप्रवेश्यस्य चानुप्रवेष्टब्रह्मणो भेदावश्यम्भावात् कार्यस्य तेजःप्रभृतेरग्रकाले ब्रह्मातिरिक्त सूक्ष्मावस्थात्मकरूपान्तर लब्धम्, तदेवोपस्थितत्वादपेक्षितं त्वाच्च द्वारतयोपादानभूतस्य ब्रह्मणो विशेषणत्वेन स्वीक्रियते ; 'ब्रह्म वा इद' मित्यादौ तु शाखान्तरे तेज प्रभृतिसूक्ष्मावस्थारूपस्य तमसो 'यस्य तमः शरीर' मित्यादिश्रुत्या ब्रह्मशरीरत्वप्रतीते. शरीरत्वेन तद्व्यतिरिक्तत्वाच्चदेव द्वारतया उपादानभूतब्रह्मविशेषणत्वेन स्वीक्रियते । एव न्यायाद्विशेषणत्वम. । आदिशब्देन पृथदाद्यन्यायो विवक्षित. । एवञ्च ब्रह्मशब्दसमानाधिकरणनिर्देशो न ब्रह्मस्वरूपपरिणामप्रतिपादनार्थः, अपि तु कारणस्य स्थूलावस्थाप्रहाणाश्रयस्याब्रह्मात्मकतां प्रतिक्षेपार्थ. । इदंशब्दस्य ब्रह्मपर्यन्तत्वात्समानाधिकरण्योपपत्तिः । तदपीत्यवधारणम्।

दशायामपि अविद्याया सूक्ष्मोपाधेः शक्तेर्वा ब्रह्मसम्बन्धित्वेन स्वस्य त्व दासत्वैश्च स्वीकारात्। वयं तु वाक्यान्तरानुसारेण निर्विकारनिरवद्यश्रुतिविरोधपरिहारार्थं च प्रपञ्चोपादानभूतब्रह्मविशेषण तच्छरीरमित्यनुमन्यामह इति विशेष। अविद्यामिथ्यात्वपक्षे अवधारणमसकुचितमिति चेन्न,—'अग्र' इत्यादि वैयर्थ्यस्य सद्विद्यानिरूपणे स्थापनात्। किञ्च—ब्रह्मात्मादिशब्देषु स्वरूपपरेष्वपि वैशिष्ट्यलाभो दर्शित.। सच्छब्द तु विमृशाम -इदमग्रे सदेवासीदिति इदमर्थसतोविधिपरे वाक्ये न तावत्सच्छब्देन ब्रह्मस्वरूपमात्र प्रतिपाद्यम्, अनन्तरवाक्यविरोधात्, अनन्तरमेव हि 'तद्धैक आहुरसदेवेदमग्र आसी' दिति। तत्र 'कुतस्तु खलु सोम्यैव स्यात् कथमसत सज्जायेतेति सत्त्वेव सोम्येदमग्र आसी' दित्युच्यते। अत्र हि कार्यद्रव्यस्य पूर्वमविद्यामानत्वपक्ष प्रतिक्षिप्यते, न पुनरब्रह्मात्माकत्वपक्ष. तथा सति 'कथमसत सज्जाये तेति

सर्वैरपि संकुचितविषयमेव वाच्यमिति भाव.। सर्वमतेऽप्यवधारणसङ्कोचाविशेषे परामिहितविशेषणमेव कुतो नाद्रियते इत्यत्राह वयंत्वि ति। वाक्यान्तरे कृत्स्नस्य ब्रह्मशरीरत्वावगमात् शरीरतया सिद्धस्यैव ब्रह्मविशेषणत्वमङ्गीक्रियते, अविद्याविशेषणाङ्गीकारे ब्रह्मण. सावद्यत्वप्रसङ्गात्, शक्त्यङ्गीकारे ब्रह्माभिन्नोपाध्यङ्गीकारे च ब्रह्मण. सविकारत्वप्रसङ्ग., शरीरस्य विशेषणत्वाङ्गीकारे न सावद्यत्वम्, विकारस्य शरीरगतत्वात् न स्वरूपगतत्वमिति। वैयर्थ्यस्ये ति। इदानीमवधारणसम्भवादिति भाव.। अनन्तरवाक्यविरोधादि त्यादि। सच्छब्दस्य ब्रह्मस्वरूपपरत्वे 'असदेव' त्यादिना अब्रह्मकारणपक्ष एव प्रतिक्षेप्यः स्यात्, तच्चायुक्तमिति भाव.। तथासती ति। अब्रह्मणो मृदादेर्घटाद्युत्पत्ति दर्शनादिति भाव.।

ननु 'कथमसत सज्जायेते' त्यत्राब्रह्मणो ब्रह्मात्मक कथं जायेतेत्यर्थ, तत्र च न व्याप्तिसम्भव इति चेन्न,—तथापि ब्रह्मात्मकमिद जगद्ब्रह्मणः

लोकदृष्ट्या व्याप्तिप्रदर्शनायोगात्, अतः 'सदे' वेत्यत्र वाक्ये प्रपञ्चस्यैव 'बहु स्या' मिति वक्ष्यमाणबहुत्वावच्छिन्नसत्ताप्रतिपक्षभूतै कत्वावच्छिन्नसत्तायोग एव प्रतिपाद्यते । अतो ब्रह्मैवात्र मृग्यं न तु सूक्ष्मचिदचिद्वस्तुसद्भावः । ननु सच्छब्दनिर्दिष्टस्यैव 'बहु स्या' मिति 'तदैक्षत बहु स्या' मिति बहुभवनसङ्कल्परूपेक्षणश्रवणात् अचेतने प्रतिसहृतकरणग्रामे चेतनेष्वयोगात् उत्तरत्र सर्वत्र 'सन्मूला. सोम्येमाः सर्वा. प्रजा. सदायतना· सत्प्रतिष्ठाः' 'सता सोम्य तदा सम्पन्नो भवति' 'सति सम्पद्य न विदु' रित्यादिषु सच्छब्दस्य नामवत्प्रयोगाच्च 'सदेव सोम्ये' त्यत्रापि सच्छब्देनानवच्छिन्नसत्ताविशिष्टब्रह्मस्वरूपमेव विवक्षितमिति चेत्? सत्यम्, तथापि पूर्वोक्तानुपपत्त्या स्वरूपमात्र विषयत्वासंभवेऽनुपपत्त्यन्तरेण ब्रह्मस्वरूपपरत्वे चावश्यम्भाविनि अगत्या

कथ जायत इति प्रदर्शनायोगात्, ब्रह्मात्मकत्वस्य जगति सिद्धवत्कारासम्भवात् । नात्वे ति । अस्मिन् वाक्ये सूक्ष्मचिदचिद्वस्तुसद्भावो न मृग्य इत्यर्थः ।

ननु ब्रह्म न मृग्यमीक्षणादिना तस्यैव स्पष्ट प्रतीतेरित्याक्षिपति नन्वि ति। उत्तरत्रे ति । 'सन्मूला' इत्यादिषु सच्छब्दस्य विशेष्याप्रयोगात्सापेक्षस्य समासायोगाच्च नैरपेक्ष्येण नामत्वात्, बहुत्वावच्छिन्नसत्ताप्रतिपक्षैकत्वावच्छिन्नसत्तायोगस्य च 'एकमासी' दिति क्रियापदेन कृतत्वात्, 'सन्मूला' इत्यादिष्विव 'सदेवे'त्यत्रापि सच्छब्दस्तत्कालेक्षणकर्तुर्ब्रह्मण एव नाम, न च तदसाधारणप्रवृत्तिनिमित्तासम्भव·, अनवाच्छिन्नसत्तायोगस्य प्रवृत्तिनिमित्तत्वादित्यर्थ· । नामत्र दिति । 'तदर्ह' मिति वतिः । नामत्वानुरूपमित्यर्थः । सत्य मिति । ब्रह्मपरत्वमङ्गीकृतम्, स्वरूपमेवविवक्षितमित्यवधारणार्थचिदचिद्वैशिष्ट्याभावेऽनङ्गीकारः । पूर्वोक्ते ति । लोकदृष्ट्याप्तिप्रदर्शनायोगादित्यर्थः । अनुपपत्त्यन्तरेण—ईक्षणनामभ्यामित्यर्थः । अगत्ये त्यादि । निर्विकारत्वश्रुत्यनुपपत्त्या विशेषणविशिष्ट

श्रुत्यर्थापत्तिबलेन सूक्ष्मचिदचिद्वैशिष्ट्यव्यवहितसत्तावच्छिन्नं ब्रह्मात्र 'सत्' इति प्रतिपाद्यत इति निर्ध्रीयते। तथा सति 'तद्धेदं तर्ह्य-व्याकृतमासीत् तन्नामरूपाभ्यां व्याक्रियत' 'आत्मा वा इदमेक एवाग्र आसी' दित्यादिश्रुतिभिरपि सङ्गति सिध्यति। अस्तु वा 'सदेव सोम्येदमग्र आसी' दित्यत्र सच्छब्देन ब्रह्मस्वरूपनिर्देशः; तथापि 'तद्धैक आहु' रित्यादिना असत्कार्यवादप्रतिक्षेपात् कार्यद्रव्यस्य पूर्वं विद्यमानत्वप्रतीतेः तद्विशिष्ट ब्रह्मैवात्र सच्छब्दार्थ इति शक्यतेऽवगन्तुम्। अत एव 'शरीरिभूतपरमात्माभिधायिभिः सद्ब्रह्मादिशब्दै' रिति भाष्यमपि सुघटितम्।

परत्वमावश्यकम्, लोकदृष्ट्या व्यवहारप्रदर्शनार्थञ्च सत्त्वपुरस्कारेण प्रवृत्तिर्वाच्या, एवञ्च साक्षात् सत्त्वविशिष्टरूपेणाभिधाने चिदचिद्विशेषणविशिष्टप्रतिपादनासम्भवादगत्या चिदचिद्द्वारा सत्तावच्छिन्न ब्रह्म सदिति प्रतिपाद्यत इत्यर्थः। चिदचिद्वैशिष्ट्येन हेतुना व्यवहिता चिदचिद्गतत्वाद्व्यवहिता या सत्तेत्यर्थः। न च शब्दस्य योगात् प्रवृत्तौ विशेष्यसाकाङ्क्षता, 'प्रोक्षणीरासादय' तीत्यादिषु प्रोक्षणीशब्दस्य यौगिकत्वेऽपि अश्वेव शास्त्रस्थाना प्रचुरप्रयोगादपा प्रतीत्या विशेष्यनिराकाङ्क्षत्ववत् 'प्रोक्षणीपात्र' मित्यादौ तत एव समासवच्च, विशेष्यनिराकाङ्क्षत्वस्य 'सन्मूला' इत्यादौ समासस्य चोपपत्तेः। नन्वर्थापत्त्या उपादानत्वे विशेषणवैशिष्ट्यकल्पनेऽपि न तस्य किञ्चिच्छब्दवाच्यत्वकल्पकमस्ति, एवञ्चाव्यवहित सत्तावैशिष्ट्य सच्छब्दार्थोऽस्त्वित्यत्राह तथा सती ति। 'तद्धेद' मित्यत्र विशेषणस्य 'आत्मा वा इद' मिति विशेष्यशब्दत. प्रतीतेस्तदुभयश्रुत्यैकार्थ्याय व्यवहितसत्तायोग एवात्राश्रीयत इति भावः। अस्तुवे ति। ब्रह्मस्वरूपनिर्देशः—ब्रह्मस्वरूपे ऽनवच्छिन्नसत्ताप्रवृत्तिनिमित्तपुरस्कारेण मुख्यवृत्ति.। 'तद्धैक आहु' रिति कार्यद्रव्यस्य प्रागविद्यमानतयावगतस्यैव परिणामित्वात् ब्रह्मशब्दस्तद्विशिष्टपर इत्यर्थः। अत ऐवे ति। स्वरूप एव शक्त्यङ्गीकारादित्यर्थ.।

न च अत्र शक्तिद्वयकल्पनागौरवम्, विशिष्टपरत्वे पर्यवसानेन ब्रह्मणि सच्छब्दवृत्ते , स्वरूपपरत्वे तु श्रुता[त्य]र्थापत्त्या शाखान्तरानुसारेण वा चिदचिद्वैशिष्ट्यस्यापि क्रोडीकारोपपत्ते. । न च अत्र लक्षणा दोष., तथापि सर्वशब्दलक्षणापक्षादस्यैवोपादेयतमत्वात् । य. पुन सर्वपदार्थानुवृत्तसत्तामात्रमेवात्र सच्छब्दार्थ , स एव च ब्रह्मेत्याह, तत्पक्षे तु सकलश्रुतिस्मृतिन्यायविरोध , प्रपञ्चमिथ्यात्वप्रसञ्जकाभावेनाप्रकृतत्वात्, इदानीं तत्रोदास्महे । तत्रापि हि प्रपञ्चस्यैव सत्त्वं प्रतीयमान कार्यदशायां कारणदशायां च दशाद्वयविषयसच्छब्दद्वयेन प्रातिष्ठित भवति ।

नन्व् पक्षद्वयेऽपि विशिष्टपरत्वाङ्गीकारात् ब्रह्मणि प्रकृता च शक्तिद्वय स्यादित्यत आह न चे ति । अपर्यवसानम्–विशेषणज्ञ कैर्विशेष्यपर्यन्तता । श्रुत्यर्थापत्त्ये ति प्रसङ्गादुक्तम् । शाखान्तरानुसारेण ति । प्रकृताभिप्रायम् । ' तद्धेदन्तल्लक्ष्याकृतमासी ' दित्येतच्छाखान्तरम्, तत्समानार्थत्वायेहापि विशिष्टपरत्वमित्यर्थ । स्वरूपवाचिना विशेषक्रोडीकारे लक्षणा स्यादित्यत्राह न चात्रे ति । न्यायानुसारिणी लक्षणा न दोषायेत्यर्थ । दोषत्वमङ्गीकृत्याह तथापी ति । किं प्रपञ्चस्य मिथ्यात्वेन तदाधिष्ठानतयानुगता सत्ता सच्छब्दार्थ इत्युच्यते । किं वा सत्यभूत एव प्रपञ्चे व्यापकीभूतं ब्रह्मैव सर्वानुगता सत्ता सैव सच्छब्दार्थ इति ? आद्य आह प्रपंचे ति । सत्यभूतप्रपञ्चात्मकसत्तायास्तदुपादानत्व हि न प्रपञ्चमिथ्यात्वापादकम्, अतस्तदिह निराक्रियत इत्यर्थः । न तस्य प्रपञ्चमिथ्यात्वसाधकत्वाभावमात्रम् , प्रस्तुतास्मिन् पक्षे कारणवाक्येन कार्यकारणावस्थयो· सत्त्व व्यवस्थाप्यत इत्याह तत्रापिही ति । तस्मिन् पक्ष इत्यर्थ. । प्रतीयमान मिति प्रत्यक्षादिनेति शेष । ' इद सदेवे ' त्येकः सच्छब्द., ' कथमस्तः सज्जायेत 'तत्तो वै सजायत ' इत्यपर. । सिद्धान्त इवेत्यपिशब्दस्य भाव. ।

किञ्च यदिदं विशिष्टस्योपादानत्वं श्रौतं कल्पितं वेति। तत्र भवन्तमपि पृच्छामः, अविद्याविशिष्टस्योपादानत्वं श्रौतं कल्पितं वेति, न प्रथमः, सद्ब्रह्मादिशब्देष्वविद्यासौरभस्याप्यनाघ्राणात्। नाप्युत्तरः,

---

[१८४-पु] यद्वा तत्पक्ष इति। सत्तैव सच्छब्दार्थः. सैव च ब्रह्मेत्ययमर्थः सकल श्रुतिस्मृतिन्यायविरुद्ध इत्यर्थः। ब्रह्मस्वरूपं सच्छब्दार्थ इत्यस्य पक्षेङ्गीकृतत्वात्ततो विशेषद्योतनार्थः. तु शब्दः। कथ श्रुत्यादिविरोध इत्यत्राह प्रपंचे ति। सत्तैव ब्रह्म सच्छब्दार्थश्च इत्येतन्निराकृतस्याप्रकृतत्वान्न तत्प्रपञ्चयत इत्यर्थः। सच्छब्दस्यात्र सत्तापरत्वस्य निराकार्यत्वेऽपि सत्तार्थकत्वमात्रस्यानिराकार्यत्वादिति भावः। अप्रकृतत्वं कुत इत्यत्राह प्रपंचे ति। मिथ्यात्वप्रसङ्गकस्य कस्यापि तेनालाभादित्यर्थः। नन्वग्रे सत्तादात्म्यप्रतिपादनादुपादानत्वपर्यवसानात्तदेव मिथ्यात्वप्रसङ्गकमित्यत्राह तत्रापीहा ति। ब्रह्मस्वरूपं सच्छब्दार्थ इति पक्षे वर्णितरीत्या अनन्तरवाक्यपर्यालोचनादिवशेन कार्यकारणावस्थयोः सच्छब्दस्य सत्तायोगिपरत्वान्न सत्तातादात्म्यमिह प्रतिपाद्यम्, एवञ्च प्रत्यक्षप्रमितसत्तायोगस्य श्रुत्यापि प्रतिपादनात् सत्यत्वमेव प्रतिष्ठितं भवति, न तु मिथ्यात्वप्रसङ्ग इत्यर्थः। ब्रह्मणः सत्तारूपत्वे तन्निराश्रयत्वादिश्रुतिस्मृतिविरोधः, नीरूपस्य चक्षुरादिना सन् घट इत्यादिरूपेण ग्रहणासम्भवान्नयायविरोधः, सत्तार्थत्वे तु व्याकरणविरोधः, सच्छब्दप्रवृत्तिनिमित्तानुशिष्ट तल्प्रत्ययान्तत्वेन सत्सत्ताशब्दयोर्भिन्नार्थत्वात् घटादिशब्दवत् प्रवृत्तिनिमित्तविशिष्टवाचकत्वस्यावश्यकतया प्रवृत्तिनिमित्तमात्रवाचकत्वमात्रमयुक्तम्, यथाऽत्रैवाधिकरणे राजशब्दार्थसिद्ध्यपजीवनेन राज्यशब्दार्थसिद्धेर्न राज्ययोगो राजशब्दार्थ इत्युक्तम्, तथा सच्छब्दार्थसिध्युपजीवनेन सत्ताशब्दार्थसिद्धेस्तदधिकरणन्यायविरोधश्चेत्यर्थः।

कल्पकाभावादेरविशेषात् । तत्सद्भावेपि प्रत्यक्षादिसमस्तप्रमाणप्रत्यनीक दुर्घटिताभिमतार्थकल्पनेरपि सहृदयसंवादिसमीचीनप्रक्रियाकल्पनस्योपपन्न त्वात् । मृद्घटादिदृष्टान्तेन स्वरूपोपादानत्वप्रतिपादनप्रसङ्गं तु यदि भा स्करादयः शृणुयुः तदा ते प्रथमप्रतीतनिर्विकारतादिमात्रव्याघातरक्षण कल्पितव्याघातक्षतिशतविशरारुणा भवन्मतेन नन्देयुः। नन्वविद्याविशिष्टं ब्रह्मास्माकं जगदुपादानम् भवतान्तु सूक्ष्मप्रकृतिपुरुषविशिष्टमिति व्यव-हितविकाराश्रयत्वाविशेषादावयोः को विशेष इति ; अहो महदिदमव-धानम्! यत्प्रत्यक्षादिप्रमाणगणदृढावधारिताचिदचिदात्मकप्रपञ्चबाधाबाधा भ्यामावयोर्विशेषः प्रदर्शित इति। नन्वेवमपि व्यवहितोपादानप्रतिपादनप्रया समुत्सृज्य प्रपञ्चसत्यत्ववृथाग्रहानुरूपे स्वारसिके स्वरूपोपादानपक्षे स्थीयता

कल्पकाभावादे रिति । आदिशब्देन विशेषणकल्पनस्य ' एकमेवे ' त्यवधारणविरुद्धत्व गृह्यते ।

ननु निर्विकारश्रुत्यन्यथानुपपत्तिरेव कल्पिकेत्यत्राह तत्सद्भाव इति । समस्ते ति । अविद्याविशेषणकल्पने तत्कार्यस्य मिथ्यात्व स्यात्, तच्च सर्वप्रमाण विरुद्धमित्यर्थः । दुर्घटिताभिमते ति । सहृदयसंवा दीति वक्ष्यमाणवैलक्षण्य वि वक्षितम् । प्रथमे ति । ब्रह्मस्वरूपस्य उपादानत्वे निर्विकारत्वसविकारत्वयोः सा-वद्यत्वनिरवद्यत्वयोश्च यो व्याघात. प्रथम प्रतीतः तस्माद्रक्षणाय विवर्तवादस्त्वयागी कृत', स च व्याघातशतविशीर्ण', ततश्च तद्दर्शनात्तावद्व्याघातरहिते स्वाभिमतस्वरूप परिणामवादे भास्करादय' प्रीतिमन्तो भवेयुरित्यर्थः । विशरारुर्विशरणशीलः। यद्यपे ' शृवन्द्योरारु ' रिति ताच्छीलिकोऽय कर्तृप्रत्ययः,ततश्च विदारयितेत्यर्थः स्यात्, तथापि कर्मकर्तृत्वस्य विवक्षितत्वात्, भिदुर काष्ठमिति ' विदिभिदि—च्छिदे कुर ' जिति कर्तरिविहितकुरच्प्रत्ययान्तभिदुरशब्दवत् कर्मणि प्रयोगः । प्रदर्शित इति । " वयन्तु वाक्यान्तरानुसारेण त्यादि " नेत्यर्थ. ।

मिति चेत् ; मैवम्, सर्वतादात्म्ये समस्तविकारावद्याश्रयत्वावश्यंभावेन निर्विकारनिरवद्यत्वश्रुतिविरोधस्य दुष्परिहरत्वात् । स्वारस्यमपि मरीचिका सलिलकल्पम् । तथाहि—तत्र भास्करमतं तावत्पृच्छामः, ब्रह्मस्वरूपमेव परिणमतीत्यत्र किमीश्वरो ब्रह्मशब्दवाच्यः? उत तदंशभूतः सूक्ष्मोचिदुपाधिः? उत समुदायः? उत तदुभयानुवृत्तसद्द्रव्यमात्रम्? यद्वा ब्रह्मधर्मभूतः शक्तिविशेष एवेति; व्यतिरेकादिपक्षस्त्वत्यन्तदूरस्थतया नोपक्षिप्यते । तत्र तावन्न प्रथमः, ईश्वरांशस्य विकारानभ्युपगमात् । न द्वितीयः, ब्रह्मोपादानत्वप्रहाणप्रसङ्गात् । न तृतीयः, समुदायस्य समुदायिभ्यां भिन्नत्वे सति न ब्रह्मोपादानत्वसिद्धेः, अभिन्नत्वे पक्षद्वयोक्तदूषणस्य पुनरुन्मज्जनम् । चतुर्थेपि पक्षे सन्मात्रस्य सर्वतादात्म्ये चेतनाचेतनात्मकविश्वप्रपञ्चस्थदोषाधारत्वेन तदात्मकस्य ब्रह्मणो निर्दोषत्वश्रुतिविरोधः । पञ्चमस्तु पक्षः परिशिष्यते । तत्रापि शक्तेः ब्रह्माव्यतिरेके पुनः स एव श्रुतिविरोधः । व्यतिरेके ब्रह्मोपादानत्वभङ्गप्रसङ्गः । व्यतिरेकाव्यतिरेकपक्षस्तु दुस्थत्वादेव दूरपरिहरणीयः । स्वाभाविकभेदाभेदवादश्च सर्वलोकविरुद्धत्वात् दुर्विचारमूल एव । तेन पक्षद्वयप्रतिक्षेपे मृषावादः परिशिष्यते । सोपि स्वतः प्रतिक्षेप्य एव, प्रस्फुटदोषसङ्करविघटितत्वात् ।

पंचमस्त्वि ति । शक्तेरन्तरङ्गत्वात् तत्परिशेष इति भावः । तत्रापि न ब्रह्मोपादानत्वश्रुतेः स्वारस्यमित्यभिप्रायेणोपपादयति **तत्रापी** ति । **दुस्थत्वा** दिति । ब्रह्मस्वरूपाव्यतिरिक्तायाः शक्तेर्व्यतिरेक उपाधित इति वाच्यम्, तस्यापि तथेत्यनवस्थेत्यर्थः । शक्तिशक्तिमतोर्व्यतिरेकाव्यतिरेकौ स्वाभाविकाविति चेत्राह **स्वाभाविके** ति। भास्करमतप्रतिक्षेपप्रकारेणैव यादवमतस्य प्रतिक्षिप्ततामभिप्रेत्याह **तेने** ति। **मृषावादः**—विवर्ततया ब्रह्मोपादानकत्ववादः । **स्वत** इति । स्वेनैव प्रतिक्षप्तु

अवस्थान्तरयोगित्वमुपादानत्वमुच्यते ।
मृत्पिण्डघटदृष्टान्तस्तत्रैव ह्युपपद्यते ॥
सर्पभूरज्ज्वंशालादिरूपावस्थान्तरान्वयः ।
रज्जौ न विद्यते तस्मान्नोपादानत्वमिष्यते ॥
इत्थमध्यस्ताविश्वस्य ब्रह्मोपादानभाषणम् ।
लोकवेदविरुद्धत्वात्स्वयमेव निरुध्यते ॥
अतः उपादानत्वानुपपत्तिरद्वैतवादिन एवेति ॥

इति शतदूषण्यां ब्रह्मोपादानत्वान्यथानुपपत्तिभङ्ग.

॥ त्रिपञ्चाशो वादः ॥

योग्यः, स्वव्याहत इत्यर्थः । तदेवोपपादयति । अवस्थान्तरे ति । लोकसिद्धतामुक्त्वा श्रुतिसिद्धतामाह मृत्पिण्डे ति । ब्रह्मणोऽधिष्ठानत्वाद्विकारान्वय. स्यादित्याशङ्क्याह सर्पे ति । इत्थ मित्यादि । अवस्थानाश्रयस्योपादानत्वस्य लोकवेदविरुद्धत्वाद्विश्वस्याध्यस्ततोक्तिर्ब्रह्मण उपादानत्वोक्तिश्च परस्परव्याहते इत्यर्थः ।

एतेनेद निरस्तम्, यदाह नवीनः—अवस्थान्तरयोगित्व नोपादनत्वम् ; तद्धि विकारवत्कारणत्व परिणामित्वं वा ? नाद्य , यत्किञ्चित्समवायित्वस्य निमित्तसाधारणत्वात्, तद्विकारसमवायित्वस्याप्येकसमुदायवादे तन्न सत्त्वात्, तन्नानात्वेऽपि अनित्यमृद्घटादौनित्यसम्बन्धासम्भवः, सम्बन्धस्य सम्बन्ध्याश्रयत्वनियमात्, अनित्यत्वे च भावकार्यस्य सोपादानत्वनियमात्, तदुपादाने तत्समवायसत्त्वे अनवस्था, असत्त्वे उपादानलक्षणाव्याप्तिः, नापि द्वितीय·, तद्धि तात्त्विकरूपान्तराभेद , तच्च न अभेदे, रूपान्तरत्वव्याघातात् ; तस्मात्परमते नोपादानलक्षण निर्वहति; असन्मते तु यदभिन्न कार्यमुत्पद्यते तत्कारणमुपादानम्, अभेदश्च मृद्घट इति सामानाधिकरण्यानुभवसिद्ध., अय घट इत्यत्र स्वप्रकारीभूतधर्मद्वयविशिष्टाभेदविषयत्वस्य क्लृप्तत्वात् ; स चाभेद. प्रकृते तादात्म्य भिन्नत्वे सत्यभिन्नसत्ताकत्वम्, अस्ति हि मृद्घटयोरेतत्तादात्म्यम्, भेदाभावे कार्यकारणभावायोगात्, उपादानो

पादेययोः सत्ताभेदाभावाच्च, दण्डघटयोस्तु नैवम्, भेदे सतिसमानेऽपि दण्डाधिष्ठा नात्तदुपहितात्तत्सत्त्वात् घटसत्ताया अन्यत्वात्, अन्यत्वं च दण्डाद्यभावेऽपि सन् घट इति अनुभवात् दण्डो घट इत्यननुभवाच्च सिद्धम्; नीलो घट इत्यादौ गुणगुण्याद्ययुतसिद्धसामानाधिकरण्यानुभवस्थले सर्वत्र इदमेव तादात्म्य विषयः; नन्वेवमेकघटाश्रितरूपरसादीना घटसत्तैकैव सत्तेति रूपरसादेरन्योन्य सामानाधिकरण्यानुभवः स्यादिति चेन्न, रूपाद्यवच्छिन्नतया घटसत्ताया रसादिसत्तात्मत्वाभावात्, ननु मृद्घटयोर्भेदे कथमेकसत्ताकत्वम्, दण्डघटयोरदर्शनादिति चेत्? दण्डघटभेदवत् मृद्घटभेदस्य सत्तावच्छेदकत्वाभावात्, रूपरसयोरप्यन्योऽन्यं भेदः सत्तावच्छेदकः नत्वाश्रयाद्भेद, अथवा कश्चिदनिर्वचनीयो धर्मस्तादात्म्यम्; अतो यदभिन्न कार्यमुत्पद्यते तत्कारणमुपादानम्, एवञ्च जगद्विवर्ताधिष्ठान ब्रह्मा प्युपादानम्, विवर्तस्याधिष्ठानाभिन्नत्वात्, ब्रह्मणः कारणत्वाच्च अभेदश्च सन् घट इति प्रतीतिसिद्धः सद्रूपाधिष्ठानतादात्म्यविषयत्वात्, न हि सदिति घटस्वरूपमेव प्रतीयते, तस्य पटादावननुगतत्वात्, नापि सत्ताजातिर्नैरुक्त्यम्, अतिरिक्तसत्ताकल्पने गौरवात्, प्रतीतेरधिष्ठानतया सत्तादात्म्यविषयत्वेनाप्युपपत्तेः, सामान्यादौ सद्बुध्ययोगाच्च, न च बाधायोग्यत्व सत्त्वं सामान्याद्यनुगतमिति वाच्यम्, तस्या एव सत्ताया लाघवानुगृहीतानुभवेन " न ह्यसति द्वैतसिद्धिः आत्मैव सिद्धो द्वितीयः " इत्यादिश्रुत्या चात्ममात्रतया सिद्धत्वात्; अन्यथासिद्धानुभवेन श्रुत्यर्थान्यथाकरणायोगात्, नापि प्रमाणयोग्यत्वम्, अबाधितानुभवस्य प्रमाणत्वे बाधायोग्यत्वपर्यवसानात्, यथार्थानुभवस्य तत्त्वे मिथ्यारजतादिसाधारण्यात्; तस्मात्कार्याभिन्न ब्रह्म कारण चेत्युपादानम्; अभेदश्चाधिष्ठानतयेति ब्रह्मविवर्तभूतं जगदिति।

अथभाव.— समवायानङ्गीकारादाश्रयाश्रयिभावाङ्गीकाराच्च अवस्थान्तरयोगित्वमुपादानत्वमित्यत्र न कश्चिद्दोष', एतदेव परिणामित्वमपीति, तदपि सुस्थम्; रूपान्तरवदभेदो वा, परिणामित्वम् रूपान्तर च कार्यावस्थातात्त्विकरूपान्तराभेदः परिणामित्वमित्यसङ्गतम्, रूपान्तरस्य तात्त्विकत्वे अद्वैतहानेः। स्वसमानसत्ताकत्व विवक्षाया सद्भिन्न कार्यमुत्पद्यत इत्यत्र वक्ष्यमाणो दोषोऽनुसन्धेय.। सिद्धान्ते

त्विदमपि पूर्वत्रैव पर्यवसितम् । यदभिन्न कार्यमुत्पद्यते तत्कारणमुपादानमित्यत्रापि न दोषः, उपादानस्यैव सद्वारकोत्पत्तेः सद्वारककार्यतायाश्च सत्त्वात् । त्वत्पक्षेत्व तदयुक्तम्, कार्यकारणयोर्भेदाङ्गीकारात् ।

ननु भिन्नत्वे सत्यभिन्नसत्ताकत्वलक्षणोऽभेदोऽस्तीत्युक्तम् , सत्यमुक्तम, दुरुक्तन्तु तत्, तस्य मृद्घट इति सामानाधिकरण्यानुभवसिद्धत्वाभावात्; अय घटः अय कम्बुग्रीव. इति सामानाधिकरण्यानुभवाविषयस्यवैतैत्सामानाधिकरण्यानुभवविषयत्वात् , त्वयैवाभेदस्यैतत्सामानाधिकरण्यानुभवसिद्धत्वेऽय घट इत्यत्र स्वप्रकारीभूतधर्मद्वयविशिष्टाभेदविषयत्वस्य क्लृप्तत्वादिति हेत्वाभिधानात्, अय घटः अय कम्बुग्रीवः सोऽय देवदत्तः तत्त्वमसि सत्य ज्ञानमित्यादिषु भिन्नत्वे सत्यभिन्नसत्ताकत्वासम्भवात् । किञ्च भिन्नत्वे सत्यभिन्नसत्ताकत्व यदि सामानाधिकरण्यप्रतीतेर्विषयः तदा मृद्घटौ भिन्नौ अभिन्नसत्ताकौ चेति प्रयोगः स्यात्; ससर्गमर्यादया भानाद्यदि न तथा प्रयोगस्तदा मृद्घटावभिन्नाविति प्रयोगो न स्यात्। किञ्च तादात्म्य हि तत्स्वरूपकत्वम्, तत्स्वरूपकत्व च तत्स्वरूपाभिन्नत्वम्, इद कथ भेदाभिन्नसत्ताकत्वघटितशरीर स्यात् ? यदि तादात्म्यशब्दो रूढ इत्युच्यते एवमपि मृदात्मको घट इति प्रयोगो न स्यात्, मृत्स्वरूपं यस्येति हि तदर्थः । किञ्च सधीभवन्ति ब्राह्मणा इत्यत्रेव तन्तवः पटीभन्तीति सपद्यकर्तरि च्विर्न स्यात्, जायमानात् पटाद्भिन्नतया सत्पद्यकर्तृत्वासम्भवात् । कार्यकारणयोर्भेदे अवयविभङ्गे त्वयोक्तो गुरुत्वाधिक्यप्रसङ्गोऽवर्जनीयः ।

अपि च असत उत्पत्त्यसम्भवात् घटस्य सूक्ष्मरूपेणावस्थान कार्यस्य त्वयोच्यते, तल्लाजातस्य सूक्ष्मरूपस्य जातस्य घटस्य चाभेदः कथमुपपद्यते ? नचाऽत्रापि भेद एव, असत उत्पत्तिप्रसङ्गात्, सूक्ष्मरूपकल्पनावैयर्थ्याच्च । तथा च पिण्डरूपेण प्रागवस्थान पश्चात् घटरूपेणोत्पत्तिरित्येव वक्तुमुचितम् ।

किञ्च । मृत्पिण्डो घट आसीदिति प्रतीतिर्न स्यात् । " पुनरावृत्तः स्वर्ण पिण्डः खदिराङ्गारसवर्णे कुण्डले भवत " इति च भाष्यम् । पिण्डरूपकार्ये घटरूपकार्याद्भिन्नमेव हि मतम् । न च तत्र तादात्म्यसम्भवः, तत्राभिन्नसत्ताक

त्वासिद्धेः, सा च पिण्डाभावेऽपि घट इत्यनुभवात् घटाभावेऽपि पिण्ड इत्यनुभवाच्च भिन्नैव सिद्धा। किञ्च द्रव्य घट इत्यत्र द्रव्याभिन्नसत्ताकत्वं रूपी घट इत्यत्र रूप्यभिन्नसत्ताकत्व च विषय इति स्यात्, तनश्च घटे द्रव्यत्वरूपे न स्याताम्। किञ्च—' यवमयश्चरुर्भवती ' त्यादौ विकारार्थप्रत्ययानुपपत्तिः, यवस्य चर्वपेक्षया भिन्नसत्ताकत्वात , अवघातादिना यवनाशेऽपि चरुप्रतीते'। एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया एकस्य कारणस्य स्वरूपे ज्ञाते कार्यस्य सर्वस्य स्वरूप ज्ञातं स्वरूप स्यैकत्वात्, स्वरूपं चाधिष्ठानसत्तेति ह्यर्थस्त्वयोच्यते, तथा च " मृत्पिण्डेन सर्वं मृण्मयं विज्ञात स्या " दित्यसङ्गतम्, पिण्डघटयोरभिन्नसत्ताकत्वाभवात्। एवं " सदेव सोम्येदमग्र आसी ' दित्यनुपपन्नम्, एकया हि सत्तया उभयोस्तुल्यः सम्बन्धो वाच्यः, अस्य हि सर्वस्य ब्रह्मण्यध्यस्तत्वं सम्बन्धः, ब्रह्म तु नाध्यस्तम्, अतो ' बहु स्या प्रजायेय ' ' सच्च त्यच्चाभव ' दित्यादि बहुसामञ्जस्यम्। सदेवेति सच्छब्देन प्रकृतिविवक्षायामपसिद्धान्त., ईक्षणश्रुतीक्षत्यधिकरणव्याघातः, अद्वितीयान्वयानुपपत्तिश्च।

यत्तु सन् घट इत्यादौ सद्रूपाधिष्ठानसद्भेदाभाव एव विषय इति। तन्न, मृद्घट इत्यादावभिन्नसत्ताकस्यैव विषयत्वोक्तेरननुगमात्। न च सर्वत्र तत्प्रतियोगिकसद्भेदाभाव एव तादात्म्यं विषय इति वाच्यम्, सद्भेद इति भेदस्य पारमार्थिकत्वविवक्षायां दण्डघटयोरपि तादात्म्यप्रसङ्ग', व्यावहारिकत्वविवक्षायां मृद्घटयोरपि भेदस्य व्यावहारिकत्वेन तत्रापि तादात्म्याभावप्रसङ्गात्। सद्भेदाभावशब्देन सत्तावच्छेदकभेदाभावविवक्षाया भेदत्वाविशेषेण सर्वस्यापि भेदस्य सत्तावच्छेदकत्वात् मृद्घटयोस्तादात्म्य न स्यात्।

किञ्च—किमिदमभिन्नसत्ताकत्वम्? उभयोरेकसदध्यस्तत्वञ्चेत् ; घटपटयोरपि तादात्म्यप्रसङ्ग., प्रपञ्चब्रह्मणोः तदभावप्रसङ्गश्च। घटेनाकाशवत् एकेन भिन्ने सदंशे इतरस्याध्यासश्चेदुभयाधिष्ठाने औपाधिकभेदस्याप्यभाव इति पर्यवसितम्। ततश्च रूपस्पर्शयोस्तादात्म्यप्रसङ्गः, घटसत्तायां एव रूपस्पर्शाधिष्ठानत्वात्, एकरज्वारोपितयोः सर्पभूदलनयोस्तादात्म्यप्रसङ्गश्च। अन्यतराधिष्ठानतावच्छिन्ना

धिकरणताक.र भेतर.विष्ठानतायाश्चेत् , अवच्छेदकत्वस्यानतिरिक्तवृत्तित्वरूपस्ये रूपस्पर्शयोस्तादात्म्यप्रसङ्ग एव । अवच्छेदकत्व सम्ब धविशेषश्चेत्किमेतावद्दूरधावतेन? सम्बन्धविशेषः तादात्म्यमिति सुवचत्वात्। किञ्च—इद सामानाधिकरण्यनिबन्धनमिति कुत्र दृष्टम् ? इद रजतमित्यत्रेति चेत् ; इदानीं प्रपञ्चमिथ्यात्वस्य विप्रतिपन्नतया तत्र सत्ताधिष्ठानकत्वासिद्धेः । सामानाधिकरण्यप्रतीत्यन्यथानुपपत्त्या कल्पने अय घट इत्यत्रैवाभेद एव कल्प्येत, तस्यैवोपपादकत्वात् , अन्यस्योपपादकत्वेनाक्लृप्तस्यापि कल्पने इदमेव कुतः कल्प्यते? सप्रतिपन्नमयुतसिद्धत्वमेव तादात्म्यमिति कुतो न कल्प्यते ? तत्सम्बन्धिन्याभेदप्रवेशादिति चेत् , साक्षात्स्वरूपे भेदप्रवेशान्नेदमर्हम् । अभिन्नसत्ताकत्वमेव तादात्म्यं चेत् , इतोऽप्यन्यत्र कल्पत स्वरूपाभेदभेदाविशेषात् कल्पत्वात् घटकलशसामानाधिकरण्यप्रसङ्गाच्चायुतसिद्धेरेव तादात्म्यरूपत्वं कल्पयितुमुचितम् । अकल्पनमेव वा । कथ तर्हि मृद्घटः नीलो घट इति सामानाधिकरण्यम् ? अथ घट इत्यत्र कथं सामानाधिकरण्यम्? अभेदादिति चेत् , कथमिह तन्न स्यात् ? बाधादिति चेत् , कथ तर्हि अग्निर्माणवक इति ? उपचारादितिचेदिहापि तथास्तु ।

ननु प्रतीतौ कथमुपचार.? तस्य शब्दधर्मत्वादिति चेत् , सामानाधिकरण्यमपि शब्दधर्म एवेति कथमुपचारो न तस्योपपादकः ? अस्तु वा सामानाधिकरण्य प्रतीतिधर्मोऽपि, तथ्यभेदगोचरत्वान्नातिरिच्यते, ततश्चाभेदस्यैव प्रतीतेः कथं भेदः ! युक्तित इति चेत् , तर्ह्यभेदप्रतीतिभ्रम इति किन्तदुपपादनाय शश विषाणकल्पनतया? श्रुतिरपि मुख्यार्थासम्भवे तत्त्वमसिवल्लक्षणया नेतव्या।

ननु मृद्घट इति तावत् समानाधिकरणप्रयोगो दृश्यते, अय च प्रयोगोऽर्थविशेषप्रतीत्या विना नोपपद्यते, अतः प्रयोगनिमित्तज्ञानस्य विषये निरूपिते मृद्घटयोः कार्यकारणयोरभेदासम्भवात्, अभेद विना सामानाधिकरण्यायोगात्, घटकलशयोरिवापर्यायत्वाच्च भिन्नत्वे सत्यभिन्नसत्ताकत्वं विषय इति कल्प्यत इति चेन्न ; अन्यत्र कल्पाभेदभ्रमस्यैव सामानाधिकरण्यनिमित्तत्वकल्पनौचित्यात्, मृद्घटयोर्भेदादपर्यायत्वम् । किंच—तयोरभेदगोचरायाः प्रतीतेरन्यविषयत्व

कल्पनादपि निर्विषयत्वकल्पनमेव वरम्। किञ्च कार्यकारणयोरभेदप्रतीतिस्तावद्दुरपह्नवा, "यथा सोम्ये" ति वाक्येनापि दृढीकृता, अतोऽभेदस्य दुरपह्नवत्वात् कार्यत्वमनिर्वचनीयत्वादुपपादय, किमनया अभेदप्रत्यक्षापह्नवसामानाधिकरण्यानिर्वाहकखपुष्पकल्पनावैयाकुल्या, अवस्थाया एव कार्यत्वं द्रव्ये कार्यत्वव्यपदेश औपचारिकः, कादाचित्कावस्थायोग एव वा कार्यत्वमिति वा कल्पय। एतेन पृथक् सत्ताशून्यत्वं तादात्म्यमिति निरस्तम्, तस्यापृथक्सत्ताकत्व एव पर्यवसानात्, सत्ताशून्यत्वस्य दण्डघटादिसाधारणत्वात्, ब्रह्मण्यभावात् पृथक् पदवैयर्थ्यात्। सत्तावच्छेदकभेदशून्यत्वं तादात्म्यमित्यपि न, अवच्छेदकत्वं यदि तदध्यस्तत्वम्, तदा सत्तावच्छेदकेति व्यर्थम्। भेदाभावे कार्यत्वानुपपत्तिश्च त्वयैवोक्ता भेदस्य सत्ताभेदकत्वाभावविवक्षाया भेदे वैषम्याभावाद्विशेषणवैयर्थ्यात्। भेदो हि सत्ताभेदकताप्रयोजकः, यथा दण्डघटयोः स्वयं भिन्नत्वात् सत्ता भिन्ना, मृद्घटभेदस्तु मृद्घटयोर्न सत्ताभेदकताप्रयोजकः, अतस्सत्तावच्छेदकभेदशून्यत्वं तादात्म्यमिति चेत्? भेदत्वाविशेषे कथमिदं वैषम्यम्, वैपरीत्यस्यापि सुवचत्वात्।

ननु भिन्नाविमाविति दण्डघटयोः प्रत्यक्षेण भेदो गृह्यते, मृद्घटयोस्तु नैवम्, किन्त्वनुमीयते—इति वैषम्यान्मृद्घटयोर्भेदो न सत्तावच्छेदक इति चेन्न,— परोक्षत्वापरोक्षत्ववैषम्यस्यापि वैपरीत्यप्रयोजकत्वशङ्काया निवारकाभावात्। एतेन सत्तानवच्छेदकभेदवत्त्वमित्यपि निरस्तम्। किञ्च अभिन्नसत्ताकत्वमित्यत्र सत्तया कः सम्बन्धो विवक्षितः? नतावत्तादात्म्यमेव, आत्माश्रयात्। नापि तत्सत्तातिरिक्तसत्ताशून्यत्वं सम्बन्धः। सर्वस्यापि सत्तासम्बन्धराहित्येनातिप्रसङ्गात्। घटादेर्मृत्सत्तातिरिक्तवाय्वाद्यवच्छिन्नसत्तासंयोगित्वाद्द्रव्येष्वव्याप्तेः। अस्य सम्बन्धत्वासम्भवाच्च। न हि जलगतशैत्यातिरिक्तशैत्यराहित्याद्वह्नौ शैत्यविशिष्टप्रत्ययः। नापि संयोगः अद्रव्येष्वसम्भवात्। न च सत्तासम्बन्धस्सत्ताप्रतियोगिकभेदाभावः, मिथ्यात्वेन प्रपञ्चस्य सत्तया भिन्नत्वात्। न च पारमार्थिकभेदाभावः, पारमार्थिकभेदस्याप्रसिद्धेः। न च ब्रह्मैव तादृशोभेदः, प्रपञ्चेन सम्बन्धस्यानिरू-

षणात् , निरधिकरणत्वाच्चातिप्रसङ्गतादवस्थ्यात् । नाप्यधिष्ठानाध्यस्यमानभावः सम्बन्ध., तस्य सन् घट इति प्रतीतिविषयत्वासम्भवात् । अध्यस्यमानत्वञ्च तद्भेदेनोत्पन्नत्व तदभेदेन प्रतीयमानत्व वा न सम्भवति, अभेदासम्भवात् प्रतीति विषयत्वाभावाच्च । न च सत्तावच्छेदकत्व सम्बन्ध·, सम्बन्धमन्तरेणावच्छेदकत्वासम्भवात , तस्य प्रतीतिविषयत्वासम्भवाच्च । अनिर्वचनीयः कश्चिद्धर्मस्तादात्म्यमित्यपि न, तस्याभेदादन्यत्वे सामानाधिकरण्यनिमित्तत्वाभावात् । अनन्यत्वे तद्वा[प्य]त्तत्वे च भेदे विद्यमाने तदयोगात् , उभयोस्तुल्यसत्ताकत्वात् ।

नन्वभेद· प्रातिभासिकः, यौक्तिको भेदो व्यावहारिक इति चेन्न, ' यथा सोम्येति '' श्रुतिविरोधात् । न हि प्रातिभासिकाभेदमात्रेण ततो भिन्नस्य तज्ज्ञानेन ज्ञातता सम्भवति । यच्च ब्रह्माभेद. सन् घट इति प्रतीतिसिद्ध इति , तन्न, घटादेरेव सत्त्वात्, अन्यथा तस्या. प्रतीतेर्भ्रमत्वप्रसङ्गात् । किन्तर्हि सत्त्वम् ? उच्यते । अस्तिनास्त्योः परस्परप्रतिक्षेपकता नावत् सर्वलोकविदिता, नास्तीति चेह नास्तीति इदानीं नास्तीत्यधिकरणसापेक्षम्भावप्रतियोगित्व प्रतीयते, यत्र चाधिकरणविशेषाप्रयोगः तत्रापि विवक्षित एव स , प्रकरणादिना तन्निर्द्धारणम् , योऽपि समवायो नास्तीत्यादिप्रयोगस्सोऽपि सर्वदेशसर्वकालाभावप्रतियोगित्वगोचरः , न च तादृशाभावाप्रसिद्धि., अभावे एकत्वस्याविवक्षितत्वात्तत्र तत्र प्रसिद्धा एवाभावा विवक्षिता·, सयोगादतिरिक्ते प्रसिद्धे उक्तमभावप्रतियोगित्वमारोप्यते, अनारोपमूलकसमवायनिषेधस्तु सयोगादतिरिक्त· प्रतियोग्यतिरिक्त सम्बन्धो न भवतीत्यादिरूप. , एव चेह घटो नास्तीत्येतत्प्रतिक्षेपकतया इह घटो ऽस्तीत्यस्य एतद्देशीयाभावप्रतियोगित्वाभावो विषय , इदवस्तुस्वरूपमस्तीत्यादेः सर्वकालवर्त्यभावप्रतियोगित्वप्रतिक्षेपात्मकत्वात्तादृशाभावप्रतियोगित्वाभावो विषय इति । यद्वा अस्तीति स्वार्थिकप्रत्ययवदनतिरिक्तार्थ·,, अत एव ह्यात्मभरणवचनत्वमुच्यते, आत्मशब्द. स्वरूपवचन , तिङन्तस्य साध्यरूपेण प्रत्यायकत्वमर्यादानुसारेण भरणशब्दप्रयोग., अस्तिप्रयोगश्च अनतिरिक्तार्थत्वेऽपि कारकपदानाक्रियापदेन विना बोधकत्वाभावात् । कालान्वयार्थश्च इह घटस्सन्नित्यत्र सन्निति प्रयोगस्तु

इह घट इत्येतावन्मात्रोक्तौ उत्पत्तिविनाशादिसाधारणतया तदाकाक्षानिवृत्तये । क्रियान्तराप्रयोगादेव तदाकाक्षा निवर्तत इति चेत् ? सत्यम् अत एव हि क्वचिदिह घट इत्येतावन्मात्रं प्रयुज्यते । प्रकारस्य प्रकारान्तरादप्रकत्वादयमपि प्रयोगो युज्यत एव । न तु सत्त्वप्रतीत्यर्थोऽयमस्तेः प्रयोगः, देवदत्तो भुङ्क्ते यज्ञदत्तः पचति विष्णुमित्रो गच्छतीत्यादौ अस्तेरप्रयोगात् । तत्राप्रयोगो हि क्रियापदान्तरसत्त्वेन वाक्यस्यान्वयबोधसामर्थ्यात् । साधयति प्रयोगः कालार्थश्च । यद्वा प्रामाणिकत्वं सत्त्वम्, तच्च प्रमाविषयत्वम्, स च प्रामाण्यस्य स्वतस्त्वात् परोक्षापरोक्षसर्वप्रमाणगोचरः, अत एव घटज्ञानमात्रात् ज्ञानान्तरमनपेक्ष्य घटोऽस्तीति प्रयोगः । सत्त्वस्य सर्वज्ञानगोचरत्वात् । अस्तेः प्रयोग पूर्ववत् क्वचिद्वाक्यशिद्धये क्वचिद्विप्रतिपत्तौ साधनप्रतिज्ञार्थम् । अथ वा बाधायोग्यत्वं सत्त्वम् । न च लाघवानुगृहीतप्रत्यक्षानुभवेनात्ममात्रस्यैव सत्त्वम् . अनन्तरपदार्थानां बाधितत्वकल्पने गौरवात् ; सर्वप्रतीत्यप्रामाण्यकल्पनानुपपत्तेश्च । नचाबाधितत्वं ब्रह्मणि प्रत्यक्षं विषयीकर्तुं शक्नोति । ब्रह्मस्फुरणस्य प्रकाशमात्रत्वात्, तेन बाधायोग्यत्वप्रकाशासम्भवाद्द्वैतश्रुतिरीश्वराद्वैत्वनिषेधादिपरा ।

एतेन विवर्तोपादानत्वव्याघातप्रदर्शनेन श्रुतिव्याघातोऽपि दर्शितः । सद्विद्यया तावद्विवर्तपक्षो व्यवहन्यते, स्तब्धोसीत्यनेन आदेशमप्राक्ष्यः, येनाश्रुतमित्यादिप्रतिपन्ननिमित्तोपादानत्वविशिष्टज्ञानस्य मोक्षसाधनत्व प्रतिपन्नम् । अतस्तद्विरुद्धो विवर्त्तवादः । आदेशशब्दस्य नियन्तृपरत्वमाचार्यैरेव उपपादितम् ।

एव "येनाश्रुत" मित्यनेनापि व्याघातः, प्रपञ्चब्रह्मणोस्मत्यमिथ्यावस्तुनोरत्यन्तविलक्षणतया अन्यतरज्ञानेनान्यतरस्य ज्ञातत्वासम्भवात् । अधिष्ठानज्ञानेनाध्यस्त ज्ञात भवतीति यद्युच्येत, तदा भ्रान्त्यभ्रान्त्योस्सङ्करप्रसङ्ग, शुक्तिज्ञानस्यैव रजतज्ञानत्वप्रसङ्गात् । नन्वज्ञातस्य स्वरूप ज्ञात भवतीत्यर्थः, मिथ्याभूतस्याधिष्ठानातिरेकेण स्वरूपाभावादधिष्ठानमेव तस्य स्वरूपमिति चेत् ? किमथ स्वरूपशब्दो लाकव्युत्पन्न एव, उत त्वया परिभाषितः ? नाद्यः, घटस्वरूपमित्यत्र स्वरूपशब्दस्य घटार्थकत्वेनैव व्युत्पत्ते इहापि तथैव विवक्षाय.

ज्ञातत्वासम्भवरूपदोषतादवस्थ्यात् । न द्वितीय., अश्रुतशब्देन पारिभाषिकस्वरूप शब्दार्थोपस्थापने लक्षणाप्रसङ्गात् ।

" कथन्नु भगव इत्य " नेनापि व्याघातः, विवर्तपक्षे शङ्कानुदयात् । एव दृष्टान्तवैयर्थ्यञ्च, मृज्ज्ञानेन सर्वस्य ज्ञातता हि तत्र प्रतिपाद्यते, तच्च कार्य-कारणयोरभेद एव युज्यते, न तु कार्यस्य मिथ्यात्वे ।

एवमन्यज्ञानेनान्यस्य ज्ञातता कथ भवति ? कार्यञ्च भिन्नमेव, पृथुबुध्नोदराकाररूपरूपभेदात् नामभेदाच्चेति नैयायिकाशकानिरासार्थेन 'वाचारम्भण' मित्यनेनापि व्याघातः । तत्र " वाचारम्भण मृत्तिकेत्येव सत्य " मिति कार्य मिथ्यात्व कारणसत्यत्व च प्रतिपाद्यत इति चेत् ? किमिद कारणसत्यत्वम् । पारमार्थिकत्वे अद्वैतहानिः , व्यावहारिकत्वे कार्यस्य मिथ्यात्व यदि प्रातिभासिकत्वेन तदा मृदोऽपि कार्यत्वात् मृद्घटयोस्तत्त्वे न विशेषः । यदि व्यावहारिकत्वेन मिथ्यात्व तदाप्ययमेव दोष., कार्यस्यैव मिथ्यात्वस्य वाच्यत्वात् नामधेयग्रहणवैयर्थ्यञ्च । " मृत्तिकैव सत्ये " ति वाच्य इति करणवैयर्थ्यञ्च । सिद्धान्ते तु वाचा वागर्थे , अध्ययनेन वसतीतिवत् प्रयोजनस्यहेतुतया निर्देशः, इदमुपलक्षणम्—रूपस्यापि ग्रहणात् , वागर्थे हानाद्यर्थेच, विकार.—अवस्था, नामधेयच आरभ्यते—प्रदृश्यते । हेतुमाहमृत्तिकेति, या सा मया पूर्वाह्णे मृत्तिका दृष्टा सैवेदानीं घट आसीदित्यबाधितप्रत्यभिज्ञानान्न द्रव्यस्य भेद इति भावः ।

एतेनैकविज्ञानेन सर्वविज्ञानप्रतिज्ञायाः ब्रह्मव्यतिरिक्तस्य कृत्स्नस्यापि मिथ्यात्वात् ब्रह्मव्यतिरेकेण ज्ञातव्यान्तर नास्तीत्यत्र तात्पर्यम् , अत एव हि वाचारम्भणमिति दृष्टान्ते सर्वस्य मिथ्यात्वेन ज्ञातता प्रतिपाद्यते इति निरस्तम् । किञ्च यदि ब्रह्मणि ज्ञाते सर्व ज्ञात भवतीत्युच्येत, तदा सर्वशब्दस्याशेषपरत्वमङ्गीकृत्य ब्रह्मणि ज्ञाते ज्ञातव्यमशेष ज्ञातं भवति, इतरस्य मिथ्यात्वेनाज्ञातव्यत्वादिति वक्तु शक्येतापि, नचैव श्रूयत, अपित्वश्रुते श्रुत भवतीति । तत्र ब्रह्मणि श्रुते पूर्वमश्रुत तदेव ब्रह्म श्रुतं भवतीत्य वक्तव्यतया अन्यच्छ्रुतं भवतीत्यर्थ. प्रतीयते ।

ननु दृष्टान्ते "सर्वं मृण्मय विज्ञातं स्या" दित्युक्तेः दार्ष्टान्तिके तद्वि वक्षितमेवेति चेन्न, दृष्टान्तबलात् सर्वत्वलाभे तत्समानार्थत्वाय तद्वत् कृत्स्नस्य तत्कार्यतया तदभिन्नत्वेन ज्ञाततैव विवक्षणीया, न तु कृत्स्नस्याज्ञातव्यता। दृष्टान्ते हि सर्वं मृण्मय विज्ञात स्य दित्युच्यते, न हि तत्र कृत्स्नस्य मृण्मयस्याज्ञातत्व मृत्पिण्डस्य ज्ञातव्यत्व च विवक्ष्यते।

एतेन दार्ष्टान्तिक एवासङ्कोचात् सर्वत्वलाभ इति निरस्तम्, तत्रापि दृष्टान्तवैधर्म्येण इतरज्ञातव्यत्वविवक्षाया असम्भवादेव। तदसम्भवश्च जलाहरणाद्यदेश्यसिद्धये घटस्यैव ज्ञातव्यत्वात्। तदर्थमेव हि मृत्पिण्डस्य ज्ञातव्यता।

एवं "सदेव सोम्येदमग्र आसी" दित्यत्र विवर्तपक्षे इदङ्ग्रहण वैयर्थ्यम्। स्वरूपोपादानत्वपक्षे 'अग्रे सदेवासीत् तदैक्षत तत्तेजोसृजत' इत्येव पर्याप्तेः। सिद्धान्ते तु इद ग्रहणाभावे ब्रह्ममात्रस्य पूर्वमवस्थानोक्तौ तस्यैव बहुभवनाभिधाने स्वरूपोपादानत्वशङ्का स्यादिति अस्यैव सूक्ष्मरूपेणावस्थानमुच्यते 'इद सदासी' दिति, ईक्षणसहकारादनेन विशिष्टोपादानसिद्धि.। किञ्च नहीद सदिति सत्यमिथ्यावस्तुनोरसामानाधिकरण्यव्यपदेशस्तम्भवति। नहि रजत शुक्ति रासीदिति व्यपदिशन्ति। व्यपदिशन्ति हदि रजतमिति इति चेत्? किन्ततः? स व्यपदेशो भ्रान्तिमूलः। तदभावे च कथ श्रौतो व्यपदेशः। सदेवासीदिद नासीदित्युक्तावध्याहारः। वृद्धिमिच्छतो मूलतो हानिश्च, उपादानत्वप्रतीतेर्हि मिथ्यात्वं सिसाधयिषितम्, सैवासिद्धा, नहि गेहे देवदत्त एवासीन्नान्य इत्युक्ते देवदत्त इतरेषामुपादानमिति प्रतीयते। अयं घट. पूर्व मृण्मात्रमासीदितिवदिदमग्रे सन्मात्रमासीदित्युक्तौ हि उपादानत्व सिध्येत्। तयोक्तौ चानेन वाक्येन सजातीयविजातीयस्वगतभेदनिषेधात् प्रपञ्चमिथ्यात्वसिद्धिरित्येतत् व्याहन्यते। सजातीयादिविशेषशून्यं यदस्ति तदासीदित्युक्तौ न दोष इति चेन्न,—पूर्व कार्याभावमात्रप्रतिपादनस्यैव कारणत्वप्रतिपादनोपयोगितया मिथ्यात्वप्रतिपादनस्यानुपयोगात्।

एव " तद्वैक आहु " रित्यादिना कार्यस्य प्रळयकालेऽपि सत्त्वप्रतिपादनेन तार्किकमतनिराकरणेनापि व्याघातः । न च तद्वाक्य शून्यवादिनिराकरणार्थमिति वक्तु शक्यम्, सर्वदा शून्यत्ववादिभिरग्र इति विशेषानभिधानात्, जायत इत्यनभिधानाच्च । अ ोऽनुवादस्यायमर्थ.—इद प्रळयकाले अविद्यमानमेवासीत्, कथं तर्हि सर्गसम्भव इत्याशक्य कर्तृसद्भावमाह एकमेवेति, एकशब्दः प्रधानपरः, ईश्वरो विवक्षित.; घटादिरूपकार्य इव कर्तापेक्षितः, न च जीवस्य तदानी करणकळेबरादिविधुरस्य कर्तृत्वमुपपद्यते । ततस्तद्वैधुर्यात् कथं सर्ग इत्याह अद्वितीयमिति, कर्त्रन्तरनिरपेक्षमित्यर्थ. । कार्यत्व हि सकर्तृकत्वेन व्याप्तं, न तु द्विकर्तृकत्वेनाप्रयोजकत्वात्, क्वचिद्बहुकर्तृकत्वदर्शनात्तत्प्रसङ्गाच्चेति भावः, सहकार्यपेक्षायामाह असत इति । तस्मादेकशब्दोदितादीश्वरादसतः प्रागभावाच्चेत्यर्थः, कार्योत्पत्तिक्षणे अविद्यमानात् हेतुत्वमात्रविवक्षया पञ्चमी । उत्तरस्याय भावः । कथमिति मृददेर्विकारादिस्पर्शमात्रदर्शनात् कार्यद्रव्यस्य कारणाभेदात् प्रागभावासिद्धेश्चेति ।

एव " बहुस्या प्रजायेये " ति व्याघातः, अभेदानुपपत्तेरेव । प्रजायेयेति च व्यर्थम् । सिद्धान्ते तु स्वस्य बहुभावासिद्धिद्वारा सर्गसङ्कल्प उच्यते ' प्रजाये ' येति. प्रजनयेयेत्यर्थ. । ' तत्तेजोऽभव ' दिति वक्तव्ये ' तत्तेजो सृजते ' त्यस्वरसम् । सिद्धान्ते तु द्वारसर्गोऽभिधीयते—स्वरूपाभेदभ्रमव्यावृत्तये । एवं ब्रह्मोपादानत्वस्य विशेषणस्य चाभ्यासाद्विशिष्टोपादानत्वतात्पर्य स्पष्टम् । अपागाद ग्नेरग्नित्वमित्यादिना कार्यमिथ्यात्व प्रतीयत इति चेन्न,— अग्निस्वरूपमङ्गीकृत्याग्नित्वस्यैव निरासात् । तस्मादवयविनिराकरणमिह क्रियते, समुदायातिरेकेणावयविनोऽभावादग्नित्वजातिर्दूरोत्सारितेत्यर्थः ।

" ऐतदात्म्यमिद सर्व तत्सत्य स आत्मे " त्यनेनापि व्याघातः । कथमैतदात्म्यम् । चेतनाचेतनगतदोषस्य ब्रह्मण्यपि प्रसङ्गादित्यत्र ह ' तत्सत्य ' मिति । तत्र हेतुः ' स आत्म ' ति, शरीरीत्यर्थ. । समभिव्याहारविशेषविधुरस्यात्मशब्दस्य शरीरप्रतिसम्बन्धिन्येव स्वारस्यात् । एव " तत्त्वमसी " त्यनेनापि

व्याघात', शरीरित्वेन विशिष्टोपादानत्वमुपपाद्य कार्यविशेषे तदुपसंहारात्। एव "ब्रह्मवा इद" मित्यादिश्रुत्यन्तरैरपि व्याघात.।

संद्विद्यामहावाक्यतात्पर्येणापि व्याहन्यते विवर्तवादः। तथाहि—पुत्रानुकम्पया तस्य मोक्षसाधनज्ञानमुत्पिपादयिषुर्निमित्तोपादनत्वविशिष्टब्रह्मज्ञानस्य मोक्षसाधनत्वम्मन्वानस्तदुपदेशायोद्युक्तोऽर्थगौरवमनुसन्धाय जिज्ञासामुखेनेममर्थमुपदेष्टुं तस्य जिज्ञासोत्पादनाय एकविज्ञानेन सर्वविज्ञानमुपक्षिप्य तस्य जिज्ञासामुत्पाद्यतेन पृष्टस्सन् 'सदेवे' त्यारभ्य षट्भिः खण्डैः कारणत्वमुपदिदेश। पुत्रोऽपि जिज्ञासितमर्थं ज्ञातवान्। पुनर्ज्ञातव्यान्तराभावात्। "तद्धास्य विजज्ञाविति विजिज्ञावि' त्युपसंहृतम्। जिज्ञासानिवृत्तेश्च श्वेतकेतुः पुनर्न पप्रच्छ। अतो. निमित्तोपादानत्वविशिष्टब्रह्मज्ञानस्य मोक्षसाधनतया महावाक्यतात्पर्यविषयत्वात्, तद्विरुद्धो विवर्तवादः। उत्तरखण्डाना कि प्रयोजनमिति चेत्? उक्तार्थस्थिरीकरणमिति ब्रूमः। शिष्यस्य जिज्ञासात्रिरहेऽपि स्वोत्पादित ज्ञान दृढीकर्तुं आचार्यः शिष्यानुकम्पया उक्तमेवार्थं दृष्टान्तादिभिरुपपाद्य उपसञ्जहार। तत्रचेतनोपादानत्व सद्वारकत्वञ्च दृढयति, "स्वप्नान्त" मिति। चेतनस्य सुषुप्तौ लयोपपादनात्तस्य प्रळयोत्पत्तिसम्भव उक्त इति चेतनानुपादानत्वशङ्काव्यावृत्तिमुखे कारणवाक्ये 'इद' मिति चेतनोऽपि सगृहीत इत्युक्त भवति। स च लयः सद्वारकावस्थाप्रहाणमेव, न तु द्रव्यस्वरूपनाश इत्यभिप्रायेणाह "यथाशकुनि" रिति। बन्धन सूत्रबन्धनशाखा, मनो-जीवः, प्राणः-परमात्मा। शकुनिर्निर्व्यापारतया बन्धन प्राप्य यथा निष्ठति तथा जीवः स्वव्यापारभूतज्ञानविकासावस्था विहाय परमात्मान प्राप्य तिष्ठतीत्यर्थः। चेतनोपादानत्वमेव प्रकारान्तरेणोपपादयति, "अशनाये" ति शरीरस्य सृष्टिवाक्योक्तभूतत्रयात्मकत्वं युक्त्या प्रसाध्य, तद्विशिष्टचतनोपादानत्वमिह प्रतिपाद्यते। "सदायतना" इति स्थितिरुक्ता, 'सत्प्रतिष्ठा' इति लयः। प्रागुक्त शरीरस्य भूतत्रयात्मकत्व स्मारयति 'यथात्वि' ति। त्रिवृत्करणार्थं भागत्रयसम्भावनार्थमन्नमशितमित्यादिनोक्तमिह स्मारितम्। सुषुप्तिवल्लयान्तरमप्याह 'अस्य सोम्ये' ति। तेज. शब्दो जीवपरः, स्वप्रकाश

त्वात्प्रकाशवत्त्वाच्च । ' स य ' इति । ' सदेवे ' त्यत्र यत्सूक्ष्मचिदचिद्विशिष्टं वस्तूक्तं तदेवेदानीं सुषुप्तौ लयस्थानत्वेनोक्तमित्यर्थः । सद्वारकत्वस्पष्टयार्थमाह ' ऐतदात्म्य ' मिति । एष आत्मा यस्य तदैतदात्म्यम्, स्वार्थे ष्यञ् । दोषान्वयप्रसङ्गादिदमनुपपन्नमित्याशङ्क्य स्वरूपाभेदो न विवक्षित इत्यभिप्रायेणाह· ' तत्सत्य ' मिति । हेतुं माह ' स आत्मे ' ति । उक्तमुपादानत्व विशेषे उपसंहरति, ' तत्त्वमसी ' ति । उक्त सद्वारकावस्थाश्रयत्वेनोपादानत्व नवकृत्वोऽभ्यस्य दृढीक्रियते । याद स पत्तिमात्र लयः कथ सुप्ता न जानीयुः, शकुनिर्हि जानातीत्य भिप्रायेणाह भूय ' इति । सुषुप्तिदशाया शरीरविशिष्टस्य न लयः, किन्तुज्ञान विकासावस्थाविशिष्टस्यैवेत्यभिप्रायेणाह, ' त इहे ' ति । शकुनेर्बन्धनादागतस्य तज्ज्ञानदर्शनात् तद्वदिहापिज्ञान स्यादिति शङ्कापि दृष्टान्तेन परिहार्येत्यभिप्रायेणाह ' भूय ' इति । ' समुद्रा ' दिति । मेघै. समुद्रादप उद्धृत्य वर्षणाद्धि नद्यः पूव हन्तीति भावः । इय समुद्रादागता उत्थाने न शरीरसृष्टिरित्यभिप्रायेणाह ' त इहे ' ति । नदीदृष्टान्तेन स्वरूपविकारः प्रतीयत इत्यभिप्रायेणाह ' भूय ' इति । नन्वणिम्नः कथं महत्त्वम्, अतः कार्यं द्रव्यान्तरमेव, तच्च पूर्वमेव कारणे वर्तते सामग्रया तदभिव्यज्यते, इति ह्येक आहुरित्यभिप्रायेणाह ' भूय ' इति । यदि पूर्वमेव कारणे कार्य स्यात् तदा तत्तल्लोपलभ्येत, नचाभिव्यञ्जकाभावादनभिव्यक्तिः, सामग्रया व्यञ्जकत्वे तद्विरहे कार्यापत्तीतिप्रसङ्गात्, तस्मादण्वेवावयवान्तरैः सह पृथुकार्यता भजत इत्यर्थः । यदि परमात्मा कार्यकारणान्तर्गतः, स कथं नोपलभ्यत इत्यत्राह ' भूय ' इति । लवणवत् परमात्मग्रहणे उपायान्तर ब्रूहीत्याह ' भूय ' इति । पूर्वोक्तवाङ्मनस्संपत्तिकालोपपादनाभिप्रायेणाह ' भूय ' इति उक्तार्थस्य सत्यतोपपादनाभिप्रायेणाह ' भूय ' इति । सर्वेषा प्रश्नाना मदीयप्रश्नमनेक्ष्य स्वप्नान्तरवद्वक्तव्यं स्वयमेव ब्रूहीति वाभिप्रायः । ' यथा तत्र न दह्येते ' ति । येन सत्येन न दह्यते तथैव सत्यमिद विशिष्टोपादानत्व, अतस्तत्परशुग्रहणेनापीममर्थ साधयामीत्यभिप्रायः । एवं निमित्तत्व विशिष्टोपादानत्वयोरेव सद्विद्यातात्पर्यावगमात् तद्विरुद्धो विवर्तवादः इति ।

एवं सूत्रव्याघातोऽपि, " तदनन्यत्वमारम्भणशब्दादिभ्यः " इत्यनन्यत्व प्रतिपादनात्। तस्य ब्रह्मणः अन्यत्वं न विद्यते यस्मादन्यत्तदनन्यत्, तस्य भावः—अनन्यत्वमिति विवक्षाया हेत्वनन्वय, नामरूपस्पर्शस्य हेतुत्वेनाभिधानात्। न च तस्य मिथ्यात्वे हेतुत्वसम्भवः। " वाचारम्भण " मिति व्यावहारिकत्वमुक्तम्। तदेवात्र सूत्रे आरम्भणशब्दविवक्षितमिति चेन्न;—'वाचारम्भण' मित्यस्य एतदर्थपरत्वस्या " रम्भणशब्दादिभ्य " इत्यनेनैव निरासात्। न हि वाचारम्भणशब्दादिभ्य इत्युक्तम्।

एवं श्रुतिव्याघातादेव माध्वाश्च ध्वस्ताः। अयं हि माध्वानां अभ्युपगमः, जगन्निमित्तमेव ब्रह्म, नोपादानमपि, परिणामित्वेनोपादानत्वम्, तच्च निर्विकारत्वश्रुतिविरुद्धम्; न च चिदचिद्विशिष्टस्य जगदुपादानत्व, विशिष्टस्य विशेषण विशेष्याभ्या मनन्यत्वेन विशेष्यस्योभयोर्वोपादानत्वविवक्षायामुक्त एव दोषः, विशेषणोपादानत्वोक्तिर्ब्रह्मणोऽनुपादानत्वपर्यवसायिनी; तस्मान्निमित्तमेव ब्रह्मेति। श्रुत्या विशिष्टोपादानत्वप्रतिपादनादेव ते निरस्ताः। मृद्रूपं कारण त्रिवृत्करणोपदेशात् भूतत्रयात्मकम्, तथा तत एव घटोऽपि भूतत्रयात्मकः, ततश्च विशिष्टमेव कारणम्, विशिष्टमेव कार्यं, तत्राप्यंशभेदनिरूपणे कार्यगतत्तद्भूताशे कारणगतत्तद्भूताशः कारणम्, एवमिहापि चिदचिद्ब्रह्मसवलित कारणं कार्यमपि, तथा अंशभेदनिरूपणे तत्तदंशे तत्तदंशः कारणम्। अचितः कार्यत्वमेवंस्याद्वारकम्, द्रव्यस्य नित्यत्वात्, चिद्ब्रह्मणोः कार्यत्व सद्वारकावस्थाद्वारकम्। सम्भवति च द्वारस्याव्यवधायकत्व, कारणत्ववत्। इश्यते चाश्रयत्वेऽपि द्वारस्याव्यवधायकत्वम्, खट्वाया शयितेऽपि प्रासादे शेत इत्यत्र, घट वहत्यप्युदक वहती त्यत्र च। उदकानाश्रयत्वे हि घटवहनाच्छ्रमाधिक्य नोपलभ्येत, गुरुद्रव्याश्रयताया श्रमहेतुत्वस्य क्लृप्तत्वात्, ततोऽन्यस्य स जलकुम्भवहनस्यापि प्रयोजकत्व मनुपपन्नम्। " काठिन्यवान्यो बिभर्ती " त्यादिकमपि इश्यते। नचैव भूतलस्य घटगतरूप श्रयत्वप्रसङ्गः, अपृथक्सिद्धस्य स्वापृथक्सिद्ध प्रति पृथक् सिद्धस्य स्वपृथक् सिद्ध प्रति च द्वारत्वात्। ब्रह्मणि सद्वारकावस्थान्वये ' बहुस्या ' मित्यादि प्रमाण

सदृश्यमुपलभ्यते । अन्यत्रादर्शनेऽपि श्रुतिबलादेव सद्वारकाश्रयत्वमङ्गीकर्तुं शक्यम्, किं पुनस्तद्दर्शने । द्वारसापेक्षत्वाच्च न निर्विकारत्वश्रुतिविरोधः । निषेधो हि यथा प्रसक्ति, प्रसक्तिश्च यथान्यत्रदर्शनम्, अचेतने च विकारः साक्षादेव दृष्टः, तथैवेह प्रसक्तो निषिध्यते । यथा भूतले घटो नास्तीत्यत्र संयोगसम्बन्धेन प्रसक्तेः तथैव निषेधः, न सम्बन्धान्तरेण । नच साक्षात्वविवक्षाया लक्षणा, अधिकरणप्रतियोग्यभावपदेषु कस्यापि लक्षणाविरहात् । घटघटत्वयोः प्रतियोगित्वप्रतियोगितावच्छेदकत्ववदवच्छेदकीभूतस्य ससर्गस्यापि वाक्यनैव भानात् । एवं चेतनगतदोषान्वयनिषेधेऽपि द्रष्टव्यम् । एवञ्च श्रुतिसिद्धोपादानत्वनिरासे श्रुतिविद्वेष एव निमित्तम् । श्रुतिहृदयविसवाद्यर्थस्य श्रुत्यर्थतया कीर्तनादपि श्रुतिविद्वेषः सिद्धः । तथाहि— एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा सादृश्यप्राधान्यनिबन्धना, सादृश्यनिबन्धनत्वे दृष्टान्तत्वय वाचारम्भणमित्युक्तम्, तदनुपपन्नम् । तज्ज्ञानस्य तत्सदृशज्ञाने कथं हेतुत्वम् ? सर्वेषा सर्वज्ञत्वप्रसङ्गात् तत्सदृशमिति ज्ञाने हेतुत्व तु सर्वसाधारणत्वान्न ब्रह्मासाधारणमिति तमप्राक्ष्यः येनाश्रुतमिति निर्देशानुपपत्तिः । दृष्टान्तवैषम्य च । दार्ष्टान्तिके हि प्रमेयत्वादिना यथाकथञ्चित्सदृशत्वेन ज्ञानं विवक्षितम्, तत्र किमर्थं तत्कार्यस्य दृष्टान्तत्वोपादानम्, विशेषोपादानस्य प्रयोजनाभावात् । किञ्च सादृश्ये किमर्थो निर्बन्धः ? ततोऽपि तद्विसदृशत्वेन ज्ञातं भवतीत्येव वक्तु युक्तम्, ब्रह्मापेक्षया कृत्स्नस्याप्यत्यन्तविसदृशत्वात्, तत्प्रतियोगित्वस्य कथञ्चिद्ब्रह्मासाधारण्यसम्भवात् । ततोऽपि तज्जन्यत्वेन ज्ञात भवतीत्येतद्धरम्, दृष्टान्तस्वारस्यात् । प्राधान्यात् ज्ञानमित्यनुपपन्नम् । इतरज्ज्ञातप्रायम्, तज्ज्ञानफलस्यैतज्ज्ञानेनैव सिद्धत्वादिति ह्यर्थः, तथा च लक्षणा ' वाचारम्भण ' मित्यस्यादृष्टान्तत्वाच्च ।

ननु वाचा वागिन्द्रियेणारम्भण—उत्पादन यस्य साकेतिकस्य भाषाशब्दस्य तन्नामधेयं विकारः, कर्मणि घञ् विकृतम्, सस्कृतापभ्रंशरूपेण विक्रिय माणत्वात् । ' वाद्वाचे ', त्याकारान्त', ' मृत्तिके ' त्यादि, सस्कृतनामधेयन्तु सत्य नित्य अतस्संस्कृतस्य नित्यत्वात् सार्वत्रिक. प्रयोगः, भाषाया विकारत्वात्

क्वाचित्कः, अतो व्यापकत्वात् संस्कृतस्य भाषाविशेषेण यत्फल देशविशेषे व्यवहार लक्षणं तत्संस्कृतज्ञानेन भवति तथेहापि ब्रह्मज्ञानेन इतरज्ञानकार्यं भवतीत्यर्थ इति चेन्न;- संस्कृतस्यैव क्वाचित्कत्वात्। सम्यगधीतव्याकरणानामेव संस्कृतप्रयोगसामर्थ्यात्। अन्यथा ह्यपभ्रंश एव स्यात्। यथेति पदाभावेन दृष्टान्तत्व चानुपपन्नम्। न च 'यथासोम्येकेन मृत्पिण्डेन सर्वं मृण्मय 'विज्ञातं स्या' दित्यनुषज्यते, तस्योपपादक 'वाचारम्भण' मितीति वाच्यम्, अनुषङ्गस्यैव दोषत्वात्। अनुषङ्गेऽपि पिण्डमणिपदानन्वयाच्च। नखनिकृन्तनेन कार्ष्णायसमित्येतदत्यन्तासङ्गतम्। तस्मात् श्रुत्यैव सर्वे वादिनो निरस्ताः।

श्रुत्यैवैव समस्ताश्च निरस्ताः प्रतिवादिनः।
तथैव हृदय सम्यक् बोधिता मम देशिकाः॥
एवं मध्वमते सूत्रव्याघातेऽपि स्पष्टः।

इति श्रीवाधूलकुलातिलकश्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्येन
तदेकदैवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्ध
महाचार्यपरनामधेयेन रामानुजदासेन विरचितायां
शतदूषणीव्याख्याया चण्डमारुताख्यायां
ब्रह्मोपादानत्वान्यथानुपपत्तिर्नाम
त्रिपञ्चाशः स्कन्धः ॥५३॥

॥ श्रीरस्तु ॥

॥ चतु पचाशोवाद ॥

यत्प्रपत्ति विना सर्वैर्यस्य माया दुरत्यया ।
धनञ्जयरथोत्तसं तत्प्रपद्ये परं महः ॥

यदुच्यते—" माया तु प्रकृति विद्या " दिति विश्वस्य मायोपादान कत्वश्रवणात्, मायाशब्दस्य च मिथ्यार्थत्वात् मिथ्योपादानकस्य च सत्यत्वायोगाद्विश्वमिथ्यात्व सिद्धमिति । तदपि स्तनन्धयकथितम् । तत्र तावत् श्रुतौ वचनव्यक्तिर्विपर्यासिता । न हि तत्र प्रकृत्यनुवादेन मिथ्यात्व विधीयते, अपि तु मायानुवादेन प्रकृतित्वम् । तु शब्दोपि तस्यैवानुकूलः । पूर्वस्मिन्वाक्ये 'अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः,' इति प्रसक्तयोर्मायामायिशब्दयोरर्थमविदुषस्तज्ज्ञानोपजननायैव हि " माया तु प्रकृतिं विद्यान्मायिन तु महेश्वर " मित्युच्यते । अतो मायेत्युक्ता सा जगदुपादानतयोपनिषत्प्रसिद्धा प्रकृतिरेव। यश्च मायीति निर्दिष्ट स च प्रकृत्यधिष्ठाता चिदचिच्छरीरको महेश्वर एवेति वचनव्यक्ति. ।

यत्प्रपत्तिं विने ति । अनेन भगवत्प्रसादैकनिवर्त्यतया ज्ञाननिवर्त्यत्वा भावप्रतीतेर्जगदुपादानस्य मिथ्यात्वाभावसिद्ध्या वादार्थस्संगृहीत । मायान्त्विति । प्रकृतिशब्देन जगदुपादान निर्दिश्य तस्य मायाशब्देन मिथ्यात्वं विधीयत इति भावः । विपर्यासि तेति । स्वयेात शेष. । तुशब्द इति । तुशब्दो यच्छब्दवदुद्दश्यत्वसूचक इति भावः । मायानुवादेन प्रकृतत्व किमर्थं विधीयत इत्य त्राह पूर्वस्मिन्नि ति । इति वचने ति । इत्यर्थप्रतिपादिका वचनव्यक्तिरित्यर्थ ।

स्वरूपेऽपि यच्छब्दाद्यभावेऽपि प्रथमचरमभावेनोद्देश्योपादेयव्यवस्था सिद्धा। तथा ह्याहु —" यद्वृत्त(च्छब्द)योगः प्राथम्यमित्याद्युद्देश्य-लक्षण " मिति। अस्त्वेव वचनव्यक्ति, तथापि प्रकृतेर्मायाशब्द वाच्यत्वसिद्धेर्मिथ्यात्वमपि सिध्यतीति चेन्न,—मायाशब्दस्य मिथ्यार्थपरत्वेऽप्युपचारतोपि तत्र तत्प्रयोगसम्भवेन वाच्यत्वनिर्णयासिद्धेः। न हि प्रकृतेर्मायाशब्दवाच्येति श्रुत्यर्थः, अपि तु अत्र मायशब्देन प्रकृति-र्विवक्षितेति। तथापि मुख्यार्थे बाधकाभावादुपचारवृत्तिरनुचितेति चेत्? न, प्रकृतित्वान्यथानुपपत्त्यैव बाधात्। कारणसत्यत्वं बहुशो मृद्दृष्टान्तादिभिर्निदर्शितम्। " अचेतनापरार्था च नि

यच्छब्दाद्यभावेऽपी ति। तुशब्दाभावोऽभ्युपगत। मिथ्यार्थ मिथ्यात्व प्रवृत्तान मित्तमि त भाव.। अपी त्यभ्युपगमस्य मायाश ब्यार्थ इति भावः। तत्र प्रकृतौ। मायाशब्देन ति। मायाशब्दे प्रकृतिरिति योजना।

ननु मायाशब्देन, मायाशब्दविवक्षितत्वोक्तौ लक्षणं स्यात विपर्यास एवेति चेन्न,—अनुवादतात्पर्ये अवगते वाक्यतात्पर्यानुसारेण अदोषत्वात्।

ननु मा भूद्विपर्यास, नापि लक्षणा, मायाशब्दमुख्यार्थोद्देशेन प्रकृतित्व विधीयतामिति चेन्न,—पदव्याख्यानरूपताया 'विद्या' दिति पदस्वारस्यादि द्धत्वात्। अस्त्वेव व्याख्यानरूपता, अथापि मायाशब्दा मुख्यवृत्त्यव प्रकृतौ वर्तते, मुख्यार्थश्च मिथ्यैवेति शङ्कते तथापी ति। अनिवचनीयनिरासाभिप्रायेण वा शुक्तिरजतादेरुपादानत्वाभिप्रायेण वाह प्रकृतित्वे ति। तदभ्युपगमेन प्याह कारणे ति। मृद्दृष्टान्तेन कार्यकारणयोरभदः प्रतीयते, एवञ्चेदमर्थस्य सदभेदः प्रकृतेर्विशेषणतया सच्छब्दवाच्यत्व एव सम्भवति, न च सच्छब्द बाधो युक्त इति भावः। निदर्शित मिति। निदर्शनेन समर्थितमित्यर्थ.। 'मृत्तिकेत्येव सत्य' मित्यादे. कार्यस्य सत्वप्रतिपादनपरत्व हि [illegible]

विक्रिया । " " गौरनाद्यन्तवती सा जनित्री भूतभाविनी " इत्यादि भिः प्रकृतिनित्यत्वसिद्धेश्च तन्मिथ्यात्वंनिरस्तम् । सत्यत्वेपि केन मिथ्यात्वोपचारः किमर्थश्चेति चेत् ? अस्थिरतरभोगप्रसाधकत्वेन स्वप्नार्थ तुल्यतया जिहासितत्वज्ञापनार्थ इति मन्वीथाः । न च मायाशब्दो मिथ्यार्थवाची, विचित्रसृष्ट्युपकरणभूतार्थाभिधायित्वात् । सर्वप्रयोगानुगतनिमित्तसम्भवे नानारूपार्थोपादानस्य निरस्तत्वात् । न च मिथ्यार्थेष्वेव तत्प्रयोग येन तत्रैव तच्छक्ति. कल्प्येत, अपि तु सत्येष्वपि यथ —" यावन्त. पासवो भूमे. सरूपाता देवमायये " ति । न हि

मेथ्यात्ववर्णनमित्यर्थः । गौरि त्यादि । मिथ्यात्वे ज्ञाननिवर्त्यत्वं । केनेति । उपचारनिमित्तगुणविशेषप्रश्नः । अस्थिरतरभोग ग. । मायाशब्दस्य मिथ्यार्थवाचित्वमभ्युपगम्योक्तम् । इदानीं नचे ति । मिथ्यात्व न प्रवृत्तिनिमित्त, किन्तु विचित्रसृष्ट्युपकरण 'तस्मा उक्थ्यमेव प्रायच्छत , तन्निर्मायमभूत्, महान् यज्ञो हि ात्, ' इति यज्ञे मायाशब्दः प्रयुक्त , स च नें मिथ्यार्थः, यज्ञस्य ाद्धेः, मिथ्यात्व च न सप्रतिसम्बन्धिकम्, अतः ' तस्य मायासी ' त्वसृष्ट्युपकरणत्वेन यज्ञस्यावस्थानमेव वाच्यमिति भावः । क्वचित्तत्प त्तकत्वेन प्रयोग., क्वचित्तु तत्पुरस्कारेणैव लक्षणया गौण्यावा, एवमनुगमो विवक्षित', एतच्चोत्तरत्र स्पष्टीभविष्यति ।

ननु ऐन्द्रजालिके गजे मायागज इति प्रयुज्यते, तस्य गजस्य मिथ्यात्वात्तत्र च मायाशब्दप्रयोगात् मिथ्यात्वमप्यर्थस्यादित्याह सर्वप्रयोगे ति ।

नन्वनुगतप्रवृत्तिनिमित्त न कल्पनीयं ायाशब्दस्य सत्ये प्रयोगाभावात् मिथ्यार्थ एव हि मायाशब्द प्रयुज्यत इत्यत्राह नचे ति । यद्येवं क्वचित्प्रयोग श्रित्य प्रयोगान्तर निह्नूयते, तर्हि सत्ये प्रयोगमाश्रित्य मिथ्याप्रयोग एव निह्नूय ते प्रतिबन्ध्यभिप्रायेणाह अपि तु सत्येष्वेवे ति । स्यादेवम्प्रतिबन्दी, यदि स्यादाह यथे ति ।

मिथ्याभूतस्य कस्यचित्संख्यानकरणत्वं प्रतीमः। "माया वयुनं ज्ञान" मिति नैघण्टुकानुसारात् अर्थौचित्याच्च ज्ञानविषयत्वमेव तत्रोचितम्। तथा " मायया सततं वेत्ति प्राणिना तु शुभाशुभ " मिति च। तथा " तेन मायासहस्र तच्छम्बरस्याशुगामिना। बालस्य रक्षता देहमेकैक श्येन सूदित " मिति। न हि मिथ्याभूतस्य कस्यचिच्छस्त्रच्छेद्यत्वं, अपि तु तत्वोपदेशादेव तन्निवृत्ति.। तथाप्यनेकशक्तिकल्पनाया गौरवात्तत्रौपचारिकोऽयं प्रयोग इति चेन्न,—विपर्यासस्य दुर्वारत्वात्। प्रसिद्धिप्रकर्षान्मिथ्यात्वे[र्थे] शक्तिरङ्गीक्रियत इति चेन्न;—मिथ्यापर्याय-त्वेन मायाशब्दस्य प्रसिद्धेरेवाभावात्। न हि स्वदृग्दोषादिमात्रमूलभ्रम विषयेषु शुक्तिरजतरज्जुसर्पादिषु मिथ्याशब्दप्रयोगविषयेष्वपि क्वचित् कदाचिदपि मायाशब्दप्रयोगो दृष्टचरः। अतो यत्रेन्द्रजालादिमूलभ्रा-न्तिविषयेषु मायाशब्दप्रयोगः तत्रापि मिथ्यात्वमन्तरेण निबन्धनान्तर मस्तीति निश्चीयते। तच्च किमिति निरूप्यमाणेष्वैन्द्रजालिकवदिन्द्रजि दादौ मायाविशब्दप्रयोगात् तत्र चालीकत्वस्याविवक्षितत्वात्

ननु न वय प्रयोग निह्नुमहे, अपित्वनेकशक्तिकल्पनागौरवमयेन अनुगतपूर्वृत्तिनिमित्तं न कल्पनीय किन्तु मिथ्यात्वमेव पूर्वृत्तिनिमित्तं सत्ये प्रयोग औपचारिक इत्येव वक्तव्यमिति गूढाभिसन्धिश्शङ्कते तथापी ति। विपर्यासस्ये ति। प्रतिबन्दीमात्रेणापि मिथ्यार्थकत्वनिश्चयप्रतिबन्धात् पूर्वपक्ष्यभिमतान्यथानुप-पत्तिर्न सिध्यतीति भाव.। अभिसन्धिमुद्घाटयश्लोदयति प्रसिद्धी ति। मिथ्यात्वं प्रवृत्तिनिमित्ततया विवक्षितम्। प्रसिद्धेरेव ति। प्रसिद्धिरेव नास्ति, कुतः प्रकर्ष इत्येवकाराभिप्राय.। प्रसिध्यभावमुपपादयति नही ति। स्वदृक्दोषे ति। ऐन्द्र जालिकव्यावृत्तिः। नन्वैन्द्रजालिके मिथ्यात्वे प्रसिद्धिरस्त्येवेत्यत्राह अतो यत्रे ति। शुक्तिरजतादिषु मिथ्यात्वे सत्यपि प्रयोगाभावात् अन्यत्र प्रयोगे न तन्निब-न्धन किन्वन्यदेवेत्यर्थः। अलीकत्वस्ये ति। परमते मिथ्यात्वे सत्यपि लौकि-

सत्यस्य वाऽसत्यस्य वा विचित्रार्थस्य सृष्टौ प्रकाशने वा सामर्थ्यवानि त्येव मायाविशब्दार्थः, तच्च सामर्थ्यं सत्यो मन्त्रौषधादिरेव, तदनुब न्ध्यतीन्द्रियशक्तिविशेषो वा ततश्च मायाजन्यज्ञानविषयतया मिथ्याभू तेष्वप्यर्थेषु लक्षणया मायाशब्दप्रयोग उपपद्यते ।

मायोत्थज्ञानवेद्येर्थे युक्ता मायेति लक्षणा ।
मिथ्यासम्बन्धरहिते नास्त्रादौ सत्यकारणे ॥

न हि पर्वतसमुद्रपावकादिहेतुष्वस्त्रविशेषेषु, मिथ्यासम्बन्धगन्धरहि तेषु मायाशब्दोपचारस्सम्भवति । मिथ्यार्थसादृश्यात् तत्र गौणोऽयं प्रयोग इति चेन्न,—विपरिवर्तप्रसङ्गस्य प्रागेवोक्तत्वात् । लक्षणापेक्षया गौणवृत्तेर्जघन्यत्वाच्च । मुख्यलक्षणावृत्तिभ्यां प्रयोगनिर्वाहे सम्भवति मुख्यगौणवृत्तिभ्यां निर्वाहस्यानुचितत्वात् । अतो विचित्रसृष्ट्युपकरण-भूतार्थविशेष एव मायाशब्दशक्तिः ।

कैस्तदज्ञानात् मिथ्यात्वस्य साधारणत्वाच्चेति भावः । सत्यस्य वाऽसत्यस्येवे ति । सत्यासत्याभ्या याथासख्यन सृष्टिप्रकाशनयोरन्वयो न विवक्षितः, प्रवृत्तिनिमित्त द्वित्वप्रसङ्गात्, किन्तु उभयोरुभयत्राप्यन्वयः । सत्यस्य वाऽसत्यस्य वा सर्गे सामर्थ्यवानिति परमते, सत्यस्यासत्यस्य वा प्रकाशेन सामर्थ्यवानिति सर्वसाधार-णम्, क्वचित्प्रकाशने सामर्थ्यमर्थसृष्टिद्वारा; यद्वा याथासङ्ख्येनैवान्वयः, विचित्र सर्गकरत्वविचित्रप्रकाशकत्वान्यतरसामर्थ्य प्रवृत्तिनिमित्ततया विवक्षितम् । तस्मात् सामर्थ्यविशेषो मायाशब्दप्रवृत्तिनिमित्तमिति भावः । किञ्च मायाशब्दस्य मिथ्या र्थकत्वे शस्त्रादौ प्रयोगोऽनुपपन्न इत्याह मन्त्रौषधे ति । मिथ्यासम्बन्धराहित्ये-हेतुः सत्यकारण इति । सत्यस्य कारणम् । नही ति । समुद्रशब्दो महाजलपरः । लक्षणापेक्षये ति । 'लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणते' ति वार्तिकेन मुख्यलाक्षणिकाभ्या उभाभ्या व्यवधानोक्तेः । लक्षणाया मुख्यव्यवधानमात्रमेव मुख्यगौणवृत्तिभ्या मिति उपलक्षणम् । ऐन्द्रजालिकमन्त्रादौ मिथ्यार्थसम्बन्धा-

नन्वेवमपि सर्वप्रयोगानुगत निमित्त न सिध्यति, 'मेघोदय स्सागरसन्निवृत्ति' इत्यारभ्य विष्णोर्विचित्राः प्रभवन्ति माया' इति प्रयुज्यते, तथा देवमायेव निर्मिता 'सख्याता देवमायया' 'मायया सततं वेत्ती' त्यादिषु निर्दिष्टनिमित्तासिद्धेरिति चेन्न!—आद्ययोर्माया कार्यतया लक्षणयापि प्रयोगोपपत्ते. । मुख्यत्वेऽपि तत्र न दोषः, मेघो दयादीनामपि विचित्रवर्षादिसृष्टुरीश्वरस्य तत्तत्सृष्ट्युपकरणत्वाविशेषात् । 'देवमायेव निर्मिते' त्यत्रापि स्त्रीरूपेण परिणता देवानां मायेत्यर्थ. । न चात्र कस्यचिदपि शब्दस्य लक्षणा, अभूतोपमामात्रस्य विवक्षितत्वात्। 'संख्याता देवमायये' त्यत्र तु निखण्ड्वनुसारादौचित्याच्च ज्ञानमेव विवक्षितम्। तथापि घटज्ञानमित्यादिषु घटमायेति प्रयोगादर्शनादाश्र्यावहत्वमात्रेण तत्र मायात्वोक्ति. । नैघण्डुकाश्च शक्तिविषयमनादृत्य

लक्षणासम्भवात्। स्त्रीरूपेणे ति। निर्मिता देवाना विचित्रसर्गशक्तिरिव तिष्ठती त्यर्थः। मात्रेण ति। गुणवृत्तिरेव न मुख्यवृत्ति, अतो नानेकार्थत्वमिति भाव।

ननु भवद्भिरपि गौणवृत्त्या निर्वाहस्य स्वीकारात् कथ गौणवृत्त्या निर्वाहः परस्य दोषतयोद्घाटित इति चेन्न,—गत्यन्तराभावेनात्र गौणी वृत्तिरुभाभ्याम ङ्गीकार्या, तथा च यत्र मुख्यलक्षणाभ्यामेव निर्वाहस्तुकरः, तत्रापि त्वया गौणवृत्ति रङ्गीकार्या, इति वैषम्यस्याभिप्रेतत्वात्।

एतेनेदं निरस्तम्। मिथ्यापरिणाम्यज्ञान मायाशब्दार्थ., ऐन्द्रजालिकग जतुरगादौ मायाशब्दप्रयोगो मृद्घट इति वत्तादात्म्यात्, ऐन्द्रजालिकमणिमन्त्रादौ मायाशब्दप्रयोगो मायाक्षोभकत्वाल्लक्षणया, अस्त्रादौ अघटित कार्यजनकत्वगुणयोगात्, एकत्रैवाज्ञाने साधारणभ्रमानुकूलशक्तिनिमित्तको मायाश ब्दप्रयोगैः, तेन ऐन्द्रजालिके मायाविशब्दः असाधारणभ्रमानुकूलशक्तिनिमित्त', तत्रै वाज्ञानशब्दः, तेन शुक्तिरजतादौ न मायाशब्दप्रयोग इति। इन्द्रजिदस्त्रादौ गौ णवृत्त्यङ्गीकारात् तत्कार्ये सत्यपर्वतपार्वकादौ कथञ्चिदपि प्रयोगासम्भवात्, शुक्ति-रजते मायाशब्दप्रयोगप्रसङ्गाच्च॥

प्रयोगविषयमात्रं संगृह्णन्तीति बहुलमुपलभ्यते । सम्भवति चास्मदुक्तं मुख्यनिमित्तमत्रापि, इतराशक्याश्चर्यतरभूमिपांसुसख्यानसर्वप्राणिशुभाशुभविवेकादिहेतुत्वात् । अस्तु वा ज्ञानपर्यायत्वं क्वचिन्मायाशब्दस्य, तथापि तद्व्यतिरिक्तविषयेषु पूर्वोक्तमेव निमित्तम् । न हि गत्यभावात् क्वचिच्छक्तिभेदकल्पनेत्यत्रापि तथा क्लृप्तिः, गौर्बाह्लीक इत्यत्रापि शक्त्यन्तरकल्पनिप्रसङ्गात् । किञ्च मिथ्यारूपमायोपादानत्वेपि तदुत्पन्न

ननु साधारणभ्रमानुकूलशक्तिनिमित्तकत्वात् मायाशब्दस्य न तत्र मायाशब्दप्रयोग इति चेन्न,-एवमपि कारणतादात्म्यप्रयुक्तप्रयोगस्यानिवार्यत्वात् । न च साधारणभ्रमजनकत्वशक्तियोगोऽज्ञानशब्दप्रवृत्तिनिमित्तम्, ज्ञाननिवर्त्यत्वस्य तन्निमित्तत्वोक्तिविरोधात् । न च साधारणभ्रमानुकूलशक्तियोगो मायाशब्दप्रवृत्तिनिमित्त, मन्त्रादिसाधारणतया तत्र गौणवृत्युक्तिविरोधात् । न च भ्रमपरिणामित्व विवक्षितमिति वाच्यम् , अस्मादौ त्वयोक्ताघटितकार्यजनकत्वस्यैव लाघवेन मायाशब्दप्रवृत्तिनिमित्तत्वसम्भवात् । इदमेव च प्रागुक्त विचित्रकार्यजनकत्व मन्त्रौषधाद्यतिरिक्तस्य त्वदभिमतस्य परिणामिनोज्ञानात् न तत्र लोके मायाशब्दप्रयोगसम्भव. । एतेन मायाक्षोभकत्व मन्त्रादौ प्रयोगनिमित्तमित्यपि निरस्तम् । ' यज्ञो हि तस्य मायासी ' दिति सप्रतिसम्बन्धित्वप्रतीतेश्च । विचित्रसृष्ट्युपकरणमर्थः । बहुल मिति । ' अध्वर्यूद्गातृहोतारो यज्ञस्सामर्ग्विदः क्रमात् । ' इत्यमरकोशे तत्तद्वेदोक्तकार्यकारिषु चतुर्षु चतुर्षु अध्वर्व्वादयः शब्दा अभिधानतयोक्ताः पूर्वतन्त्रे ' उद्गातृणा चमसभक्ष ' इत्यत्र उद्गातृशब्द एकत्रैव मुख्य', उद्गातृप्रस्तोतृप्रतिहर्तृसुब्रह्मण्येषु प्रवचनान्वयाद्रूढिपूर्वकलक्षणेत्युक्तम् । एवमध्वर्व्वादिष्वपि । तथा ' दर्शश्च पूर्णमासश्च यागौ पक्षान्तयोः पृथ ' गिति दर्शपूर्णमासशब्दौ कर्माभिधानतयोक्तौ, पूर्वतन्त्रे दर्शपूर्णमासशब्दाभ्या कालयुक्तकर्मलक्षणेत्युक्तम्, तथा पृषदाज्यशब्द. नामतया नामपाठे उक्त', पूर्वतन्त्रे पृषच्छब्दश्चित्रतांवोची, दध्ना चित्रितत्वात् सदध्याज्यं योगवृत्त्या पृषदाज्यमित्युच्यत इत्युक्तम् । एव कल्पकासिद्धिरुक्ता । इदानीं कल्पकत्वासिद्धिमाह । किंचे ति । उपादानत्वे ति।

मात्रस्य प्रपञ्चस्य मिथ्यात्व न सिध्यति, 'न विलक्षणाधिकरण' न्यायेन विलक्षणादपि विलक्षणकार्योत्पत्तिसम्भवात्। असत्यात्सत्योत्पत्ते र्युष्माभिरेव स्वीकारात्। असत्यस्य सत्यनिमित्तत्वमात्रमुदाह्रियते, न तु सत्योपादानत्वमिति चेन्न,—तुल्यन्यायत्वात्। नह्यस्ति राजशासन मिथ्याभूतेन निमित्तेनैव भाव्य न तूपादानेनेति। उपादानोपादेययोस्तादात्म्यादुपादानस्य मिथ्यात्वे कार्यस्य सत्यत्वे च सत्यमिथ्यार्थयोरेकताप्रसक्तिरिति चेन्न,—उपादानत्वोपादेयत्वादिवत्सत्यत्वमिथ्यात्वयोः क्रमेणाविरोधात्। नन्वेकस्य पूर्वापरीभूतावस्थाभेदवत्त्वमुपपन्नम्, एतावता कथं स्वरूपतो मिथ्याभूतमुत्तरस्मिन् काले सत्यं भवदिति चेन्न,—पूर्वस्मिन् काले स्वरूपेणासत एव द्रव्यस्यावस्थाविशेषस्येवोत्तरकालेसत्त्ववदविरोधात्। तयोरुत्तरकालवर्तित्वेन सत्त्वं पूर्वकालेप्यस्तीति चेन्न,—तस्य तत्कालेपि प्रामाणिकत्वमात्रस्यात्रापि समानत्वात्। तत्कालससर्गविवक्षायां विरोधात्। अत उपादानमिथ्यात्वे श्रुतिसिद्धेपि न कार्यमिथ्यात्व

उपादानोपादेयत्वप्रयोजकधर्मवदित्यर्थः। उपादानत्वप्रयोजको धर्मः पिण्डावस्था उपादेयत्वप्रयोजको धर्मो घटावस्था। पूर्वस्मिन्काल इति। अत्र सत्वशब्देन मिथ्यार्थनिष्ठतया परैरुक्तं विद्यमानत्व विवक्षितम्। कार्यस्य पूर्वं सत्वे कार्यत्वानुपपत्तेः असत्त्वे च सत्वासत्वयोर्व्याघातेनानन्तर सत्वानुपपत्तेश्च कार्य मिथ्या, मिथ्यात्वे च व्याघाताभावात् पूर्वमसतोपि अनन्तर विद्यमानत्वं युज्यत इति हि परैरुच्यते। एव चासत्त्वमिथ्यात्वयोरिव सत्त्वमिथ्यात्वयोरपि न व्याघात., अन्यथाऽसत्त्वमिथ्यात्वयोरपि व्याघातप्रसङ्गात्, किञ्च कार्यकारणयोर्भेद. परैरङ्गीकृत एव, ततश्चभेदाभेदसत्यत्वमिथ्यात्वाभ्या मिथ्यार्थस्य सत्योपादानत्वमुपपद्यत एवेति भावः। तत्कालेपि प्रामाणिकत्वे ति। तद्गोचरप्रमाणस्य तत्कालीनत्वं विवक्षितम्। यद्येव मिथ्यार्थस्य सत्योपादानत्वसम्भव, तर्हि 'असद्वा इदमग्र आसीत्ततो वै सदजाय' तेति श्रुत्यनुसारात्। मिथ्यार्थस्य सत्योपादानत्वं भवद्भिः कुतो नेष्यत इत्यत्राह उपादाने ति। दृष्टान्तेन उपादानोपादेययोरैक्यप्रतिपाद

सिद्धिः । उपादानसत्यत्वमेव च सद्विद्यादिष्वसत्कार्यवादनिरासपूर्वकं 'मृत्ति केत्येवसत्य' मिति 'सन्मूलास्सोम्येमा' इत्यादि भिरभिधीयते । एवमु— पादानमिथ्यात्वेपि कार्यसत्यत्वाविरोधोपपादनन्यायेन कार्यमिथ्यात्वेप्युपा दानसत्यत्वाविरोधोऽप्युपपादित एवेति मिथ्याभूतस्य मिथ्याभूतमेवोपा दान भवितुमर्हतीत्यनिर्वचनीयाज्ञानकल्पनमपि निरस्तमिति ॥

इति शतदूषण्यां मायोपादानत्वान्यथानुपपत्तिभङ्गः

॥ चतुःपञ्चाशो वादः ॥

नात् उपादानस्य सत्यत्वकण्ठोक्तेश्च सत्यस्यैवोपादानत्वम् । असद्वेत्यत्र स्थूलावस्था भावो विवक्षित इति भाव. । प्रसङ्गादिह एव मिति ।

इति श्रीवाधूलकुलातिलकश्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्येन

तदेकदैवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्ध

महाचार्यपरनामधेयेन रामानुजदासेन विरचिताया

शतदूषणीव्याख्याया चण्डमारुताख्यायां

मायोपादानत्वान्यथानुपपत्तिर्नाम

चतु पञ्चाशः स्कन्ध ॥५४॥



॥ श्रीरस्तु ॥

॥ पंचपंचाशो वादः ॥

बालः क्रीडनकैरिव स्थिरचरैः स्वेनैव निर्वर्त्तितै
स्सङ्कल्पैकवंशवदो विहरति ब्रह्मादिभिर्जन्तुभिः ।
जिज्ञास्याय मुमुक्षतामिह पुनः प्राप्याय मुक्तात्मनां
लक्ष्मीकौस्तुभलक्ष्मणे नम इदं तस्मै परब्रह्मणे ॥

यदाहुः—प्रत्यक्षसिद्धं श्रुत्यादिसिद्धं च सर्वं कार्यं मिथ्यैव, विकल्पासहत्वात् । तथाहि—किं कारणेन कार्यं सम्बद्धमारभ्यते, उतासम्बद्धम् ? आद्ये सम्बन्धाश्रयतया द्वयोरपि सत्त्वाविशेषात्सव्येतरविषाणयोरिव किं कस्य कारणं कार्यं वा ? असम्बद्धत्वे तु असम्बन्धाविशेषात्

बालः क्रीडनकै रिति । स्वेनैवे ति । कार्यानुपपत्तिपरिहारस्य विवक्षितत्वात्, निर्वर्तितै रिति । विवर्तव्यावृत्तेः, संकल्पैकवंशवद् इति परामिमतविद्यावशत्वाभावप्रतीतेः, मुमुक्षतां प्राप्याये ति सत्ययोरेव मोक्षब्रह्मप्राप्त्योस्साध्यत्वप्रतीतेश्च वादार्थः संगृहीतः ।

ननु बन्धविस्रंसफलकर्तृव्यापारो यदा धातुना विवक्ष्यते तदा मुञ्चति वत्समिति भवति, बन्धविश्लेषलक्षणकर्मव्यापारो यदा धातुना विवक्ष्यते तदा कर्तुरपि वत्सस्य कर्मवद्भावविधानात् मुच्यते वत्सः स्वयमेवेत्यात्मनेपदमेव भवति, एवञ्च 'पशवः पाशिताः पूर्वं परमेण स्वलीलया । तेनैव मोचनीयास्ते' इति ईश्वरस्यैव मोचकत्वात् बन्धविश्लेषलक्षणकर्मव्यापारविवक्षयैव जीवे मुमुक्षतेः प्रयोगो वाच्यः, तत्र च कर्मवद्भावादात्मनेपदमेव स्यात् अतः कथं शत्रन्तप्रयोग इति चेत् ? अन्तर्भावितण्यर्थतया कर्तृव्यापारप्रयोजकव्यापारवति [illegible] प्रयोगात् ; स च व्यापार उपासनम्, तत्र [illegible] व्याप्येत्यर्थः । मोचकव्यापारप्रयोजकव्यापारविवक्षायाश्च ज्ञानानिवर्त्यत्वाभावात्

सर्वं सर्वस्य कारणं भवेत् न वा किञ्चित् कस्यचित् । तथाभिव्यक्तिवादिभिरुक्तम्—" असत्वान्नास्ति सम्बन्धः कारणैस्सत्त्वसङ्गिभिः । असम्बद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थिति " रिति । तथा कार्यं कारणाद्भिन्नमभिन्न वा ? पूर्वत्र भिन्नत्वाविशेषात्सर्वं सर्वतः स्यात्. नवा कुतश्चित् । उत्तरत्रात्माश्रयप्रसङ्गः । नियतपूर्वसत्कारणं नियतोत्तरसत्कार्यमिति विभजसे, तथाच स्वप्रागभावकाले स्वयमेव नास्तीति कथं ब्रूयाः । तथा विकृताद्विकृताद्वा उपादानात् कार्योत्पत्तिः ? पूर्वत्रापि विकृतिरपि विकृताद्विकृताद्वेति विकल्पेनानवस्था । उत्तरत्राविकृतत्वाविशेषात् यावदुपादानसत्त्वमुपादेयारम्भप्रसङ्ग. । सहकारिसम्बन्धादिति चेन्न,—तत्सम्बन्धोत्पत्तिरपि विकृतस्य वा अविकृतस्य वेति विकल्पदुस्थत्वात् । अस्तु च विकृतं कार्यारम्भकम् । तत्र किं रुचकादिविकृतिविशिष्टं हेमादि स्वस्तिकारम्भकम्, उत रुचकादिमात्रं, अथ हेमादिमात्रमिति ? नाद्य., स्वस्तिके रुचकाश्रुतिविशिष्टहेमानुपलम्भात् । अत एव न द्वितीय., हेमानुवृत्तिदर्शनविरोधाच्च । न च तृतीय., आरम्भकहेमातिरिक्तादर्शनात्, तत्प्रत्यभिज्ञानाच्च । वदन्ति हि स्वस्तिकमपि तदेवेदं हेमेति । न च व्यवस्थितबुद्धिशब्दसख्यापरिमाणकार्यकारणकालादिभेदात्पिण्ड

मिथ्यात्वाभावे तात्पर्यम् । किञ्चि दिति । ' कारण भवेदि ' त्यनुषङ्गः । सर्वतस्त्या दिति । सर्वं सर्वस्य कारण स्यादित्यर्थ । नवा कुतश्चि दिति । ' किञ्चित्स्या दिति शेष । दोषतामाह नियते ति । सहकारिसम्बन्धा दिति । अविकृतात्कार्योत्पत्तिरिति शेषः ।

नन्वस्त्यतिरिक्तस्वस्तिकोपलम्भ इत्यत्राह तदि ति । तदुपपादयति वदन्तिही ति । बुद्धी ति । एकत्र तन्तव इति बुद्धि परत्र पट इति बुद्धिरिति बुद्धिभेद , तथैव शब्दभेदः, तन्तुषु बहुत्व पट एकत्वमिति सख्याभेद', सूक्ष्मत्व महत्वमिति परिमाणभेद., तन्तुषु कारणत्व पटे कार्यत्वमिति भेद., तन्तूनाम्पूर्व

घटयोर्नष्टत्वानष्टत्वभेदात्कारकव्यापारवैयर्थ्यप्रसङ्गान्नित्यानित्यविभागानुपपत्तिप्रसङ्गाच्च कारणातिरिक्तकार्यसिद्धिरिति वाच्यम्,—रज्ज्वाद्यधिष्ठानसर्पभूदलनाबुधारादिबुद्धिशब्दान्तरादिभिरनैकान्तिकत्वात्। नचाबाधितत्वे सतीति विशेषणीयम्,—विशेषणासिद्धेः; प्रत्युत तन्निषेधात् विगीता बुद्धिशब्दान्तरादयो भ्रान्तिसिद्धभेदावलम्बनाः, दुर्निरूपबुद्धिशब्दान्तरादित्वात्, कम्बुकलधौतबुद्धिशब्दान्तरादिवत्; मध्येऽप्यसत् कार्यं, आद्यन्तयोरसत्वात्, शुक्तिकारजतवत्, विवादगोचरो भेदव्यवहारः स्वविषयसर्वभेदानुगतैकवस्तुमात्रावलम्बनः, भेदव्यवहारत्वात्, रज्ज्वादिविषयसर्पभूदलनादिभेदव्यवहारवदित्यादिभिः। नचैषां प्रत्यक्षबाधः, तर्कानुगृहीतानुमानात्तस्य दुर्बलत्वात्। अन्यथा ज्वालैक्यप्रत्यक्षाविजयप्रसङ्गात्। किंच यदि कारणे पूर्वं कार्यमसत्, कथं तेन जनयितुं शक्यम्, न हि प्रलयोदकावसिक्तेष्वपि प्रस्तरेषु अङ्कुराः प्ररोहन्ति। न च पीते विश्वकर्मणापि नीलमुत्कीर्यते। अथ पूर्वमेव तत्र सत् सिद्धत्वादेव न साध्यं स्यात्। तत एव कारकव्यापारनैरर्थ्यं च।

काले सत्त्व पटस्योत्तरकाल एवेति कालभेदः। नित्ये ति। आत्मा नित्यः घटादेकमनित्यमिति विभागो नित्यप्रकृत्यभिन्नत्वेन स्यादित्यर्थः। रज्ज्वादी ति। अन्तुपटगोचरबुद्धिशब्दान्तरादयस्तत्त्वतोभिन्नविषयाः, बुद्धिशब्दान्तरत्वात्, परसंख्यापरिमाणे तत्वतो भिन्नाश्रिते, सख्यापरिमाणान्तरत्वादित्याद्यनुमान विवक्षितम्। अत्र रज्ज्वाद्यधिष्ठानसर्पादिबुद्धिशब्दान्तरादिभिरनैकान्त्यमित्यर्थः। असिद्धे रिति। तदिग्धासिद्धेरित्यर्थः। तन्निषेधा दिति। अत्राधितत्वनिषेधादित्यर्थः। एतस्य हेत्वादिभि रित्यनेनान्वयः। किं बुद्धेर्बाधो भ्रमत्वज्ञानं उत विषयापहार इति विकल्पमभिप्रेत्याद्येऽबाधितत्वाभावमाह विगीते ति। भिद्यत इति भेदो घटार्थः द्वितीय आह मध्येऽपी ति। तर्के ति। सम्बन्धासम्बन्धविकल्पानुपपत्या

व्यङ्ग्यत्वमस्त्विति चेन्न,—व्यक्तिसदसद्भावयोरप्यनुयोगावतारात् । व्यक्तेरपि व्यंग्यत्वेऽनवस्थानात्, नित्यव्यक्तत्वे घटादेरपि नित्यव्यक्तिप्रसङ्गात् । किञ्च भावादभावाद्वा घटाद्युत्पत्तिः नाद्यः, अनुपमृदिलात्पिण्डादेर्घटाद्युत्पत्तेरदर्शनात् । न द्वितीयः, घटादेरप्यभावात्मकत्वप्रसङ्गात् । एवमन्येऽपि परश्शता विकल्पास्सुलभाः । एवं जन्मनि निरस्ते विनाशोऽपि निरस्त एव, तुल्यन्यायत्वात् । सदसद्यावृत्तविनाशोपलब्ध्ययोगाच्च तदुभयकोटिविलक्षणतया मिथ्यात्व स्वध्यवसानम् । स्मरन्ति च, " अनाशी परमार्थश्च प्राज्ञैरप्युपगम्यते । तत्तु नाशि न संदेहो नाशि द्रव्योपपादित " मिति । " यच्चान्यथात्वं द्विज याति भूयो न तत्तथा तत्र कुतोहि तत्त्व " मिति च । श्रुतिश्च तदुपबृंहिता " वाचारम्भणं विकारो नामधेय " मित्यादिका । न च " मृत्तिकेत्येव सत्य " मित्यादिना ब्रह्मव्यतिरिक्तस्य कार्यभूतस्यापि मृत्तिकादिद्रव्यस्य सत्यत्वमिह कण्ठोक्तमिति भ्रमितव्यम्, भिक्षुपादप्रसारणन्यायेन व्यावहारिकसत्य-

---

दिस्तर्कः । व्यक्तिसदसद्भावयो रिति । पूर्वमेवाभिव्यक्तेः सत्त्वे कारकव्यापारवैयर्थ्यादि, असत्त्वे सर्वकालासत्त्वोत्पत्त्यसम्भवादि ।

नन्वभिव्यक्तिः प्रागेव सती, सैव कारकव्यापारेणाभिव्यज्यत इत्यत्राह व्यक्ते रिति । नित्ये ति । तथा च कारकव्यापारवैयर्थ्यमिति भावः । एवं जन्मनी ति । घटः किमिदानीं सन् उतासन् ? आद्ये सतः पश्चादसत्त्वानुपपत्ते र्विनाशानुपपत्तिः, द्वितीये विनाशकव्यापारवैयर्थ्यम्, प्रागेवासत्त्वादित्यर्थः । एव मसम्भावितोत्पत्तिविनाशत्वात् उत्पत्तिविनाशवत्त्वेन भासमान कार्य मिथ्येत्युक्तम् अत. सदसद्यावृत्तविनाशोपलब्धियोगान्यथानुपपत्या च मिथ्यात्वमध्यवसीयते इत्याह सदस दिति । विनाश उत्पत्तेरप्युपलक्षणार्थः । 'कार्यानुपपत्तिलक्षणो मिथ्यात्व तर्क. श्रुतिस्मृतिन्यायमप्यनुशात इत्याह स्मरन्तिचे त्यादि ।

त्वानुपमर्देन घटादिमित्थ्यात्वप्रतिपादने तात्पर्यात्। अन्यथा दार्ष्टान्तिक प्रतिकूलत्वप्रसङ्गात्। मृत्तिकातिरेकितद्विकारमित्थ्यात्ववन्मूलकारणातिरेकि मृत्तिकादिसमस्तसद्विकारमित्थ्यात्वे हि बाक्यतात्पर्यम्। एतेन "प्राणा वै सत्य" मिति श्रुत्यन्तरमपि निर्व्यूढम्। तत्रापि हि—"अथ नामधेयं सत्यस्य सत्यं प्राणा वै सत्यं तेषामेष सत्य" मिति पूर्वोत्तरवाक्यांश षरामर्शेन मध्यगतप्राणविषयसत्यतोक्तिः व्यावहारिकीं सत्यतामभिसन्धा येति गम्यते। तदेवं श्रुतिस्मृत्यनुमानतर्कैः सिद्धं कार्यमित्थ्यात्वम्। नश्वरत्वाच्च जगतो मिथ्यात्वं निपुणधियां स्वध्ववसानमिति।

तत्र ब्रूमः—यदुक्तं कारणेन कार्यं सम्बद्धमारभ्यते उतासम्बद्ध मिति, तत्रासम्बद्धमित्येव पक्षः, न हि कारणाना मिथस्सम्बन्धमन्तरेण कार्येणापि सह सम्बन्धः कार्योत्पत्त्यङ्गतया इष्टचरः, येन तदङ्गीकुर्मः। यत्तु असम्बन्धाविशेषात्सर्वं सर्वस्य कारणं भवेदिति, तत्तदा स्यात्, यद्यसम्बद्धत्वमेव कार्यारम्भप्रयोजकं स्यात्। न च तदस्ति, तत्तद्वस्तूना प्रतिनियतशक्तीनां प्रतिनियतकार्यारम्भकत्वस्यान्वयव्यतिरेकसिद्धत्वात्। यदि कारणाना कार्यसम्बन्धोपि कार्यारंभाङ्गमिष्यते, तदानङ्गीकारः, अविषयवृत्तित्वं वा, कारणानां परस्परदृष्टस्य सम्बन्धस्य कार्ये सञ्चर—

ननु 'प्राणा वै सत्य' मिति श्रुत्या प्राणसत्यत्व प्रतिपाद्यते, न च तद्व्यतिरेकेण कार्यमित्थ्यात्वे तात्पर्यमिति निर्वाह. शक्य·, कार्यस्य तत्रानुक्तेः, अतस्तद्विरोध इत्यत आह एतेने ति। वक्ष्यमाणेनेत्यर्थ·। तत्रापि हीति। यथा राजराजो मन्मथमन्मथः पवित्राणां पवित्रमित्यादौ ऐश्वर्यसौन्दर्यपावनत्वानामुत्कर्षापकर्षौ गम्येते, तथात्र सत्यत्वोत्कर्षापकर्षौ गम्येते, तत्रापकृष्ट प्राणगत सत्यत्व व्यावहारिकसत्यत्व उत्कृष्ट ब्रह्मगत पारमार्थिक सत्यत्वमित्यर्थः। · नश्वरत्वा दिति। तावदेव च बाधितत्वमित्याभि

णात्, युक्ताङ्गत्यागो वा, असिद्धत्वेनासम्बन्धस्य साध्यता प्रत्युपयुक्तस्य त्यागादिति । एतेन भिन्नत्वाभिन्नत्वविकल्पोपि निरस्तः, दण्डचक्रादिविलक्षणस्यैव घटादेस्तत उत्पत्तिदर्शनात् । उपादानेपि हि कार्यकारणयोरत्यन्तभेद एव दृश्यते । अवयविवादिना तु द्रव्ययोरपि । एवमपि चेदभेदोभ्युपगम्येत, तर्हि युक्ताङ्गत्यागः, कार्यकारणभावोपयुक्तस्यैव भेदस्य परित्यागात् । अयुक्ताङ्गस्वीकारो वा, तद्विरोधिन एवाभेदस्य स्वीकारादिति । अन्यथा स्वव्याघात. सार्वभौमः । एवमुत्तरेष्वपि विवेक्तव्यम् ।

यत्तु विकृतादविकृताद्वोपादानात्कार्यारम्भ इति । तत्र विकार शब्देन यत्किञ्चिदागन्तुकधर्मविवक्षायां विकृतादिति ब्रूमः, सहकारिसम्बन्धोपि हि विकार एव । अथ कार्यरूपेण विकृतत्व विवक्ष्यते, तदा त्वविकृतादिति वदामः, अन्यथा आत्माश्रयप्रसङ्गात् । यत्तु अविकृतत्वाविशेषात्सर्वदोत्पादकत्वप्रसङ्ग इति, तन्न, अविकृतस्यैव सहकारिचक्रसन्निपातेन कालविशेषनियतकार्यारम्भोपपत्ते. । यत्तु सहकारिसम्बन्धोपि विकृतस्य वाऽविकृतस्य वेति विकल्पितम्, तदपि सहकार्यन्तरसम्बद्धस्यै

मान । युक्ताङ्गत्यागमुपपादयति असिद्धत्वेने ति । कार्यकारणयो रिति । द्रव्यस्य कार्यत्वघटकीभूता साक्षादुपपत्तियोगिन्यवस्थात्रकार्यशब्देन विवक्षिता। अन्यथे ति । एवमप्यनेन तर्काभासन कार्यनिरासे मिथ्याभूतमपि कार्यमेव निराक्रियेत । मिथ्यात्वादेव सर्वमुपपद्यत इति चेत्, तत्कि राजशासनेन ? दर्शनादिति चेत्; तर्हि तत एवासत्पक्षेऽपि कारणासम्बद्ध ततो भिन्न च कार्यमिति कि न सेत्स्यति? एव मिति । विकृताविकृतादिविकल्पेष्वपि स्वव्याघातकत्वपर्यन्ता दोषा ग्राह्या इत्यर्थ । स्वपक्षनिर्वाहमाह यत्तु विकृता दिति । सहकार्यन्तरसम्बद्धस्ये ति । सिद्धान्ते उपादानस्य नित्यत्वात् सहकार्यन्तरसम्बद्धस्य सहकार्यन्तरसम्बन्धे नानवस्था दोष इति भाव. । यथा निश्चितप्रामाण्यस्यैव ज्ञानस्य सशयनिवृत्त्यादौ पयोगित्वे प्रामाण्यस्य परतस्त्वमते प्रामाण्यज्ञानेऽनवस्था सा च साध्यत्वान्मूलक्षय

वेति परिहृतम्। नचात्रानवस्था दोष, सिद्धानवस्थारूपत्वात्। न हि पूर्वं पूर्वं कारणं नास्तीत्युत्तरोत्तरासिद्धि। न च पूर्वपूर्वाभावे प्रमाणमस्ति, प्रत्युत कार्यमेव प्रमितं सत् कारणप्रवाहे प्रमाणं भवति। अन्यथा कार्यानुदयप्रसङ्गात्। न च नोपलभ्यते कार्यम्, उपलभ्यमानमपि वा किं बाध्यते? सर्वकार्यबाधे स्वप्रवृत्तिविरोधात्। कतिपयकार्यबाधे त्वबाधितकार्यान्तरसद्भावेन कार्यकारणभावमात्रस्यापलपितुमशक्यत्वात्। अन्ततो बाधस्यापि कार्यत्वेन कर्तुमेवाशक्यत्वप्रसङ्गः। बाधस्यापि बाधे व्याघात स्यादिति।

यत्तु रुचकादिविकृतिविशिष्ट हेमादि रुचकादिमात्र वा हेमादिमात्रं वा स्वस्तिकारम्भकमिति विकल्पितम्, तत्रारम्भकमिति किं स्वस्तिकनिर्माणोपयुक्ताकारविशिष्ट विवक्षितम्? उत तदुपयुक्ताकार एव? अथवा रुच[स्वस्ति]काश्रयमात्रमिति, आद्ये रुचकादिविकृतिविशिष्टमिति ब्रूमः। न च स्वस्तिके रुचकाकाराकारितहेमानुपलम्भविरोधः, कार्योपयुक्ताकाराणा कार्येप्यनुवृत्तेरनपेक्षितत्वात्। तदपेक्षणे

करीति दोषः. न तथेयमित्यभिप्रायेणाह सिद्धे ति। अनवस्थाया दोषत्वप्रयोजक मूलक्षयकरत्वमसिद्धत्व च नास्तीति क्रमेणाह न हीत्या दिना। सर्वकार्यबाध इति। असद्विलक्षणकार्यस्वरूपाविरोधिबाधविवक्षाया तादृशेनापि कार्येण कारणप्रवाहस्यानुमातु शक्यत्वात् सहकार्यन्तरसम्बन्धस्य सहकारिसम्बन्धसम्भवात् सहकार्यन्तरसम्बन्धस्य कार्यारम्भकत्वे दोषाभावाद्विकृताविकृतादिविकल्पमूलतर्कप्रवृत्तेर्मिथ्यात्वसाधनायोगात् तथा मिथ्यात्व साधयता स्वरूपासत्वपर्यवसित एव बाधो वाच्यः, एवञ्च स्वप्रवृत्तिविरोधः, मिथ्यात्वसाधनलक्षणकार्यस्याप्यसिद्धेरित्यर्थः। सर्वकार्यबाधपक्षे दोषान्तरमाह अन्तत इति। कृतागतिमाशङ्क्य परिहरति बाधस्यापीति। प्रपञ्चबाधस्य च ये प्रपञ्चसत्यत्वसिद्धेरित्यर्थः। नचेति। रुचकादिमात्र

चानङ्गीकारप्रसङ्गात् । के चन कारणाकाराः कार्येष्वनुवर्तन्ते के चित्तु निवर्तन्त इति यथादर्शनमङ्गीकार्यत्वात् । द्वितीये तु रुचकादिमात्रमिति वदामः । न च हेमानुवृत्तिदर्शनविरोध., उक्तोत्तरत्वात् , कारणदशावच्छेदकाकारनिवृत्तावप्याश्रयतयोपयुक्तस्य द्रव्यस्य तदाकारविशेषस्य चानाशकाभावादनुवृत्तत्वस्य दुर्निवारत्वात् । तृतीये तु हेममात्रमित्येव तत्वम्। नचारम्भकहेमातिरिक्तं न दृश्यत इति वाच्यम्,—स्वहृदयविसंवादात् ; अन्यथा आरम्भकमपि न दृश्यत इति वक्तु शक्यत्वात् । अतिरिक्तं तु दृश्यते, तत्किमवयविद्रव्यान्तर उत तदारम्भकतयाभिमतावस्थान्तरमात्रम् उत विवर्तविशेष इत्येवमादिको हि विवाद । हेमप्रत्यभिज्ञान तु न स्वस्तिकप्रतीत्यपह्नवक्षमम् । हेम्न एव स्वस्तिकविशेषितत्वेन प्रत्यभिज्ञोपपत्ते. । अन्यथा पूर्वानुभूतातिरिक्ताकारमन्तरेण कथ सा प्रत्यभिज्ञा? न हि यत्किञ्चिद्देशकालावस्थादिविशेषमन्तरेण सेय मित्युल्लेख. । अन्यथा स इत्येव वा स्यादयमित्येव वा ।

यत्तु बुद्धिशब्दान्तरादौ कारकव्यापारवैयर्थ्यप्रसङ्गे नित्यानित्यविभागानुपपत्तिप्रसङ्गे च रज्ज्वाद्यधिष्ठानसर्पादिक निदर्शितम्, तदपि देशकालादिप्रतिपन्नोपाधौ बाधाभावादेव परिहृतम् । बाधकतया अभ्युपगताश्च प्रत्येकं परिहियन्त एव । अत एव दुर्निरूपबुद्धिशब्दान्तरादित्वादिति हेतुरपि निरस्त· ।

स्यारम्भकत्वे य पूर्वपक्षे दोष उक्तः, स इह नास्तीत्यर्थ । उक्तोत्तरत्वादिति । त्वयैव रुचकाकृतिमात्रस्य कार्योपयुक्ताकारत्वस्योक्तत्वादित्यर्थः । एवञ्च हेम्न उपादानत्वस्यानिवर्तितत्वात्तदनुवृत्तौ न विरोध इति भावः । तदाकार ति। हेमाकारम् । तदारम्भकतये ति । अभिमतस्य द्रव्यस्यावस्थान्तरमित्यर्थ । अन्यथा-अतिरिक्ताकारयोगस्य प्रत्यभिज्ञाविरोधित्व इत्यर्थ. । पूर्वे ति । पूर्वानुभूताकारं अतिरिक्ताकार चान्तरेणेत्यर्थ । अवस्थादिविशेष —अवस्थादिभेद । कालद्वयादिविषयीकरणमन्तरेण प्रत्यभिज्ञा न सम्भवतीत्यर्थ । निदर्शित मिति ।

यत्तु मध्येप्यसत् कार्यं आद्यन्तयोरसत्वादिति प्रयुक्तम्, तदप्य बाधितसत्त्वोपलम्भेन बाधितम्। अन्यथा मध्येप्यनारोपित कार्यं आद्यन्तयोरनारोपितत्वादिति वक्तु शक्यत्वात्। अन्य चोपलम्भानुवर्तित्वेन प्रबलत्वादनेन पूर्वस्य बाध एव वा। अपि च कार्यमाद्यन्तयो. सदप्यस्तं वा मध्ये सत्वात् मध्येप्यस्तत्वाद्वेति सांख्यनयेन त्वन्नयेन वा प्रयोगे कि वक्ष्यसि ? उपलम्भविरोधादिकमिति चेत्तुल्यम्।

यच्च विवादगोचरो भेदव्यवहार स्वविषयसर्वभेदानुगतैकवस्तुमात्रालम्बन इति प्रतिज्ञातम्, तत्र कि मृत्पिण्डाद्येकैकोपादानकघटशरावादि भेदव्यवहारमात्रं पक्षीक्रियते उत सर्पभूदलनादिभेदव्यवहारविलक्षणः सर्वोपि ? पूर्वत्र श्रुतिनिदर्शितमृत्पिण्डलोहमणिनखनिकृन्तनादिभेदव्यवहारैरनैकान्त्यम्, न हि तत्र मृदादिकमनुवर्तते। पृथिव्यादिकमनुवर्तत इति चेत्; तदास्तु पृथिव्यादिभेदव्यवहारै। अथ तत्रापि प्रकृतिभूताविद्यानुवृत्ति पश्यसि, तथापि ब्रह्माविद्ययो· भेदव्यवहारेणानैकान्त्यं दुस्त्यजम्। न हि ब्रह्माविद्यानुगतं वस्त्वन्तरमिष्यते। न च ब्रह्मैवोभयत्रानुवर्तते, ब्रह्मणि ब्रह्माध्यासानभ्युपगमात्, ब्रह्मभेदानभ्युपगमाच्च।

व्यभिचारस्थानतयोदाहृतमित्यर्थः। अबाधितत्वे सतीति विशेष्यते, बाधश्च प्रतिपन्नदेशकालोपाधौ निषेध., तदभावश्च घटादे सिद्ध एवेत्यर्थ। प्रतिरोधमुक्त्वा बाधमप्याह अस्यचे ति। सांख्यनयेन—साख्यप्रयोगमनुसृत्येत्यर्थ·। त्वन्नये नेति। त्वदङ्गीकृतहेतुनेत्यर्थ। उपलम्भे ति। वक्ष्याम इत्यनुषङ्ग। मृत्पिण्डेत्या दि। एतद्घटशरावादिभेदव्यवहार. स्वविषयसर्वभेदानुगततदुपादानैकवस्त्वालम्बन इत्यनुमानं विवक्षितम्। श्रुतिनिदर्शितेत्य नेन पक्षसमत्वशङ्का परिहृता, तत्र मृत्तिकासत्यत्वश्रुते.। एकोपादानालम्बनत्व एकाधिकरणवस्त्वालम्बनत्व वा साध्यते, तत्रैकाधिष्ठानारोपितत्वम्, अतस्तत्राप्यनुगतमस्त्येवेति शङ्कते पृथिव्यादिकमि ति। ब्रह्मपर्यवसानमेव मिथ्यात्व वेत्स्यतीत्यभिप्रायेणेदानीं मृदादेर्मिथ्यात्वानाधिष्करणेनैव शङ्कितम्। व्यवहारै रिति। अनैकान्त्य इत्यनुषङ्ग.। अनभ्युपगमे हेतुमाह ब्रह्मभेदे ति। स्वस्मिंश्चाध्यासोऽनुपपन्न इति भाव.। यद्वा ब्रह्मणी ति।

अभ्युपगमे च तद्भेदव्यवहारेण तदेव स्यात् । एतेनोत्तर कल्पोपि दत्तोत्तर । ब्रह्मविद्याभेदस्यापि पक्षीकारे बाधात् । तद्बहिष्कारे तु तेनैवानैकान्त्यादिति । किञ्च–वस्तुशब्देन परमार्थविवक्षाया दृष्टान्तासिद्धि, न हि रज्ज्वादे सत्यत्वमिच्छसि। अथ प्रतीयमानमात्रविवक्षा, तदा वस्तुमात्रावलम्बन इति वक्तु न शक्यते । आरोपितस्यापि घटादेरालम्बनत्वस्यावर्जनीयत्वादिति ।

यत्तु तर्कानुगृहीतानुमानात् प्रत्यक्षस्य दौर्बल्यं ज्वालैक्यप्रत्यक्षे निदर्शितम्, तदप्यसत्, अनुग्राहकतयाभिमताना तर्काणामपाकृतत्वात्। ज्वालैक्यप्रत्यक्ष तु सादृश्यादिदोषसम्भवात् निर्वापितारोपितेपि तथैव प्रत्यभिज्ञानदर्शनात् अनन्यथासिद्धमामग्र्यनुवृत्त्यादेहेतुबलात्तत्र च स्वोपजीव्यविरोधादिप्रसङ्गाभावाच्च बाध्यतामनुभवतीति युक्तम् । इह तु विपरीतमिति विशेष ।

यत्पुन. कारणे कार्यं पूर्वं सदसद्वेति, तस्य कोऽर्थ ? किं कार्यद्रव्य कारणावस्थाया द्रव्यरूपेण विद्यते नवेति ? तदा सदित्यभी कुर्म । तथापि न साध्यत्वविरोध, अवस्थापत्तिरूपेण तदुपपत्ते ।

अभेदाद्ध्यासोनुपपन्न इत्यर्थ. । अस्तु तर्हि ब्रह्मभेदः, तथा च तत्र ब्रह्माध्याससम्भव इत्यत आह ब्रह्मभेदे ति । तदेव अनैकान्त्यमेव । बाधोऽशत. । तदावस्त्वि ति । यदा वस्तुशब्देन परमार्थो विवक्ष्यते तदानुगतैकवस्तुमात्रालम्बना इत्यत्र परमार्थव्यवच्छेदसम्भवादनुगतैकपरमार्थालम्बनत्वे सति तदन्यपरमार्थानालम्बना इत्यर्थो भवति, तच्च वक्तु न शक्यते, घटादेः परमार्थत्वानङ्गीकारात् , यदा तु प्रतीयमान विवक्ष्यते तदाऽनुगतैकार्थालम्बनत्वे सति तदन्यार्थानालम्बना इत्यर्थो भवति , अत्र चार्थशब्द स्वरूपकथनपर., तच्च पक्षे बाधितम्, घटादेरालम्बनत्वादिति भाव. । प्रत्यक्षात्तर्कसहकृतानुमानस्य प्राबल्यमङ्गीकृत्योक्तम् , इदानी प्रत्यक्षस्य न तदशानुमानप्राबल्यात् बाध्यत्व किन्तु दृष्टदोषसजातीयदोषेणाप्रामाण्यशङ्काग्रस्तत्वादित्याह ज्वालैक्ये ति ।

तत एव कारकव्यापारसाफल्यं च। एतावानेव च न सत्कार्यवाद·। अथ कार्यावस्था कारणदशायामस्ति न वेति पृच्छसि, तदा नास्त्येव सा। कथमसती तेन जनयितुं शक्येतेति चेत्, किं पूर्वं सतीमेव दशा पश्चादुत्पद्यमाना पश्यसि? येनैव विरोधमाशङ्कसे। तथाचायुक्ताङ्गस्वीकार.। अवस्थासत्त्वस्य जन्यत्वविरोधिनः स्वीकारात्। असत उत्पत्तौ प्रस्तराद योप्यकुरेयु. शशादयोपि शृङ्गादिमन्त· स्युरिति चेत्; किमियं राजाज्ञाः उत शाप? न हि नियतशक्तिकेषु कारणेषु देशकालस्वरूपप्रतिनियत कार्यविशेषारम्भकेषु परिदृश्यमानेषु तच्छक्तिविधुरादपि तदुत्पत्तिराशङ्कितुमपि शक्यते। प्रागसतीं दशां पश्चात्सतीमिच्छतोऽवयविद्रव्ये कः प्रद्वेष इति चेत्, न कश्चित्, अदर्शनादेव तु नाङ्गीकुर्मः।

यत्तु भावादभावाद्वा घटाद्युत्पत्तिरिति, तत्र किं विद्यमाने द्रव्ये घटाद्यवस्था जायते उताविद्यमान इति प्रश्नार्थ? तदा विद्यमान एवेति मन्वीथाः। न हि घटाद्यवस्थोत्पत्तौ मृदादिकं नास्ति। उपमर्दितेपि हि पिण्डे पिण्डत्वमेव निवृत्तं न तु द्रव्यम्। अनुपमृदितेभ्यश्च तन्त्वादिभ्य पटाद्युत्पत्तिरपि दृश्यते। अथासतो घटाद्युत्पत्ति. सतो वेति पृच्छसि, तदा सत एवेत्युत्तरम्। पूर्वं सत पिण्डात्तदानीं सत एव वा मृदादे· घटाद्युत्पत्तिदर्शनात्। अथ कारणविशेषावच्छेदकावस्था कार्योत्पत्तिदशायां निवृत्ता न वेति पृच्छसि; तदा पिण्डादौ निवृत्ता तन्त्वादौ त्वनुवृत्तेति सान्दृष्टिकमिदम्। नचाभावादुत्पत्तौ कार्यस्याभावात्मकत्वप्रसङ्ग·, कार्यकारणयोरत्यन्तसालक्षण्यस्य "न विलक्षणत्वा"

किं पूर्वमिति। दशां अवस्था। किमियमिति। किं राजाज्ञयैव शक्यते उत शापवशादित्यर्थः। प्रागसती मिति। न हि साख्यवदसत उत्पत्त्यनुपपत्तेरवयविनि द्वेषस्तव सम्भवतीति भावः। अनुपमृदितेभ्य इति। तत्र च न द्रव्यविनाशशङ्का लेशोऽपीति भाव.। नन्वभावपदेन प्रसिद्धाभावं विवक्षित्वैव विकल्प्य दूषितमित्यत आह न चाभावा दिति। भावरूपाज्ञानपरिणामस्य घटादिध्वंसस्याभावत्वव

धिकरणे निरस्तत्वात् । भावान्तराभाववादिन इष्टप्रसङ्गाच्च । घटत्वादि कमपि हि पिण्डाद्यपेक्षया प्रध्वसकोटिघटितं कपालाद्यपेक्षया तु प्रागभावपक्षनिक्षिप्त कुड्याद्यपेक्षयात्वन्योन्याभावायत इति । ये चान्ये पश्यतोहराणा प्रलापाः–"न चेदुत्पत्तिरुत्पत्तेर्नित्यत्वमनवस्थिति. । उत्पत्तावप्यतः

दभावोपादानकस्यापि तव भावत्वमविरुद्धमिति भावः । भावान्तरे ति । अभावादुत्पन्नं हि घटत्वाद्येव, तच्च भावरूपमन्यभावात्मकमित्यर्थः । तदुपपादयति घटत्वादिक मिति । उत्पत्तेरुत्पत्तिरस्ति नवेति विकल्प्य दूषणार्थ. श्लोक. । उत्पत्तावनवस्थि तिरित्यन्वय. । " कुर्वत्कार्यमकुर्वद्वा करण कारण भवेत । कुर्वच्चेदनवस्थानमकुर्वत्यनवस्थिति. ॥ " इत्यादय. । एव द्वितन्तुकादिपूर्वपूर्व पटाभेदेनैवोत्तरोत्तरः पटो जायते, स एव पट एतावानाशीदिति विवेकिनामन्यनुभवात् , न च जातस्य जायमानाभेदोऽविद्या विना सम्भवति, तस्मादविद्यामहिम्ना प्रथमपटस्तत्परिमाण च दुर्निरूपस्वरूपेण वर्धत इति कार्यमनिर्वचनीयमेव ; एवमेकस्मात्तन्त्वादेरज्जुद्रव्यस्योत्पत्तिरप्यत्र मानम्, तत्र एकस्य परमार्थत. सयोगो न सम्भवति, अत एकास्मन् चन्द्रे द्वित्ववदेकस्मिंस्तत्वादौ द्वित्वस्य मायात्मकत्वात् तन्निमित्त्य सयोगोऽपि तदात्मक इति तत्कार्यमपि तथैव, अत एवाधिकपरिमाणात्तन्त्वादेर्न्यूनपरिमाणरज्ज्वारम्भोऽपि, अविद्या विना तदयोगात् , मायया तु गिरिशिखरस्थाधिकपरिमाणवृक्षादौ न्यूनपरिमाणकार्यारम्भो दृष्ट इत्यनिर्वचनीय कार्यम्, एवं बाल्यादिशरीरमप्युत्तरोत्तरशरीराकारेण वर्धमानमविद्याकारणत्वे प्रमाणम्, माया विना शरीराभेदे परिमाणभेदायोगात् , न च तद्भेदोऽनुपलम्भबाधात् , पूर्वोत्तरशरीरयो विनाशोत्पत्तिहेत्वभावाच्च, अननुसन्धानप्रसङ्गाच्च, एव क्षीरस्य दधिभावोऽपि मायया, क्षीरस्वभावे स्थिते तस्य दधिभावानुपपत्तेः , क्षीरविनाशे क्षीरारम्भकैः परमाणुभिर्दध्यारम्भ इत्ययुक्तम्, परमाणूना सर्वत्र सुलभतया दध्यर्थं क्षीरानुपादानप्रसङ्गात् , क्षीरध्वंसानामपि सुलभत्वात्, उपात्त क्षीरध्वसस्यैव हेतुत्वे पीताद्भूमौ पतिताद्वा दध्युत्पत्तिप्रसङ्गात् , माहिषात् क्षीरादुत्पन्न माहिषमित्यादिव्यवस्थायोगात् क्षीरदध्नोः नियततुल्यपरिमाणत्वा-

कार्यं कारणं च निरूपित" मित्येवमादय., तेप्यनयैव दिशा प्रशमनीया इति।

" सिद्धानवस्थितिः सामग्र्यात्मकोत्पत्तिसंग्रहे।
अन्यथा स्वपरत्राणान्न काचिदनवस्थिति " रिति।

योगाच्च। तस्माच्छुक्तिरिव रजतरूपेण क्षीरमेव दध्याकारेण परिणमत इति तन्मिथ्ये तित्येवमादयश्च गृह्यन्ते। तेषी ति। उत्पत्तिशब्देन किं प्रथमक्षणसम्बन्धो विवक्षित? अथ सामग्री? अन्यद्वा? आद्ये अयुक्ताङ्गीकार', अनेकक्षणवर्तिना पदार्थानामेव प्रथमक्षणवत्त्वेन द्वितीयक्षणस्य द्वितीयक्षणापेक्षाया इव प्रथमक्षणस्य प्रथमक्षणापेक्षाया अभावादित्यभिप्रेत्य द्वितीयं दूषयति सिद्धे ति। सामग्री ति। सामग्र्यानन्तर्यसम्बन्धादुत्पन्नमिति विशिष्टव्यवहार इति भावः। तृतीयं दूषयति अन्यथे ति।

यत्तु स एव पट एतावानासीदिति प्रत्यभिज्ञया मिथ्यात्वसमर्थनम्, तत्र किमिय प्रत्यभिज्ञा बाधितविषया उताबाधितविषया? आद्ये धर्मिसत्यत्वं निष्प्रत्यूहम्। द्वितीये अभेदतद्धर्मिणोः सत्यत्व त्वयैव समर्थितम्। किञ्च त्वत्पक्षे ाभेदस्य मिथ्यात्वात्तत्र कथं भेदः, समानसत्ताकयोर्विरोधात्; नचान्यतरस्य ेभासिकत्वम्; विनिगमकाभावात्, अभेदस्य प्रातिभासिकत्वे पटयो.सत्यत्वात्, दस्य प्रातिभासिकत्वे पटस्य सत्यत्वाच्च। अथ नात्र विरोधः, अभेदस्याधिष्ठा ात्तागतत्वात्, स एवाभेदः प्रत्यभिज्ञासामानाधिकरण्ययोर्निमित्तमिति चेन्न,— रभेदाभावेऽपि तत्सम्बन्ध्यभेदमात्रेण तदुपपत्तेः। कुविन्दाभेदाद्वा पटयोस्ते क न स्याताम्? अथ कुविन्दस्य न हि पटद्वयतादात्म्यम्, अस्ति तु सत', अतस्त्वदभेदस्तेन तादात्म्यवतोः पटयोः सामानाधिकरण्यनिमित्त स्यादिति चेन्न; तथा सति पटत्वस्यैव निमित्तताप्रसङ्गात्। तत एव सर्वपटाना सर्वघटानां सर्वद्रव्याणा च सामानाधिकरण्यप्रसङ्गात्। तस्मात्तयो' स्वरूपाभेद एव निमित्तम्। तस्मादरत्निमात्रपटीभूता एव तन्तवस्तन्त्वन्तरैः सह षोडशारत्निमात्रपटीभवन्ति। एषञ्च प्रत्यभिज्ञोपपन्ना, पूर्वतन्तुप्रवेशात्। भेदोऽप्युपपन्नः, तन्त्वन्तरप्रवेशात्।

यत्तु सदसद्व्यावृत्तविनाशोपलब्ध्ययोगात्तदुभयकोटिविलक्षणतया मिथ्यात्वमिति, तदपि मन्दम्; उपलब्धिविनाशाभ्यामपि कादाचित्कत्वं तत्र सिद्धेः । न ह्युत्तरकालीनो विनाशः स्वकालेऽप्यसत्त्वं साधयितुमलम् । अथ नित्यमेव सच्छब्दार्थतया परिगृह्य तद्वैलक्षण्यान्मिथ्यात्वमिष्यते, तथाप्यनित्यत्वमेव मिथ्यात्वमिति विवक्षितं स्यात्, तथा च वस्तुनो न काचित् क्षतिः । अत एव "अनाशी परमार्थश्चे" त्यादिस्मृतिरपि निर्मूला । "वाचारम्भणं विकारो नामधेयं" मित्यादिका तु श्रुतिरवयवद्रव्यान्तरनिरासपरेति सद्विद्यानिरूपणे व्यक्तमनुसन्धेयम् । अत एव 'मृत्तिकेत्येव सत्य' मित्यादावपि परमार्थसत्यत्वमेव विवक्षित

रज्ज्वनुपपत्तिस्त्ववयवादिनामेव । त्वत्पक्षे पूर्वोक्तदूषणान्यपि रज्जुसख्यापरिमाणानि न मुञ्चन्ति । क्षीरदध्यनुपपत्तिस्तवैव, नास्माकम् । क्षीरद्रव्यस्यैव गन्धरस क्षीरावस्थाप्रहाणेन दध्यवस्थागन्धरसोत्पत्ते. सर्वलाविद्यायाः सुलभत्वात् सर्वत्र दध्युपलम्भप्रसङ्गात् अनाशीत्यादि। निर्मूला—सदसद्व्यावृत्तविनाशयोगान्मिथ्येति न त्वदुक्तन्यायमूलेत्यर्थ. । अनाशीत्यादिस्मृतिश्च प्राज्ञाना परमार्थशब्दप्रयोगान्मित्तप्रदर्शपरा, तत्प्रदर्शन च श्रेयसामल्पकालतया तदभावकालस्यैव भूयस्त मत्यल्पकालसत्त्व तिरस्कृय तस्यासत्कल्पतया हेयत्वं परमात्मनः सर्वदा स उपादेयत्व च प्रदर्शयितुम् । अय चार्थस्तत्प्रकरणे स्पष्ट. ॥

तत्तुनाशि न सन्देह इत्यस्यायमर्थ -नाश्युपपादितस्य नाशित्वे उपासनस्यापि शित्वात्तदुपपादितस्य मोक्षस्यापि नाशिता स्यादित्यत उक्त 'द्रव्ये' ति । शब्दो देयद्रव्यपरः, नश्वरद्रव्यप्रदानेन देवताभ्यः प्राप्य फल स्वप्रदत्तद्रव्येण नश्वरमेव भवति, उपासनस्य नश्वरत्वेऽपि तस्य स्नेहरूपत्वात्तेन स्निग्धेन पुरुषेणात्युदारेण सर्वशक्तेन दीयमानस्य पुरुषार्थस्य तादृशशक्त्यानुगुण्यमेतीति नित्यपुरुषार्थदानमुपपद्यत इति भाव. । अत एवेति । घटादेर्मृत्तिकसत्यता न तु तद्व्यतिरेकेणावयवादिनिराकरणपरत्वेन प्रपञ्चमिथ्यात्वतात्पर्यात्र पारमार्थिकसत्यत्वमेवोच्यत इत्यर्थ. । आदिशब्देन "प्राणा वै सत्य" [illegible] शब्देन सहचर्यात् जीवा उच्यन्ते, ते सत्यम्, स्वरू

मिति सिद्धम्। अतः प्रत्यक्षादिशरणैः श्रुतिशरणैरपि कार्यजातस्य सर्वस्य सत्यत्वमेष्टव्यम्। अन्यथा प्रागुक्तकर्कासैः कारणमपि किं न खण्ड्यते? प्रत्यक्षश्रुत्यादिबलादिति तु समानम्। अथ यदि कारणस्यापि भङ्ग इष्ट इत्याशयः, तथा सति कारणसत्यत्वमत्यादरेण प्रतिपादयन्ती श्रुतिर्बाध्येत। एतेन कारणसामान्यं तद्विशेषांश्च खण्डयता वेदबाह्यत्वं तावत्सुव्यक्तम्। विशेषदूषणानि तु स्वावसरे ग्राह्याणि।

यश्चासौ व्यामोह —नश्वरत्वादेव विश्वमिथ्यात्वमिति, स किं नाशबाधविवेकाभावात्? उत तयोर्व्याप्यव्यापकभावाभिमानात्? न प्रथमः, उभयोरपि विवेकस्य सुप्रसिद्धत्वात्। स्वकाले सत एवार्थस्य स्वोत्तरकालासत्त्वं नाशः, बाध्यत्वं तु स्वप्रतीतिकालेप्यसत्त्वलक्षणमिति। असत्त्वमेव नाश इत्येतावता पर्याप्तौ किं विशेष्यत इति चेन्न;—प्रागभावेपि विनाशशब्दप्रयोगप्रसङ्गात्। तथाप्युत्तरकालासत्त्वमित्येतावतालमिति चेन्न,—गगनकुसुमादावपि प्रसङ्गात्। स्वकाले सत एवार्थस्यान्यापेक्षयोत्तरकाले स्वप्रागभावकालेप्यसत्त्वसम्भवात् तद्व्यवच्छेदार्थं स्वोत्तरकालासत्त्वमिति विशेष्यते, एतावदेव निष्कर्षलक्षणम्, पूर्वं तु वैशद्यार्थम्। यदि वस्तुनो यथाकथञ्चिदसत्त्वं मिथ्यात्वमिति विवक्षितम्, नदास्माकमिष्टापादनम्। परस्परभावादिमत्तया केनचिदाकारेण सर्वेषां सत्त्वाभ्युपगमात्, कार्याणां च विनाशाभ्युपगमात्। तावन्मात्रमेव मिथ्यात्वशब्देनोपचर्यमाणमपि नास्माकमनिष्टमापादयति। नापि

भावरहित्यात्। इद जीवब्रह्मसाधारणम्, जीववत्कर्मकृतस्वभावविकाराभावात् परमात्मा ततोऽपि सत्य इत्युच्यते, कर्मकृतविकारो हि साक्षाज्जीवे स्वनिष्ठत्वभ्रमयोग्य, परमात्मनस्तु स्वभावविकारो न तथेति'दं वैषम्यमाश्रित्य 'सत्यस्य सत्य' मित्युक्तम्। कारणमिति। मृदादिकमित्यर्थः। अत्यादरेणेति। "मृत्तिक-

द्वितीय, व्याप्तेरभावात् । रज्जुसर्पादिषु व्याप्तिः सिद्ध्यतीति चेन्न;—तत्र विनाशस्यानभ्युपगमात् । अर्थबाध एव हि तत्र व्यक्तः । गन्धर्वनगरादिषु विनाशोपि प्रत्यक्षसिद्ध इति चेन्न,—तत्रापि मिथ्यात्वपक्षे बाध एव । विनाशभ्रमस्तु स्यात्, सत्यत्वभ्रमवत् । तत्सत्यत्वपक्षे तु कथं तत्र विनाशमिथ्यात्वयोः व्याप्तिर्ग्राह्या । अतः उत्पत्तिविनाशकोपि सर्वं कार्यं स्वकाले सदेवेति सिद्धम् ॥

इति शतदूषण्यां कार्यानुपपत्तिभङ्गः

॥ पञ्चपञ्चाशो वादः ॥

त्येव सत्यम् " " कार्ष्ण्यसमित्येव सत्यम् " ' लोह इत्येव सत्य " मित्यभ्यासादादरावगति ॥

इति श्रीवात्सकुलतिलकश्रीनिवासाचार्यपादसेवासम्पादितपरमकरुणस्वयाथात्म्येन तदेकदैवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्ध महाचार्यापरनामधेयेन रामानुजदासेन विरचितायां शतदूषणीव्याख्यायां चण्डमारुताख्यायां कार्यान्यथानुपपत्तिभङ्गो नाम पंचपञ्चाशः स्कन्धः ॥५५॥

श्रीरस्तु ।

अथ षट्पञ्चाशो वाद ।

देशानामपि देशतामुपगतं स्वाभाविकाद्वैभवात्
कालस्यापि कलाद्युपाधिकलनात्कालत्वहेतुं स्तुमः ।
निश्शेषेऽपि विभूतिकोटिघटिते निम्नोन्नते वस्तुनि
स्वाच्छन्द्येन जहत्समाधिककथासम्भावन तन्महः ॥

यत्पुनः परिभाषन्ते—अनन्तपदसामर्थ्यादेव ब्रह्मव्यतिरिक्तानन्तवस्तुमिथ्यात्व सिध्यति ; तथाहि—अनन्तशब्देन असङ्कोचात्सर्वविधपरिच्छेदाभावोऽप्युच्यते, परिच्छेदश्चतुर्धा—देशत. कालतो वस्तुत. स्वरूपतश्चेति । तत्र गगनकुसुमादिवत् स्वरूपपरिच्छेदः सद्रूपत्वेन प्रतिक्षिप्यते, तच्च सत्यपदेनैव सिद्धमित्यनन्तपदेन तद्विवक्षा भवतु वा मा वा, त्रिविधपरिच्छेदाभावस्तावद्विवक्षित एव । तत्र सर्वदेशसर्वकालव्यापित्वादत्र देशे नास्ति अत्र काले नास्तीत्येवरूपयोर्देशकालपरिच्छेदयोरभावः सिद्धः । वस्तुपरिच्छेदस्तु इदमिदं न भवतीत्येवंरूप । आश्रयप्रतियोगिविशिष्टस्य भेदस्याभावो [भवन्] भेदप्रतियोगितदाश्रयाणां सर्वेषामभावाद्वा अन्यतमाभावाद्वा ? आद्ये शून्यवादावतार. । द्वितीयेऽपि सर्ववस्तुनादात्म्याद्वा स्वव्यतिरिक्तसमस्तमिथ्यात्वाद्वा स्वस्य तुच्छत्वाद्वा

देशानामपि ति । देशकालवस्तुपरिच्छेदाभावा. क्रमेण संगृह्यन्ते । निश्शेषे वस्तुनि जहत्समाधिककथासम्भावनामि त्यन्वय. । सप्तमी च निर्धारणे । समाधिकत्वतुनी निर्धार्ये । विभूतिकोटिघटित इति हेतुगर्भविशेषणम् । निम्नोन्नत इति यथा निम्नं स्तम्बादि तथा हिरण्यगर्भोन्नतमपि सर्वेश्वरापेक्षयेत्यभिप्रायम् । स्वाच्छन्द्येने ति । उपगतत्वादिना सम्बध्यत । जहती समाधिककथासम्भावना यादिति विग्रह. ।

परिभाषन्त इति । अनेन युक्तिशून्यत्व विवक्षितम् । वस्त्वन्तरभेदाभावो वस्त्वपरिच्छेद. , अयं च वस्त्वन्तरमिथ्यात्वेनैव निर्वाह्य इत्यभिप्रायेण सामर्थ्या दिति । वस्तुपरिच्छेदस्त्वि ति । इदमिदं न भवतीत्येवं रूप – एव प्रतीयमानो भेद इत्यर्थ., सर्ववस्त्वि ति। भेदाभावप्रयुक्त

सम्भवति , तत्राद्यः पक्षोभ्यर्हितविरोधानामर्हन्मतार्हाणां भास्करादीनामेव युज्यते। अन्तिमस्त्वर्थो लोकायतिकाना निरीश्वरमीमासकादीनाम् । अतो मध्यम· पक्ष परिशिष्यते । न च वाच्य वस्त्वन्तराभावे तन्निरूपितपरिच्छेदाभावेन तन्निरूपणीयवस्तुपरिच्छेदाभावो दुर्वच इति ; वस्तुपरिच्छेदाभावेन वस्तुपरिच्छेदाभावो दुर्वच इति स्ववचनव्याघातात् । ननु प्रत्यक्षाद्यविरोधेन वस्तुपरिच्छेदाभावो वर्णनीयः, अन्यथा प्रागुक्तपक्षयोरपि प्रतिक्षेपायोगात् , शक्यते चाविरोधेन निर्वहणम्, तथा हि-वस्तुना परिच्छेदो वस्तुपरिच्छेद –यथा कुड्यादिभिरालोकादेः, स चास्य नास्तीति वस्तुपरिच्छेदरहित ब्रह्मेति , तदसत् , देशपरिच्छेदादीदृशस्य वस्तुपरिच्छेदस्य विशेषाभावात् । स्वतः परिमितदेशा घटादयः, आलोकादयस्तु प्रसृमरतया स्वतोनेकदेशव्यापिनोपि कुड्यादिभिरुपाधिभि. परिच्छिद्यन्ते, इह तु कथ परिच्छेद इति चेन्न,—तथा-

---

विशिष्टाभावकोट्याभिप्रायेणोक्तम्। अभ्यर्हिते ति । तादात्म्य हि भदसहिष्णव भेदः , स च सप्तभङ्गीवादवद्विरोध बहुमन्यमानाना भास्करादीनामेव युज्यत इत्यर्थः ।

भावाभावसमावेशप्रसङ्गो विरोध , स च तैरिष्टप्रसङ्गत्वेन स्वीक्रियत इति तस्य तैर्बहुमतत्वम् । अत्यन्ताभेदपक्षस्तु स्वप्रवृत्तिव्याघातेन सयौक्तिकाभासैरप्यनभ्युपगत इति वक्ष्यमाणत्वाच्छङ्कानर्ह एवेति भाव· । असद्व्यावृत्तस्वरूपाङ्गीकारात् तत एव परिच्छेदतदभावौ सुनिरूपावित्याभिप्रायेण पारहरति वस्तुपरिच्छेदाभावेने ति ।

ननु प्रत्यक्षे ति । सति सम्भव इति भावः । [शक्यते चेति—चस्त्वर्थः । विशेषाभावा दिति । गूढाभिसन्ध्युत्तरम् । अभ दोक्तिभ्रमाभिसन्धिमजानानश्चोदयति स्वत इति । अभिसन्धिमुद्घाटयात तथापी

प्यदूरविप्रकर्षेण पृथक्प्रतिपादनप्रयोजनाभावात्। एतेन वस्तुपरिच्छेदो वस्तुनः परिमाण देशपरिच्छेदस्तु तत्कार्यं—इति विभागोपि प्रत्युक्तः। न च वाच्यं इदमिद न भवतीति [प्रतिषेधो] परिच्छेदो वस्तुपरिच्छेदः, स च सर्वशरीरिणो न सम्भवतीति। 'अस्थलमनण्वह्रस्व' मित्यादिनिषेध शतश्रवणात्। अन्यथा चिदचिदीश्वरस्वरूपविवेकाद्यनुपपत्तेश्च। न च सर्ववस्तुसामानाधिकरण्ययोग्यत्वेनेदमिदं न भवतीति निषेधैकान्त्याभावा द्वस्तुपरिच्छेदाभाव इति वाच्यम्, अमुख्यसामानाधिकरण्यस्यान्यत्रापि सम्भवात्, "आपो वा इदँ सर्व" मित्यादिवत्। मुख्यसामानाधिकरण्यस्य तु ब्रह्मणोपि सर्वत्रासम्भवात्। न हि शरीर ब्रह्मेत्यादिसामानाधिकरण्यं दृष्टं इष्ट श्रुतं वा। एवमूहान्तरेष्वपि दूषणमूहनीयम्। ततश्च स्वव्यतिरिक्तसमस्तवस्तुमिथ्यात्वादेव ब्रह्मणो वस्तुपरिच्छेदाभाव इति।

अत्रोच्यते। शास्त्रप्रत्यक्षयोर्विरोधे प्रत्यक्षप्राबल्य तावत् स्थित मन्यत्र। अत एव अनन्तपदश्रुत्यन्यथानुपपत्त्यापि न प्रत्यक्षादिविरुद्धं

ति। एतेने ति। द्रव्यस्य परिमाणाभाव एव विभुत्वमिति भावः। **निषेधैकान्त्यम्**—इदमिद नेति प्रतिषेधयोग्यत्वे सति सामानाधिकरण्यायोग्यत्वम, स एव वस्तुपरिच्छेदः, तदभावोऽपरिच्छेदः, इद च सामानाधिकरण्ययोग्यत्वे पर्यवसित मिति तदेव सामानाधिकरण्यं किममुख्यसाधारण विवक्षितं उत मुख्यमेवेति विकल्पमभिप्रेत्य दूषयति अमुख्यत्या दिना। असम्भवा दिति। शरीरशरीरिभावस्य ब्रह्मणो देवादिशब्दवाच्यत्वस्य चासिद्धेरिति भाव। अभ्युपेत्याप्याह नही ति। ऊहान्तरेष्वि ति। स्वतन्त्रवस्त्वन्तरासम्भव, उत्कृष्टवस्त्वन्तराभावः, असख्यातगुणत्व मित्यादयः। लाघवाद्वस्त्वन्तरसद्भाव एव परिच्छेद इत्याद्ययोर्निरासः। असख्यातत्वन्तु गुणगतमिति न ब्रह्मणोऽनन्तत्वसिद्धिः। तावतैव तदनन्तत्वव्यपदेश औपचारिकत्वप्रसङ्गः।

प्रपञ्चमिथ्यात्वं सुसाधम् । अतो भवदभिमतवस्तुपरिच्छेदाभावो दुरुपपादः । भास्करादिपक्षेपि सर्ववस्त्वैक्ये सत्यपि भेदस्यापि विद्यमानत्वात्परिच्छेदनिषेधोनुपपन्नः, अन्यथा भेदाभेदस्यापि विलयप्रसङ्गात् । केवलाभेदपक्षस्तु सर्वव्यवहारविलोपप्रसङ्गेन यौक्तिकाभासैरपि नाभ्युपगम्यते । अभेदमात्रमस्तीत्येतावता वस्तुपरिच्छेदाभाववचनं त्वमुख्यम् ।

यत्तूक्त-वस्तुना परिच्छेद इति पक्षे वस्तुपरिमाणपक्षे च देशपरिच्छेदात् पृथग्व्यपदेशप्रयोजन नास्तीति । तदयुक्तम्, विरुद्धार्थप्रतिपादनादरूपप्रयोजनार्थमतिपादनस्यैव वरिष्ठत्वात् । भवत्पक्षेपि वस्तुपरिच्छेदाद्देशकालपरिच्छेदयोरनतिभेदेन पृथग्व्यपदेशप्रयोजनाभावप्रसङ्गः । यदा हि स्वव्यतिरिक्तसमस्तवस्तुमिथ्यात्वेन वस्तुपरिच्छेदाभावः तदा देशकालयोरेवाभावात्तदधीनपरिच्छेदस्याप्रसक्तत्वेन तन्निषेधो निरर्थकः । यदि पुनः त्रयाणां परिच्छेदाना स्वरूपभेदात् घटादिषु च दृष्टेरत्र तन्निषेध इति, तत्परोक्तयोरप्यर्थयो. समानमेव ।

अत इति । मिथ्यात्वस्य स्वयमेव बाधितत्वान्न त्वदभिमतवस्तुपरिच्छेदाभावोपपादन तेन शक्यामित्यर्थः ।

ननु भास्करादिमते प्रपञ्चस्य मिथ्यात्वाभावान्न प्रत्यक्षादिविरोध इत्याकाक्षायामाह भास्करादीति । अन्यथेति । भेदस्याभावे । अपि शब्देन तदस्यन्ताभमिति सूच्यते ।

ननु आनन्त्यश्रुतिसिद्ध्यर्थं विलयोप्यस्तु, तत्राह केवलेति सर्वेति । नित्यब्रह्माभेदेन सर्वस्य नित्यत्वात् किञ्चित्प्रयोजनोद्देशेन प्रवृत्तिर्न स्यादित्यर्थः । यौक्तिकाभासैरप्यस्वीकृत कथ वैदिकाभासै. स्वीकार्यम्, आमुष्मिकप्रवृत्तेरपि विरोधादित्याशयेनापिशब्द. । ननु सत्यपि भेदे तदभावात्मकाभेदस्य सत्त्वात् भेदस्य वस्तुपरिच्छेदाभाव इत्यत आह अभेदेति । भेदाभावमात्रान्नापरिच्छेदः—अन्यथा अपरिच्छिन्नब्रह्माभेदात् घटादेरप्यनन्तत्वप्रसङ्गात्, तत्र च पटभेदसहचरितत्वत् विद्यमानोप्यभेदो नापरिच्छेदः, भेदासहचरितस्यैव तस्यापरिच्छेदशब्दार्थत्वादिति वाच्यम्, तथाचाभेदमात्रे परिच्छेदाभाववचनं अमुख्यमित्यर्थः । परिच्छेदयो रित्यनन्तर चकारोऽध्याहार्यः ।

यच्चोक्तं सर्ववस्तुसामानाधिकरण्ये मुख्यामुख्यविकल्पेन दूषणम्, तदपि मन्दम् ; स्वव्यतिरिक्तसमस्तद्रव्यशरीरिणस्तद्वाचिभिरनिष्कर्षकैः शब्दैः प्रतिपादने विवक्षिते दोषकथाभावात्। ततश्चात्र वस्तुपरिच्छेदो नाम स्वस्मात्पृथक्सिद्धाद्वस्तुनो भेदः, स च सर्वप्रकारस्य ब्रह्मणो न सम्भवतीति, स्वरूपभेदमात्रस्य निषेधो निषेधशब्दस्थत्वाद विवक्षित एवेति विवेकानुपपत्तिचोद्यं नावतरति। अयन्त्वर्थः प्रत्यक्षाद्यविरुद्धश्रुतिस्मृतिसूत्रानुगृहीतश्चेत्ययमेवारम्भणाधिकरणभाष्ये प्रदर्शितः। यथा—"भेदवादिनस्तु सर्वचिदचिद्वस्तुशरीरत्वेन ब्रह्मणः सर्वप्रकारत्वात् स्वतः परतः परिच्छेदोपि न विद्यत" इति।

नन्वेवमपि सर्वविधपरिच्छेदनिवृत्तिर्न सिध्यति, स्वरूपविवेकदशायामिदमिदं न भवतीति परिच्छेदस्य विद्यमानत्वादिति चेत्; सत्यम्, तथाविधवस्तुपरिच्छेदस्य श्रुतिभिरेव प्रतिपाद्यमानत्वात्, विश्वमिथ्यात्व पक्षेपि ततः परिच्छेदोक्तेः त्वयाभ्युपेतत्वाच्च तन्निषेधो न शक्यः। यदि च वस्त्वन्तराभावाद्वस्तुपरिच्छेदाभाव उच्यते, तर्हि भवत्पक्षे घटादेरपि वस्त्वन्तराभावात्तत्सिद्धि स्यात्। ब्रह्माख्यं वस्त्वन्तर तस्य विद्यत इति चेन्न ; तत्स्वरूपस द्भावेपि तयोर्भेदस्य मिथ्यात्वेन तस्य वस्त्वन्तरत्वा—

तदपी ति। मुख्यसर्ववस्तुसामानाधिकण्यार्हत्व वस्त्वपरिच्छेद., "यस्यात्मा शरीर" मित्यादिभिश्च सर्वस्य ब्रह्मशरीरत्वेन ब्रह्मप्रकारत्वात् प्रकारवाचिना च प्रकारिपर्यन्तत्वस्याकृत्यधिकरणासिद्धत्वाच्च न तदसम्भवः, न च कैश्चित् शब्दैरसामानाधिकरण्यात्तदभावः, अनिष्कर्षकैस्तद्वाचिशब्दैः सामानाधिकरण्यादित्याशय.। तदर्हत्वञ्च स्वतन्त्रवस्तुभेदाभाव इत्यभिप्रायेण परिच्छेदस्वरूपमाह ततश्चे ति। भाष्यमुदाहरति भेदवादिनस्त्वि ति। स्वत इति वस्तुपरिच्छेदाभावो विवक्षितः, तत्र हेतुः सर्वप्रकारत्वा दिति। अस्य हेतुत्वेनाभिधानात्, पृथक्सिद्धवस्तुभेदो वस्तुपरिच्छेद इत्युक्तं भवति। परत इति तत्कार्यभूतदेशकालपरिच्छेदाभावो विवक्षित.। तत इति। अनृत-

योगात् , व्यावहारिकं वस्त्वन्तरत्वं तस्य विद्यत इति चेत्तद्ब्रह्मापेक्षया घटादेरपि समानम् । न च तदपेक्षया ब्रह्मणः परिच्छेदोऽपि मिथ्याभूतः; जडाजडैक्यप्रसङ्गादेरन्यत्रोक्तेः । स्वसजातीयवस्त्वन्तरसद्भावो वस्तुपरिच्छेद इति विशेष इति चेन्न,—यथाकथञ्चित्सजातीयत्वविवक्षाया प्रकाशसमानत्वादिरूपेण ब्रह्मणः सजातीयस्याविद्यादेर्विद्यमानत्वात् । नचाविद्यादेरवस्तुत्वेन परिहारः, घटादेरपि समानत्वस्योक्तत्वात् । नहि घटाद्यपेक्षया वस्तुतः सजातीयत्वादिकं ब्रह्मणः । घटादिस्वरूपस्यापि मिथ्यात्वाद्विशेष इति चेत् , किमतः? मिथ्यात्वेऽपि घटादेः पटत्वाद्यभाववद्वस्तुपरिच्छेदाभावस्यापि सिद्धेः । अस्त्येवम् , तथापि सत्यत्वं ब्रह्मणोऽपि तत्सिद्धिरस्त्येवेति चेन्न,-इतरवैलक्षण्यार्थानि सत्यज्ञानानन्तपदानीति स्वसिद्धान्तभङ्गप्रसङ्गात् । सर्वथा सजातीयवस्त्वन्तरसद्भावो वस्तुपरिच्छेद इति तदभावविवक्षाया प्रपञ्चसत्यत्वेऽपि न कश्चिद्दोषः । ब्रह्मणस्तद्विभूतिप्रपञ्चेन अत्यन्तसाजात्याभावस्य ब्रह्मलक्षणादिवशादेव सिद्धेः ।

जडपरिच्छिन्नत्ववैकस्य परेणापि वाच्यत्वादित्यर्थः । नहि घटा दीति । सजातीयत्वविशिष्टत्वेषेण ब्रह्मणोऽपि वस्तुत्वं नास्तीत्यर्थः ।

ननु सजातीयनिष्ठवस्तुभेदप्रतियोगित्वरूपं सजातीयवस्त्वन्तरत्वं परिच्छेदः, तस्य मिथ्यात्वात् ब्रह्मणः सत्यत्वात् ब्रह्मणि तदभावोऽस्ति , घटे तु तादृशप्रतियोगिमिथ्यात्वेऽपि घटस्यापि मिथ्यात्वान्न तत्र तदभावः , मिथ्याभूतस्य ह्यधिष्ठान एवाभावः , न तु स्वसमानसत्तके स्वाश्रयेऽपीति शङ्कते घटा दीति । स्वरूपस्यापी ति । भेदप्रतियोगित्ववदिति भावः । मिथ्यात्वेऽपी ति । मिथ्यात्वेऽपि घटस्य तत्र पटत्वाभावस्तत्र विरोध्यसन्निधानादेव, ततश्च सजातीयवस्तुनिष्ठ भेदप्रतियोगित्वस्य मिथ्यात्वेन तत्र पारमार्थिकाभाव प्रत्यविरोधित्वात्, अभावाधिकरणत्वं च विरोध्यसन्निधानस्यैव प्रयोजकत्वात्पटत्वाभाववत्परिच्छेदाभावेऽपि स्यादित्यर्थः । अस्त्येव मिति । यद्यपि त्वदुक्तरीत्या सत्यत्वमभाववत्त्वे न प्रयो

किञ्च–देशकालपरिच्छेदाभावोपि न घटादिव्यावर्तकः, सत्यदेश कालपरिच्छेदस्य घटादिवद्व्यभावात् , मिथ्यादेशकालपरिच्छेदस्य ब्रह्मण्यपि विद्यमानत्वस्य भवतैव स्वीकारात् ।

किञ्च–देशकालपरिच्छेदाभावो न देशकालयो स्वरूपनिषेधगर्भः, वस्तुपरिच्छेदाभावेनैव तत्सिद्धेः ; तद्वद्ब्रह्मव्यतिरस्वरूपे सत्येव तत्प्रयुक्त परिच्छेदाभावो वर्णनीयः, अन्यथा वैरूप्यात् ; सम्भवतश्चैकरूप्यस्य परित्यागायोगात् , सम्भवति तदस्मत्पक्षे सर्वेषु वस्तुषु यथाप्रमाणमवस्थितेष्वेव प्रतिघातपरिणामपृथक्सिद्ध्यादिलक्षणपरिच्छेदस्य प्रतिक्षेपात् ।

किञ्च–अनन्यधासिद्धानेकश्रुतिगणप्रतिपन्नस्य ब्रह्मविभूत्यादेरनेकार्थसाधारणैकानन्तपदस्वारस्यानुरोधाय[धेन] बाधो न युक्तः । तदनुरोधे नैवत्वैकानन्तपदस्वारस्यं सङ्कोचनीयम् । ततश्च प्रत्यक्षाद्यविरुद्धविविध परिच्छेदाभाव एवात्र विवक्षित इत्यङ्गीक्रियताम् । अन्यथानन्तपदश्रुत्य सङ्कोचाय संख्यातोपि परिच्छेदाभावस्वीकारेण ब्रह्मबहुत्वप्रसङ्गात् । एकत्वश्रुतिवशाद्वस्तुपरिच्छेदाभावेनान्योन्यव्याघाताच्च तत्परित्याग इति चेत्तर्हि प्रपञ्चसत्यत्वप्रतिपादकप्रत्यक्षश्रुत्यादिवशात्तत एव व्याघाताच्चेदश

जकम् , तथाप्यविरोधीत्यभिप्रायेणासत्यत्वकीर्तनम् । स्वीकारादिति । जीवस्य मिथ्यात्वस्वीकारात् तस्य च प्रतिबिम्बस्य ब्रह्माभिन्नत्वात् घटाद्यपरोक्षज्ञानस्य च वृत्त्यवच्छिन्नचैतन्यरूपस्योत्पत्तिविनाशस्वीकारादित्यर्थः । वस्तुपरिच्छेदाभावेनेति । तथा च देशकालयोः सतोरेव सर्वदेशकालसम्बन्धात् तत्कृतपरिच्छेदाभावादृशकालपरिच्छेदो वाच्यः, तद्वैरूप्यार्थं तद्वस्तुपरिच्छेदाभावोपि देशकालयोः सतोरेव वाच्य इत्यर्थः । स्वारस्यानुरोधेनेति । वस्त्वन्तरभेदमात्र वस्तुपरिच्छेद इत्यभ्युपगमवादः । तत एवेति । अनन्तशब्दार्थबहुवस्तुपरिच्छेदाभावयो व्याघादित्यर्थः ।

वस्तुपरिच्छेदभावोपि परित्याज्य एव । यदि च त्रिविधपरिच्छेदभावे वश्यमभिसन्धिः, तर्ह्यविरुद्धः परिच्छेदाभावोऽत्र स्वीक्रियताम् । सम्भवन्ति चान्येपि व्यवच्छेद्याः परिच्छेदभेदाः वस्त्वन्तरप्रतिघातवस्तुपरिमाणस्वतन्त्रवस्त्वन्तरसद्भावादयः । एवं वास्तु[वस्तु]परिच्छेदाभाव.—उत्कृष्टेन वस्तुना उत्तराविभूतेन परिच्छिन्न ह्यपकृष्ट वस्तु, तथाविधोपकर्षो ब्रह्मणो नास्तीति । अस्मिश्चार्थे विवक्षिते तस्य सर्ववस्तुशरीरित्वेन सर्वात्मकत्वमप्यन्तर्गतं भवति । एव सति " उल्लङ्घितत्रिविधसीमसमातिशायिसम्भावनं तव परिब्रढिमस्वभाव " मिति भगवद्यामुनाचार्यवचन गोवलीवर्दन्यायेन फलफलिनिर्देशेन वा नेतव्यम् । आरम्भणाधिकरणभाष्यमप्येतत्परमेव योजनीयम् ।

अस्मिश्चे ति । वस्त्वन्तरप्रतियोगिकापकर्षो वस्तुपरिच्छेदः, तदभाव श्चेत्कर्षः, भावान्तरस्याभावत्वात् , स च सर्वशरीरत्वादि, तदपि तदन्तर्गत मित्यर्थः । उल्लङ्घितेत्या दि । यद्यपि परिब्रढिमा प्रभुत्वम् , ' प्रभौ परिवृढ ' इति निपातनात् , तथापि तस्य धर्मिद्वारानन्तत्वान्वय इत्यभिप्रेत्येदमुक्तम् । स्तोत्र भाष्ये साक्षात्प्रभुत्वगननयैवोक्तम्—' देशत कालतो विषयतश्चे' ति । प्रभुत्वस्य ब्रह्मादिवदेकाण्डादिमात्रगतत्वाभावो देशापरिच्छेदः, एतल्लोके पुण्यपापविवेक प्रभोरपि वैवस्वतस्य ' प्रभुरहमन्यनृणा न वैष्णवाना ' मिति विषयविशे दिव सङ्कोचो विषयपरिच्छेदः, तदभावो ब्रह्मादिसर्वविषयत्वमपरिच्छेद इति तत्र भेद । तत्र च न पौनरुक्त्यशङ्कापि, तिस्रो विधा यस्येति बहुव्रीहावन्यपदार्थत्रये समाधिकरणाहित्यस्य पृथक्त्वचनात् । सख्याया (इत्वो) उल्लङ्घनानन्वयात् गोवलीवर्दन्यायसम्भव । फले ति । त्रिविधा सीमा समातिशायिसम्भावना योल्लङ्घिता येनेति विग्रह , तत्र सम्भावनोल्लङ्घन फलमित्याशयः । आरम्भणे ति । 'स्वत' इति स्वरूपमन्वितपरिच्छेदः, स च देशकालाभ्याम्, 'परत इति गुणविभूतिभ्य

अतः सिद्धं सत्यैरेव देशकालवस्तुभिरपरिच्छिन्नं सर्वदेशकाल-व्यापि सर्वान्तरात्मभूतं सर्वैर्मङ्गलगुणैः समस्तहेयप्रतिभटतया च सर्वस्मात्परं ब्रह्मानन्तपदनिर्दिष्टमिति नातः प्रपञ्चमिथ्यात्वसिद्धिरिति ॥

इति शतदूषण्यां आनन्त्यनिरूपणवादः

॥ षट्पञ्चाशो वादः ॥



परिच्छेदः, तदभाव एव वस्त्वपरिच्छेद इति भावः। सत्यैरेवेति। सत्यैरेवापरिच्छेद उपपादयितुं शक्यः, नासत्यैः, घटस्य सत्यात्पटादिवासत्यात् शुक्तिरजतादेरपि भेदस्य परिच्छेदरूपत्वात्, न चैतन्नास्ति,परिभाषामात्रपरिशेषापत्तेः।

अयमत्रनिष्कर्षः —त्वया वस्तुपरिच्छेदशब्देन परिभाषितोऽन्तशब्दार्थः इति किमभिधानकोशसिद्धम् ? उत व्यवहारसिद्धम् ? किं वा वस्तुपरिच्छेदशब्दवदन्तशब्दोपि त्वया परिभाषितः ? आद्यौ न कापि दृष्टचरौ। परिभाषा तु न निषेधामः, परन्तु श्रुतेस्तत्परिभाषापारतन्त्र्यम्।

ननु देशपरिच्छेदस्यात्यन्ताभावरूपत्वात् कालपरिच्छेदस्य प्रागभावध्वंसरूपत्वात् तत्र चान्तशब्दप्रयोगात् नानाशक्तिकल्पने संसर्गाभावत्वेन शक्तिकल्पने च गौरवाच्चाभावत्वेनैव लाघवाच्छक्तिः कल्प्यते, ततश्च भेदोऽन्तशब्दार्थ इति चेत्, यद्येवं तर्हि लाघवाद्वस्तुत्वमेवान्तशब्दप्रवृत्तिनिमित्तम् ततोपि लाघवात् सर्वशब्देपि वा वस्तुत्वमिति किं न कल्प्यते ? व्यवहारस्य शक्तिकल्पकत्वात् तदनुसारेण गौरवं तिरस्कृत्य तत्तच्छब्दाना तत्तत्प्रवृत्तिनिमित्तकल्पनमिति परिहारः प्रकृतेपि तुल्यः। [अ]भेदे अन्तशब्दप्रयोगाभावात्।

किञ्च देशकालपरिच्छेदयोरन्तशब्दश्चरमभागार्थः, ग्रामान्तः कर्मान्त इत्यादौ तथा दर्शनात्, क्वचित्प्रयोगबलात् व्यवसार्थोपि, तथा समीपार्थश्च, प्रागभावात्यन्ताभावान्योन्याभावेषु न क्वचिदप्यन्तशब्दप्रयोगो दृष्टचरः। कथं तर्हि

सिद्धान्ते वस्तुपरिच्छेदार्थकनामिधानम् ? उच्यते, उत्कृष्ट वस्त्वपकृष्टवस्तुपरिच्छेदकतया लोकव्यवहारसिद्धम् , अतः परिच्छेदशब्दार्थतामात्रेण तदपि विवक्षितुं शक्यत इत्येवावता तदङ्गीकारः, क्वचित्तदन्तर्गतस्वतन्त्रवस्त्वन्तरशून्यपरत्वाङ्गीकारश्च । अस्तु वा भेदोऽप्यन्तशब्दार्थः, अथाप्यन्तशब्दस्यानेकार्थत्वात् देशकालपरिच्छेदे तयोः प्रचुरप्रयोगाच्च अत्रापि तन्निषेध एव युक्त । नानार्थत्वाच्च न सङ्कोचगन्धः । अस्तु वा त्वदुक्तरीत्या एकार्थत्वम् , तथापि प्रचुरप्रयोगान्मानान्तराविरोधाच्च उक्तरीत्या सङ्कोच एव युक्तः । अन्यथा " अनादिर्भगवान् कालो नान्तोऽस्य द्विज विद्यत " इति अन्तशब्देन कालस्यापि वस्तुपरिच्छेदाभावप्रसङ्गात् । अन्तशब्देन भेदस्याप्युक्तौ निषेधानुपपत्तिश्च , ब्रह्मणः प्रपञ्चभिन्नत्वात् । सत्यादिपदैः प्रपञ्चभेदः प्रतिपाद्यते, अनन्तशब्देन भेदनिषेधः क्रियते, इदं च वाक्यं तत्त्वावेदकम् , पदत्रयमपि स्वरूपलक्षकमिति कस्मादुपाध्याया दधीतोय वृषळोद्वाहमन्त्रं क्षम्यता अयमसदृष्टप्रलापः , पदद्वयमपि स्वरूपलक्षकमित्येतावदेवोच्यत इति चेत् , तर्हि आनन्त्यश्रुतितः कथं मिथ्यात्वसिद्धिः ? अतः पुनरावृत्तः स एव मन्त्रः । अपि च प्रपञ्चमिथ्यात्वं कथं भेदनिषेधोपपादकम् ? सत्यपदात्तानृतव्यावृत्त्युपपादकत्वात् ।

ननु प्रपञ्चस्य सत्यत्वे तद्भेदोऽपि सत्यः स्यात् । मिथ्यात्वे तु भेदोऽपि मिथ्येति निषेधोपपत्तिरिति चेन्न ,—अनृतव्यावृत्तेर्मिथ्यात्वप्रसङ्गात् । सत्यादिपदानां तत्त्वावेदकत्वप्रसङ्गाच्च तेषां व्यावृत्तिपरत्वोक्तेः ।

ननु सा व्यावृत्तिः स्वरूपात्मिका, निषिध्यमानस्तु भेदः स्वरूपातिरिक्तो मिथ्येति चेत् , तर्हि सत्य एव परिच्छेद इति कथमानन्त्यसिद्धिः ? न हि स परिच्छेदो न भवतीति राजाज्ञा , अविद्याया अपि परिच्छेदप्रसङ्गात् । तत्रापि भेदाङ्गीकारे अनवस्थाप्रसङ्गेन स्वरूपात्मकतयैव भेदस्य स्वीकार्यत्वात् ।

ननु देशकालपरिच्छेदवदयमपि परिच्छेदः अभावप्रतियोगित्वात्मक एव, अभेदप्रतियोगित्वं वस्तुपरिच्छेदः , तदेवात्र निषिध्यते, न तु भेदाश्रयत्वमिति चेन्न , सदसाद्वलक्षणत्वं वदता ब्रह्मभेदस्य प्रपञ्चेऽङ्गीकारात् । स्वसम ।

सत्ताकभेदप्रतियोगित्व परिच्छेद इति चेन्न,—प्रपञ्चमिथ्यात्वसिद्धेः प्राक् सत्ता-भेदासिद्धेः। प्रातिभासिकसत्ताङ्गीकारेऽपि न विशेषणस्य प्रयोजन पश्यामः।

ननु भेदप्रतियोगित्वस्य ब्रह्मणि निषेधात् विद्यमानमपि भेदप्रतियो-गित्व मिथ्यैव, एव च, तन्मिथ्यात्वस्य भेदतदाश्रयमिथ्यात्वं विनानुपपत्तेः तत्सिद्धि·, न च भेदप्रतियोगित्वस्य मिथ्यात्वमभेदप्रतियोगित्वस्य सत्यत्वेना-प्युपपन्नम्, तत्सत्यत्व चाभेदसत्यत्वाधीनम्, तच्च प्रपञ्चसत्यत्वाधीनम्, अतः प्रपञ्चसत्यत्वेनोपपन्न प्रपञ्चभेदप्रतियोगित्वमिथ्यात्व कथ प्रपञ्चमिथ्यात्व साधयेत्? प्रपञ्चसत्यत्वेनैव वा तदुपपत्तिः, भेदप्रतियोगित्वस्यासत्यत्वे अभेदप्रतियोगित्वस्य सत्यत्वावश्यभावात्, अतोऽनन्तपद प्रपञ्चसत्यत्वस्यैव साधकमिति वाच्यम्, जडाजडयो. पारमार्थिकाभेदासम्भवादिति चेन्न,—अभेदप्रतियोगित्वस्यापारमार्थ्ये भेदप्रतियोगित्वपारमार्थ्यस्यावर्जनीयत्वात्, ब्रह्मणोऽधिष्ठानतया प्रपञ्चस्य तदभे-दाच्च। सोऽपि मिथ्येति चेत्तर्हि समानसत्ताकयोर्विरोधाङ्गीकारात्तथाविधयोरेव भेदप्रतियोगित्वाभेदप्रतियोगित्वयोरङ्गीकाराच्च पुनरावृत्तस्य एव मन्त्र.।

ननु सत्यभूतभेदप्रतियोगित्वस्याभाव एवाभेदः, तेनाधिष्ठानत्वोपपत्तिः, अयमेव चानन्तशब्दार्थोपीति चेत्, तर्हि सत्यभूतभेदप्रतियोगित्व परिच्छेद इति घटादे. तदभावात् तेषामपि अपरिच्छिन्नत्वप्रसङ्गः। ब्रह्मणः प्रपञ्चभिन्नत्वात् भेदस्य च ब्रह्मस्वरूपत्वात् सत्यभूतभेदप्रतियोगित्वात् घटादेः कथं तदपरिच्छेद इति चेत्, तर्हि घटादेः पटादिभेदः परिच्छेदो न स्यात्। न चेष्टापत्तिः, अविशेषात् ब्रह्मनिष्ठभेदप्रतियोगित्वस्यापि अपरिच्छेदत्वप्रसङ्गात्। आश्रयसमान सत्ताक भेदप्रतियोगित्व परिच्छेद इति तु दत्तोत्तरम्, समानसत्तापदवैयर्थ्य-स्योक्तत्वात्।

ननु घटादौ भेदप्रतियोगित्वस्य मिथ्यात्वात् समानसत्ताकयोर्भावाभाव योर्विरोधाच्च भेदप्रतियोगित्वाभावो मिथ्याभूतो घटादौ न सम्भवति, सत्यभूत-स्तु नास्त्येव। अनन्तपदेन कृत्स्नमिथ्यात्वावगमदशायामभेदप्रतियोगित्वाभावस्यापि मिथ्यात्वावगमात्। तस्मान्नापरिच्छेदप्रसङ्गो घटादेरिति चेत्, एव तर्हि ब्रह्मणोऽपि नापरिच्छेदसिद्धिः। भेदप्रतियोगित्वस्य तत्रापि मिथ्यात्वेन मिथ्याभूतस्तदभावस्या

सम्भवात्, सत्यभूताभावासिद्धेश्च । अथोच्येत ब्रह्मणि भेदप्रतियोगित्वाभावः स्वरूपमेवेति, सिद्धं तर्हि घटादेरपरिच्छेदः, ब्रह्मणीव ब्रह्मस्वरूपस्य प्रतियोगित्वाभावस्य घटादावप्यवश्यम्भावात्, प्रतियोगित्वस्य मिथ्यात्वेन तदविरोधस्याविशेषात्, सद्वैलक्षण्यस्य मिथ्यात्वे प्रपञ्चसत्यत्वप्रसङ्गेन ब्रह्मण एव सद्वैलक्षण्यरूपताया वाच्यत्वेन भेदत्ववत् भेदप्रतियोगित्वाभावरूपताया अवर्जनीयत्वात् ।

इति श्रीवाधूलकुलतिलकश्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्येन

तदेकदैवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्ध

महाचार्यापरनामधेयेन रामानुजदासेन विरचितायां


अतदूषणीव्याख्यायां चण्डमारुताख्यायां

आनन्त्यनिरूपणं नाम

षट्पञ्चाशः स्कन्धः ॥५६॥

॥ श्रीरस्तु ॥

॥ सप्तपंचाशो वादः ॥



ब्रह्मण्यानन्दशब्देन दर्शितां गुडजिह्विकाम् ।
निर्विशेषगृहीतानां वादिना विलुनाम्यहम् ॥

श्रूयते हि—" विज्ञानमानन्दं ब्रह्म " " आनन्दो ब्रह्म " " कं ब्रह्म खं ब्रह्म " त्यादि । तत्र किमिदं ब्रह्मण आनन्दत्वं नाम? सुखत्वमिति चेत्तदपि किमिति विचारयाम. । किमनुकूलवेदनीयत्वम् ? उतानुकूलवेदनत्वम् ? अथानुकूलत्वमात्रम् ? यद्वा दुःखनिवृत्तिरूपता मात्रम् ? उत ज्ञानात्मकत्वमेव? किञ्चिद्धर्मान्तर वा ? न प्रथमः, वेद नीयत्वस्यानभ्युपगमात् । व्यावहारिकं तदस्त्विति चेत्तर्हि ब्रह्मण आनन्द त्वं व्यावहारिकमिति ब्रह्मणोऽनानन्दत्वमेव परमार्थः स्यात् । ततश्च

क्षिप्तानासुरयोनिषु प्रतिमुहुर्मूढानधोधोगता ऽ
प्यै नप्राप्यैव तु पार्थसूतपरमानन्द ततो निन्दतः ।
नैर्गुण्येन सता तदात्मियशसा दग्धान् सदा वादिनो
नीचान् भाति नुदन् सतां परिबृढस्त्वय्यन्तसद्देशिकः ॥
निरुपममिद वैराग्य वः क्षमा च विनिन्दथ
प्रगुणमपि यत ब्रह्मानन्द स्तवो गुणवत्तया ।
यदपि निरय मूढा न द्विष्ट भावि वय पुन
र्जनितभगवत्प्रेमाणः श्रीनिवासगुरुक्तिभिः ॥

आनन्दत्वस्य परपक्षे असम्भवं दर्शयिष्यन् तस्येष्टापादनत्वनिरासायाह श्रूयत इति । किमिद मिति । न तावत्स्वरूपम्, तथा सति हि स्वरूपमानन्दो न स्यात् ; नापि धर्मः, अनिर्वचनात् , अतो दुर्निरूपमित्यर्थः । व्यावहा-रिक मिति । वेद्यत्वस्य घटादाविव धर्मिसमसत्ताकत्वाभावान्नाभ्युपगमविरोध

व्यावहारिकदशायामनुकूलत्वं तन्निवृत्तिदशायां तन्निवृत्तिरपीति संसार-स्यैव प्राह्यत्वं मोक्षस्य दूरपरिहरणीयत्वमिति स्यात् । यदा कदाचिदनु-कूलवेदनीयत्वं यावद्द्रव्यभाविन आनन्दत्वस्य उपलक्षणमिति चेत्तर्हि सासारिकस्य सर्वस्यापि वस्तुजातस्य "वस्त्वेकमेव दुःखाय" "तदेव प्रीत्यै भूत्वे" ति श्लोकद्वयोक्तप्रकारेण कदाचिदनुकूलवेदनीयत्वस्य सद्भावाद्यावद्द्रव्यमानन्दत्वं स्यात् । ततश्च सप्रपञ्चतयैवानुभव उपा-देय. स्यात् ; सहस्रवतः पञ्चशत किमधिकमितिन्यायात् । विषयानु कूल्यानुभवदशाया ब्रह्मानन्दानुभवो न सिध्येदिति चेन्न;—तस्य नित्य स्वयम्प्रकाशत्वाभ्युपगमात् । वैशद्यावैशद्यादिदूषण त्वन्यत्रैव । एवं वेदितु रप्रवादपि वेदनीयत्वासिद्धे. । व्यावहारिकदशायां तत्सद्भावमात्रमपि

इति भाव: । व्यावहारिके ति । ससारदशायामित्यर्थ. । तदि ति । ससार-निवृत्तिदशायामित्यर्थ· । यथा प्रपञ्चस्य कल्पितत्वात्तिष्प्रपञ्चत्व ब्रह्मण: परमार्थ-स्तथाऽऽनन्दत्वस्य कल्पितत्वे तद्विपरीतमनानन्दत्वमेव परमार्थ. स्यादिति भाव. । एतेन वृत्तिविषयत्वमादायानुकूलवेद्य वमित्यापि निरस्तम् । आनन्दत्वस्ये ति । आनन्दात्मकस्वरूपस्येत्यर्थ. । आनन्दत्वं स्यादि ति । उपादेयस्वरूप स्यादि-त्यर्थ. । अनुभव —ब्रह्मानुभव. । ननु अपरिच्छिन्नब्रह्मानन्दलाभात् क्षुद्रसुख रूपप्रपञ्चस्य नोपादेयतेत्यत्राह सहस्रवत इति । अधिकम्—अपेक्षितादधिक-मनपेक्षितमित्यर्थ ।

ननु अधिकब्रह्मानन्दानुभवविरोधित्वात् विषयानन्दानुभवो नोपादे इति शङ्कते विषयानुकूल्ये ति । तस्ये ति । ब्रह्मस्वरूपस्येत्यर्थ. । तथा च तन्मात्र नन्दस्य नाप्रकाश इति भाव: । यद्वा ब्रह्मानन्दस्वेत्यर्थ. । उक्त हि युष्माभि: " भानत एव परमप्रेमास्पदत्वलक्षण सुख " मिति । संसारदशायामप्यात्मनि परमप्रेमास्पदत्वप्रयोजक सुखासाधारण स्वरूप भासत इति हि तदर्थ. । ससार-दशाय मविशदब्रह्मानन्दानुभवेऽपि विशदानुभवाभावादस्त्येव विरोध इत्यत्रा वैशद्ये ति । अतिरिक्ताकारप्रकाश एव च वैशद्यम्, तस्मिन्नप्याकारे स ए सत्यत्वामेथ्यात्वावकल्प इत्यादिना जिज्ञासानुपपत्तिवादे वैशद्यदूषणमित्यर्थ: आदि शब्देनावरण.नावरणारभावणत्वानवधारणत्वादिकं तत्र तत्र दूषितमित्यर्थ: दूषणान्तरमाह एव मिति । वेद्यनीयत्वासिद्धे न प्रथम इत्यन्वय. ।

दत्तोत्तरमेव। नापि द्वितीयः, वेदनरूपत्वातिरिक्तानुकूलत्वाभ्युपगमे निर्विशेषवादापक्रमात्, तदनभ्युपगमे व्यर्थविशेषणत्वात्, पर्यायत्वादिप्रसङ्गाच्च। भिन्नार्थत्वे विशेषणत्वाभावे च घटः पट इतिवत् अनन्वयात्। न तृतीयः, आनुकूल्यस्यापेक्षिकत्वेन किञ्चिदपेक्ष्येत्यभ्युपगम्यत्वात् भवतश्च तदयोगात्। स्वात्मानं प्रतीदमानुकूल्यमिति चेन्न,—प्रतिसम्बन्धित्वलक्षणस्वभावविशेषाभ्युपगमेऽपसिद्धान्तात्, अनभ्युपगमे तदुपाधिकानुकूलत्वस्यापि विनिवृत्तेः। अविद्याशबलितं स्वात्मानं प्रतीति चेत्तर्हि तन्निवृत्तिदशायामानुकूल्यनिवृत्तिप्रसङ्गः प्राग्वदेव। नापि चतुर्थः, औपनिषदमर्यादबहिष्कारात्, अभावात्मकत्वप्रसङ्गाच्च।

दत्ते ति। मोक्षदशाया वेदितुरभावेनानानन्दत्वापत्त्येत्यर्थः। वेदने ति। वेदनस्वरूपातिरिक्तानुकूलत्वाभ्युपगम इत्यर्थः। व्यर्थे ति। विशेषणवाचित्वाभिमतमनुकूलपदं विशेषणाभावाद्व्यर्थमित्यर्थः। पर्यायत्वा दीति। अनुकूलवेदनपदयोरुभयोरपि स्वरूपप्रवृत्तिनिमित्तकत्वे पर्यायत्वम्, अन्यथा तु प्रवृत्तिनिमित्तान्तरस्याप्यभावादबोधकत्वमेव स्यादित्यर्थः।

ननु वेदनानुकूलपदयोर्भिन्नार्थत्वान्न पर्यायत्वम्, नचैवं सविशेषत्वं तद्वतविशेषणवाचित्वाभावादित्यत्राह भिन्नार्थत्व इति। विशेषणवाचित्वाभावे विशेष्यतो भिन्नार्थं वाच्यम्, तथा च न सामानाधिकरण्येनान्वयः—घटः पट इतिवदिति भावः। आपेक्षिकत्वेन—पुरुषविशेषापेक्षत्वेनेत्यर्थः। विनिवृत्तेरिति। स्वरूपे प्रतिसम्बन्धित्वानभ्युपगमे तद्घटितानुकूल्यस्याप्यभावादित्यर्थः। औपनिषदे ति। दुःखनिवृत्तेः पुरुषार्थत्व इत्यर्थः। वैशेषिकाद्यविशेष इति भावः। सुखरूपं भावान्तरमेव दुःखनिवृत्तिः, अतो नाभावात्मकमिति शङ्कते

ब्रह्मणो दुःखनिवृत्तिरेव सुखशब्दवाच्यं भावान्तरमिति चेन्न,—उदासीनावस्थाया. सर्वसम्मतत्वात्, पूर्वं निर्दुःखस्यापि शार्करादिरसास्वादनान्यसुखानुभवदर्शनाच्च । अन्यथा सुखनिवृत्तिरेव दुःखमिति वदन्तं प्रति किमुत्तरम्भवेत् । अभ्युपगम एवोत्तरमिति चेन्न,—द्वयोरपि भावरूपत्वासिद्धिप्रसङ्गात् ? भावान्तराभाववादिना नैवं चोदनीयमिति चेन्न; भिन्नोपाधिक्रोडीकरणेदासीनावस्थासङ्ग्रहसिद्धेः, स्वरूपत एव निरूपण[ा]सिद्धेश्च ।

किञ्च-समस्तदुःखनिवृत्तिरूपा सुषुप्त्यवस्थामुद्दिश्य, नाहमत्र भोग्यं पश्यामीति वदन्तं प्रति भोग्यात्मस्वरूपोपदेशदर्शनाद्दुःखनिवृत्त्यतिरिक्तसुखरूपमात्मस्वरूपमिति ज्ञायते । नापि पञ्चमः, 'विज्ञानमानन्दं ब्रह्मे' ति सहप्रयोगेण व्यतिरेकसिद्धे, न हीदं निखण्डवत्पर्यायबोधनोपक्षीण लक्षणं वा वाक्यम्, येन सहप्रयोगः सङ्गच्छेत ।

ब्रह्मण इति । उदासीने ति । कदाचिद्दुःखावस्था अन्यदा तु दुःखनिवृत्त्यात्मकसुखावस्था इत्यवस्थाद्वयमेव स्यात्, नोपेक्षावस्थेत्यर्थः । इतोऽपि न दुःखनिवृत्तिः सुखमित्याह पूर्वं मिति । अन्यथा उदासीनावस्थानङ्गीकार इत्यर्थः. द्वयोरिति द्वयोरपि प्रतियोगिनिरूपणनियतनिरूपणकत्वादिति भावः । भावान्तरेति भावान्तराभाववादिना भावयोरेव सुखदुःखयोः परस्परभावात्मकत्वस्य वक्तव्यत्वात् उदासीनावस्थासग्रहाभावतौल्यात्, अन्यथा सुखनिवृत्तिरित्यादिचोदनद्वयापीत्यादिचोदनञ्च न सम्भवतीत्यर्थः । भिन्नोपाधी ति । न वयं सुखत्वे दुःखाभावत्व दुःखत्वेन सुखाभावत्व ब्रूमः, किन्तुभयत्तद्देशकाविशिष्टभावान्तरत्वेन, अत उदासीनावस्था सिध्यतीत्यर्थः । एवमुदासीनावस्थासग्रहाभावप्रतिबन्दी पराकृता, द्वयोरपि भावरूपत्वासिद्धिप्रसङ्गप्रतिबन्दीमप्युद्धरति स्वरूपत इति । किंच इति । 'नाहमत्रे' त्यत्र अत्र शब्देन सुषुप्त्यवस्था परामृश्यते, सा च ज्ञानेच्छादुःखादिसकलवृत्तिनिवृत्तिरूपा, ततश्च

यावता च विज्ञानत्वं ब्रह्मण. समर्थितं तावतैव हि भवताप्युपरन्तव्यम्, किमानन्दत्वोपपादनप्रयासेन। अपर्यायताबोधनिवृत्त्यर्थोयं प्रयास इति चेन्न,-तथाविधविवादाभावात्। तत्सद्भावेपि महता प्रयासेनापि सर्वलोकप्रसिद्धस्यापर्यायत्वस्यापि दुरपह्नवत्वात्। दु खरूपाणि च कानिचिद्विज्ञानान्युपलभ्यन्ते, तदपि ज्ञानमात्रस्य सुखरूपत्वे विरुद्धम्। भ्रान्त्या तदुपलम्भ इति चेन्न;-विरोधिनि विज्ञानात्मकत्वे प्रकाशमाने तद्विरोधिनो दु खरूपत्वस्यारोपासम्भवात्। न हि सुखरूपतया प्रकाशमाने दुःखरूपत्व कदाचिदध्यस्यति। नापि षष्ठ., बहिष्कृतानुकूल्यस्य तस्यानन्दशब्दवाच्यत्वायोगात्। तत्प्रतीकारे उक्तदूषणानुं—

दु खाभावे ज्ञायमानेऽपि 'नाहमत्र भोग्य'मित्युक्तेर्दु.खाभावस्य भोग्यत्वाभाव उक्तः उत्तरे चात्मनो भोग्यत्वमुक्तम, अतो भोग्यत्वेनोक्तस्यात्मनोऽभोग्यत्वेनोक्त दु.ख निवृत्तिमात्रत्व दुर्वचनमिति भावः। किञ्च ज्ञानत्वस्यैव आनन्दत्वरूपत्वे ज्ञानत्वं प्रसाध्यापि पुनरानन्दत्वसाधनप्रयासात्मकस्वप्रवृत्तिव्याघात इत्याह यावताचे ति। अपर्यायते ति। ज्ञानस्यानन्दशब्दवाच्यत्वमेव साध्यत इत्याशय। तथाविधे ति। आनन्दस्यानन्दशब्दवाच्यत्वे अविप्रतिपत्तेः, ज्ञानत्वानन्दत्वयोरभेदे ज्ञानेऽपि न तद्विप्रतिपत्तिरिति भाव। किञ्च न ज्ञानत्वमानन्दत्व दु.खेऽपि गतत्वादित्याह दु खे ति। दु.खादिकमपि ज्ञानविशेष इति स्वमतेनेदमुक्तम्। तदुपलम्भ इति। ज्ञाने दु खत्वोपलम्भ इत्यर्थः। ज्ञानत्वस्य विरोधित्वाभावादारोपसम्भव इत्यत्राह नहीति तथाच ज्ञानत्वमेव सुखत्वमित्युक्तत्वात् ज्ञानत्वे प्रकाशमाने दु खत्वारोपो न सम्भवतीत्यर्थ.।


अस्तु यत्किञ्चिदानन्दत्वम्, आनन्दत्वेनाभिमतस्यानुकूलमस्ति न वा? द्वितीये दोषमाह बहिष्कृते ति। आद्ये दोषमाह तत्प्रतीकार इति। आनुकूल्याङ्गीकारेण तत्प्रतीकार इत्यर्थ.। उक्ते ति। तृतीय पक्षोक्तदूषणेत्यर्थः।

वृत्तेरेव दुष्टत्वात् । ज्ञानात्मकत्वातिरेकानतिरेकविकल्पेनापि दत्तमेवोत्तरं मन्तव्यमिति ।

अतो न कथञ्चिदपि निर्विशेषचिन्मात्रवादिनस्तदानन्दत्व-सिद्धिरिति ।

इति शतदूषण्यां निर्विशेषब्रह्मण आनन्दत्वभङ्गः

॥ सप्तपञ्चाशो वादः ॥



ज्ञानात्मकत्वे ति । तदानुकूल्य ज्ञानात्मकत्वमेव ? अतिरिक्तं वा ? अनिरेके निर्विशेषवादापक्रमादिद्वितीयपक्षोक्तदोषः प्रसजेत् , अनतिरेके सहप्रयोगानुपपत्त्यादि. पञ्चमपक्षोक्तदोषः प्रसजेदिति भावः ।

यदाह नवीनः—

सुखत्व हि सुखपदप्रवृत्तिनिमित्ततयानुगतव्यवहारविषयतया व्यावृत्ताबेव कल्पते , न तु सुखरूप आत्मनि, तत्र तत्कल्पने प्रमाणाभावात् , श्रुतौ सुखपदस्य वृद्धव्यवहारे वृत्त्यवच्छिन्नचैतन्यात्मनि सुखे व्युत्पन्नस्य ज्ञानादिपदवल्लक्षणया आत्मनि प्रयोगात् , ननु यद्यात्मनि न सुखत्व तर्ह्यात्मा न सुखम् , तस्यैव तत्स्वरूपलक्षणत्वादिति चेन्न,—न सुखत्व सुखस्य स्वरूपलक्षणम् , तस्य ततोन्यत्वात् , अन्यस्याप्यस्वरूपत्वायोगात् । किञ्च सुखत्वाश्रयव्यक्तौ विशेषोऽस्ति नवा? न चेत्कथ सुखत्वव्यवस्था? व्यक्तिविशेष विना सुखत्वस्यैव धर्म इति नियन्तुमशक्यत्वात् , प्रथमेऽपि स विशेषो न धर्मः, तत्रापि व्यवस्थापकाभावात्, व्यक्तिस्वरूपातिरिक्तधर्मानिरूपणाच्च । ततः सुखस्वरूपमेव विशेषः, तदेव तल्लक्षणम्—गोत्वादेरिव तत्स्वरूपम् ।

नचैव ज्ञानानन्दपदयोः पर्यायत्वमेकार्थत्वादिति वाच्यम्,-तत्तद्वृत्ति विशेषशबलस्य तदुपहितस्य वा ज्ञानानन्दपदवाच्यत्वात् प्रवृत्तिनिमित्तभेदेनापर्याय

त्वात् । नचैवमानन्दपदलक्ष्यत्वादात्मा नानन्दः स्यादिति वाच्यम्,—छत्रिणः छत्रिपदलक्ष्यत्ववदनौपाधिकप्रीतिविषयतया आनन्दस्यैव आत्मन आनन्दपदलक्ष्यत्वेनानन्दत्वानपायात् ; तस्मादनौपाधिकप्रीतिविषयो यश्चैतन्य तदेव सुखम्, तच्च दुःखानुभवदशायामपि स्वाश्रयाधारणरूपेण प्रतीयत इति न तदा प्रेमानुपपत्तिः । एतेन यदि चैतन्यमेव सुखलक्षण तदा चैतन्यस्य परेणाप्यभ्युपगमात् तदतिरिक्तस्य सिद्धान्तेऽप्यभावाच्चैतन्य सुखमिति नाममात्रं न अर्थविशेष इति प्रत्युक्तम्, आत्मातिरिक्तं सुखमिति वदतामप्यनौपाधिकप्रीतिविषयत्वमेव तल्लक्षणम् । आत्मापि चेत्तादृश कथ नात्मा सुख कथ वा न परमतात् विशेष. ? प्रमाण स्वस्यात्मा सुखरूपोनिरूपाधिकप्रेमगोचरत्वाद्व्यतिरेकेणानात्मवत् ।

नन्वत्र न सुख वाश्रय इति प्रतिज्ञार्थः, केवल आत्मनि तदभावात्, अत एव न सुख-वविशिष्टाभिन्न इत्यर्थ , केवलस्य सुखत्वविशिष्टाभेदे केवलेऽपि तत्प्रसङ्गात्, नापि दु.खान्यत्व साध्यम्, सिद्धसाधनात्, नापि दु खविरोधित्व दु खात्यन्ताभावत्वेनार्थान्तरत्वादिति चेन्न, निरवयवसुखपदवाच्याभेदस्य साध्यत्वात्, अत्र स्वमते वृत्तेरपि सुखपदवाच्यत्वाद्भेदसाधने बाध इति निरवयवेत्युक्तम्, वस्तुनस्त्वेतद्विशेषण विनापि बाधितसुखपदवाच्याश्च विहायाबाधितस्वरूपसुखभेदाभावमादाय साध्य सिध्यति , तथा च न बाधपरिहाराय विशेषणम्, किन्तु सुखपदवाच्यवृत्तिभेदस्य साध्यव्यतिरेकस्यात्मनि सत्वेऽपि हेतुव्यतिरेकाभावात् तत्र व्यातरेकव्यभिचारपरिहाराय , न च निरवयवसुखपदवाच्यसुखत्वभेदोऽप्यात्मन्यस्तीति व्यतिरेकव्यभिचारस्तदवस्थ इति वाच्यम , वृत्तिविशेषानुगतात्मस्वरूपसुखत्वेव सुखानुगतबुद्धिविषयतया सुखत्वरूपत्वेन तस्य तद्भेदाभावात् ; यद्वा परमप्रेमास्पदताप्रयोजकरूपाभेद साध्य इति ।

तदसत्—परमते हेतो. स्वरूपासिद्धे', अह भूयासमित्याद्यहमर्थस्यैव निरुपाधिकप्रेमगोचरत्वदर्शनात् सुख मे भूयादित्याद्युत्पत्त्यादिमतो लोकप्रसिद्धस्य सुखत्वाश्रयस्यैव निरुपाधिकप्रेमगोचरत्वदर्शनात् । नचोभयत्रापि सुखस्वरूपचैतन्याभेदादेव प्रेमेति वाच्यम् , अद्यापि त्वदभिमतात्मन. सुखत्वासिद्धेः सदिग्धव्यभिचारात् । अत एवाहमर्थे व्यभिचार. ।

किञ्च—सुखपदवाच्या हि वृत्तिरेव, तस्यामेव प्रवृत्तिनिमित्तयोगस्य त्वयाभिधानात्, चैतन्यस्य प्रवृत्तिनिमित्तयोगाभावात्, सुखवृत्तितादात्म्यमात्राध्यासाद्योगाभावात्, सुखवृत्तितादात्म्याध्यासात् सुखपदवाच्यत्वे शुक्तेरपि रजतपदवाच्यतापसङ्गात्, तथा च साध्यापसिद्धिः, सुखरूपत्वासिद्धावपि सुखत्वरूपत्वसिध्या अर्थान्तरत्वञ्च । द्वितीयसाध्यमप्यनुपपन्नम्, परमप्रेमास्पदताप्रयोजकरूपाभेदेऽपि परमप्रेमास्पदत्वासिद्धेरर्थान्तरत्वात् ।

किञ्च—मोक्षदशाया ब्रह्मणः उपादेयत्वसिध्यर्थं हि श्रुतिरानन्दत्वं प्रतिपादयति, तत्रापि स्वरूपमात्रस्य स्वप्रकाशादिसिद्धत्वात् तावन्मात्रप्रतिपादनेऽप्युपादेयत्वासिद्धेः सत्यज्ञानादिपदैरप्यसिद्धेश्च न तस्य प्रतिपाद्यता । धर्मप्रतिपादने चाद्वैतहानिः । धर्मस्य मिथ्यात्वे तु कल्पितप्रपञ्चाधिष्ठानस्य ब्रह्मणः परमार्थतो निष्प्रपञ्चस्वरूपत्वात् कल्पितानन्दत्वपरमप्रेमास्पदताकस्य ब्रह्मणः तद्विपरीतस्वरूपं परमार्थः स्यात् । तदिदमुक्तं प्रथमविकल्पदूषणे "ब्रह्मणोऽनानन्दत्वमेव परमार्थः स्या" दिति । यच्च सुखत्वाश्रयत्वकौ विशेषौस्ति नवेत्यादि, तन्न, तत्र विशेषो यदि भेदः, सोऽस्त्येव, तत्स्वरूपस्य तदितरसमस्तभिन्नत्वात्, यदि सुखत्वाश्रयप्रयोजको धर्मविशेषः, स नास्त्येव । न चैवं सुखत्वाव्यवस्थापत्तिः, स्वरूपविशेषेऽपि तत्पर्यनुयोगस्य सुशकत्वात् । यच्च ज्ञानानन्दपदयोरपर्यायत्वसाधनम् तदपि न सुखात्मकवृत्तौ ह्यनुगतव्यवहारनिमित्तमानन्दत्वमधिष्ठानसुखस्वरूपमेवेति त्वयोक्तम्, तथा ज्ञानत्वमपि । अतो ज्ञानत्वानन्दत्वयोरभेदात्स्यादेव पर्यायत्वम्॥ "विज्ञानमानन्द" मित्यादौ आनन्दपदलक्ष्यत्वेऽनानन्दत्वापत्तिश्च । न च छत्रिपदलक्ष्यत्वेऽपि छत्रित्ववदानन्दपदलक्ष्यत्वेऽप्यानन्दस्वरूपानपायः, तत्र छत्रिणोऽपि गमनस्य प्रमाणान्तरसिद्धत्वादजहल्लक्षणा, अत्र तु न स्वरूपमानन्द इत्यत्र प्रमाणान्तरमस्ति ।

किञ्च आनन्दत्वस्य वृत्तिगतप्रवृत्तिनिमित्ततया तव वृत्तेरेव विशेष्यत्वात् जहल्लक्षणैव । न च तदभेदाध्यासाच्चैतन्यमपि वाच्यम्, दुःखपदेऽपि वृत्त्यवच्छिन्न

चैतन्यस्य वाच्यत्वापत्ति' । अजहल्लक्षणाया मुख्यत्वात्तत्सिद्ध्यर्थमेव सुखपदवाच्य वृत्त्यवच्छिन्नचैतन्यमिति चेन्न,—लक्षणामुख्यत्वाय शक्तिगौरवस्यान्याय्यत्वात् । किञ्च एव शक्तिकल्पनायामपि आनन्दत्व वृत्तावेव न चैतन्य इति कथ तदानन्द स्वरूपम् ?

एतेन लाघवेनानन्दपदस्य विशेष्यस्वरूपलक्षकत्वात्तदेव ब्रह्मानन्दस्वरूप मित्यत्र प्रमाणमिति निरस्तम् । यच्चानौपाधिकप्रीतिविषयत्वमेव सुखलक्षणम् तच्चात्मन्यपीति, तन्न, अनौपाधिकत्व यद्यन्येच्छानधीनत्व तदा तवाहङ्कारेति व्याप्तिः । यद्यन्यसम्बन्धानधीनत्वम्, तदा चैतन्ये असम्भव., अहमर्थसम्बन्ध प्रयुक्तत्वात्तत्र प्रेम्ण., सर्वेषामपि हि अह भूयास मम सुख भूयादिति स्वान्तःकरणा वच्छिन्नचैतन्ये स्वसम्बन्धिसुखे च निरुपाधीच्छा भवति, न तु देवदत्तो भूयात् तत्सुख भूयादिति ।

इति श्रीवाधूलकुलतिलकश्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्येन

तदेकदैवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्ध

महाचार्यापरनामधेयेन रामानुजदासेन विरचितायां

शतदूषणीव्याख्याया चण्डमारुताख्यायां

निर्विशेषब्रह्मण आनन्त्यभङ्ग

सप्तपञ्चाश. स्कन्धः ॥५७॥



॥ श्रीरस्तु ॥

॥ अष्टपंचाशो वादः ॥

पूर्ववृत्तचतुष्केपि पूर्वत्वेनोपवर्णिते ।
नित्यानित्यविवेकेत्र नित्यत्वं वो निरस्यते ॥

श्रूयते हि " नित्य विभुं सर्वगतम् " " नित्यो नित्याना " मित्यादिभिरात्मतत्वनित्यत्वम् । तद्वत्पक्षे नोपपद्यते, ब्रह्मव्यतिरिक्त— मविद्याकालादिकं स्वरूपतोपि सर्वमनित्यं ब्रह्मैकमेव नित्यमिति हि वः सिद्धान्तः । तदेतत् ब्रह्मासाधारणनित्यत्वं किं सर्वकालसत्तारूपम्; उत कालावच्छेदनिवृत्तिरूपम्? अथवा प्रध्वंसरहितत्वम्? आहोस्तिदबाधित त्वम्? उत निर्विकारत्वम्? यद्वा उभयावधिरहितत्वम्? किञ्चिद्धर्मान्तरं वा? नाद्य., अविद्याया अपि नित्यत्वप्रसङ्गात् । सापि हि सर्वेण कालेन सम्बध्यत एव, सर्वस्थापि कालस्य तत्कार्यत्वाभ्युपगमेव तदसम्बन्धा-

---

पूर्ववृत्ते ति । मुमुक्षापर्यन्त हि साधनचतुष्टयान्तर्गत सर्वं नित्यानित्य-वस्तुविवेकसाध्यम्, अतो नित्यत्वसिद्धावेव नित्यानित्यवस्तुविवेकपूर्वक पूर्ववृत्त— चतुष्क सिद्धयति, तच्च नित्यत्व त्वन्मते न सम्भवतीति शास्त्रारम्भ एवोच्छिद्येतेति भावः ।

श्रूयते हीति । तथा च श्रुतिसिद्धत्वान्नित्यत्वानुपपत्तौ नेष्टप्रसङ्ग इति भावः । वक्ष्यमाणाविद्याकालातिव्याप्त्यादिदूषणोरयोगितया वा ब्रह्मव्यतिरिक्त मिति । ब्रह्मणोऽपि तत्तद्वृत्त्यवच्छिन्नसविद्रूपेणानित्यत्वात्तद्व्यावृत्त्यर्थमाह स्वरूपतोपी ति । वः सिद्धान्त इति । नित्यानित्यविवेकपूर्ववृत्तत्ववादिना व इत्यभिप्रायेण व इत्युक्तम् । तत्कार्यत्वे ति । तदुपादेयत्वाभ्युपगमेनेत्यर्थः ।

नुपपत्तेः । सापि कदाचिन्निवर्त्तिष्यत इति चेत् किमनेन ? तन्निवृत्तौ तदुपादानकालावस्थानायोगात् तदसम्बद्धकालासिद्धेः । सर्वकालसम्बन्धे सत्यपि सर्वकालसत्ता नास्तीति विशेष इति चेत्तर्हि नित्यत्वलक्षणे सर्वकालपदवैयर्थ्यम् , सत्तैव नित्यत्वमित्येतावतैव ब्रह्मव्यतिरिक्तसर्वव्यवच्छेदात् । नचैवमस्त्विति वाच्यम् ;—सच्छब्दनित्यशब्दयोरपर्यायत्वेनैव प्रसिद्धेः । अतः सर्वस्मिन् काले स्वरूपलाभमात्रमेव नित्यत्वं

नन्वविद्यानिवृत्तिरपि कदाचिद्भविष्यति , तत्काले च नाविद्येति न सर्वकालसम्बन्धित्वमिति शङ्कते सापी ति । किमनेने ति । कदाचिन्निवर्तिष्यत इति वचनमपार्थमित्यर्थ.। तन्निवृत्तावि ति। उपादानोपादेययोरभेदादिति भावः।

न च तयोस्तादात्म्यमेव , तच्च भिन्नत्वेसत्यभिन्नसत्ताकत्वमिति वाच्यम् ,—भेदाङ्गीकारेऽवयविवादप्रसङ्गात् , तादात्म्यस्य निरस्तत्वाच्च । किञ्च यद्यविद्यानिवृत्त्यनन्तरं तदधीनकालस्य निवृत्तिः, तदा कालनिवृत्त्यधिकरणकालान्तरस्वीकारप्रसङ्गः ।

नन्वविद्यानिवृत्त्यनन्तरकाले कालनिवृत्ति च ब्रूमः किंत्वविद्यानिवृत्तिदशायामपि कालो वर्तते निवर्तते चेत्येव ब्रूम इति चेत् , यद्यविद्यानिवृत्तिजन्या कालनिवृत्तिर्न स्यात् तदाविद्यया सहैव कालस्तत्त्वज्ञानान्निवर्तेत, नैव वा निवर्तेत, यद्यविद्यानिवृत्तिजन्या तदा तदुत्तरकालोऽवश्यमङ्गीकर्तव्यः, उत्तरकाल विना तदसम्भवात् । किञ्च अविद्यासम्बद्धावरणादेर्नित्यत्वप्रसङ्गः सर्वथा दुस्तरः । न सर्वकालसत्तेत्य नेन सर्वकालसम्बन्धो विवक्षितः, किंतु सर्वकालसत्यत्वमिति शङ्कते सर्वकाले ति । नित्यत्वलक्षणे—नित्यत्वात्मके ब्रह्मासाधारणधर्म इत्यर्थः।

ननु सत्तामात्रे विवक्षिते नित्य इति व्यवहाराभावात् सन्नित्यशब्दयोः पर्यायत्वप्रसङ्गाच्च सर्वकालसत्त्वमेव नित्यशब्दार्थः, अतो न वैयर्थ्यमपीत्यत्राह अत. सर्वस्मिन्नि ति। व्यवहारापर्यायत्वान्या सर्वकालप्रवेशो आवश्यके सत्यत्वाशो

वक्तव्यम्, तच्चाविद्यायामपि समानमिति न ततो विवेकः। न द्वितीयः, कालस्यापि तत्सद्भावेन ततो विवेकासिद्धेः। न हि कालः कालान्तरेणा वच्छिद्यते, तथा सत्यनवस्थानात्। नापि स्वेन, कर्मकर्तृविरोधात्। न च स्वतः पूर्वापरभावेनावस्थितैः स्वांशैरवच्छिद्यत इति वाच्यम्,—तथा सति वस्तूनामिव कालस्यापि क्षणिकत्वादिप्रसङ्गात्। समस्तस्वांश समुदायावच्छेदान्न दोष इति चेत्, तत्र कोयमवच्छेदो नाम? किं तत्सम्बन्धित्वमात्रम्? किं वा तत्पूर्वोत्तरकालयोरविद्यमानत्वम्? उत तत्समकालभावित्वम्? यद्वा तदात्मकत्वमेवेति। आद्ये ब्रह्मणोप्यनित्य-त्वप्रसङ्गः, तत्सम्बन्धस्यावर्जनीयत्वात्, तन्मिथ्यात्वात्तत्परिहारे घटादे रपि नित्यत्वप्रसङ्गात्। द्वितीये पूर्वोत्तरकालशब्दार्थासिद्धिः। न हि कालात्पूर्वं पश्चाच्च कालोस्तीति बालिशोपि ब्रूयात्। एवं नास्तीति न ब्रूयादेव, स्ववचनविरोधप्रसङ्गात्, अत एव च कालस्यानाद्यन्तत्वसिद्धि

न प्रत्येश्यो गौरवात्, तदप्रतिसन्धानेपि नित्यत्वव्यवहाराच्चेति भावः। स्वाशानामपि पौर्वापर्यार्थं कालान्तरापेक्षा परिहरति स्वत इति। क्षणिकत्वादी ति। क्षणकालवादिना सूक्ष्मस्थूलतरादिकालाना प्रत्येकमवच्छेदकत्वे तत्तत्सूक्ष्मादि कालमात्रस्य नित्य स्यादित्यर्थः। प्रत्येक स्वाशानामवच्छेदकत्वे ह्यय दोषः, सम-स्ताशसमुदायस्यावच्छेदकत्वे तु न दोष इति शङ्कते समस्तस्वांशसमुदाये ति। तत्सम्बद्धस्य—समस्तकालाशसम्बद्धस्येत्यर्थः। वस्तुतस्तु समस्तकालाशसम्बन्धो नित्यत्वमेव नानित्यत्वमिति बोद्धव्यम्। तन्मिथ्यात्वा दिति। पारमार्थिककाल सम्बन्धस्यानादो नित्यत्वमित्यभिप्रायः। द्वितीय इति। कालाशसमुदायापेक्षया पूर्वोत्तरकालयोरभावादित्यर्थः। नहीं ति। अशापेक्षया पूर्वोत्तरकालौ ह्यप्यपेक्ष्या-पीति वक्तव्यम्, अशौ च न कालः, तदपेक्षया च पूर्वोत्तरकालौ न सम्भवतः, कालान्तरानावात्, अभेदे तु पौर्वापर्यासम्भादिति भावः। कालाशसमुदायेना वच्छेदो नाम तत्पूर्वोत्तरकालयो र्यस्याविद्यमानत्वम्, तत्र तत्पूर्वोत्तरकालयारुक्तय सम्भव उक्तः। अथ तत्र कालस्याविद्यमानत्वोक्तेरप्यसम्भवमाह एव मिति। अत एवे ति। पूर्वोत्तरकालाभ्यां तत्राविद्यमानत्वाच्चेत्यर्थः। पूर्वोत्तरकालौ तत्रा

रिति कुतः ततो विवेकः ? तृतीयेपि कालान्तराभावेन समकालशब्दार्थासिद्धिः। चतुर्थे तु घटादेर्नित्यत्वप्रसङ्गः, कालांशतादात्म्यलक्षणकालावच्छेदाभावत्। न च तृतीय., प्रध्वसस्य प्रध्वंसाभावेन नित्यत्वप्रसङ्गात्। ततः किमिति चेत्; ब्रह्मव्यतिरिक्तानन्तप्रध्वंसनित्यत्वेन ब्रह्मैकमेव नित्यमिति निर्बन्धानुपपत्तिः। नापि चतुर्थः, अबाधितत्वेन लोकाभिमतेषु स(त्यर.म्यग्रजतादिषु नित्यशब्दप्रयोगदर्शनात्। न च लोकमन्तरेण शब्दार्थसम्बन्धसिद्धिः। न च बाधबुध्या घटादिष्वनित्य शब्दप्रयोगो दृश्यते, भवदीयमुपदेशमविदुषा लौकिकाना तेषु तद्बुध्य भावात्। नापि पञ्चमः, विकाराणां निर्विकारत्वेन नित्यत्व प्रसङ्गात्। तेषामपि सविकारत्वेनवस्थानात्। विकारान्तरोपादानत्वे च तेषां द्रव्यत्वप्रसङ्गाच्च। ततश्च द्रव्याणामनित्यत्व तद्विकाराणा नित्यत्वमिति सर्वलोकविरोधादिप्रसङ्ग.। ब्रह्मणश्च निर्विकारत्वानुपपत्तिः स्वावसरे

विद्यमानत्व च यतो व्याघाताच्च सम्भवति तत एव कालस्थानाद्यन्तभावस्वभावाद्वाच्य इति कालाद्विवेको ब्रह्मणो न सिद्ध्यतीत्यर्थ।

प्रध्वसरहितत्व नित्यत्वमिति पक्ष द्रूषयति न च तृतीय इति। ननु प्रध्वसस्यापि प्रध्वसस्तत्वज्ञानाद्भवति, अनवस्था तु ब्रह्मण एव तत्प्रध्वसत्वेन परिहृता, अत एव मुक्तावपि ध्वसप्रवाहानन्त्यकल्पनादपि प्राथमिक ध्वस एवानन्तोऽस्त्विति शङ्का च परिहृतेति चेत्, तर्हीदानीन्तनघटादिप्रध्वसोपि ब्रह्मैव स्यादिति ध्वसोच्छेदः। न च मुद्गराद्यनन्तरभावित्वान्न तथेति वाच्यम्—तत्त्वज्ञानाविद्यानिवृत्त्यनन्तरभावित्वेन ध्वसध्वसस्यापि ब्रह्मातिरेकित्वात्। अनन्तप्रध्वंसे ति। अनन्तपदमसख्यपरम्। परमतेऽबाधितत्वासम्प्रतिपत्तेरुक्त लोकाभिमतेष्वि ति। न च बाधे ति। यदि नित्यत्वमबाधितत्वम्, तर्हि बाधितत्वेन ज्ञात एवानित्यशब्द. प्रयुज्येत, घटादिषु नचैव दृश्यत इत्यर्थ.। विकारः परिणामो वा काठाचि कापृथक्सिद्धधर्मो वा इति विकल्पमभिप्रेत्य प्रथम दूषयति विकाराणा मिति। सर्वलोके ति। पूर्वेषु पिण्डात्मनावस्थिता मृदिदीना घटीभूय तिष्ठतीति द्रव्यनित्यस्येयं विकारास्येयं च लोकसिद्धमित्यर्थ.। प्रथमपक्षे दोषमाह ब्रह्मणश्चे ति। तत्तद्वृत्त्यवच्छिन्नस्य व्यावहारिकभेदवत्

द्रष्टव्या । नापि षष्ठ., व्यावहारिकोभयान्तवत्त्वस्य संविदात्मके ब्रह्म-व्यपि समानत्वात् । पारमार्थिकस्य तस्य प्रपञ्चेप्यभावेन तस्यापि नित्य-

---

कादाचित्कतया उत्पत्तिरप्यस्त्येवेत्यभिप्रायेणाह व्यावहारिके ति । ननु स्वसमानसत्ताकोभयान्तयोरभावो नित्यत्वमिति चेन्न,—अविद्याया अपि नित्यत्वापत्तेः तस्या अपि अन्तद्वयाभावात् । ब्रह्मैव अविद्याध्वस इति चेत्, एवं सत्यविद्यैव ब्रह्मप्रागभाव इति ब्रह्मापि नित्य न स्यात् ।

नन्वविद्याया ब्रह्मसमानसत्ताकत्वाभावात् न ब्रह्मणो नित्यत्वहानिरिति चेन्न,—ब्रह्मणोप्यविद्यासमानसत्ताकत्वाभावात् तस्या अपि नित्यत्वप्राप्तेः ।

ननु स्वासमानकालीनत्वमप्यन्तविशेषणम्, अविद्या च ब्रह्मसमानकालीनेति न ब्रह्मण्यसम्भव इति चेन्न,—ब्रह्मण्यविद्यासमकालमित्यविद्याया अपि नित्यत्वप्रसङ्गात् । किञ्च यद्यविद्याध्वसो ब्रह्म, तदा अविद्यैव ब्रह्मध्वस इति किं न स्यात् ? उत्पत्तिमदभावत्वप्रागभावान्यप्रतियोग्यसमानकालाभावत्वादेर्ब्रह्मण्यपि दुर्वचत्वात् । न च प्रागभावप्रतियोग्यभावत्वं ध्वसत्वम्, अविद्यैव ब्रह्मप्रागभाव इति वाच्यम्, ब्रह्मण एवाविद्याप्रागभावत्वापत्तेः प्रतियोग्यसमानकालीनानाद्यभावत्वादेरविद्यायामपि दुर्वचत्वात् । ध्वसप्रतियोगित्व प्रागभावत्वमित्यत्रान्योन्याश्रयात् ।

ननु साध्याभावत्व ध्वसत्वम्, ब्रह्म च तत्त्वज्ञानसाध्यम्, यस्मिन्सत्य प्रिमक्षणे यस्य अविद्याव्यतिरेकात्मनो ब्रह्मणः सत्व यद्व्यतिरेके तस्य ब्रह्मणो व्यतिरेकोऽविद्येत्येवं साध्यत्वलक्षणयोगादिति चेन्न,-अविद्याया अपि तत्त्वज्ञानप्रागभाव साध्यत्वस्य त्वद्रीत्या सत्वात्, तथा अविद्यानिवृत्तिप्रतिबन्धकमावरणमिति त्वन्मते अविद्यायास्तदधीनाया उक्तरूपावरणसाध्यत्वसत्वाच्च ।

एतेन उभयान्तवत्त्वमुभयान्तवत्त्वप्रतियोगित्वम्, तच्च यद्यपि व्यावहारिक ब्रह्मणोस्ति, तथापि तत्र तदभावोप्यस्ति, अधिष्ठानस्य कल्पितप्रतियोगिकाभावाश्रयत्वात्, अविद्याया तु न तदभाव., तस्या अनधिष्ठानत्वादिति परास्तम्, ब्रह्मणो ध्वसत्वासिद्धेरुक्तत्वात् ।

त्वप्रसङ्गात्। अत एवाबाधितमुभयान्तराहित्यमित्यपि निरस्तम्, प्रपञ्च गतोभयान्तराहित्यस्यापि अबाधितत्वात्। नापि सप्तमः, तर्किं नित्य-शब्दप्रवृत्तिनिमित्ततया लोकव्युत्पत्तिसिद्धमुत नेति विचारणीयम्। आद्ये लोक एव प्रतिपक्षः। द्वितीये तु ब्रह्मण औपचारिकनित्यत्वमेव वा पारिभाषिकं वा नित्यत्वमिति अनित्यतायामेव पर्यवसानम्। तथा च कुतो नित्यानित्यवस्तुविवेकः। किञ्च संविदनित्येति वदतः सौगता दीन् प्रति किं लोकोपलम्भसिद्धाया विषयग्राहिण्या एव संविदस्वया नित्यत्वं साध्यते? उत लोकोत्तीर्णायाः कस्याश्चित्? आद्ये प्रत्यक्षादि विरोधः, विषयनित्यत्वप्रसङ्गश्च। अस्मदादिप्रत्यक्षज्ञानं तावत् घटादिकं स्वसत्ताकाले सन्त साधयति न पुनः पूर्वोत्तरकालसत्तां विद्यमानामपि गृह्णाति। तत्कस्य हेतोः? स्वकालाकलितवस्त्ववभासित्वनियमात्, ततश्च यदि स्वयं कालानवच्छिन्ना संवित् स्यात् विषयस्यापि कालानव-

---

ननु पारमार्थिकत्व राहित्यविशेषण न प्रतियोगिविशेषणम्, घटादौ च स्वरूपस्य मिथ्यात्वाद्राहित्यमपि बाधितमिति शङ्का निराकरोति अत एवे ति। घटादौ हि उभयान्तवत्व व्यावहारिक तद्राहित्य च न प्रातिभासिकम्, अप्रतीतेः, समानसत्ताकप्रतियोगिविरोधाच्च न व्यावहारिकम्, अतः परिशेषात् परमार्थ इत्यर्थः। न च घटादौ तद्राहित्यमेव नास्तीति वाच्यम्, अबाधितत्वविशेषण वैयर्थ्यादिति भावः।

ननु माभूदबाधितत्वविशेषणमिति चेन्न; तथापि प्रतियोगिनोपरमार्थ-त्वे प्रपञ्चे उभयान्तत्ववत्त्वाभावस्थावश्यंभावादिति। आद्य इति। लोके सर्वकाल सम्बन्धित्वादेरेव प्रवृत्तिनिमित्ततया ग्रह इत्यर्थः। नित्यत्वं साध्यत इति। अनुमानेनेति शेषः। उत्तरत्र "नित्यतया तत्सिद्धावनुमाननैरपेक्ष्या" दिति वक्ष्यमाणत्वात्। अस्मदा दीति। परोक्षज्ञाने स्वकालीनत्वेन ग्राहकत्वनियमाभावात् प्रत्यक्षेत्यु क्तम्। लौकिकप्रत्यक्षं हि स्वाधिकरणतया यावान्काल उभयसम्प्रतिपन्नः

च्छेदेन प्रकाशप्रसङ्ग. । तेनैवाबाधितेन तन्नित्यत्वमवर्जनीयम् । यदि पुनर्विषयिकालानवच्छेदेन विषयो गृह्यत इति मन्यसे, तथाप्येकयैव अस्मदाद्यैन्द्रियकसंविदा विषयस्य यावत्सत्त्व प्रकाशप्रसङ्गो दुर्वारः । एवं वर्तमानतया वस्तु गृह्णन्तीष्वनुमानादिसंवित्स्वपि विषयनित्यत्व—प्रसङ्गः समानः । याश्चातीततया अनागततया च स्वसवेद्यं गृह्णन्ति ता अपि स्वकालापेक्षयातीततयानागततया च वस्तु गृह्णन्तीति स्वयं कालानवच्छेदे स्वविषयाणामप्यतीतत्वागामित्वलक्षणकालावच्छेदो न स्यात् । द्वितीये त्वाश्रयासिद्धि । शास्त्रसिद्धा सेति चेन्न;–नित्यतया तत्सिद्धौ अनुमाननैरपेक्ष्यात्, अनित्यतया तत्सिद्धौ तु बाधात् ।

तावत्कालीनतया विषय गृह्णाति, तत्कालपूर्वोत्तरकालीनत्व विद्यमानमपि न गृह्णाति, तत्र किञ्चित्प्रयोजक वाच्यम्, नचान्यदुपलभामहे, अतोस्य यावत् स्वकालमात्रावच्छिन्नवस्त्ववभासि-वस्वभाव. तत्प्रयोजकः कल्प्यः, ईदृशस्वभावं चेत् ज्ञान नित्यं स्यात् यावत्पूर्वोत्तरकालावच्छिन्नतया विषयमवभासयेत्, तावत्कालीनत्व चाबाधितमिति विषयोपि नित्यः स्यात् । न च पूर्वोत्तरकालयोर्घटोनास्तीति प्रतीत्या बाधस्त्वया सुवच. ज्ञानभेदानङ्गीकारात् । स्वेनैव स्वस्य बाधायोगात्, बाधकत्वाभिमतज्ञानान्तरस्यापि नित्यत्वेन परस्परविरोधेन द्वयोरप्येकत्र सम्भवाच्च, सर्वदा असत्वग्रहप्रसङ्गेन नित्यत्वात्यन्तासत्त्वयोरापत्तेश्चेति भावः। **यदि पुनरित्या** दि । ज्ञानेन तत्कालावच्छिन्नतया विषयो न गृह्यते किन्तु स्वरूपतः, नचैवमपि नित्यप्रकाशप्रसङ्ग, विद्यमानस्यैव वस्तुनः प्रत्यक्षे भाननियमादिति यद्यच्यते तथापि भासकज्ञानस्य नित्यत्वेन यावत्सत्व विषयः प्रकाशेतेत्यर्थः। क्वचित् पुरुषान्तरसविदा धारावाहिकादिसविदा च विषयस्य यावत्सत्व प्रकाशेने ष्टापादनव्यावृत्त्यर्थं **एकये** त्युक्तम्। **एव** मिति। वर्तमानत्वप्रकारिकानुमितिः नित्या चेत् तत्तत्स्वकालावच्छिन्नतयैव विषय गृह्णीयादिति विषयस्य नित्यत्वं स्यादित्यर्थ.। **याश्चे** ति ।

संविन्मात्रस्य च लोकसिद्धत्वेन शास्त्रागोचरत्वात्। किञ्च नित्यत्वं किं स्वरूपम्? उत धर्मः? पूर्वत्र स्वप्रकाशेनैव नित्यमित्युपलम्भप्रसङ्गः। धर्मत्वेपि किं स्वप्रकाशैकवेद्यम्? उत ज्ञानान्तरवेद्यम्? पूर्वत्र स एव प्रसङ्गः। उत्तरत्रापि किं संविन्निष्ठतया ग्राह्यम्? उतान्यथा? आद्ये संविदोपि ज्ञानान्तरवेद्यत्वसधर्मत्वादिप्रसङ्गः। अन्तिमे संविन्नित्यत्वासिद्धिः। न हि नित्यत्वं कस्यचित्सिद्धमित्येतावता संविदो नित्यता सिध्येत्। तथासत्यविशेषेण सर्वेषामपि नित्यत्वप्रसङ्गः। एवमानन्दत्वादिधर्मेष्वपि विकल्पदूषणानि निपुणैरनुसन्धेयानि।

एवञ्च—सति संविन्नित्या अनुत्पन्नत्वात् यदनित्यं तदुत्पन्नं यथा घट इत्यनुमानमपि निरस्तम्, प्रागभावेनानैकान्त्यात्। भावत्वे सतीति विशेषणेपि भवदभिमताविद्यायामनैकान्त्यं दुर्वारम्। सा ह्यनादिरन्तवती च भवन्मते। किञ्च संविच्छब्देन किमहमिति प्रत्यक्त्वेन प्रतीयमानमात्मस्वरूपं पक्षीक्रियते? उत सकललोकप्रसिद्धा विषयग्राहिणी वित्तिः? उत सैव सकलविषयाश्रयविरक्ता भवद्भिः

ननु स्वापेक्षया अतीतत्वग्रहण माभूत्, भोजनादितत्तत्क्रियान्तरापेक्षयातीतत्वं गृह्यतामिति चेत्, भोक्ष्यमाणः स्नास्यामि भोक्ष्यमाणः स्नामि भोक्ष्यमाणोस्नासिषमित्यत्र स्नानस्य भोजनपूर्वकाले सर्वत्र गृहीते भूतभविष्यद्वर्तमानव्यवस्थाया ज्ञानापेक्षया ज्ञानसमानकालक्रियापेक्षया वा वाच्यत्वात्तस्य नित्यत्वात्। ब्रह्म धर्म इति। अत्र धर्मत्वं स्वरूपातिरिक्तत्व विवक्षितम्, न ब्रह्मधर्मत्वम्, उत्तरत्र संविन्निष्ठतया ग्राह्यत्वपक्षे सधर्मत्वापादनात्। धर्मत्व इति। स्वरूपातिरिक्तत्व इत्यर्थः। स एवे ति। स्वरूपातिरिक्तस्य स्वप्रकाशवेद्यत्वे तद्धर्मत्वमेव वक्तव्यम्, अतो नित्यमित्युपलम्भप्रसङ्ग इत्यर्थः। नित्यत्वग्राहिज्ञानस्याबाधितत्वे नित्यत्वस्य सत्यत्वात् सधर्मत्वं स्यादित्याह स धर्मत्वे ति। बाधितत्वेऽनित्यत्वप्रसङ्ग आदिशब्दार्थः। एवंचे ति। संविदो ज्ञानान्तरावेद्यत्वात् नित्यत्वानिरू—

सह प्रव्रज्यां गतेति । न प्रथमः, सिद्धसाधनात् । न द्वितीयः, सकललोकविरोधात् ; हेतोश्च स्वरूपासिद्धेः ; करणानां चेन्द्रियादीनां एतस्य चानुमानप्रयोगप्रयासस्य निष्प्रयोजनत्वप्रसङ्गात् । तदभिव्यक्तयर्थं तदपेक्षेति चेन्नित्यमभिव्यक्तत्वाभ्युपगमे[न] तदभिव्यक्तेस्तदनपेक्षणात् ; अन्यथाऽस्मन्मतप्रसङ्गात् । भवदभिमतनित्यस्वयंप्रकाशात्मस्वरूपस्यैव संविद्वैशद्यार्थं तदपेक्षेति चेन्न ; वैशद्यासम्भवात् ; स्थलान्तरे तस्यानुसन्धेयत्वात् । न च तृतीयः, आश्रयासिध्यादेः प्रागेवोक्तत्वात् । अनेनैवानुमानेन तत्सिद्धिरिति चेन्न;—अन्योन्याश्रयणात्—तादृशसंवित्सिद्धौ तत्पक्षीकारेणैतदनुमानप्रवृत्तिः तत्प्रवृत्तौ च तादृश—संवित्सिद्धिरिति । अनेनैव न्यायेन अनुत्पन्नत्वात् निर्विकारेत्यादिसाध्य

पणाच्चेत्यर्थः । करणाना मिति । एतज्जननीयत्वाभिमतज्ञानस्यापि नित्यसिद्धत्वा दिति भावः ।

नन्वभिव्यक्ता वित्तिर्विषयप्रकाशिका, अभिव्यक्तिश्चावरणाभिभवः, स च वृत्त्या, तदर्थं करणापेक्षेति शङ्कते अभिव्यक्तयर्थं मिति । आवरणस्य निरासादभिव्यक्तिः स्वरूपमेव [स्फुरणमेव] वाच्यम् , तस्य च नित्यत्वान्न करणापेक्षेत्यर्थः । अन्यथे ति । अभिव्यक्तेरनित्यत्वे स्वरूपस्य तदभिव्यक्तित्वासम्भवाद्विषयग्रहणात्मकावस्थाविशेषस्यैव तदभिव्यक्तित्व वाच्यमित्यस्मन्मतप्रसङ्ग इत्यर्थः । वैशद्यासम्भवा दिति । अधिकाकारविशेषभान वैशद्यमस्मन्मते सवति , ननु त्वन्मत इति भावः । अनेनै वेति । प्रागभावाविद्याभ्यामनैकान्मित्यादिनेत्यर्थः ।

इति श्रीवाधूलकुलतिलकश्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्य
तदेकदैवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्ध
महाचार्यापरनामधेयेन रामानुजदासेन विरचितायां
शतदूषणीव्याख्याया चण्डमारुताख्याया
निर्विशेषब्रह्मणो नित्यत्वभङ्गो नाम
अष्टपञ्चाशः स्कन्ध ॥५८॥



प्रयोगो दूषणीयः । तदेवं ब्रह्मासाधरणनित्यत्वासिद्धेर्न नित्यानित्यवस्तु विवेकः । नित्यमुपादेयमिति सामान्यविवेकमात्रमपि निपुणनिरूपणेन निष्फलमापन्नमिति ।

आनन्त्यानन्दनित्यत्वप्रभृतीनां स्वरूपतः ।
विभागे सविशेषत्वमविभागे त्वसत्यता ॥
सौगतोक्तेपि विज्ञाने स्वरूपं विद्यते ततः ।
नित्यत्वादिवि[वाद]वेकस्ते नैरर्थक्येन जायते ॥

इति शतदूषण्यां निर्विशेषनित्यत्वभङ्गः

॥ अष्टपञ्चाशो वादः ॥

॥ श्रीरस्तु ॥

॥ एकोनषष्टितमो वाद. ॥

स्वत सर्वजगत्सूतेः संवित्सिद्ध्यादिभि. स्फुटम्।
अद्वितीयपदोक्तस्यैव साधिता सविशेषता ।

अत्र हि अनन्तपदवदद्वितीयपदेनापि सविशेषतैव । तथा हि– अद्वितीयपदे किं तत्पुरुष.? उत बहुव्रीहिः ? यदा तत्पुरुषः, तदापि किं द्वितीयादन्यत्वम्? तद्विरुद्धत्वम्? तदभावमात्रम्? वा स्यात्, पूर्वत्र द्वितीयादन्योन्याभावमात्रं वा विवक्षितम्? उत अब्राह्मणादिनयात्तत्सादृश्यपरत्वं वा ? द्विधापि न द्वितीयहानिः । न तरां ब्रह्मणो निर्विशेषत्वम् । द्वितीयत्वाभावे प्रथमत्वादिमात्रं स्यात्, विशेषनिषेधे शेषाभ्य

स्वत इति । कर्त्रन्तरानधिष्ठितत्वेनेत्यर्थ. । अनेन एकपदेन अविभक्तनामरूपत्ववाचिना उपादानत्वमुच्यते, अद्वितीयपदेन कर्त्रन्तरनिषेध इति भगवद्भिमतनिर्वाहः सूचितः । तेन तस्यैव कर्तृत्वे तदुपयोगिज्ञानादिसिद्ध्या सविशेषत्व सिद्धिरिति भावः । परमाचार्याणा निर्वाहमभिप्रेत्याह संवित्सिद्ध्यादिभि रिति । अनन्तपदव दिति। 'बृहद्गुणत्वाद्यमनन्तमाहु' रित्यादिप्रमाणानि विवक्षितानि। नञस्तदन्यतद्विरोधितदभावरूपार्थत्रयसम्भवादिकल्पयति किं द्वितीया दित्यादि । अन्योन्याभावमात्र मिति । अन्योन्याभावमात्रपरत्वमित्यर्थः । नविा– वयुक्तन्यायमभिप्रेत्याह अब्राह्मणादिनया दिति । अब्राह्मणमानयेत्यादौ ब्राह्मणाद्यन्वितनञस्तत्सदृशपरत्ववदित्यर्थः । तत्सादृश्यवत्त्व मिति । विवक्षितमित्यनुषङ्ग. । द्विधापी ति । प्रत्युत भेदसादृश्यनिरूपकतया द्वितीयसत्त्वं वाच्यमिति भावः । न तरा मित्युक्तमुपपादयति द्वितीयत्वे ति । भेदसादृश्याभ्यामपि अविशेषत्व स्यादित विवक्षितम् । विशेषे ति । अशिशिरः पावक इत्युक्ते यथा

नुज्ञानसिद्धेः । अन्यथा प्रथमत्वादेरपि सामान्यतो विशेषतो वा निषेधे निर्विशेषत्वस्य निषेध्यत्वात् । तथा च न किञ्चिदित्युक्तं स्यात् । अनन्त-

---

शैत्यातिरिक्तस्पर्शः सामान्यतो विशेषतश्चौष्ण्यादिरूपेण न निषिध्यते तथा अद्वितीयत्वमित्युक्तेपि प्रथमत्वतृतीयत्वादिकोट्यन्तर सामान्यरूपेण विशेषतश्च न निषिध्यत इत्यर्थः । अन्यथेत्या दि । यद्येकविशेषनिषेधे शेषाभ्यनुज्ञानं न स्यादित्यर्थः ।

अत्र ' अन्यथा प्रथमत्वादेरपि सामान्यतो विशेषतो निर्विशेषत्वविशेषतो वा निषेधतो वा निषेध्यत्वा ' दिति यदि पाठः, तदायमर्थः-आदिशब्देन तृतीयत्वादि गृह्यते, प्रथमत्वादेश्च सामान्यतो निषेधः—ब्रह्म कतिथमपि न-प्रथमादिकं नेत्यादिरूपः, विशेषतो निषेधः—प्रथमं न तृतीय नेत्यादिरूपः, निर्विशेषत्वविशेषतः—निर्विशेषत्वेन स्वरूपविशेषणाद्वा, निषेधतः—धर्मिस्वरूपनिषेधतो वेति । ततः किमित्यत आह तथाचे ति । सर्वनिषेधन्तथासति सिद्धयेदित्यर्थः । यद्वा—विशेषतानिषेधत इति। ब्रह्मणि द्वितीयरूपविशेषनिषेधे प्रथमत्वादिकमनुज्ञात स्यात्, तथा द्वितीयस्य ब्रह्मणि अधिकरणविशेषे निषेधे ब्रह्मातिरिक्त द्वितीयमभ्यनुज्ञात स्यात्, अत्र विशेषरूपेण निषेधो विशेषनिषेधः, तेनाधिकरणविशेषप्रतियोगिविशेषसाधारण्यसिद्धिः । अन्यथा—उक्तप्रतियोग्यधिकरणविशेषद्वयानुज्ञाभावे । धर्मान्तरानुज्ञानाभावे दोषमाह प्रथमत्वादे रिति । निर्विशेषत्वविशेषतोवे त्यत्र पूर्ववदेवार्थ । धर्म्यन्तरानुज्ञाभावे दोषमाह निषेधतो वेति । स्वरूपेण निषेधतः। सद्द्वितीयमिति सद्रूपे अधिकरणविशेषेण न निषिध्यते, किंतु द्वितीय नेति निरूपकतयेति भावः। यद्वा—सामान्यतो निर्विशेषत्वविशेषतो वा विशेषतो निषेधतो वेति पूर्वतसन्तयोरुत्तरतसन्ताभ्या याधासख्येनान्वयः । सामान्यतो निर्विशेषत्वविशेषप्रतिपादने न प्रथमत्वादिनिषेध. कार्यः स्यात् , विशेषत.-प्रथमत्वादिविशेषरूपेण, निषेधतः प्रथम द्वितीय नेत्यादिप्रातिस्विकरूपेण निषेधतो वा प्रथमत्वादिनिषेध. कार्य. स्यादिति । यदि तु ' अन्यथा प्रथमत्वादेरपि सामान्यतो वा विशेषतो वा निषेध्यत्वा ' दिति पाठस्तदा स सुसङ्गमः ।

रेपि विरोधः किं भावाभावात्मकतया सहानवस्थित्या[1] वध्यघातुकभावेन वा[2] न प्रथमः, द्वितीयस्य ब्रह्माभावरूपत्वे तत्प्रतियोगितया ब्रह्मण एव तुच्छत्वापातात् । अभावप्रतियोगित्वमेव हि सर्वत्र तुच्छत्वम् । देशकालादिभेदात्सदपि स्यादिति चेन्न,—अदेशकालव्यवच्छेदनीयत्वोपगमात् । प्राक् ध्वसादिविकल्पेनापि ब्रह्मणः कार्यत्वानित्यत्व तुच्छत्वप्रपञ्चान्तरसद्भावादिदोषो द्रष्टव्यः । अयमेव ब्रह्मण एव द्वितीया भावरूपत्वेपि ।

किञ्च—स्वाभावे ब्रह्मणि द्वितीयं कथमध्यस्येत[1] तद्भानाभानयोस्तदयोगात् । अविशदभाने सविशेषत्वभानावश्यम्भावात् । दोषवैचित्र्यात् सर्वमुपपन्नमिति चेन्न;—विरुद्धाकाराग्रहणमन्तरेण क्वचिदप्यध्यासादृष्टेः।

कि द्वितीय ब्रह्माभावरूपं ब्रह्मद्वितीयाभावरूपं वेति विकल्प्याद्य दूषयति द्वितीयस्ये ति । देशकाले ति । सर्वदा सर्वत्राभावप्रतियोगित्व हि तुच्छत्वम्, अतः अभावप्रतियोगित्वमात्रात्र तुच्छत्वप्रसक्तिः देशकालान्तरे असत्वेपि देशकालान्तरे सत्वस्यापि सम्भवादित्यर्थः । द्वितीयस्य प्रागभावत्वादिविकल्पमभिप्रेत्याह प्रागि ति । प्राक्कालीनपरः प्राक्छब्दः, अभावविकल्पगतप्रध्वससमभिव्याहारात्र प्रागभावलाभः । तुच्छत्वे ति । यद्यपि प्रागपीदं दूषणमुक्तम्, तथाप्यभावत्वेन सामान्येनोपस्थितस्य इह त्वत्यन्ताभावत्वेन विशिष्योपस्थितस्येति भेदः । एतदपि विकल्प्य दूषणे न्यूनत्वशङ्का[ङ्क्या]त्यन्ताभावो न दूषित इति कस्यचिन्मन्दप्रयो माभूदिति । अन्योन्याभावपक्षे दोषः प्रपंचे ति । वियदादिप्रपञ्चान्तरसद्भा वः, अतः प्रपञ्चान्तरमेव ब्रह्मान्यद्वक्तव्यमित्यर्थः । आदिशब्देन सत्यत्वाविरोधो विवक्षितः । ब्रह्मद्वितीयाभाव इति द्वितीय दूषयति अयमेवे ति । कार्यत्वादिरेवेत्यर्थः । ब्रह्मणो विनाशित्वकार्यत्वे ब्रह्मणो देशकालाद्य(नव)परिच्छिन्नतया प्रपञ्च तुच्छत्वं प्रपञ्चान्यब्रह्माश्रयसद्भावादिश्च दोषः स्यादित्यर्थः । प्रपञ्चाभावत्वेप्यवैशद्यादध्यास सम्भवतीत्यत्राह अविशदे ति । सर्व मिति । विरुद्धाकारभानमध्या सश्चेत्यर्थः । विरुद्धेति । ननु विरुद्धाकारग्रहेप्यौपाधिकाध्यासः सम्भवति, प्रपञ्चा

तद्ग्रहेप्यध्यासे नित्यमध्यासप्रसङ्गात्। सहानवस्थानविरोधे सतः परिच्छिन्नत्वापत्तेः, शीतोष्णादिवद्भिन्नाश्रयत्वनियमाविवक्षायां धर्मधर्मिणोरेकाश्रयत्वाभावात् ब्रह्मणः सधर्मकत्वाविरोधः, स्वनिष्ठताभङ्गश्च। एकाश्रयत्वाभावमात्रे वक्तव्ये सर्वस्य ब्रह्माश्रयत्वं श्रुत्यन्तरसिद्धं सिध्यत्येव। न तृतीयः, द्वितीयस्य धातुकत्वे सदनित्यत्वादिप्रसङ्गात्। सतो धातुकत्वेपि न द्वितीयात्यन्ताभावः, हन्तव्यस्यादौ स्वरूपलाभावश्यम्भावात्। अध्यासनिवर्तकत्वमेव अस्मदिष्टं धातुकत्वमिति चेत्; अस्तु सदध्यासघाति, अनध्यस्तात्मना द्वितीयस्थितेर्न क्षतिः। तथा तस्य न प्राप्तिरिति चेन्न,—सगुणादिश्रुत्यैव तत्प्राप्तेः। कल्पितविषया सेति चेन्न;—अद्यापि तद्बाधादृष्टेः।

ध्यासश्चौपाधिक इति चेन्न,- विरोधिब्रह्मस्वरूपे भासमाने उपाध्यध्यासस्यैवासम्भवात्। द्वितीय दूषयितुमुपादत्ते सहे ति। किं विरोधो भिन्नाश्रयत्वनियमः? उत एकाश्रयत्वाभावः? आद्य आह सत इति। शीतोष्णादिवत् भिन्नाश्रयत्वनियमविवक्षाया सतः परिच्छिन्नत्वापत्तेरित्यन्वयः। दूषणान्तरमाह धर्मधर्मिणो रिति। एकाश्रयत्वाभावा दिति। भिन्नाश्रयत्वस्याप्युपलक्षणम्, विरोधे सत्यपि लोके धर्मधर्मिभावदर्शनात्, ब्रह्मणः सधर्मत्वं न विरुध्यत इत्यर्थः। स्वनिष्ठते ति। 'स्वे महिम्नि प्रतिष्ठित' इति प्रतिपादितानन्याश्रयत्वभङ्ग इत्यर्थः। परिच्छिन्नत्वस्वनिष्ठताभङ्गोद्धारतया द्वितीयं पक्षमुत्थाप्य निरस्यति एकाश्रयत्वे ति। सदनित्यत्वा दीति। प्रपञ्चसत्यत्वाविरोधमुमुक्ष्वनुपादेयत्वादि गृह्णते। शङ्कते—अध्यासे ति। सत्यत्वप्रत्युक्तस्वरूपलाभः प्रपञ्चस्य कुत इति भावः। आस्त्व ति। सतोऽध्यासघातित्वे प्रागिव तत एव स्वरूपसिद्धयभावेपि द्वितीयस्य न सत्यत्वक्षतिरित्यर्थः।

ननु सत्यत्वेन द्वितीयं न प्राप्तमध्यस्तं चोच्यते, अतश्शुक्तिरजतादिष्विव अध्यासनिवृत्तौ विषयनिवृत्तेरपि सिद्धेर्ज्ञाननिवर्त्यतया मिथ्यात्वं स्यादिति शङ्क्य तथे ति। अद्यापी ति। तद्बाधो ह्यद्वितीयश्रुत्या वाच्यः, अद्वितीयश्रुतेश्च

सतोध्यासविरोधित्वे च अविद्यासहस्रैरपि न स्यादध्यासः ; सत्यादित्ये सन्तमसवत् । अध्यस्यति हन्ति चेति चेन्न ; नैरपेक्ष्यविरोधात् । अन्यथान्यस्यैवान्ततो घातुकत्वात् । साधारणहेतुत्वे सिद्धे विशेषोक्तिरियमिति चेन्न;—तस्यैव त्वदभिमतस्य इतः पूर्वमसिद्धेः । प्रथमतृतीयादिभावमात्रेण द्वितीयविरोधवाचोयुक्त्या सुस्थं द्वितीयम् । तदभावमात्रपरे तु समासे न सदादिशब्दैः सामानाधिकरण्यं स्यात् , नञर्थस्य स्वतन्त्रत्वात् । तस्य तदात्मकत्वविवक्षायोगस्योक्तत्वाच्च ।

बाधकत्वं नैतावत्पर्यन्त सिद्धमित्यर्थः। सतोऽध्यासनिवर्तकत्वे तस्याध्यासेन सहानवस्थानलक्षणा विरोधिता वाच्या, व्यापारमन्तरेणापि स्वरूपत एव निवर्तकत्वात् , तमोनिवर्तकालोकवत् , ततश्चालोकविरहदशाया अपि सत्वात् तमः स्वरूपसम्भव', इह तु सतो नित्यसिद्धत्वान्नाध्याससम्भव इत्याह सत्त्व इति ।

नन्वालोकस्य सन्तमस प्रति हेतुत्वाभावादालोकः सन्तमस क्षणमपि न सहते , स त्वध्यासं प्रत्यधिष्ठानत्वादध्यस्य निवर्तयतीति शङ्कते अध्यस्य तीति । निरपेक्षनिवर्तकत्वे अधिष्ठानत्वमेव न स्यादित्याह नैरपेक्ष्ये ति । अधिष्ठानत्वे तु उत्पादकस्य निरपेक्षनिवर्तकत्वासम्भवादन्यदेव निरपेक्षनिवर्तक स्यादित्यर्थः ।

ननु कार्यमात्रसाधारण्येन हेतुत्वे सिद्धे तद्विशेषरूपनिवृत्तिहेतुत्वमनेनानूद्यते, अतः प्रतियोगिनिवृत्त्योरुभयोरपि हेतुत्वस्य प्रमाणसिद्धत्वादुभयत्र हेतुत्वमेष्टव्यम्, प्रतियोगिन प्रति हेतुत्व चाध्यासाधिष्ठानत्वमेवेति अध्यस्य निवर्तकत्वमुपपद्यत एवेति शङ्कते साधारणे ति । अध्यस्य निवर्तकत्वे तु निवर्त्यातिरिक्तानपेक्षेण सता निवर्त्यस्य द्वितीयस्य क्षणिकत्वप्रसङ्ग इत्यपि दूषण द्रष्टव्यम् । द्वितीयत्वविरोध्याकाराश्रयत्व द्वितीयविरुद्धत्वमित्याशंक्य निराकरोति प्रथमे ति । तत्पुरुषविकल्पे तृतीयं दूषयति तदभावमात्रपरे तु समास इति । अयं विकल्पः प्रौढवादः । नञर्थस्ये ति । द्वितीयाभावस्य सदर्थधर्मत्वादित्यर्थ. । सदर्थ एव द्वितीयाभाव इत्यत आह तस्ये ति । उक्तत्वा दिति । तद्भानाभानयोरध्यासा

न च सम्भवन्त्यां गतौ वाक्यभेदाध्याहारादिर्न्याय्यः। नापि बहुव्रीहिः, तत्र द्वितीयं यस्य नास्तीति किं प्रथमादिविधिकटाक्षेण? सर्वनिषेधाभिप्रायेण वा? न पूर्वः, सर्वनिषेधासिद्धेः। नोत्तरः, बहुव्रीहिविरोधात्। "अनेकमन्यपदार्थे" इति हि सः। किञ्च द्वितीय निषेधवत्त्वं च धर्मं ब्रह्मण उपस्थापयन्त्यां वृत्तौ कथं निर्विशेषत्वसिद्धिः। अनुपस्थापयन्त्यां च कथं तरां नास्त्यर्थसम्बन्धे यस्येति विग्रहः? न च स्वरूपमेवात्र नास्तिशब्दार्थः; अन्यपदार्थत्वायोगात्, स्वस्य स्वसम्बन्धायोगाच्च। भेदकल्प्त्युपचार इति चेत्तथापि द्वितीयाभाव एव ब्रह्मेति निष्कर्षः स्यात्। तत्र चोक्तमध्यासानुपपत्त्यादे। अपि च अविद्या तद्विकाराणां ब्रह्मव्यतिरेके कथमद्वितीयत्वम्? तन्मिथ्यात्वेपि तेषां

योगरयोक्तत्वादित्यर्थ। यद्वा नञर्थो निषेधः, तस्य समासे स्वातन्त्र्येण बोधनासम्भवादित्यर्थः। पर्युदासनञ एव तत्पुरुषः न तु निषेधनञ इति भाव.।

नन्वरतिरव्यवहारोऽस्मरणमित्यादौ निषेधनञोपि समासो दृश्यत इति चेन्न–गुणक्रियावाचिसमभिव्याहृतनञो निषेधवाचिनोपि तत्पुरुषो नान्यस्येति नियमात्। अन्यथा भूतले घटो नेति वत् अघट इति प्रयोगापत्तेः। असामर्थ्यम्–अदार्ढ्यमधैर्यमित्यादावपि वैयाकरणाभिमत गुणत्वमस्त्येव। एव शब्दानुपपत्तिमुक्त्वा, अर्थानुपपत्तिमाह तस्ये ति। (२६४-पुटे)

नन्वद्वितीयमिति न सद्विशेषणम्, किं तु द्वितीयाभावप्रतिपादक वाक्यान्तरम्। यद्वा-यत्राद्वितीयम्–द्वितीयाभावस्तत् सदेवाग्र आसीदिति योजना, अतो न दोष इत्यत्राह नन्वे ति। सदृशद्वितीयनिषेधाधिष्ठानान्तरशङ्कानिवारणेन सम्भवन्त्या गताविति्यर्थः। प्रथमा दीति। यदा द्वितीयत्व ब्रह्मातिरिक्तावधिक तदा प्रथमादिविधिः, यदा ब्रह्मावधिक तदा सर्वनिषेधः। अनेक मिति। तथा च बहुव्रीहि वशात् द्वितीयतदभावान्यपदार्थाना सिद्धिरिति भावः।

ननु ज्ञानस्वरूपमितिवत् भेदकल्पनात् बहुव्रीहिः स्यादिति शङ्कते भेदे ति। भेदकल्प्त्यापचार इत्यर्थः। तन्मिथ्यात्वेपी ति। न च मिथ्यात्वेन

द्वितीयत्वस्य दुस्त्यजत्वात् । सत्यमिथ्यार्थयोरव्यतिरेके विरोधात् । न च यूय जैननयनिष्ठा· । तन्निष्ठाश्च तत्तामिव द्वितीयतां वांच्छन्ति । ब्रह्मणो निर्विशेषत्वविवक्षायां च न किञ्चिदपि लक्षणं तत्र स्यादिति तदुदाहरण विरोधः । व्यवच्छेद्यायोगाच्चेति । अस्मत्पक्षे तु वृत्तिद्वयमपि सम्यक् ।

द्वितीयव्यतिरेकोक्त्या सतः स्यादग्रगण्यता ।
द्वितीयशून्यतोक्त्या च तत्समाननिषेधनम् ।

न ह्यपरं कुतश्चित् सर्वकारण ब्रह्म, येन तस्य द्वितीयता स्यात् । न चास्य किञ्चिदैश्वर्येण सम, येन द्वितीयगणना सहेत । " न तत्समश्चाभ्यधिकश्च दृश्यत" इत्यादिश्रवणात् । तेनात्र सदृशद्वितीयानिषेध परं वचः ।

द्वितीयाभावस्यापि तत्र सत्वात् बहुव्रीहिः, स्वनिरूपितद्वितीयस्वरूपे विद्यमाने तदभावमात्रेण तथा निर्देशानुपपत्ते. । न हि वटे सदृशद्वितीयाभावसत्त्वेपि अद्वितीयः सवितेतिवदद्वितीयो घट इति प्रयोगोस्ति, न वा गवाभाववत्यपि (१) गवये ऽसदृशो गवय इति । अविद्यादीना ब्रह्माव्यतिरेकपक्ष दूषयति सत्ये ति । अव्यतिरेके सत्यमिथ्यात्वयोर्विरोधादित्याशयः ।

अन्ये तु " एकमेवाद्वितीय " श्रुतिर्न मिथ्यात्वे मानम्, तथा हि, एकशब्दोऽनेकार्थः, " एके मुख्यान्येकेवला " इत्यमरोक्तेः, " एको गोत्र " इत्यत्र " एकशब्दोयमन्यप्रधानासहायसख्याप्रथमसमानवाची " ति कैयटोक्तेश्च, सम्भवति च ब्रह्मणि जीवादितोन्यत्वप्राधान्यप्राथम्यादि, निर्दोषत्वेन च नामरूपसमानत्व, अतो न तस्य स्वगतभेदनिषेधकत्वम्, अद्वितीयशब्दोपि कर्मधारयो बहुव्रीहिर्वा? आद्ये ब्रह्म द्वितीयान्यत्वेपि प्रथम तृतीय वा स्यात्, नान्य., प्रथमार्थत्वेन कर्मधारये सम्भवति जघन्यस्य बहुव्रीहेरयोगादित्याहुः ।

अत्र नवीनः—अस्त्वेकशब्दस्यानेकार्थत्व, तथापि शब्दार्थ इत्येव न ते प्रकृते ग्राह्याः, तथा सति ' चित्रया यजेत ' त्यत्रापि चित्रत्व ग्राह्यं स्यात्, सम्भवति च चित्रत्वस्याप्यग्नीषोमीयपशुविशेषणत्वेन यागसाधनत्वम्, अथ तत्र

स्त्रीत्वचित्रत्वयोर्विधाने वाक्यभेदः स्यादिति, तर्हि प्रकृतेष्यनेकगुणविधाने स तुल्यः, सतोपि प्राप्तत्वात्। किञ्च केषाञ्चिन्मानान्तरेण सिद्धत्वेन केषाञ्चित्तद्विरुद्धत्वेन च नान्यत्वादिगुणेषु तात्पर्यम्, अन्यत्वैकत्वे तावन्मानान्तरसिद्धे, साम्यमपि यदि केनचिद्धर्मेण, तदा प्रमेयत्वादिना तदपि सिद्धमेव, अथ निर्दोषत्वेन, तदपि न, जीवादेर्दोषबहुळस्व तत्समत्वायोगात्। ब्रह्मणोप्यविद्यादिदोषाश्रयत्वाच्च। असहायत्वमपि यदि स्वकार्ये इतरसहकारिराहित्यम्, तन्न, अदृष्टादेर्विद्यमानत्वात्। न चेतनान्तरसहकारिराहित्यम्, भोक्तॄनुद्दिश्य भोग्यसृष्टौ तेषामपि सहकारित्वान्न तद्राहित्यम्, तस्यापि तव मते अद्वितीयपदेनैव सिद्धत्वात्। प्राथम्यमपि यदि प्रथमकालीनत्वम्, तदा पूर्ववाक्य एव तत्सिद्धमनुपपन्नञ्च, जीवांनामप्यनादितया तत्तुल्यकालत्वात्। नापि गुणोत्कर्षः। "निर्गुण" मित्यादिस्वार्थपरगुणनिषेधकानेकश्रुतिविरोधेन तस्याऽतदर्थत्वात्। प्राधान्यमपि स्वातन्त्र्यम्। तच्च यदि स्वेच्छया प्रवर्तमानत्वम्, तन्न, जीवस्याप्येतत्सत्वेन तदपेक्षया तदयोगात्। अथानन्यप्रेर्यत्वम्; तच्च सर्वज्ञान्तराप्रेर्यत्वम्, तस्यापि तव मते अद्वितीयपदेन सर्वज्ञान्तरनिषेधे अर्थादेव सिद्धत्वात्। नापि जीवानियाम्यत्व, तस्यापि सर्वनियन्तृत्वपरश्रुत्यैव लब्धत्वात्। 'येनाश्रुत श्रुत भवती' त्यादिना अद्वैत एवोपक्रमात्, मृदादिदृष्टान्तैस्तदुपपादानाच्च। न गुणेषु तात्पर्यम्। अथोपक्रमोपि ब्रह्मणः प्राधान्याद्यभिप्रायेणैव, तज्ज्ञानात् सर्वज्ञानमुपचर्यत इति चेन्न,—असति बाधकेप्युपचारकल्पनेतिप्रसङ्गात्। कथञ्चित्तदाक्षेपानुपपत्तेश्च। न हि ब्रह्मणः प्राधान्यादौ किञ्चिल्लौकिकं मानं विरुध्यते, तथापि मृदादिवाक्यासङ्गतिरेव, तेन तस्य प्राधान्याद्यनुपपादनात्। 'मृत्तिकेत्येव सत्य' मिति कारणस्यैव सत्यत्वमुपसंहृत्य 'एवं सौम्य स आदेशो भवती' ति जगत्कारणस्यैव सत्यत्वप्रतिपादनाच्च। समवायस्य भेदाभेदस्य निरस्तत्वेन धर्माणां सम्बन्धाभावादपि न ब्रह्मधर्मत्वम्। यदप्यद्वैतवाद्यभ्युपगतनिर्धर्मत्वनिषेधाय सख्यादिक श्रुतिर्विधत्त इति; तन्न, अद्वैतिनो ब्रह्मनिर्धर्मत्वप्रसिद्धेः श्रुतिमूलत्वात्। किञ्च अद्वैतवादिभिरप्यामोक्षं ब्रह्मणः प्राधान्यादिकमभ्युपेयत एवेति तद्विधानमव्यर्थम्। न च तस्य वास्तवत्व

मुक्तिकालीनत्व वा श्रुत्या प्रतिपाद्यत इति वाच्यम्,—अत्र वास्तवादिपदा भावात्। श्रुतेस्तत्र तात्पर्ये च न किञ्चिन्मान पश्यामः। प्रत्युत रुद्ररोदनादिवत् निष्प्रयोजनत्वात्तत्रातात्पर्यमेव। तच्च 'तद्ब्रह्माहमिति ज्ञात्वा सर्वबन्धैः प्रमुच्यत' इत्यादिना भेदज्ञानादेव मुक्तिश्रुतेः। तस्मादेकमिति भेदनिषेधपरमेव।

यत्तु 'अद्वितीय' मित्यत्र बहुव्रीहिर्जघन्य इति कर्मधारय एवाभ्युपेय इति। तन्न, अघटो देश इत्यादावपि तदभावप्रसङ्गात्। न च तत्र विवक्षानुसारात् तथा, तर्हि प्रकृतेष्युपक्रमादिलिङ्गैः द्वैताभावे श्रुतितात्पर्यावगमात् तथास्तु। किञ्च तव कर्मधारयासम्भवादपि बहुव्रीहिरेव ग्राह्यः, ब्रह्मातिरिक्तचेतनाभ्युपगमे ब्रह्मणि द्वितीयत्वस्य सत्वात्। न च धर्मतो निष्कृष्टस्यैव द्वितीयत्वम्, ब्रह्म च सकलसद्गुणाश्रय इति न द्वितीयमिति वाच्यम्, सजातीयान्यमात्रे द्वितीय शब्दव्युत्पत्ते. अन्यथा द्वितीय चक्षुरित्यादौ समे द्वितीयशब्दप्रयोगो न स्यात्।

ननु सर्वज्ञद्वितीयत्व निषिध्यत इति चेन्न,—चेतनद्वितीयातिरिक्तस्य सर्वज्ञद्वितीयत्वस्य सिद्धयसिद्धयोस्तदयोगात्। एतेन सम एव द्वितीयशब्दव्युत्पत्तेरद्वितीय इति समाधिकनिषेध इति निरस्तम्, सर्वज्ञान्तराभावात्, एकशब्देन निर्दोषत्वादिरूपेण प्रपञ्चेन ब्रह्मण. साम्य विधीयत इति तदुक्तिव्याघाताच्च - सामान्यनिषेधे बाधके सत्येव विशेषविषयत्वस्य वक्तव्यत्वाच्च।

ननु द्वितीयमात्रनिषेधो न सम्भवति, द्वितीयाभावस्यैव द्वितीयस्य सत्वादिति चेन्न,—द्वितीयाभावस्याप्यात्ममात्रत्वस्यासकृदुक्तत्वात्। तस्मादेकादिशब्देन स्वगतात् स्वविलक्षणात् सजातीयाच्च यो भेद· स एव प्रतिषिध्यत इति।

अत्रोच्यते,--यदुक्तमनेकगुणविधाने वाक्यभेदप्रसङ्ग इति, तत्त्वापि तुल्यम्, एकमिति विहितस्यैव पुनर्विधाने तद्वैयर्थ्यप्रसङ्गेन एकशब्देन स्वगतभेदाभावस्वरूपस्य एवकारेण विजातीयभेदाभावस्वरूपस्य अद्वितीयमिति सजातीयभेदाभावस्वरूपस्य च प्रतिपाद्यत्वात्। न च सजातीयाद्यभावात्मकमेकमेव सत्प्रतिपाद्यत इति न वाक्यभेद इति वाच्यम्-ब्रह्मधर्मा धर्म्यभिन्ना इति पक्षेपि तुल्यत्वात्।

यदि च निवर्त्यसंशयभेदेन प्रयोजनभेदाद्वाक्यभेदः तदा तवापि तुल्यम्। किं च सन्मात्रस्य प्राप्तत्वात् सजातीयाभावात्मकेपि तस्मिन् तात्पर्यं न सम्भवति, भेदवत्। यदि च सजातीयाद्यभावरूपेणाप्राप्तम्, तर्हि वाक्यभेद एव। वस्तुत 'इद' मिति निर्दिष्टप्रपञ्चस्य एकत्वादिविशिष्टब्रह्मात्मकत्वविधाने कुतो वाक्यभेद.? यच्च मानान्तरसिद्धत्वान्न तेषु तात्पर्यमिति. तत्रोक्तमुत्तरं कुसमयप्राप्त निर्गुणत्वनिषेधाय सख्यादिविधिरिति। न च निर्धर्मत्वप्रसिद्धेः श्रुतिमूलत्वाच्च तद्वाध इति वाच्याम्, तर्कतोपि तत्प्राप्ते., 'कथमसत. सज्जायेते' ति कुतर्कप्राप्तनिराकरणदर्शनात्। 'नेह नाने' त्यादिवाक्यान्तरान्मन्दमतीना भ्रमप्राप्तस्य तन्निवारणार्थत्वसम्भवाच्च। 'जुष्ट यदा पश्यत्यन्यमीश' मित्यादिभेदवाक्यादपि ततो भेदज्ञानस्य मोक्षसाधनत्वावगमान्मुमुक्षोर्भेदवाक्यभ्रमात्प्रवृत्तिवारणार्थं अद्वैतात्मवाक्यश्रवणनियमविधिरिति त्वयैवोक्तत्वात्। यदप्यद्वैतिभिरप्यामोक्ष ब्रह्मणः प्राधान्याभ्युपगमात् तद्विधान व्यर्थमिति, तन्न, न हि त्वत्समय एव कुसमयः, सन्त्यन्येपीश्वरस्य साक्षिमात्रत्वादिवादिन., तद्वाक्यैर्भ्रम. स्यात्। अथवा-किं न एतेन त्वदीयकुमतित्वाभिमानखण्डनेन, त्वा प्रत्येव परमार्थप्राधान्यादिप्रतिपादनार्थमयमुद्यमः। सत्यपदाभावेपि तात्पर्य सम्भवति, 'स्तब्धोस्युततमादेश' मित्येकत्वप्रशासनकर्तृत्वाद्युपक्रमादेरेव तात्पर्यलिङ्गत्वात्। न च निष्प्रयोजनत्वम्। एकत्वविधिमुखेनाद्वैतनिरासे भेदज्ञानान्मोक्षस्य 'पृथगात्मान' मिति वाक्यावगतस्य सिद्धे। प्रत्युताद्वैतस्यैव निष्प्रयोजनत्वम्, ब्रह्माभेदलक्षणप्रयोजनस्य सिद्धत्वात्। एवञ्च साम्यविधानेपि न दोष., प्रमेयत्वादिना सिद्धावपि सत्त्वेन साम्यस्य कुदृष्टिनिरासार्थं विधेयत्वात्।

यच्चोक्त सहायत्वे दूषणम्, तन्न, अदृष्टद्वारकचेतनान्तरसहकारिराहित्यस्य विवक्षितत्वात्। नह्यसहायेन मयेद कृतमित्यादौ ज्ञानादृष्टादि निषिध्यते। यथोक्त-अस्त्यसहायार्थः एकाकिभि. क्षुद्रकैर्जितमसहायैरिति गम्यते, न हि तत्र जितानामदृष्टद्वारा सहकारित्वमपि निषिध्यते।

आहुश्च— यथैक एव सविता न द्वितीयो नभ. स्थले ।
इत्युक्त्या न हि सावित्रा निषिध्यन्तेत्र रश्मयः ॥

तथा च

यथा चोलनृपः सम्राडद्वितीयोत्र भूतले ।
इति तत्तुल्यनृपतिनिवारणपर वच ।
न तु तत्पुत्रतद्भृत्यकळत्रादिनिवारण " मिति ।

भाष्ये तु प्रकरणस्थमृत्पिण्डादिष्विवैकशब्देनाविभक्तनामरूपावस्था—विशेषविशिष्टबोधनादुपादानत्वसिद्धौ पिण्डादिष्विवाधिष्ठात्रंतरशङ्कायां तन्निषेधपरोयमद्वितीयशब्द इति स्थापितम् । एतदेव " बहु स्या " मिति ब्हुभवनतत्सङ्कल्पयोराश्रयतयानन्तरमेव स्थाप्यते " सो कामयत बहु स्य " मिति श्रुत्यन्तरैश्च । एतदर्थमेव प्रकृत्यधिकरणम् । अतो ऽद्वितीयश्रुतिरेव विश्वातिशायित्ववाचिनीं गुणविभूतिश्रुतिशतविदितबहु—विधविशेषजातातिशयितविशेषान्तरतत्परा निर्विशेषवादिना विसवादिनीति नीतिविदः ।

इति शतदूषण्यां अद्वितीयश्रुतिविसंवाद
॥ एकोनषष्टितमो वादः ॥

यच्चोक्त अद्वितीयपदेनैव सिद्धत्वात् सर्वज्ञसहकार्यन्तररहित्य नासहाय स्वमिति, तन्न, प्रथमार्थपक्षेऽद्वितीयपदस्य कर्मधारयत्वात् ।

यच्च प्राथम्य पूर्ववाक्य एव सिद्धमिति, तन्न, ' अग्र ' इतीदशब्द निर्दिष्टप्रपञ्चस्याव्याकृतसदात्मनावस्थानकालपरम्, ' एक ' मिति ब्रह्मणः सर्वकार्यापेक्षया प्राथम्य प्रतिपादयदनादित्वपरम्, अतो न जीवेभ्यः प्राथम्यानुपपत्तिरपि दोषः । सगुणत्वव्यवस्थापनादेव गुणोत्कर्षरूपप्राथम्येपि न दोषः । किञ्च अनेन गुणोत्कर्षे विहिते निर्गुणश्रुतिरेवार्थान्तरपरा स्यात् । यच्चान्यानियाम्यत्व स्वातन्त्र्यमित्यत्र दूषणमुक्तम्—सर्वनियन्तृत्ववचनसामर्थ्यात् सिद्धमिति । तन्न, एक

विज्ञानात् सर्वविज्ञानानुपपत्त्या 'तत्वमसी' त्युपदेशानुपपत्त्या च सिद्धस्यापि सजातीयाद्यभावस्य शब्दनः प्रतिपादनस्य त्वयापि वाच्यत्वात् ।

यच्च सम्बन्धाभावान्न ब्रह्मणः कश्चिद्धर्म इति , तन्न, यदि सम्बन्धाभावेपि धर्मधर्मिव्यवस्था व्यावहारिकी, तदा सत्यभूतैव व्यवस्था सम्बन्धं विनैवास्तु , यदि सम्बन्धोपि कश्चिद्व्यावहारिकः, तदा स एव सत्यः किं न स्यात् ?

यच्चाद्वितीयशब्दे कर्मधारयदूषणम् , तन्न, उपक्रमादिलिङ्गानां विपरीतत्वात् । न च द्वैतिमते कर्मधारयासम्भवः, धर्मतो निष्कृष्टस्य द्वितीयशब्दार्थत्वेन तत्सम्भवात् । न च सजातीयान्यमात्रमेव तदर्थः, एष शूरेषु प्रथम एष द्वितीय इत्यादौ निष्कृष्टेपि प्रयोगात् । यच्च द्वितीयाभावोप्यात्मैवेति न द्वितीयत्व निषेधानुपपत्तिरिति , तन्न, सन्मात्रस्य प्राप्तत्वेन द्वितीयाभावादावतात्पर्यप्रसङ्गादसकृदुक्तत्वात् ।

इति श्रीवाधूलकुलतिलकश्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्येन तदेकदैवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्ध महाचार्यापरनामधेयेन रामानुजदासेन विरचितायां शतदूषणीव्याख्याया चण्डमारुताख्याया अद्वितीयश्रुतिविसवादो नाम एकोनषष्टितमः स्कन्धः ॥५९॥



॥ श्रीरस्तु ॥

॥ षष्टितमो वाद ॥



अस्ति नास्तीति बोधाभ्यामभिव्याप्तेषु वस्तुषु ।
सदेव सदसद्बुद्धिनिमित्तत्वेन साध्यते ॥

यदेव हि प्रामाणिकत्वेन सदिति प्रतीतिगोचरतां भजते, तदेव रूपान्तरेण नास्तीत्यपि प्रतिक्षेप भजते । तत्रासत्त्वमेव तत्त्वमिति सौगतोपदेशिनः, सदा सत्त्वमिति सारूप्याः, सत्त्वासत्त्वसमुच्चय इति जैनाः, उभयप्रहाणमित्यद्वैतिनः, उपाधिभेदादुभयव्यवस्थेत्यपरे, तत्रैव नास्तीति व्यपदेशोपि भावान्तरनिमित्त इति निष्कर्षकाः ।

नन्वसत्त्वमेव सर्वत्र युक्तम्, असतोपि शुक्तिरजतखरविषाणादेः भ्रान्तिहेतुवैचित्र्यादस्तीति धीविषयत्वदृष्टेरिति चेन्न,—बाधाभावात् । नास्तिधीरेव बाध इति चेन्न ;—उपाधिभेदेन विरोधाभावात् । मध्येप्यसत्कार्यं आद्यन्तयोरसत्त्वात्—खपुष्पवदिति चेन्न,—धर्मिहेतुग्राहकाभ्या विरोधात्, स्ववाग्व्याघाताच्च । अस्तिबुद्धेर्नास्तिबुद्धिरपच्छेदनयेन बलीयसी, प्रतिषेधस्य प्राप्तिसापेक्षतया परत्वात्, "पूर्वाबाधेन नोत्पत्तिरुत्तरस्य हि सिद्धचती" ति मीमांसकैरेवोच्यत इति चेन्न, दुष्टहेतुजन्यत्वाविशेषे बलावलविभागायोगात् । हेतुवैचित्र्ये

वस्तुस्थितिमाह । यदेव ही ति । प्रामाणिकत्वेने ति । तदेव सत्त्वमिति भावः । अपर इति । नैयायिकादयः । तत्रैवे ति । उपाधिभेदादिति पक्ष एव भावान्तरनिमित्तत्वं विशेष इत्यर्थः । हेतुग्राहके ति । सत्तावच्छेदककालापेक्षया पूर्वोत्तरत्व ग्राह्यम्, अतो हेतुग्राहकेण सत्ताग्रहात् बाध. । स्ववागि ति । सत्तावच्छेदककालापेक्षया पूर्वोत्तरकालयोरसत्त्वादिति हेतूक्तिसाध्योक्त्योर्व्याघात इत्यर्थः । अनुमानमेव धर्मिग्राहकाद्धेतुग्राहकाच्च बलीय इति शङ्कते नास्तिबुद्धि रिति । दुष्टे ति । तन्मते सर्वस्याप्यनादिवासनादोषजन्यत्वादिति भावः । हेत्वि ति । यदि दुष्टकारणरूपहेतुवैचित्र्यमङ्गीक्रियते, तदा पौर्वापर्येण नियमो न स्यात्, अदुष्टकारणजन्येनैवान्यस्य

पौर्वापर्यानियमाच्च। परत्वमात्रेण निषेधे त्वन्मतं नास्तीत्युक्तिमात्रेण तद्विरुद्धानां सर्वेषां विजयप्रसङ्गात्। तदुपरि जरूपेऽप्यव्यवस्थिति—प्रसङ्गात्।

नन्वस्तु तर्हि सर्वस्य सदा सत्त्वम्, असद्धियः सत्वप्राप्तिसापेक्षत्वात्, प्राप्तस्य च निर्बाधत्वादिति चेन्न;—उपाध्यन्तरेण बाधावाध विवेकस्य वक्तु शक्यत्वात्। अन्यथा घटादिषु असद्व्यवहारस्य निर्विशेषत्वप्रसङ्गात्। अनभिव्यक्त्या सविषयत्वमिति चेन्न,—अभिव्यक्तेरपि सदा सत्त्वेन तत्रापि नञर्थासिद्धेः। तत्कार्यत्वे तद्वत्सर्वत्र सत्कार्यवाद—विलयात्। अभिव्यक्त्यन्तरस्वीकारेऽनवस्थादिदोषात्।

उक्त च "अभिव्यक्तेरनादित्वे कारणानामनर्थता। तदागन्तुकतामिच्छन् किं नान्यत्रैवमिच्छती" ति।

बाधप्रसङ्गात्, ततश्चापच्छेदन्यायोपन्यासो व्यर्थ इति भावः। अत एव हेतोः सर्वस्य दुष्टकारणजन्यत्वेनाविशेषमभ्युपगम्यापच्छेदन्यायोक्तौ दोषमाह परत्वे ति। मात्रशब्देन दुष्टकारणजन्यत्वाभावो व्यवच्छिद्यते। अपच्छेदन्यायापेक्षितानियत विरोधपौर्वापर्याभावोपि मात्रशब्देन विवक्षितः।

नन्वि ति। कार्ये सत्वबुद्धिरस्ति न वा? न चेदसद्धियः सत्वप्राप्तिसापेक्षत्वात् उत्पत्तिर्न स्यात्, कुतो बाधकता? अस्तिचेत्तदापि तेन प्रतिबन्धादुत्पत्तेरसम्भवात् प्राप्तस्य सत्वस्य तेन बाधो न सम्भवतीत्यर्थः। उपाधी ति। देशकालादिभेदेन अस्तिनास्तिबुद्धिरूपबाधाबाधव्यवस्थाया वक्तु शक्यत्वादित्यर्थः। अन्यथे ति। देशकालादिभेदादविरोधानुपपादने असत्वधीर्निर्विषया स्यात्, सत्वाभावादतिरिक्त विषयस्य वक्तुमशक्यत्वात्। असत्वधीश्चानुभवसिद्धेति भावः। तत्कार्यत्व इति। तस्य अभिव्यक्तेः कार्यत्व इत्यर्थः। कारणाना मिति। अर्थः—प्रयोजन न भवतीत्यनर्थस्तस्य भावोनर्थता। कारणानामनर्थता—अभिव्यक्तिः कारणाना प्रयोजन न स्यादित्यर्थः। तेन "अर्थाज्ञ" इत्युरःप्रभृतिषु पाठात् न नित्य समासान्तकप्रत्ययचोद्यावकाश.।

पूर्वोत्तरकालावुपाधिद्वयसम्बन्धेन सत्त्वासत्त्ववर्णने सम्बन्धिन उभयानुवृत्ते. सदातनत्वम्, असतः शशशृङ्गादेर्देशकालभेदेन सत्त्वाभाव.चेति चेन्न;—स्वस्य स्वप्रतियोगिनश्चाधारतया पूर्वोत्तरकालसम्बन्धव्यपदेशात्, नित्यासद्वस्तुन. क्वचिदपि कथञ्चिदभावात्। "आदावन्ते च यन्नास्ति नास्ति मध्येपि तत्तथे" ति चेन्न;—शशशृङ्गादाविष्टत्वात्, घटादौ बाधात्। तत्प्रसङ्गेपि तत्तत्कार्योपाधिकाद्यन्तग्राहकैरेव व्याप्तिग्रहणनिरोधात्। तद्विपर्यये च हेत्वात्मनि बाध.देव। असतः कथ जन्म? सतो वा कथम्? अभिमानमात्रमिति चेत्? दूषणमप्युक्तमेव। प्रागसत्त्व च जन्मोपकारीति न तत्र विरोधचोद्यावकाशः।

बालत्वयुवत्वादिवदेकस्यैव देशकालसम्बन्धिभेदेन सत्वासत्वे उ ते—इत्यभिमानेन चोदयति पूर्वे ति। असत इति। तथा च सत. कदाप्यसत्त्वन्नोपपद्यत इति भाव.। नित्ये ति। नित्यासद्वस्तुन एव सत्वासम्बन्धनियमादित्यर्थ.। शङ्कते आदा वितिं। किं मध्येप्यसत्व साध्यते? किं वा पूर्वोत्तरकालयोरपि स व पर्यवसानायापाद्यते? आद्य आह शशशृंगादा वितिं। द्वितीय आह तत्प्रसग इति। यत्किञ्चिद्वस्त्वधिकरणकालापेक्षया पूर्वोत्तरत्व कालस्य गृहीत्वा गृहीतस्य खपुष्पादौ पूर्वोत्तरकालयोरसत्त्वस्य मध्येप्यसत्वव्याप्तिर्ग्राह्या, तत्र तद्वस्तुन. तत्काले सत्वग्रहात्तत्रैव व्यभिचाराद्व्याप्तिग्रहो नोपपद्यत इति प्रसङ्गे मूलशैथिल्यमित्यर्थ.। तद्वि ति। तस्य—प्रसञ्जनीयस्य मध्येप्यसत्वस्य, विपर्यय.—मध्ये सत्वम्, प्रसञ्जकस्य पूर्वोत्तरकालयोरसत्वस्य विपर्यये साध्ये उक्तप्रसङ्गानुग्राह्यो हेतुर्वाच्य:, स च पूर्वोत्तरकालयोरसत्वस्य कार्ये प्रत्यक्षादिना निश्चयाद्बाधित इत्यर्थः। शङ्कते असत इति। परिहरति सतो वे ति। सत्त्वेन सिद्धस्योत्पत्यसम्भवात् जन्मोपत्तिरेव न स्यादित्यर्थः। इष्टापत्त्या परिहार शङ्कते अभिमानमात्र मि ते। अभिव्यक्तिमात्रमित्यर्थ.। उक्त मिति। अभिव्यक्तेरनादित्व इत्यादिना। असतः कथ जन्मेत्युक्तानुपपत्ति परिहरति प्रागि ति। नित्यासत्त्व हि जन्मविरुद्धम्,

प्रागसत' खपुष्पस्य कथमनुत्पत्तिः ? प्राक् सतो वा प्रत्यगात्मन' कथं नित्यव्यक्तिरिति चेत्, खपुष्पे नित्यासत्त्वादेवेति निपुण पश्य। नित्यविशेषणं प्रयुञ्जानेन च स्वीकृतमनित्यमिति स्ववाग्विरोध.। ननु प्रागसत. उत्पत्तिकालेपि कारणादुत्पत्तिर्न घटत इत्युक्तम्,

" असत्वान्नास्ति सम्बन्ध कारकै. सत्वसङ्गिभि'।
असम्बद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थिति.॥ "

इति चेत् ? अत्रोत्तर दत्तमाक्षपादै. "घटादिनिष्पत्तिदर्शनात् पीडनेचाभिचारादप्रतिषेध" इति। अस्मान्यत्र विस्तरो द्रष्टव्यः। अतोऽसतो नित्यासत्त्व सतश्च नित्यसत्त्वमिति सांख्यवादः सुहृद्भिर्द्रव्यविषये योज्य। यत्पुनः सत्त्वासत्त्वसमुच्चय इत्युच्यते, तदेशकालादिभेदेन चेद्वयमनुमन्महे। अन्यथाचेदत्यन्तविरोधान्नाद्रियामहे। तथा च दूषणभूषणादि व्यवस्थाविलयेन व्यवहार एव निष्फलः स्यात्। तेन परस्परविरुद्धोऽय पक्षः।

जन्मात्मकसत्वकाले तदसत्वविरोधात्, प्रागसत्व तु तदवच्छिन्नोत्तरकालसत्वात्मक जन्मन्युपकारकमेवेत्यर्थ, प्रागसतो जन्माङ्गीकारे खपुष्पस्यापि जन्म कथ मस्या-दिति शङ्कते प्रागसत इति। सतो जन्माङ्गीकारे नित्यस्वात्मनस्त्वदभिमत जन्म घटादिवत् किमिति न स्यादिति प्रतिबन्ध्या परिहरति प्राक्सत इति। अनुत्पत्तिरित्यनुषङ्ग.। मन्मते कादाचित्काभिव्यक्तिरुत्पत्ति', सा नित्यव्यक्तत्वभावे विरुद्धेति शङ्कते नित्ये ति। नित्यासत्स्वभावत्वात् खपुष्पादावपि आगन्तुकसत्वा त्मकजन्म विरुद्धमिति परिहरति खपुष्प इति। नित्यविशेषण मिति। अनित्यव्यक्त्यभावे तद्व्यावर्तकविशेषणायोग इत्यर्थ.। दूषणे ति। दूषणस्य स्वपक्षे असत्व परपक्षे सत्व भूषणस्य तद्विपर्ययेण सत्वमसत्व चेति व्यवस्था न स्यादित्यर्थः। तेने ति। तेन—उक्तव्यवहारोच्छेदप्रसङ्गेन, विरोधस्याहृद्यत्वात्

ये पुनरुभयप्रहाणवादिनस्तेषामेव पक्षं परिशोधयामः । परस्पर विरुद्धोभयाङ्गीकारवत्तदुभयप्रहाणस्यापि विरोधकुक्षिनिक्षेपमवोपलभामहे । न हि घटत्वाघटत्वसमुच्चयवत् घटाघटविलक्षणयोरपि समुच्चयः सम्भवति, विरोधस्याविशेषात् । उपलम्भ एव विरोधोपशमने प्रभवति, स तु घटत्वाघटत्वसमाहारवत्तदुभयवैलक्षण्येपि परिपन्थी । न हि घटाघटविलक्षणं किंञ्चित्पश्यामः । घटविलक्षणस्याघटत्वात् अघटविलक्षणस्य च घटत्वात् । उभयविलक्षण पुनर्न किञ्चिदुपलभामहे । उपाधिभेदादुभय व्यवस्थेति पक्षमदूरविप्रकर्षात्परिगृह्णीमहे । उपाधिभेदस्तु स्वात्मना सत्त्व मन्यात्मना पुनरसत्त्व स्वकाले सत्त्वमन्यकाले पुनरसत्त्व तथा स्वदेशे सत्वमन्यदेशे पुनरसत्वमिति । इह तादात्म्य संसर्गो वा सत्वमिति व्यपदिश्यते, तद्विरुद्धवेषेण वस्तुन्येवासद्व्यपदेशः ।

परस्परविरुद्धार्थकोय पक्ष. स्वेनैव बाधित इत्यर्थ. । विलक्षणयो रिति—भाव प्रधानम् । ननु भावाभावयोर्विरुद्धत्वेपि सयोगतदभावयोरविरोधवत् घटाघट वैलक्षण्यस्यापि क्वचिदविरोधोस्त्वित्यत आह उपलम्भ इति ; अदूरविप्रकर्षा दिति । अभावस्य भावातिरिक्तत्वाङ्गीकारमात्रं विप्रकर्ष इति भाव. । उपाधिभेद पदेनोपाधिभेदाधीना व्यपस्थोच्यते । अन्यात्मने त्यन्योन्याभावः ।

इति श्रीवाधूलकुलतिलकश्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्येन
तदेकदैवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्ध
महाचार्यापरनामधेयेन रामानुजदासेन विरचिताया
शतदूषण्याख्याया चण्डमारुताख्याया
सत्वासत्वविवेको नाम
षष्ठितम. स्कन्ध. ॥६०॥

षष्ठे तु पक्षे विरुद्धधर्मयोग एव वस्तुन्यसद्व्यवहारहेतुतया व्यपदिश्यते, घटो हि घटात्मना सत् पटात्मना पुनरसन्निति निर्दिश्यते । सन्नेव स्वदेशकालयोः स्वविरोधिदेशकालयोरसन्निति । उपलम्भानुकूल्यात्लाघवाच्चेदमेवाद्रियन्ते वृद्धा इति ।

इति शतदूषण्या सत्त्वासत्वाविवेकवादः

॥ षष्टितमो वादः ॥

॥ श्रीरस्तु ॥

॥ एकषष्टितमो वादः ॥



पयोधितनयान्वित परमधाम्नि यद्वर्तते
सदा यदवलोकनं विदधते फणीन्द्रादयः ।
अकृत्रिमसरस्वतीवदनसन्ततास्वादितै
र्गुणैरधिगुण महः स्वयमनन्तमालक्ष्यते ॥

'विगीतं मदविद्याकल्पित–विवाद.ध्यासित चेतनजातमह'मित्या.दिषु किं सर्वत्राहमर्थैक्य सिसाधयिषितम्, उत तद्धर्मसाधैक्यम्, यद्वा तदुपलक्षितसन्मात्रैक्यम् ? न प्रथमः, अपसिद्धान्तप्रत्यक्षादिविरोध प्रसङ्गात् । न ह्यहमर्थं सत्यमात्मानमनुमन्यसे, न च अहङ्काराणां स्वरूपैक्यम् । न च परदु खादेः स्वदु.खादित्वमभिमन्यसे । " एको बहूना " मित्यादिं च न स्मरासि । अत एव न द्वितीयः, सर्वेषां सर्वदा सर्वज्ञत्वस्यासर्वज्ञत्वस्य वा प्रसङ्गाच्च । न तृतीयः, सर्वानुयायि सदैक्येप्यात्मैक्यासिद्धे. । न हि कस्यचित्सद्बुद्धिविषयमात्रे स्वात्माभिमानः, आत्माभिमानमात्रं वा, तथा सति देहात्मभ्रमादेर्विशेषतः परिहारे निदानाभावात् । आत्मनः सत्वं त्वयापीष्यत इति चेत्, सत्यमेतत्, न तु सतः सर्वस्यात्मत्वम् । आत्मव्यतिरिक्तस्य न सत्त्व मिति चेन्न, " तदनुप्रविश्य सच्च त्यच्चाभवत् " " कथमसतः सज्जायेते " त्यादिविरोधात् ।

किञ्च सतामैक्यं सर्वमानविरुद्धम्, सत्तैक्यं तु जात्यैक्यमात्र स्यात् । सत्तैव महानात्मेति चेन्न,—तस्यान्यधर्मत्वायोगात् । सतां हि भावः सत्ता, न तु सा स्वतन्त्रा । उक्तञ्च सर्वसिद्धौ " स्वैः स्वै–र्व्यवस्थितै रूपैः पदार्थानां तु या स्थितिः । सा सत्ता न स्वतन्त्रा स्यात्त-त्राद्वैतकथा कथ " मिति । पारतन्त्र्यभ्रमोऽयमिति चेत्, स किं

सत्ताया उत सत· ? आद्ये विरोध., सतां हि भाव· सत्ता। द्वितीयेपि विरोध· , न हि सता स्वधर्मभूना श्रीरस्ति। न चैतावता तेषामैक्यसिद्धि·।

अपि च जीवैक्य सत्यं मिथ्या वा ? पूर्वत्रापसिद्धान्तः, अविद्यातत्सबन्धिजीवभावतदेकत्वादीनां मिथ्यात्वाभ्युपगमात्। उत्तरत्र जीवबहुत्वमपि तथैवेति किमन्यतरपक्षपातेन तत्साधनेन वा ? प्रतीत्यनुसारेण जीवभेदपक्षे वा किं न पतसि। न च जीवैक्यं प्रातिभासिकम्; सर्वधीव्यवहारविरोधात्। नापि यौक्तिकम् ; धर्मधीविरोधात् ? प्रवृत्त्यादिभेदैर्हि परानुमानम्। न च स्वात्मपरात्मधीन्यायः , ' वैधर्म्याच्च न स्वप्नादिव ' दिति सूत्रोक्तन्यायविरोधात्। स्वात्मनश्च ते तथैव प्रसङ्गात्। स्वात्मनश्च परं प्रति परात्मित्वात्। न हि दृश्यवद्द्रष्टापि ते मिथ्याभूतः। व्यावहारिकसत्यत्वं तस्यास्तीति चेत् ? स्वीकृतं तर्हि व्यावहारिकजीवबहुत्वं तदैक्यं चेति नैकत्र पक्षपातो युक्त·। यथा दृष्ट वह्नेर्लिङ्गतो वह्न्यन्तरानुमिति. तथैव ह्यत्र आत्मान्तरानुमितिः। यद्यत्रैक्यं साध्यते, तर्हि वह्न्यादैक्यमपि किं न साध्यते? विरुद्धधर्मविहतेरिति चेत्तुल्यम्। न चैकाश्रयतया सर्वदु·खादीनां प्रतिसन्धानमस्ति। अन्तःकरणाद्युपाधिभेदादप्रतिसन्धानमिति चेन्न,—देहावयवबाह्येन्द्रियादिभेदेपि प्रसङ्गात्। स्वेच्छया विशेषवर्णनेप्यतिप्रसङ्गात्। महाप्रलयान्तरभाविनां महात्मना केषाञ्चिदन्तःकरणभेदेपि पूर्वकल्पानुभूतप्रतिसन्धानदर्शनाच्च। अद्यतनानां प्राग्भवीयाननुसन्धानवत् स्यादिति चेन्न,—प्रायेण नरक क्लेशप्रसूतिव्यसनकालविप्रकर्षादिभिः संस्कारविलयात्। न चेह तथा, स्वस्याप्यस्मरणापातादिति।

इति शतदूषण्या जीवैक्यभङ्गो नाम

॥ एकषष्टितमो वाद· ॥

॥ श्रीरस्तु ॥

॥ द्विषष्टितमो वादः ॥

स्वे स्वे कर्मणि युञ्जानो मुखबाहूरुपादजान् ।
स्वयं नः सप्रकाशेत स्वान्ते स्वच्छन्दसारथिः ॥

यत्तु भगवता बादरायणेन सूत्रितं—शूद्रस्य ब्रह्मविद्यायामनधिकारित्वम्, तद्भक्तन्त कथं निर्वहन्ति ? किं शूद्रैर्निर्विशेषज्ञानस्य दुःसम्पादत्वात्, तत्सम्पत्तिसद्भावेपि वा ततः तेषामविद्यानिवृत्त्यसम्भवादिति । न प्रथमः, स हि तथाविधस्य ज्ञानस्य वेदैकजन्यत्वाद्वा[1] अवेदजन्यत्वेपि वेदसापेक्षत्वाद्वा[2] वेदावेदयोः शूद्रादिषु ज्ञानजनकत्वाशक्तेर्वेति ? आद्यस्तावदधिमतत्वसिद्धान्तेन त्वया नाङ्गीकर्तव्यः । आत्मघातुकतर्कानुगृहीतानुमानादिनापि निर्विशेषत्वस्य प्रपञ्चमिथ्यात्वादेश्च भवद्भिः साध्यमानत्वात् । न च निर्विशेषे श्रुतिसमधिगम्यं विशेषान्तरं सम्भवति । श्रुतेरपि भवद्भिरध्यस्तातद्रूपनिवृत्तिमात्रपरत्ववर्णनात् । आनन्दत्वादेरपि स्वरूपानुप्रवेशनिर्णयात् । नचानुमानादिषु सर्वत्र

स्वे स्वे कर्मणी ति । स्वे स्व इत्यनेन ब्राह्मणाद्यधिकारिभेदेन कर्मणा व्यवस्था सूच्यते । अनेन परपक्षे स्वे स्वे कर्मणि नियोजन न सम्भवति, शूद्रस्यापि उपासनप्रसङ्गादिति सूच्यते। सूत्रित मिति । " शुगस्य तदनादरश्रवणात्तदाद्रवणात् सूच्यते ही " त्यादिभिरित्यर्थः। स ही ति । वेदे च शूद्राणामनधिकारादिति भावः । अवेदे ति । वेदाकरणकत्वेपीत्यर्थः । अनुमानादिने ति । आदिशब्देन प्रत्यक्ष विवक्षितम् । तस्य तर्कसहकृतस्य सन्मात्रे प्रामाण्याभिधानात्। ननु निर्विशेषज्ञानमात्रं सुसम्पादमस्तु, तथापि निर्विशेषस्य आकारविशेषेण ज्ञान मोक्षहेतुः, स चाकारः श्रुत्येकसमधिगम्य इत्यत्राह न चे ति । श्रुत्या विशेष प्रतिपत्तिश्च न त्वयाभ्युपगता, स्वरूपाभिन्नानृतादिव्यावृत्तिपरत्ववर्णनादित्याह—श्रुतेरपी ति । स्वरूपे ति । एतेन ब्रह्मणो निर्धर्मकसदाद्यात्मस्वरूपमागमं विना न केनचित् निश्चेतु शक्यमिति नवीनोक्त प्रत्युक्तम्, निश्चितस्वरूपानतिरेकात् । ननु मास्तूनिर्विशेषज्ञान वेदैकजन्यम्, अथापि शूद्रैस्तद्दुस्सम्पादम्, अनुमानेप्यनधिकारादित्याशङ्क्याह नचे ति। ननु शूद्रादीना लोकतः सविशेषस्यैव

शूद्रस्यानधिकारःशक्य., लोकसिद्धान्वयव्यतिरेकमूलेषु त्वदुक्तेष्वाचण्डाल मधिकारात्। यत्र च तिरश्चामप्यधिकारः तत्र द्विपदा क परिपन्थी। अन्यथा तेषां सार्वलौकिकव्यवहारोच्छेदप्रसङ्गात्। निर्विशेष तत्वमि—त्यादिलौकिकवाक्येन च तेषा तत्वज्ञान सुलभमेव। न च ततस्तेषां निवर्तकं ज्ञानं नोपलभ्यत इति वाच्यम्,—त्रैवर्णिकाना वैदिकवाक्येनापि तुल्यत्वात्। श्रवणमननिदिध्यासनजनितविकल्पवैमुख्याना दृश्यत इति चेत्, एवं लौकिकवाक्येपि तान्येव सहकारीकृत्य तत्सिद्धि पश्य। न च सामग्र्या सत्या क्वचित् ज्ञान क्वचिन्नेति नियन्तु शक्यम्, अनीश्वरेच्छया तन्नियमासिद्धे। भवतु वा वेदैकमूलत्वम्, तथापि न शूद्रादेस्तत्रानधिकारः; व्युत्पन्नपदपदार्थाना तेषा ततोपि ज्ञानसम्भ—वात्, उत्पन्नेपि तत्वज्ञाने वेदश्रवणतदर्थानुसन्धानादिमूलप्रत्यवायस्य भवन्मते प्रसङ्गाभावात्। यदा विश्वभ्रमोन्मूलनं ज्ञानमुदेष्यति तदा

ग्रहार्हविशेषव्याप्तिग्रहाभावाद्वस्तुमात्रे सविशेषत्वभ्रमादेव व्यतिरेकिणाप्यनुदया-ज्ञानुमानमित्यत आह निर्विशेषत्वं तत्वमि तीति। नन्वद्वैततत्वसाक्षात्कारो हि भ्रमविरोधी, सचेदानी शूद्रादीना ततो न जायते, वाक्यश्रवणेप्यविद्यानिवृत्त्य दर्शनादित्यत आह न च तत इति। तुल्यत्वा दिति। ज्ञानानुत्पादस्येति शेष.। श्रवणे ति। श्रवणादिनिरस्तभेदवासनानामित्यर्थः। ननु "श्रोतव्यः श्रुतिवाक्येभ्य" इति श्रुतिवाक्यैरेव श्रवणनियमात् सामग्र्यभावादेव ज्ञानानुत्पाद इत्यत आह भवतु वे ति। वेदेऽनधिकारः कि शूद्रादीना ततो ज्ञानस्यैवानु त्पत्तेः? प्रत्यवाययोगाद्वा? नाद्य इत्याह व्युत्पन्ने ति। द्वितीय आह उत्पन्न इति। अतो न प्रत्यवायेन मोक्षप्रतिबन्ध इति भावः। तदेवोपपादयति यदे ति। किञ्च प्रत्यवायस्य प्रायश्चित्तेन नाशे मोक्ष. कुतो न स्यादित्यपि विवक्षितम्। ननु निषेधोल्लघनेन लोभादिना उपदेशसम्भवात् श्रोतुश्च प्राय—श्चित्तेन प्रत्यवायपरिहारसम्भवात् त्वन्मतेपि शूद्रस्य मोक्षः स्यात्, लौकिक—

तदन्तः पातिन· कस्यचित् प्रत्यवायभ्रमस्य का वार्ता ? नचानुपनीतस्यानधीतवेदस्याश्रुतवेदान्तवाक्यस्य " न शूद्राय मतिं दद्यात् " इति वचनबलान्निषिद्धाचार्यलाभस्य शूद्रादेः कथं ततो ज्ञानमिति वाच्यम्; दग्धाधिकारतया वेदशिरसि वर्तमानैर्भवद्भिर्वेदान्तानां तदर्थस्य च तेभ्योपि यथावदुपदेशसम्भवात् । न हि वो विधिनिषेधकिङ्करता । यथा ब्रूथ—

" दग्धाखिलाधिकारत्वात् ब्रह्मज्ञानाभिना मुनिः ।
वर्तमान· श्रुतेर्मूर्ध्नि नैव स्याद्वेदकिङ्कर· ॥ " इति ।

यद्यपि " त्यज धर्ममधर्मं चे " त्यादिबलाद्दुर्बलबुद्धिभिर्युष्मत्स्मयधूमैर्निषिद्धवर्जनमनुज्ञायते, तथाप्यन्यैः कैश्चिदुन्मर्यादैरर्थादिलिप्सया तेभ्यस्तदुपदेश सम्भवन्येव ।

नचैवमस्मन्मते प्रसङ्गः, वक्तुरिव श्रोतुरपि प्रत्यवायेन तन्मूलोपामनादेः तेष्वसम्भवात् । उपासनविधीना च उपनयनाद्यङ्गकाध्ययनविधिसिद्धस्वाध्यायसम्पन्नज्ञानत्रैवर्णिकाधिकारिलाभेन कर्मविधीनामिव तदितरेषु स्वसिध्यर्थं ज्ञानान्तरकल्पनौदासीन्यात् । तत एवोपबृंहणभूतेतिहासपुराणजन्यज्ञानस्यापि विधिभिरनादृतत्वात् । तच्छ्रवणानुज्ञानस्य पापक्षयादिमात्रफलत्वात् । उपास्यस्य च ब्रह्मणोनन्तविशेष—

वादयैरनुमन्तैर्वा तज्ज्ञानसम्भवाच्चेत्यत्राह उपासने ति । पूर्वकाण्डे ह्यपशूद्राधिकरणे क्रतुविधया ह्यन्यथानुपपत्त्या विद्यार्जनमाक्षिपन्ति, यदा तु स्वाध्यायविधिविहिताध्ययनोपात्तविद्यान् द्विजन्मनो लभन्ते, तदा तैरेव लब्धात्मानोनुपपत्तिक्षयात् न चतुर्थस्य विद्यामाक्षिपन्तीति? शूद्रस्यानधिकारो निर्णीत., तेनैव न्यायेन इहापि तादृशाधिकारलाभात् न शूद्रस्य स्वच्छन्दार्जितज्ञानस्याप्यधिकार इति न तत्कृतोपासनस्य मोक्षसाधनत्वमित्यर्थः । ननु यदीतिहासादिजन्यज्ञान विधिभिरनादृतम्, तर्हि " श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रत " इति श्रवणानुज्ञानं किमर्थमित्यत्राह तच्छ्रवणे ति । अनुमानात् ज्ञानसम्भवे हेत्वन्तरमाह उपास्यस्ये ति ।

ननु अद्वैतिमतेपि मोक्षसाधनीभूतज्ञानोद्देशेन श्रवणादिविधानात्तेषां च त्वदुक्तन्यायेन त्रैवर्णिकाधिकारकत्वात् शूद्रस्य श्रवणाद्यभावान्मोक्षसाधनं ज्ञानमेव नास्तीति चेत् - उच्यते, त्वन्मते मननादिध्यासनाङ्गकश्रवणविधेर्नियमविधित्वाङ्गीकारात् तस्य त्रैवर्णिकाधिकारित्वेपि मुमुक्षुशूद्रस्य विद्यातिरिक्तमुक्त्यवीनाद्वैदान्ताद् तदर्थप्रतिपादकभाषादिभिर्वा जायमानं ज्ञानं ततो मोक्षश्च केन वार्यते? न हि प्रतिग्रहादिना ब्राह्मणो धनमर्ज्येदिति ब्राह्मणविषयको नियमः साधनान्तरेण धनार्जनमन्येषां निरुणद्धि।

ननु यद्यायुक्तरीत्या शूद्रस्य अद्वैतविद्या सम्भाव्यते, तथापि सा न बन्धमोचनाय प्रभवति, यतः—'श्रवणादिक्रमोन्निद्रवाक्यजा धीर्विमोचिका,' श्रवणं च वेदान्तवाक्यानामद्वितीये ब्रह्मणि तात्पर्यावधारणम्, तच्च शूद्रस्य नेति न तस्य तादृशी विद्योत्पद्यत इति चेत्,—न तावन्नियमविधिबलाच्छ्रवणाभाव, तत्र तस्यासामर्थ्यात्, नापि श्रुतिनिषेधात्, प्रायश्चित्तेन तन्निष्कृते, तदुपदेष्टृसम्भवश्च सुलभ एवेति।

किञ्च काचैषा तादृशी विद्या? किमपरोक्षरूपा? किं वा अपरोक्षावधारणात्मिका? यद्वा अप्रतिबद्धापरोक्षहेतुर्वा? आद्या तावदपरोक्षविषयत्वाभाव्याद्वाक्येन प्रसूयत एव; त्वन्मते द्वितीयामपि स्वकुमतिकल्पितदूषणाश्लिष्टा या काचित् सामग्री सुखं प्रसूयते। न हि न्यायाप्रबृंहितेनाप्यनवधारणं जायत इत्यनुन्मत्तः कोपि ब्रूयात्; तृतीयापि अधिष्ठानयाथात्म्यविषयोज्जाम्भमाना तदध्यस्तं कुल्लं निवर्तयन्ती विपरीतवासना बन्धनिवृत्तिप्रतिबन्धकतया त्वन्मतेनापि निवर्तयेदेवेति न केनापि प्रतिबन्धसम्भावनामर्हति।

ननु विद्या हि साक्षादविद्याविरोधिनी न तत्कार्यं प्रतीति भेदवासनया कथं न प्रतिबन्धार्हा? नैवम्, शुक्तिसाक्षात्कारात् शुक्त्यज्ञाननिवृत्तौ रजतवासनाया अप्रतिबन्धकत्वादर्शनात्। किञ्च चरमसाक्षात्कारः किं भेदवासनाया सत्यामेवोत्पद्यते? उत निवृत्तायां? नाद्य, चरमवृत्तेरप्यध्यस्तत्वेन भेदवासनाजन्यत्वात्। नान्यः, तथासति प्रागेव प्रतिबन्धात् ततोविद्यानिवृत्त्यनुपपत्तेः। न च निर्दि

स्यानुमानाद्यगोचरत्वात् । उपासनस्यैव वाक्यार्थज्ञानातिरिक्तस्य बन्ध-निवर्तकत्वात्, बन्धस्य च सत्यत्वेनादृष्टद्वारा तन्निवृत्युपपत्तेरिति ।

एतेन द्वितीयोपि पक्षो निरस्तः, वेदसापेक्षत्वेपि तेषां तदधि-गमोपायस्योक्तत्वात् । कथ वानुमानोदेर्वेदसापेक्षता ? न तावत् तद-ङ्गतया, तर्कादिवत् कैश्चिदपि तथानभ्युपगमात्, नापि कारणतया; वेदस्यैव व्युत्पत्त्यादावनुमानादिसापेक्षत्वेन वैपरीत्यात् । नापि नैसर्गिक लोकव्यवहारमूलतया तत्त्वबुबुत्साशून्याना तदभ्रान्तत्वसमर्पणमूलतत्व-बुबुत्सोत्पादनद्वारेण; साख्यसौगतादिभिः प्रत्यक्षादिवृत्तपरीक्षाप्रवृत्तैस्तदु त्पत्त्युपपत्तेः, उत्पन्नायां च तस्या भवदभिमतप्रत्यक्षानुमानादिभिर्निर्वि शेषज्ञानसम्पादनोपपत्तेः । तिष्ठन्तु सांख्यादय, त्वदभिमततत्त्वविसम्प्रदा यागतलौकिकवाक्यादपि तद्बुबुत्सा जायत एव । पश्यामश्चैतदद्यतनेषु । न च वेदानुवचनस्य विविदिषासाधनत्वश्रुत्या तत्सापेक्षता ; यज्ञादेरिव

व्यासनेन भेदवासनानिवृत्तिकाल एव चरमसाक्षात्कारोत्पत्ति, भेदवासना च विनश्यदवस्था साक्षात्कारहेतुरिति वाच्यम्,—अद्वैतवाक्यप्रतिसन्धानपदार्थस्मर-णादिसामग्रीविलम्बेन साक्षात्कारस्य निदिध्यासनव्यवधानात्। अतस्त्वदभिलक्षिताः तिरोपि विद्याः शूद्रादीनभिसरन्त्यो न केनापि वारयितु शक्या ।

उक्तत्वा दिति । भवतु वा वेदैकमूलत्वमित्यादिनेत्यर्थः । **वेदस्यैवे** ति । शक्तनया ज्ञातपदस्य वाक्यार्थज्ञाने करणत्वादिति भावः । तत्त्वबुबुत्साया ह्यनुमानादौ प्रवृत्तिः, सा चानादिसिद्धलौकिकव्यवहारजनितभेदसत्यत्वभ्रमस्य पुरुषस्य लोकव्यवहारस्य भ्रान्तत्वबोधनात् भवतीति भेदमिथ्यात्वं बोधयन्वेदस्तत्व बुभुत्सा जनयति, अतो वदसापेक्षमनुमानादित्याशक्य निराकरोति, **नापी** ति । द्वारेणेत्य नन्तर वेदस्योपयोग इति शेष । **सांख्य** ति । साख्यसौगतादीना प्रत्य क्षादिषु परमार्थविषयत्वापरमार्थविषयत्वविप्रतिपत्ते सशयात् बुबुत्सा भवतीति न वेदस्योपयोग इत्यर्थः । तस्यां–बुभुत्साया। **यज्ञादेरिवे** ति । यथा त्रैवर्णिकस्य

जन्मान्तरानुष्ठितस्यापि तस्यादृष्टद्वारा तद्धेतुत्वोपपत्तेः। अत एव न तृतीयः, व्युत्पत्त्यन्वयव्यतिरेकादिशालिषु त्रैवर्णिकेषु शूद्रादिषु च प्रमाणानां पक्षपातविरहात्। भवतु वा शूद्रादीनां यत्न कुतश्चित्तत्त्वज्ञानम्, त्रैवर्णिकानां तु वेदत एवेति नियमार्थमधिकरणमिति चेन्न.—नियामकाभावात्। अधीतवेदत्वमेव नियामकमिति चेत्, त्यज तर्हि अध्ययनक्लेशम्, शूद्रादिवल्लघीयसैवोपायेन तत्प्रयोजनसिद्धेः। अत एव चान्ततो वेदान्तोच्छेद प्रसज्येत। नचाधीतवेदैरन्यतस्तदर्थो ज्ञातु न शक्यः; तस्य तत्प्रतिबन्धकत्वाभावात्। नापि तेन्यतो न जानीयुरिति निषेधः। न च निषेधोल्लघनेपि वः प्रत्यवाय इत्युक्तम्। नापि द्वितीय.

वेदानुवचने सति बुभुत्सोत्पत्तिर्विविदिषासाधनत्वेन श्रुतजन्मान्तरानुष्ठितयज्ञादिभिरेवादृष्टद्वारेत्युच्यते तथा शूद्रस्यापि जन्मान्तरीयवेदानुवचनात् बुभुत्सा सुवचेत्यर्थ। अत एवे ति। दुर्ज्ञानजनकत्व हि वेदनसाधनत्व यज्ञादीनामाश्रित्य शूद्रे तद्विरहा द्वाच्यम्, न च तत् सम्भवति, जन्मान्तरीययज्ञादीनामपि अदृष्टद्वारा विविदिषायामिवोपयोगादित्यर्थ.।

ननु स्वभावादेव शूद्रे दुर्ज्ञानजनकत्व न सहकारिविरहादित्यत्राह व्युत्पत्ती ति। अनुभवविरोधादिति भावः। अद्वैतप्रमाणाना तादृशसम्भवकल्पना च कल्पकाभावादेव निरस्ता। नियामकाभावा दिति। त्रैवर्णिकानां वेदत एवेति नियमे हेत्वभावान्न तत्परमधिकरणमित्यर्थः। सूत्राक्षरानानुगुण्य च विवक्षितम्। अधीतवेदत्व मिति। अधीतस्य वेदस्य सप्रयोजनत्वार्थं तत एव ज्ञानस्य वाच्यत्वादित्यर्थः। त्यजे ति। कृते ह्यध्ययने तस्य सप्रयोजनत्वाय अन्यतो ज्ञान न भवेत्, अध्ययनाभावे तु ज्ञानस्य अन्यतः सम्भवाल्लाघवार्थं मध्ययनमेव त्वया त्याज्यमिति भाव। त्वयैव लाघवादन्येनापि वेदान्तानध्ययने वेदान्तस्वरूपमेवोच्छेद्येत्याह अत एवे ति। किञ्च अधीतवेदान्तानां अन्यतो ज्ञानाभावोऽध्ययनप्रतिबद्धत्वाद्वा उपायान्तरस्य ताप्रति निषिद्धत्वेन तत्राप्रवृत्तेर्वा नाद्य इत्याह नचाधीते ति। द्वितीये नार्षा ति। नचे ति। यदि ज्ञानार्थमुपायान्तरप्रवृत्तिर्दुरितहेतुः यदि च तज्जन्य ज्ञान दुरितहेतु, उभयथापि विधभ्रम-

अन्यूनानतिरिक्तविषयत्वे कस्यचिद्बाधकत्वं कस्यचिन्नेति नियामकाभावात् । नचादृष्टद्वारा वैषम्यम्, भवद्भिस्तथानभ्युपगमात् । न च बाधे तत्त्वज्ञानातिरिक्तमपेक्ष्यते, नापि बाधातिरिक्ता निवृत्तिरिष्यते, यत्रादृष्टादिसापेक्षता स्यात् । अत एव हि ध्याननियोगवादिनोपि भवद्भिर्दूरीकृताः । न च प्रत्यक्षानुमानपुवाक्याना बाधकत्वमेव नास्ति, रज्जुसर्पादिभ्रमानुच्छेदप्रसङ्गात् । न च तानि ब्राह्मणादेरेव रज्जुसर्पादिभ्रमबाधकानि न पुनः शूद्रादेरिति नियम पश्यामः । न च विश्वबाधकैस्तदन्यबाधकैरपि न दृश्यत इति वाच्यम्, वैदिकवाक्येष्वपि तथा प्रदर्शितत्वात् । भवत्वेवं तत्त्वज्ञानतत्फलयोः सम्भवाच्छूद्रादीनामपि ब्रह्मावद्याधिकारः, तस्य मिथ्यात्वमात्रेण त्वनधिकारवाचोयुक्तिरिति चेत्, हन्तैवं त्रैवर्णिकानामप्यसौ मिथ्येति किं विशिष्याभिधीयत इति । तदेतत्सर्वं तत्रैवाधिकरणे प्रपञ्चितम् । शास्त्रोपक्रमेपि सन्मात्रस्य ब्रह्मणः प्रमाणान्तरगोचरत्वे तद्विषयस्यागमस्यानुवादत्वं प्रसज्जयता सूचितम् ।

इति शतदूषण्यामपशूद्राधिकरणविरोधो नाम

॥ द्विषष्टितमो वादः ॥

निवर्तकज्ञानेन प्रत्यवायस्यापि निवृत्तिर्भवतीति " यदाविश्वभ्रमोन्मूलन " मित्यादिवाक्ये उक्तमित्यर्थः। यथा भवता शूद्राद्यनुष्ठितोपासन त्रैवर्णिकोपासनान्यूनानतिरिक्तविषयमपि न बन्धनिवर्तक तथास्माकमपीत्यत्राह नचादृष्टे ति । अदृष्टापेक्षा न सम्भवति चेत्याह नचे ति । शुक्त्यादिज्ञानस्यानपेक्षस्यैव रजतादिनिवर्तकत्वादिति भावः । यदि तु बाधातिरिक्ता निवृत्तिरिष्यते, तदा मन्त्रादेरदृष्टसापेक्षत्ववत् अत्रापि सापेक्षत्व स्यादपि, न चैवम्, बाधस्यैव निवृत्तित्वादित्याह नापी ति । अस्तु वा क्वचिददृष्टद्वारत्वम्, तदपि वैदिकज्ञानस्यैव, नत्वन्यस्यापि प्रत्यक्षादेः, प्रत्यक्षादिकं च न भ्रमनिवर्तकम्, अन्यथाऽनुभवविरोधात्, तच्च शूद्रस्यापि निवर्तक, नियामकाभावात्, अतो निर्विशेषानुमानादिना शूद्रस्यापि अविद्यानिवृत्तिः स्यात्, न च निर्विशेषानुमानादिः शूद्रस्य न विश्वबाधक, अनन्तरमपि भ्रमोपलम्भादिति वाच्यम्,—त्रैवर्णिकस्य वैदिकज्ञानेपि तुल्यत्वादित्याह नचे त्यादिना । शास्त्रोपक्रमेपी ति । प्रथमसूत्रे प्रत्यक्षस्य सन्मात्रग्राहित्वेन

वेदान्तानामनुवादत्व प्रसञ्जयता भगवता पूर्व समानविषयज्ञानान्तरस्य सत्वात्तस्य च शूद्रादावप्यविशेषात्, शूद्रस्यापि ब्रह्मविद्याधिकारादपशूद्रनयविरोध· सूचित इत्यर्थः ।

इति श्रीवाधूलकुलतिलकश्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्येन तदेकदैवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्ध महाचार्यपरनामधेयेन रामानुजदासेन विरचितायां शतदूषणीव्याख्यायां चण्डमारुताख्यायां अपशूद्राधिकरणविरोधो नाम द्विषष्टितम· स्कन्ध· ॥६२॥



॥ श्रीरस्तु ॥

॥ त्रिषष्टितमो वाद. ॥

कर्मज्ञानादिनिष्ठासु कर्तृत्वं योगिना यतः ।
स सर्वकर्ता स्वमत नित्य कारयितास्तु नः ॥

अपशूद्राधिकरणप्रसङ्गादुत्पन्नतत्वज्ञानस्य कर्मयोगानधिकारो भगवद्गीतादीन् व्याचक्षाणैः परैर्जल्पित प्रतिक्षिप्यते । तत्र तावत् सम्यग्दर्शनेन निरस्तमिथ्याज्ञानस्य प्रव्रज्या प्रविष्टस्यापि साङ्ख्यसज्ञस्य त्वदुक्ताधिकारिणः " शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिष " मित्यादिभि. लौकिकवैदिकसमस्तकर्मन्यासो नास्तीति त्वदुक्तवाक्यैरपि सुव्यक्तम् । अथापि ब्रूम·—उत्पन्नतत्वज्ञानस्य कर्मयोगेऽनधिकारः किं तस्य कर्मयोगवेदनाभावात्? तत्सम्भवेऽपि वा तस्य निष्फलत्वात्? उत तत्सफलत्वेऽपि तत्फलनैरपेक्ष्यात्? तत्सापेक्षत्वेऽपि वा अन्यतः तत्सिद्धेः? अन्यस्माद्वा कुतश्चि'दिति । न प्रथम., दीर्घकालनैरन्तर्यादरसेवितकर्मयोगलब्धज्ञानस्य प्रबलसञ्चितपातात्ययभावे झडिति तत्प्रमोषासम्भवात् , तीव्रतरात्मानुभवसुखसन्दोहेन स्यादिति चेन्न,— निषिद्ध परिहारसंस्कारस्याप्युच्छेदप्रसङ्गेन त्वदुक्तधर्माधर्मत्यागसमुच्चयविरोध—

कर्मज्ञाना दीति । अत्र स्वमतं नित्य कारयितास्तु न इत्यनेन—

" ये मे मतमिद नित्यमनुतिष्ठन्ति मानवाः ।
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते सर्वकिल्बिषैः ॥ "

इति गीतावचन स्मारितम् । न इत्यनेन ज्ञानिनामुपलक्षणात् ज्ञानिनामधिकारसूचनाद्वादार्थसग्रह. । अनेन च—

" येत्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् ।
सर्वज्ञानविमूढास्तान्विद्धि नष्टानचेतसः ॥ "

इति तदनन्तरभगवद्वचननिर्दिष्टत्व कर्मत्यागिना सूचितम् । दीर्घकालनैरन्तर्यादरसेवितत्व कर्मयोगस्य विशेषणम्। धर्मे ति । धर्माधर्मयोस्त्यागाविति विग्रहः।

प्रसङ्गात्। आगमिकसंस्कारप्रध्वसेपि स्वात्मानुभवानन्दमग्नतया निषिद्धेषु न कटाक्षोपि विक्षिप्यत इति चेत्, हन्तैवं तर्हि शारीरकर्मस्वपि न विक्षिप्येत, नचैवमिच्छसि। यस्तु तथाविधात्मानुभवेन शारीरस्यापि कर्मण. प्रस्मरति न तस्य वयमपि सुषुप्तस्येव तदानीं कर्मानुष्ठानं ब्रूमः। नचासौ यावच्छरीर तथावतिष्ठत इति दृष्ट श्रुतमिष्टं वा। न द्वितीयः, दृष्टादृष्टविकल्पानुपपत्तेः; नह्यन्धपङ्ग्वादिवत् दृष्टसामग्र्यां किञ्चिदस्यो पघातं पश्यामः। न च तस्या सत्यामदृष्टवैकल्यादशक्तिः शङ्क्या; दृष्टसामग्र्युपनयनार्थत्वात्सामान्यतोऽदृष्टस्य अन्यथा सैव निष्फला स्यात्। सम्यक् प्रयुक्ता च सा तत्फलं नोत्पादयेत्। इष्ट एवायं क्वचिदर्थः—"सुरक्षित दैवहतं विनश्यती" त्यादिस्मरणादिति चेन्न; तत्रापि यत्किञ्चिद्वैकल्यमुत्पाद्यैव तथात्वस्थितेः, अन्यथातिप्रसङ्गात्। ननु कर्तृत्वाभिमानमन्तरेण कर्मणि नाधिकार·, स चास्य निःशेषविनष्ट इति कथं सामर्थ्यमिति चेन्न;—शारीरकर्मप्रतिबन्धैव दत्तोत्तरत्वात्। तत्रापि नासौ कर्ता निष्क्रियत्वादात्मस्वरूपस्येति चेत्; तर्हि कः कर्ता? प्रकृतिरेवेति चेत्; कः सख्यावस्थस्य विशेषः? अभिमाननिरोध इति चेदेव कर्मयोगेपि किन्न स्यात्? तथैव हि फलसङ्गकर्तृत्वादित्यागेन तदनुष्ठानमनुशिष्यते। यत्र चायमधिकरोति ज्ञानयोगे स किं रूप. ? किं निष्क्रियात्मस्वरूपमात्रावस्थानलक्षणः? उत तस्मिन्नस्य सम्यग्दर्शन रूपवृत्तिज्ञानेनावस्थान? मिति। पूर्वत्र ज्ञानयोगस्य सदातनत्वप्रसङ्गः।

कर्मण इति। "अधीगर्थे" ति षष्ठी। अन्यथे ति। दृढदण्डनुन्नचक्रस्य कदा चिद्भ्रमप्रसङ्गादित्यर्थ.। तथैव ही ति। 'सङ्गन्त्यक्त्वे' त्यादिना। प्रतिबन्दी वक्तुं विकल्पयति यत्र चे ति। नंतु कर्तृत्वाभिमानः कर्मण्यधिकारो न तु ज्ञानयोगे, अत आह

उत्तरत्र ज्ञानयोगेप्यनधिकार', द्रष्टृत्वस्यापि कर्तृत्वविशेषत्वात् । दृशि क्रियाकर्तृत्वमेव द्रष्टृत्वमिति ज्ञातुरनात्मत्वं प्रतिपादयता त्वयापीष्यते । द्रष्टृत्वमप्यन्तःकरणधर्मत्वेन मिथ्यात्वेनैवानुसन्धीयमानमात्मविदं न लिपतीति चेत्; यज्ञादिकर्तृत्वेपि तथात्वे किं वैषम्यम्[1] बाह्याभ्यन्तरत्वाभ्यां वैषम्यमिति चेन्न;—वैषम्यमात्रस्याप्रयोजकत्वात्, यागादेरपि च द्रव्यत्यागात्मकबुद्धिवृत्तिविशेषत्वात्, शरीरक्रियादिरूपेष्वपि कर्मसु प्रयत्नस्यैवान्तरस्य पुरुषव्यापारत्वात्तत्रैव तत्पर्यन्ते स्वव्यापारे तस्य नियोगात्। ननु न ज्ञानयोगः स्वेच्छयानुष्ठीयते, अपितूच्छ्वासनिश्वासनिमेषोन्मेषादि वत्साल्यस्यासौ स्वरसवाहीति चेन्न;—युष्मद्गुरुवंशस्य सर्वकर्मपरित्याग रूपज्ञानस्य विधेयत्ववाचोयुक्तेरनर्थकत्वप्रसङ्गात्, शास्त्रजन्यज्ञानमात्रस्या

द्रष्टृत्वस्ये ति । ज्ञातुरि ति । ज्ञातु. ज्ञानक्रियाकर्तृत्वेन सविकारत्वाद्धि निर्विकारादात्मनोन्यत्वमहमर्थस्योच्यत इत्यर्थः ।

ननु कर्तृत्वाभिमानो न साख्यस्य निश्शेषविनष्ट', अतो ज्ञानयोगकर्तृत्वोपपत्ति'; न च तदभिमानवत्वे लेपप्रसङ्ग., अन्त.करणधर्मत्वेन मिथ्यात्वेन च तत्त्वतो ज्ञातस्य तस्य लेपायोगात्, तत्त्वज्ञाने सत्यप्यभिमानस्तु वासनाया. प्राबल्याद्विदुषामपि देहात्मभ्रमाभासवदिति शङ्कते द्रष्टृत्वमपी ति । कर्मणामपि न बाह्यत्वनियम इत्याह यागादे रिति । येषु च बाह्यत्व होमस्नानादिषु, तेष्वपि आन्तरप्रयत्नात्मकपुरुषव्यापारे कर्तृत्वम्, तत्रैव पुरुषस्य नियोगात्, तत्र च बाह्यक्रियोपपर्यन्ते नियोगात् बाह्यक्रियापि सिद्धयतीत्याह शरीरे ति । नान्वि ति । तथा च नाधिकाराभावप्रयुक्ता ज्ञानयोगानुपपत्तिः, कर्म तु न स्वरसवाहीति तत्र तत्प्रयुक्तानुपपत्ति., बुद्धिपूर्वमिच्छयानुष्ठेयत्वादित्यर्थः। गुरुवंशस्ये ति । स्वरस वाहित्वे विधेयता न स्यादित्याशयः ।

ननु शास्त्रजन्यज्ञानमेव विधेय न ज्ञानयोग इत्यत्राह शास्त्रे ति । सन्न्यासलक्षणज्ञानस्य तु विधियोग्यत्वाविधेयता । ज्ञानयोगस्य स्वरसवाहिता न

विधेयत्वात्, तथाचाभ्युपगमात्, तन्मूले तु सर्वकर्मसन्यासलक्षणे ज्ञानयोगे कर्तव्ये विधेरवकाशात्। स्वरसवाहिस्वात्मदर्शनरूपमहाजागरस्य सुषुप्तावपि नाधिकारः, प्रबुद्धस्यापि न बहिर्मुखी दृष्टिरिति शारीरकर्मस्वपि नावकाशः। तथापि निष्क्रियमात्मानमात्मत्वेनाभिमन्यमानस्य कर्तृत्वाभिमानपुरस्सरक्रियात्मस्वरूपावस्थानरूपकर्मयोगे कथमधिकारः? कथञ्च विदितकर्ममिथ्यात्वस्तत्र प्रवर्तते? इति चेन्न;—उक्तोत्तरत्वात्। ज्ञानयोगो हि क्रियाविशेष एवेति दर्शितम्। न च तस्य मिथ्यात्वमविदितम्। सोपि स्वरूपभूतसंवित्तिमात्रादन्य.। तस्य च मिथ्यात्व संवित्स्वरूपादन्यन्मिथ्यैवेति समतप्रयोजकश्रवणवेलायामेव सिद्धम्। नचात्यन्तनिष्क्रियत्वमात्मनो वयमिच्छामः, आत्मन एव कर्तृत्वस्य "कर्ता शास्त्रार्थवत्वा" दित्यादिभि स्थापनात्, उत्पत्तिनाशादि लक्षणक्रियानिवृत्तेश्च सम्यज्ज्ञानशरीरप्रेरणादिक्रियावत्वेन सह विरोधाभावात्, भावेपि वा ज्ञानयोगेपि समत्वात्। भ्रान्तिलेशमुपजीव्यैव ज्ञानयोगेपि प्रवृत्तिरिष्यत इति चेत्, तथान्यत्रापि किं नेष्यते? ननु भवत्येवमधिकारे युक्तिसाम्यम्, तथापि शास्त्रेण पर्युदस्तत्वान्न साख्य. कर्मयोगेधिकरोतीति चेत्; स्ववर्णाश्रमोचितेषु कर्मसु शास्त्रेण पर्युदासा

युक्तेत्याशयेनाह तन्मूल इति। ननु कर्मसन्यासलक्षणज्ञानस्य विधेयत्वेपि स न ज्ञानयोगः, किं त्वात्मदर्शनप्रवाह, तथा च न गुरुवश्यवाचोयुक्तिविरोध इत्यत्राह स्वरसे ति। स्वरसवाहिपदस्य बहुव्रीहि.। आत्मदर्शनस्य स्वरसवाहित्वे सुषुप्तिरपि न स्यादित्यर्थः। तत्सम्भवेपि प्रबोधे विषयान्तरसञ्चारो न स्यादित्याह प्रबुद्धस्ये ति। शङ्कते तथापी ति। निष्क्रियत्वेन ज्ञाते आत्मनि साक्रियत्वकल्पनमयुक्तमित्यर्थः। किं सर्वक्रियाराहित्यमुच्यते? उत्पत्तिनाशवृद्धिक्षयादिराहित्य वेति विकल्पाभिप्रायेणाह नचात्यन्तेत्या दिना।

ननु साक्रियत्वभ्रान्तिमत एव ज्ञानयोग इत्याशङ्कते भ्रान्ती ति।

भावात्, प्रत्युत तत्सग्रहणस्योक्तत्वात् । अत एव प्रव्रजितस्यापि यज्ञादिनिरपेक्षेषु प्राणायामादिकर्मयोगेष्वधिकारः सम्भवति, आदिश्यते च, अन्यथा " कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसग्रह " मित्युक्तलोकं सग्रहार्थकर्मण्यपि प्रवृत्तिर्निषिद्धानुष्ठान स्यात्, अतो न कथञ्चिज्ज्ञान योगे शक्तस्य कर्मयोगे सामर्थ्यासम्भवः । न च तृतीय, परित्यक्तस्व र्गादिफलस्यापि पापक्षयादिफलसद्भावात् नित्यकाम्यज्योतिष्टोमादिवदेक स्यैव विनियोगपृथक्त्वेन फलभेदोपपत्ते. । अन्यथा मुमुक्षुविषयकर्म— योगस्यैव अननुष्ठानप्रसङ्गात् । नापि चतुर्थ, कल्मषनिवृत्तेः सर्वदापेक्षि तत्वात् । कर्मयोगफलभूतस्थिरप्रज्ञतासिद्धौ कर्मयोगादभ्युत्थान त्वया-पीष्यत इति चेत्, सत्यम्, तथापि तत्र अनधिकार न ब्रूमः । अत एव हि ज्ञानयोगयोग्यस्यापि अनुविधेयानुष्ठानस्य शिष्टतया व्यपदे-श्यस्य सुकरनिष्प्रमादोपायशक्तस्य च कर्मानष्ठैव श्रेयस्त्वेनानुशिष्यते । न च कर्मयोगाभ्युत्थितस्यापि ज्ञानयोगिन स्ववर्णाश्रमकर्मनिवृत्ति ब्रूम । वर्णाश्रमधर्मा हि सर्वासु निष्ठासु इतिकर्तव्यतात्वेनावतिष्ठन्ते, न तु स्वयमेव कर्मयोगादिरूपा. । अत एव हि भक्तियोगावस्थस्यापि तदनु वृत्ति. । न च पूर्वकृतै कर्मभिर्मृदितकषायस्य किमिदानीन्तनैरिति वाच्यम् ; अमुक्तस्यात्यन्तमृदितकषायत्वाभावात् । आत्मदर्शनसिद्धौ किं तदर्थेनेति चेन्न;—अनिश्चितासद्भावपूर्वोत्तरज्ञानावरणहेतुविनिवार णाय तदुपादानोपपत्ते । न ह्यसम्भवदावरणं साख्यस्य ज्ञानम् ; तथा सति तम प्रयुक्तसुप्त्वापाद्यसम्भवप्रसङ्गात् । न च नास्ति सुप्त्वाप, " युक्तस्वप्नावबोधस्ये " ति वचनात् । अत आत्मज्ञाने सिद्धेपि उत्तरोपचयसिद्ध्यर्थमपचयपरिहारार्थं वा ज्ञाननिष्ठैरपि स्ववर्णाश्रमोचित

कर्मोपसहर्तव्यम्। न च पञ्चमः, इति कर्तव्यताभूतनित्यनैमित्तिकांशेषु तावदकरणनिमित्तप्रत्यवायपरिहारादेः करणमन्तरेणान्यतोसम्भवात्। पवित्रतमं ज्ञानमेव तमपि प्रत्यवाय निरुन्ध्यादिति चेन्, इदमपि "नाविरतो दुश्चरिता" दित्यादिभि. प्रागेव दूषितम्। "यत्साख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते" इत्यादिभिः ज्ञानयोगशक्तस्यापि तदेकफलत्वेन विकल्पिते कर्मयोगेपि सुकरोपायसङ्गादिवशादधिकारोपपत्तेश्च। षष्ठे तु चार्वाकादिसम्मतविस्रम्भान् शिष्यानेकान्ते शिक्षयत। तदेतदपि वर्णाश्रमधर्माणा यावज्जीवानुष्ठेयत्वप्रतिपादकेन भाष्येण व्यञ्जितम्।

आशरीर प्रवृत्तत्वात्स्वभावप्राप्तकर्मणाम्।
किमर्थं क्रियते द्वेष शास्त्रप्राप्तेषु कर्मसु॥ इति।

इति शतदूषण्या अधिकारिविवेको नाम

॥ त्रिषष्टितमो वादः ॥


नित्ये ति। एकस्यैव ज्योतिष्टोमस्य 'ज्योतिष्टोमेन स्वर्गकामो यजेत' 'वसन्ते ज्योतिषा यजेते' ति विनियोगभेदाद्यथा नित्यकाम्योभयात्मकस्य स्वर्गप्रत्यवाय परिहाररूपफलभेदस्तथेत्यर्थः। अन्यथा—पापक्षयादिफलाभावे। पवित्रतम मिति। 'न हि ज्ञानेन सदृश पवित्र' मिति वचनकटाक्षेणोक्तम्।

इति श्रीवाधूलकुलतिलकश्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्येन तदेकदैवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्ध महाचार्यापरनामधेयेन रामानुजदासेन विरचिताया शतदूषणीव्याख्याया चण्डमारुताख्याया अधिकारिविवेको नाम

त्रिषष्टितम स्कन्ध ॥६३॥

॥ श्रीरस्तु ॥

॥ चतुःषष्टितमो वादः ॥



श्रितान् परमहसतां परमह स इत्युक्तितः
त्रयीपथमसौगतान् कपटसौगतान् खण्डयन् ।
मुनिर्जयति लक्ष्मणो मुदमुदञ्चयन्नञ्चतां
मुकुन्दगुणमौक्तिकप्रकरशुक्तिभिः सूक्तिभिः ॥

ये पुनः शङ्करादयोऽर्वाचीनपरमहसास्ते बाह्यवेषपरिग्रहमधिकृत्य पृच्छ्यन्ते—किमिति परमहसै. ब्रह्मसूत्रमुत्सृज्यते ?

(१) किं तेषु तत्प्रापकाभावात् ?

(२) उत सामान्यत प्राप्तस्यापि विशेषतो बाधात् ?

(३) यद्वा वैकल्पिकतया परित्यागेपि प्रत्यवायविरहात् ?

(४) उताङ्गिनिवृत्तेरेवार्थात्तदङ्गस्यापि निवृत्ते. ?

(५) अथवा पूर्वानुष्ठानमात्रात् ? इति ।

(१) न प्रथम.—श्रुतिस्मृतिभि. सामान्यतो विशेषतश्च तत्प्राप्तेः । द्विजसामान्यतः प्राप्तिस्तावत्सहजा निर्विवादैव, परिव्राजकसामान्यतः प्राप्तिस्तावदभिधीयते ।

यथाह—वसिष्ठ.— " यज्ञोपवीत्युदककमण्डलुहस्तः " इति ।

उक्तित इति । उक्तित एव पारमहस्यन्न त्वर्थत इति भावः । अनेन बादार्थसूचन कृतम् । अञ्चतां—उपसेवमानानाम्, मुदमुदञ्चयन् उद्गमयन्नित्यर्थः । अधिकृत्य—विषयीकृत्य । तान्प्रति तदीयबाह्यवेषपरिग्रहविषयः प्रश्नः क्रियते । विशेषत इति । परमहसस्वरूपविशेषे बाधादित्यर्थ । सामान्यतो विशेषतश्चे ति । द्विजसामान्ये तद्विशेषपरिव्राजके चेत्यर्थ. ।

अङ्गिराः—" यतीनां त्रीणि शुक्लानि भवन्त्येतानि नित्यश' ।
यज्ञोपवीत दन्ताश्च तथा जन्तुनिवारणम् ॥ " इति ।

शौनक.—' अथ युवा सुवासा इति काषायवास., सखा मे गोपायेति त्रिदण्ड गृह्णाति, तच्छंयोरावृणीमह इति यज्ञोपवीत' मिति ।

दत्तात्रेयः—' मोक्षाश्रमे स्मृत वस्त्र रक्त यद्धातुरञ्जितम् ।
कार्यं यज्ञोपवीतन्तु सित नवगुणान्वितम् ॥ ' इति ।

सामान्यतश्च यज्ञोपवीतत्याग निषेधन्ति । यथाह—मेधातिथिः—

' गृहीतं यत् त्रिदण्डादेरविनष्टन्तु न त्यजेत् ।
समुद्रं गच्छ स्वाहेति विनष्ट प्रक्षिपेज्जले ॥
प्रक्षिप्य चान्यदादद्याद्वायत्र्या प्रणवेन वा ।
तच्छयोरित्युपवीतमब्लिङ्गाभि. कमण्डलुम् ॥ ' इति ।

अङ्गिराश्च—' यतेर्लिङ्ग प्रवक्ष्यामि येनासौ लक्ष्यते यतिः ।
ब्रह्मसूत्र त्रिदण्डञ्च वस्त्रं जन्तुनिवारणम् ॥
शिक्यं पात्र ब्रसी चैव कौपीन कटिवेष्टनम् ।
यस्यैतद्विद्यते लिङ्गं स यतिर्नेतरो यतिः ॥ ' इति ।

उतवीतपरित्यागे प्रत्यवायं स्मरन्ति च । यथाह—अत्रिः—

'ब्रह्मसूत्रं त्रिदैवत्य ब्रह्मविष्णुशिवात्मकम् ।
परित्यजन्ति विप्रा ये मोहात्तर्कोपजीविन ॥
स्वर्गापवर्गमार्गाभ्या प्रच्युतास्ते न संशयः । ' इति ।

मोक्षाश्रमे वस्त्र रक्त स्मृतम् , कौसुम्भादिव्यावृत्त्यर्थ ' यद्धातुरञ्जित ' मित्युक्तम् । निषेधन्ती ति । त्यागनिषेधादपि धारण सिद्धमिति भावः । त्रिदण्डादे रित्यादिशब्देन यज्ञोपवीत गृह्यते । तत्सूचनायैव ' समुद्र गच्छ—स्वाहे ' त्यादुत्तरवचनोपादानम्, तत्र च विनष्टोपवीतपुनर्धारणस्योक्तत्वात्, अविनष्टत्यागनिषेधवचनस्य यज्ञोपवीतविषयत्वमवगम्यत । प्रत्यवाय मिति । अतोपि

यद्यप्यत्र विप्रशब्द सामान्यवचन', तथापि पारिव्रज्यमेवाधिकृत्य प्रवृत्तत्वात् विशेषार्थ एव । सामान्यतो निर्देशस्तु सर्वेषा प्रत्यवाय-साम्यात् । तथाहि—उशनास्तत्परित्यागे सर्वेषामाश्रमिणा पतनमेवाह—

" ब्रह्मसूत्रपरित्यागाद्ब्रह्मचारी गृही वनी ।
परिव्राट् चापि पतति तस्मात्तत्न परित्यजेत् ॥ " इति ।

तत्परित्यागे बहूनि प्रायश्चित्तानि सस्मरुः । यथा—अत्रिरेव—

'त्यक्त्वा यज्ञोपवीतन्तु षट्कृच्छ्राणि समाचरेत् ॥' इति ।

वृद्धजाबालिश्च-' हीनो यज्ञोपवीतेन यदि स्याद्ध्यानभिक्षुकः ।
तस्य क्रिया निष्फला' स्यु' प्रायश्चित्त विधीयते ॥
गायत्रीसहितानेव प्राजापत्यान् षडाचरेत् ।
पुनस्सस्कारमाहृत्य धार्य यज्ञोपवीतकम् ॥' इति ।

हारीत.—' विना यज्ञोपवीतेन यत्कृत भोजनादिकम् ।
तत्पापप्रशमायाल प्रायश्चित्त ब्रवीमि व. ॥
तेषा तु भोजनादीनां प्रत्यह सुसमाधिभि' ।
सहस्राद्धैरसुयमैर्विधिपूर्वकृतैः शुचि. ॥ ' इति ।

असमीक्षितदशापरित्यक्तब्रह्मसूत्रैश्च यादवप्रकाशैः समीक्ष्य सज्ञातानुशयै. सप्रमाणमनुयुक्ता. वासुदेवायात्रोत्सवसमागता. नानादि-गन्तवास्तव्या. शिष्टाश्च प्रायश्चित्तमेव उत्तरं ददु ।

तद्धारण सिद्धमिति भावः। तर्के ति । अङ्गिकर्मनिवृत्तेरर्थात्तदङ्गयज्ञोपवीतनिवृत्ति रित्याद्यद्वैत्यभिमततर्को विवक्षित । प्रायश्चित्तानी ति । ततोपि धारण सिद्धमि-त्यर्थः । ध्यानभिक्षुक.—परिव्राट् ।

अष्टः तर्ह्यसाविति चेन्न;—प्रायश्चित्तात्पूर्वमेव तथात्वस्य प्राचीनै र्निश्चितत्वात्। तत्समुचितस्यैव यतिधर्मस्याद्यापि मानवादिवत् अविगीतशिष्टपरिग्रहात्।

(२) एवं परिव्राजकानां सामान्यतः प्राप्तं ब्रह्मसूत्रम्। परमहंसेष्वेव विशेषतोपि प्राप्तिर्दृश्यते।

तथाहि—शाट्यायनकोपनिषदि समाम्नायते—

" अथ ह यद्ब्रह्म परमं सनातन ये श्रोत्रिया अकामहता अधीयु.।
शान्तो दान्त उपरतस्तितिक्षुर्योनूचानो ह्याभिजिज्ञास्यमानः।
त्यक्तेषणो ह्यनृणस्तद्विदित्वा मौनी वसन्नाश्रमे यत्र तत्र।
अथाश्रमं चरम सम्प्रविश्य स च द्वितीयममृतं सम्प्रयाति।
अखिल विश्वं ब्रह्मभावनया निचाय्य चरेत्पृथिव्या विष्णुलिङ्गी निगूढः।
परमहंसमाश्रमं सम्प्रविश्य यथोपपत्ति पञ्चमात्रा दधानः।

तदत्र श्लोकौ भवतः—

त्रिदण्डमुपवीतञ्च वासः कौपीनवेष्टनम्।
शिक्यं कवचमित्येतद्बिभृयाद्यावदायुषम्॥
त्रिदण्डं वैष्णवं लिङ्गं विप्राणा मुक्तिसाधनम्।
निर्वाणं सर्वधर्माणामिति वेदानुशासनम्॥ इति।

अथ खलु सौम्य कुटीचको बहूदको हस. परमहस इत्येते चतुर्विधाः परिव्राजका भवन्ति। सर्वे विष्णुलिङ्गिनः सदा स्वात्मानं आत्मना ब्रह्म भावं भावयन्तः सुशीलिनः पुण्यश्लोका भवन्ती " ति।

तदि ति। तत्कृतस्य यतिधर्मसमुच्चयाख्यग्रन्थस्येत्यर्थः। वाससो विशेषणं कोपीने ति। ननु यथा न हिंस्यादिति निषेधो विहिताग्नीषोमीयपश्वालम्भा—

इमामेवोपनिषदमुपबृंहयन् भगवान् पराशरः स्मरति—" तत्र परिव्राजकाश्चतुर्विधा भवन्ति, कुटीचको बहूदको हंसः परमहसश्चेति । तत्र कुटीचका नाम—पुत्रादिभि. कुटीं कारयित्वा कामक्रोधलोभमद-मात्सर्यादीन् परित्यज्य विधिवत्सन्न्यास कृत्वा त्रिदण्डजलपवित्रकाषाय वस्त्रोपवीतधारिणः स्नानशौचाचमनजपस्वाध्यायब्रह्मचर्यज्ञानतत्पराः पुत्रा देरेव भिक्षाकालेऽन्न देहयात्रामात्रमुपयुञ्जानाः तस्यां कुटौ नित्यं वसन्त आत्मान मोक्षयन्ते । बहूदका नाम—त्रिदण्डकमण्डलुजलपवित्रशिक्य यज्ञोपवीतिनो वेदान्तार्थावबोधका. साधुवृत्तेषु ब्राह्मणकुलेषु भैक्षचर्यां चरन्त आत्मान मोक्षयन्ते । हंसा नाम—त्रिदण्डजलपवित्रशिक्ययज्ञो पवीतरक्तकाषायवाससो गोमूत्रगोमयाहारा एकरात्र त्रिरात्र षड्रात्रं मासो पवासपक्षोपवासकृच्छ्रातिकृच्छ्रचान्द्रायणसान्तपनपराकतुलापुरुषादीनि—व्रतानि चरन्तो गोद्विजाढ्येषु पुण्येषु देशेषु वसन्त आत्मान मोक्षयन्ते । परमहसा नाम—त्रिदण्डजलपवित्रशिक्ययज्ञोपवीतिनोऽन्तर्वासबहिर्वास धारिणो ग्रामैकरात्रवासिनो नगरतीर्थजनपदेषु पञ्चरात्र षड्रात्रं क्षारलवण वर्जं भिक्षाकाले शीर्णपर्णपुटं कृत्वा ब्राह्मणकुलादेव भैक्षं गृहीत्वा अष्टौ ग्रासानेव भुञ्जानाः सन्ध्योपासनतत्परा नित्य वृक्षमूले वसन्त आत्मानं मोक्षयन्ते । " इति ।

एवं शाट्यायनकश्रुत्या पराशरस्मृत्या च सुप्रसिद्धमर्थमत्रिप्रभृ-तयोपि वृत्तिभेदभिदुराणा चतुर्णा परिव्राजकाना लिङ्गभेदनिषेधद्वारा सामान्यतो दर्शयन्ति ।

यथा—" चतुर्विधा भिक्षवस्तु स्मृता· सामान्यलिङ्गिनः ॥
तेषा पृथक् पृथक् नाम वृत्तिभेदात्कृतं श्रुतौ ।
कुटीचको बहूदश्च हसश्चैव तृतीयक. ॥
चतुर्थः परमो हसो यो य. पश्चात् स उत्तमः ।
लिङ्गन्तु वैष्णव तेषा त्रिदण्ड सपवित्रकम् ॥ " इति ।

वृत्तिभेदश्च पराशरस्मृत्या प्रागेव दर्शितः। एवं परमहंसानां विशेषत एव प्राप्तेः, तत्परित्यागनिषेधाच्च द्वितीयः पक्षो निरस्तः।

(३) यद्यपि सामान्यमात्रं विशेषबलात्सङ्कोचमाप्नोति, तथापि न विशेषाद्विशेषः पराभवमर्हति, अविशेषाद्विपरिवर्तप्रसङ्गाच्च। दृष्टश्चास्य दुक्तो विशेषः। त्वदभिमतस्त्वद्यापि न दृश्यते। ननु "नखानि निकृत्य यज्ञोपवीतं विसृजे" दिति दृश्यत इति चेन्न,— "नखानि निकृत्य पुराणवस्त्रयज्ञोपवीतकमण्डलून् त्यक्त्वा नवान् प्रगृह्याश्रमं प्रविशे" दिति श्रुत्यैव त्यागग्रहणयो. पुराणनूतनविषयत्वस्य न्याय-निरपेक्षमेव व्यवस्थापनेन विरोधप्रशमनात्सामान्ययज्ञोपवीतस्य पुराणत्व विशेषिते पर्यवसातुमुचितत्वात्, सामान्यनिषेधस्य नूतनविशेषविधिना स्पर्धितुमशक्तेः। 'न हिंस्या' दित्यादिवत्। न च 'विसृजे' दित्यस्य न गृह्णीयादित्यर्थ., येन नूतनग्रहणपरतया विषयव्यवस्था

द्वयावर्तते, तथा त्यागविधिविषयात्तन्निषेधो व्यावर्त्यतामित्यत्राह यद्यपी ति। अत्यन्तबाधस्तावद्वचनस्य न युक्तः, तत्राग्नीषोमीयान्निषेधस्य व्यावृत्तौ सङ्कोचमात्रं नात्यन्तबाध., सामान्यत्वात्, इहपुनरुभयोरेकविषयत्वात्, त्यागनिषेधस्य त्याग विषयाद्व्यावृत्तौ विषयान्तराभावात्, अत्यन्तबाधात्मा पराभाव एव स्यात्, स चायुक्त इत्यर्थ'। त्यागविशेषविधिमभ्युपेत्येदमुक्तम्, वस्तुतः स एव नास्तीत्याह दृष्टश्चे ति। न्यायनिरपेक्ष मिति। अनेन "नखानि निकृत्य यज्ञोपवीत च विसृजे" दित्यत्रापि नखसाहचर्यात् पुरातनयज्ञोपवीतप्रतीतेर्न्यायपरामर्शे पुराण विषयत्वमेव गम्यत इति सूचितम्। एतच्छ्रुतिबलादपि सङ्कोच इत्याह सामान्ये ति। अनेन सामान्यविशेषन्याय उक्तः, उत्सर्गापवादन्यायमाह सामान्ये ति।

ननु "विसृजे" दित्यस्य न गृह्णीयादित्यर्थ, पुराणस्य च गृहीतस्य न ग्रहणनिषेध. शक्य इति नूतनविषयो निषेध, तथाच नूतनविषयत्वात् ग्रहण निषेधयोर्विकल्पः इत्याशक्य निराकरोति न चे ति. अस्तु स एवार्थ इत्यत्राह

दुःस्थिता स्यात् । न च तद्युक्तम्, उपचारप्रसङ्गात् । यद्यपि गृहीता गृहीतविषय विसर्जनं कथञ्चित्पश्यसि, तथापि पूर्वधृतविषयत्वमेव स्वारसिकम् । "नवान्प्रगृह्णे" त्यास्थानादरे च दण्डादेरसग्रहसिद्धिः । अन्यथा पूर्वोदाहृतविशेषश्रुतिविरोधश्च । अत एव " बहिस्सूत्रं त्यजे-दबुधः " इत्येतदपि पुराणब्रह्मसूत्रत्यागविषयं मन्तव्यम् ।

ननु " ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वे " ति ब्रह्मचारि-णोपि पारिव्रज्य विधीयते, न चं तस्य द्वितीय ब्रह्मसूत्रमस्ति, ततश्च

नच तदि ति । उपचारे ति । विसृजतेः प्राग्गृहीतहानमेवार्थ., न त्वनुपादानम्, एवञ्च सामान्यविशेषन्यायादिकमपि हानानुपादानसाधारण्यमभ्युपेत्योक्तमिति भावः । ननु " योगिनः कर्म कुर्वन्ति सङ्ग त्यक्त्वात्मशुद्धय " इत्यादौ कर्तृ-त्वाभिमानसम्पादनपूर्वक तत्यागो विधीयत इत्याशङ्क्याह यद्यपी त्यादिना । यद्यपीत्य नेन हानानुपादानयोः शक्तिद्वयकल्पनागौरवादनुगतप्रवृत्तिनिमित्ता— भावाच्च हानमेवार्थः, अभ्युरगम्य तूष्णत इति सूचयति । ननु 'नखानि निकृत्ये' त्यत्र आश्रमप्रवेशोद्देशेन न पुराणवस्त्रादित्यागस्य नवग्रहणस्य चाङ्गतया विधिः सम्भवति—नखानि निकृत्येत्यनुवाद इति सम्भवति, नवग्रहणेन पुराणत्यागस्यार्थ सिद्धत्वाभावात् , पुराणत्यागविधौ तु नवान् गृह्णत्यनुवादः, काषायवस्त्रादि-धारणस्य वचनान्तरसिद्धत्वेन नवत्वस्य तत्रार्थप्राप्ते·, एवञ्च येषा ग्रहणमन्यतः सिद्ध तेषु नवत्वस्यायमनुवाद इति नानेनोपवीतधारणसिद्धिरित्यत्राह नवानि ति । नवान् प्रगृह्णेत्यस्यानादरे वस्त्रादेरप्यसग्रह. स्यात् । न च पूर्वोदाहृतशाट्यायनश्रुत्या वासस. सिद्धि., तस्या यावदायुष बिभृयादिति विधेयान्तरयोगात् , सिद्धावपि उपवीतवत्तेनैव सिद्धयति, एवञ्च 'नखानि निकृत्ये' ति पुराणत्यागनूतनग्रहण विशिष्टाश्रमविधिरिति भावः । ' नवान् प्रगृह्णे ' त्यस्यानादरे ' त्रिदण्डमुपवीत ' मिति श्रुत्वा ' यावदायुष ' मिति धारणाविधिविधेरप्राप्ते यज्ञोपवीतादिधारणे अस भवाद्विरोध इत्याह अन्यथे ति । शिखाया अपि ब्रह्मसूत्रातिरिक्तायाः त्यागः स्यात्,

कथं तद्विषये "बहि. सूत्रं त्यजे" दिति वचनं योजनीयमिति चेत्; कथ वा छन्दोगब्रह्मचारिणा परिव्रज्यायां "सशिखं वपनं कृत्व" ति शिखावपनं योजयिष्यसि ? सम्भवद्विषय शिखावपनमिति चेत्; तर्हि सम्भवद्विषयोऽयं बहि सूत्रत्यागविधिरपीति किं न पश्यसि ?

किञ्च—प्रमाणान्तरविरोधपरिहारार्थं बहिः सूत्रमित्यर्थान्तरं वर्णयन्ति। बहि.सूत्रमित्यव्ययीभाव·। तेन सूत्राद्बहिर्भूतं समस्तमपि परित्यजेदित्यर्थः। सन्न्यस्यतो ब्रह्मसूत्रातिरिक्तं सर्वमपि परित्याज्यमित्यनेन सन्न्यासानुगुण समस्तनैरपेक्ष्यमुच्यते, तेन न ब्रह्मसूत्रपरित्याग—सिद्धिः। 'सशिखं वपनं कृत्वे' त्यपि 'सविष्टरमन्न भुञ्जीते' त्यादिवत्कर्तव्यसाहित्येनान्वय·। तेन शिखासहित एव शेषवपनं कुर्या दित्यर्थः। न पुनः 'सघृतमन्नं भुञ्जीते' त्यादिवत्, बहुप्रमाणविरोधात्।

ननु "यदक्षरं पर ब्रह्म तत्सूत्रमितिकल्पयेत्। यमिनो ज्ञानशिखिनः शिखायज्ञोपवीतिनः" इत्यादि वचनबलात् सामान्यतः पुराणनूतनसमस्तप्रतिषेध एवाभिप्रेत इति गम्यत इति चेत्, मैवम्—अन्यपरत्वादस्य वाक्यस्य। तथाहि—इदं वाक्य विद्वद्विषयं वा, विविदिषुविषयं वा, परमहसविषय वा ? पूर्वत्र विद्यास्तुत्यर्थता युक्ता। तथा च "कुर्वन्नेवेह कर्माणि जिजीविषेच्छतँ समाः" 'न कर्म लिप्यते नरे' इति वाक्यमधिकृत्य सूत्रित भगवता बादरायणेन 'स्तुतयेनुमतिर्वे' ति। तेन ब्रह्मविदां शिरसि हृदि च यावदायुषं धार्यं शिखायज्ञोपवीत ज्ञानान्वितं अत्यन्तं प्रशस्तमित्यर्थः। द्वितीये तु अवधानविधिपरतैव 'यदक्षर' मित्यादिना व्यक्ता, दृष्टो

अत आह सन्न्यस्यत इति।

पूर्वत्रे ति। नात्र शिखाकार्यं ज्ञानेनैवेत्युच्यते, बहि. कार्यं शरीरेवेतिवत्, किन्तु ब्रह्मविदा ज्ञानान्वितत्वाच्छिखापि प्रशस्ता, कि पुनर्ज्ञानमिति ज्ञान प्रशसार्थमिद वाक्यम्, यथा 'कुर्वन्नेवेह कर्माणि जिजीविषत्' 'न कर्म लिप्यत' इत्यत्र न कर्मविधिः, किन्तु विद्यास्तुत्यर्थमनुमतिरित्यर्थः। द्वितीयेत्वि

पकारे सम्भवत्यदृष्टोपकारकल्पनायोगाच्च । अनयोश्च पक्षयोरस्यार्थस्य नाश्रमविशेषाङ्गत्वसिद्धिरपि । तृतीयस्तु स्यादपि, यद्याश्रमकर्मोक्तिः स्यात्, न च तत्र तत्पश्यामः । सत्यपि आश्रमप्रसङ्गे गृहस्थावस्थागत द्वितीयसूत्रत्यागमुपदिश्य विहितत्यागजातानुशयं प्रति अर्थवाद इति युक्तम्, अर्थवादलिङ्गभूयस्त्वात् । न ह्यत्र विधिरनुश्रूयते, अन्यथा पूर्वोक्तश्रुत्यादिविरोधस्य दुष्परिहारत्वादिति ।

भवतु वैतद्वाक्यमनन्यपरम्, तथापि प्रागुक्तश्रुत्यादिबलाद्विकल्प एव स्यात्, न त्वैकान्ततो निषेधः, अन्यथा कुटीचकादीनामपि एकान्ततः तन्निषेधप्रसङ्गात् । न चैतद्वचनं परमहसमेवाधिकृत्य प्रवृत्तम्, नियामकाभावात् ।

ननु यदि परमहसमेवाधिकृत्य काचिच्छ्रुतिः स्मृतिर्वा ब्रह्मसूत्र परित्यागमेवान्ततो विदधीत तदा पूर्वोक्तश्रुतिस्मृत्यादिक सर्वं यथाकथञ्चित् कुटीचकादित्रयान्तर्भूतव्यक्तिविशेषविषय योजनीयमिति चेत्; अहो महर्षित्व देवाना प्रियस्य, यतस्त्व आप्ततमबहुतरस्मृत्येककण्ठ-प्रत्यक्षश्रुतिविवृद्धार्था कचित् कैश्चिदप्यनधीयमानाः त्वत्पक्षपातिना विकल्पवादिना विज्ञानेश्वरेण अनाघ्राता तत्पक्षं विस्तरेण प्रतिक्षिपद्भिः

त्यादि । यदि ब्रह्मस्वरूपातिरिक्त सूत्र त्यजेदिति सूत्रत्यागविधिपरत्व कल्प्यते, तदा अदृष्टोपकारकार्यत्वप्रसङ्गः, यदि तु ब्रह्मस्वरूपातिरिक्तसूत्रशिखादिषु अत्यन्त प्रसक्तो न भवेत्, ब्रह्मज्ञानसम्पादनेऽवहितो भवेदित्यर्थ स्वीक्रियेत तदा दृष्टोपकार्यार्थपरत्वम्, अत एतदेव युक्तमित्यर्थ । दोषान्तरमाह अनयोरिति । विद्वन्मात्रस्य विविदिषुमात्रस्य च त्यागः प्रसज्येतेत्यर्थ. । लिगभूयस्त्वा दिति। शिखादेः ब्रह्मसामानाधिकरण्यज्ञानसामानाधिकरण्यादिलिङ्गम्। न ह्यत्रेति। ज्ञानशिखा इत्यत्र विधिरेव नास्ति, यदक्षरमित्यत्र तत्सत्वेपि विधेयसमर्पकपदानन्तर्येण तत्समभिव्याहारेण श्रवण नास्तीत्यर्थ· ।

एवमन्यपरत्वादस्यवाक्यस्ये(३०१पु)त्युक्तमुपपादितम्। अनन्यपरत्वमभ्युपेत्याह भवतु वेति । विकल्पवादिने ति । यदि परमहसस्य उपवीतादिबाधिका

भास्कराचार्ययादवप्रकाशमस्करिप्रभृतिभिरुद्वृत्यापरिहृतामन्यादृशीं श्रुतिं द्रष्टुमिच्छसि। यदि च सापि स्यात्, कथ सर्वस्मर्तृणां ब्रह्मसूत्रधारण विधानैककण्ठ्यम्?

यच्च त्यागार्थं व्यासादिवचनमिति कैश्चित्पठ्यते, तदपि तत्तत् कोशेषु न पश्यामः; नचोदाहरन्ति पूर्वे निरूपकाः। न च प्रत्यक्षश्रुति विरोधे वैदिकपरिगृहीतबहुस्मृतिविरोधे चाप्रसिद्धस्मृतिमात्रस्य जीवित-मस्ति। लब्धजीवितत्वेपि आन्यपर्यमलेपकमतभङ्गे प्रपञ्चयिष्यते। अतः तद्वचनकारिषु व्यासादिसमाख्या सङ्केतेन प्रक्षिप्य धर्मसूनुरिव सत्यवादी भव।

एतेन पञ्चरात्रादिमूल' परमहसस्य ब्रह्मसूत्रपरित्याग इति निर-स्तम्, प्रमाणभूतेषु तेषु तथाविधवचनादेरसम्भवात्। सम्भवे चान्य-परत्वस्य गृहीतु युक्तत्वात्। परब्रह्मभूतभगवत्प्रीणनतत्तदर्थविशेषप्रपञ्चने हि पञ्चरात्रस्यैदम्पर्यम्, न सदाचारेषु। तत्र तु औदासीन्यमेव तस्येति न श्रुत्यादिविरोधे तत्र प्रगल्भतेति मध्यस्थदृष्ट्या पश्यामः। न च पञ्चरात्रमूलत्वेन भागवतपरिगृहीते नैरुक्तेपि वेदभागे परिव्राजकप्रकरणे भवदभिमतं यज्ञोपवीतादिप्रहाण दृश्यते। न च शाण्डिल्यः सूत्रयति। न च सात्वतादिषु सुरक्षितकोशासु सहितासु तथाविधवचनप्रसङ्ग.। अतो युष्मत्कूटस्थपक्षपातिना प्रक्षेपस्तथा स्याद्वा नवेति समीचीनदृष्ट्या भावय। अतः परमहसेष्वपि द्विजसामान्यतः परिव्राजकसामान्यतस्तद वान्तरविशेषतश्च प्राप्त ब्रह्मसूत्र न विशेषतो बाधमर्हतीति सिद्धम्। नापि तृतीयः,—विषयव्यवस्थापनयोग्यानां वाक्याना विरोधाभावा

काचित् श्रुतिर्दृश्येत तदा बाध एवाभिधीयेत न विकल्प इति भावः। अत इति। कोशेष्वदर्शनादित्यर्थः। विषयव्यवस्थापने ति। पुराणद्वितीयविषयतया 'नखानि निकृत्य यज्ञोपवीत विसृजेत्' 'वहि सूत्र त्यजेत् बुध' इत्यादीना व्यवस्था

देवाद्दोषदुष्टविकल्पपर्यवसानायोगात् । अन्यपरतया निश्चितानां तु दुर्बलत्वादेव । विरोधे बलसाम्ये च सति हि गत्यन्तराभावाद्विकल्पः स्वीक्रियते । न च गुरुलघुनोः विकल्पः सम्भवति, गुरुविधायकस्य शास्त्रस्याननुष्ठानलक्षणाप्रामाण्यप्रसङ्गात् । न हि लघौ सति गुरौ कश्चिदपि प्रवर्तते । मुख्यामुख्यतया तु विभागः सम्भवेदपि, यद्यनन्यथासिद्धो लघुविधिः सिध्येत् । न च तदस्तीत्युक्तम् । नचामुख्यं भवद्विशेषमङ्गीकरोषि । न च मुख्यकल्पशक्तानामप्रमुख्यकल्पस्वीकारो युक्तः । न च तेषां प्रत्यगात्मप्रावण्येन बाह्येष्वौदासीन्यादमुख्यकल्पपरिग्रह इति युक्तम्, शक्तस्यौदासीन्ये प्रत्यवायात् । न च वः काश्चिदशङ्कित भास्करीयादयः सूक्ष्मनिरूपणेपि पश्यन्ति । यथाहुः—

" कन्थां वहसि दुर्बुद्धे गर्दभेनापि दुर्भराम् ।
शिखायज्ञोपवीताभ्यां कस्ते भारः प्रसज्यते ॥
सन्ध्यावन्दनवेळायां मुक्तोहमिति मन्यते ।
खण्डलड्डुकवेळाया दण्डमादाय धावसि ॥ " इति ।

यत्तु—न्यायविदापि विज्ञानेश्वरेणाप्युक्तम्—" यज्ञोपवीतधारणं वैकल्पिकम्, यज्ञोपवीतं विसृजेदिति श्रुते " रिति ; तदपि विकल्पासम्भवस्योक्तत्वात् स्वपक्षसरक्षणाभिनिवेशकारितमित्यनादरणीयम् ।

सम्भवतीति भावः । अन्यपरतये ति । ' ज्ञानशिखा ' इत्यादीनामित्यर्थः । दुर्बलत्वादेव-विकल्पायोगादित्यनुषङ्गः । न चे ति । लघुरमुख्य इति स्वीकर्तव्यम्, न च भवदभिमतसूत्रादित्यागात्मको विशेषस्तथा स्वीक्रियत इत्यर्थः । न च मुख्ये ति । ' प्रभुत्वे सति मुख्यस्य योनुकल्पेन वर्तते । न सापरायिकं तस्य फलं भवति दुर्मते ' रिति निषेधादित्यर्थः । प्रत्यगात्मप्रावण्यातिशयादन्यत्रानादर इत्यत्रापि तैरेवोत्तरमुक्तमित्याह सन्ध्ये ति ।

नापि चतुर्थ,—ब्रह्मविदामप्यत्यन्तकर्मनिवृत्तेर्दूषितत्वात्; युष्माभिरपि प्रणवजपाचमनादिकर्मणामद्यापि क्रियमाणत्वात्। "तस्माद्यज्ञोपवीत्येवाधीयीते' त्यादेर्दुर्लङ्घ्यत्वात्, अर्थप्राप्तभोजनादिकर्मणां च अयज्ञोपवीतिनानुष्ठाने प्रायश्चित्तविधानात्।

नापि पञ्चमः,—श्रुत्यादिविरुद्धस्याचारमात्रस्यानुपादेयत्वात्। पञ्चशिख दुर्वासः प्रभृतिपरिगृहीतपरिव्राजकस्तोमेषु ब्रह्मसूत्रपरित्यागस्य पुराणेष्वदर्शनात्। परिव्राजकानुकारिधनञ्जयादिषु ब्रह्मसूत्र परित्यागाश्रवणात्। भवदीययूथ्यभास्कराचार्ययादवप्रकाशभगवन्नाथ मुनिपारम्पर्यविघटितत्वाद्भवत्पक्षप्रवेशितविसवादैक्याच्चानुविधेयाचारत्वासम्भवादिति।

अतस्सिद्ध परमहसैरपि यज्ञोपवीतमवश्य धार्यमिति।

एवमुपवीतोक्तन्यायेन परिव्राजकसामान्यतः प्राप्ते, तथा परमहंसमेवाधिकृत्य त्रिदण्डविधानात्, चतुर्णामपि लिङ्गभेदनिषेधाच्च तस्यैकदण्डधारणे नियमोपि निरस्तः।

अथ स्यात्—"न चात ऊर्ध्वं शुक्लमम्बर बिभृयात् एकदण्डी त्रिदण्डी वे" ति बोधायनादिवचनात्त्रिदण्डैकदण्डधारणयोर्विकल्प इति, भवत्वेवम्, तथापि परमहंसस्य एकदण्डधारणमेव। इतरेषा त्रिदण्डधारणमेवेति नास्ति नियमः, अविशेषेण तेषा प्रसक्तेः। भवत्वेवं का नो हानिरिति चेत्? नियमाभिमानहानि। गुरुलघुनोस्तुल्यविकल्पानुपपत्ति चात्र यादवप्रकाशादय. प्राहु। अतो मुख्यामुख्यतयैवाय विकल्पस्स्यात्। तदेतद्भगवान् व्यासः स्पष्टयति- "त्रिदण्डधारणं शस्तम्' इति। बोधायनादिसामान्यवचनविकल्पि

पञ्चशिखे ति। असम्भवादेव न पञ्चम इत्यन्वय.।

तैकदण्डधारणस्य त्रिदण्डालाभरूपापद्विषयता हारीतमेधातिथिभ्यां व्यवस्थापिता ।

" त्रिदण्डं वैणव सौम्यं सत्वचं समपर्वकम् ।
वेष्टित कृष्णगोवालरज्ज्वा तु चतुरङ्गुलम् ॥
नष्टे जलपवित्रे च त्रिदण्डे वा प्रमादत. ।
एकन्तु वैणव दण्ड पालाशं बैल्वमेव वा ॥
गृहीत्वा विचरेत्तावद्यावल्लभ्य त्रिदण्डकम् ।
यत्नेनान्वेषयेन्नित्यमप्रमत्तः समाहितः ॥ " इति हारीतः ।

मेधातिथिस्तु—" यावन्न स्युस्त्रयो दण्डास्तावदेकेन पर्यटेत् । " इति । न चैतत्प्रक्रान्तत्रिदण्डधारणपुरुषविशेषविषयमिति नियन्तुं शक्यम् , 'एकदण्डी त्रिदण्डीवे ' त्यस्याद्यापि तुल्यत्वनिश्चया भावात् । यद्यपि च प्रथमेव कस्यचित्त्रिदण्डालाभादेकदण्डग्रहणं सम्भवति, तथापि न तत्र प्रक्रमगरिनियतिरङ्गीकर्तुं शक्या, अमुख्यत्वात् । " यावन्न स्युस्त्रयो दण्डास्तावदेकेन पर्यटेत् " इत्यस्य चाविशेषेण प्रकमेपि प्रवृत्तेः ।

किञ्च—प्रत्यक्षश्रुतिसिद्धं त्रिदण्डधारणम् , स्मार्तस्तु विकल्प', पूर्वन्तु श्रुतिस्मृतित्युभयसिद्धम्, उत्तरत्र तु स्मृतिरेव । " यद्वै किञ्च मनुरवदत्तद्भेषजम् । " " मन्वर्थविपरीता तु या स्मृतिस्सा न शस्यते " इत्यादि श्रुतिस्मृतिभिरासतमत्वेन परिगृहीतमन्वादि स्मृतिसिद्ध त्रिदण्डधारणम्, विकल्पस्तु यत्किञ्चित्स्मृतिसिद्धः । भूयस्य स्मृतयस्त्रिदण्डधारणे पूर्वोपात्ता उपाधास्यमानाश्च, विकल्पे तु द्वे तिस्र सन्ति नवेति न जानीम. ।

तथा हि दक्षबृहस्पती—

" मेखलाजिनदण्डेन ब्रह्मचारीति लक्ष्यते ।
गृहस्थो यष्टिवेदाद्यैर्नखरोमैर्वनाश्रितः ॥

त्रिदण्डेन यतिश्चेति लक्षणानि पृथक् पृथक्।" इति।

शाण्डिल्यः—"दण्डानि त्रीणि सङ्गृह्य धारयेद्विधिपूर्वकम्।"

अत्रि — लिङ्गन्तु वैष्णव तेषा त्रिदण्ड सपवित्रकम्।
त्रिदण्डेन यतिश्चेति लक्षणं वै श्रुतं स्मृतौ॥"

दत्तात्रेयः— "त्रिदण्डिरूपधृग्विप्रः साक्षान्नारायणः स्मृत।
त्रिदण्डी पूज्यते येन विष्णुस्तेन प्रपूजितः॥
अष्टाक्षरेण मन्त्रेण नित्यं नारायणात्मना।
नमस्यो भक्तिभावेन विष्णुरूपी त्रिदण्डधृक्।
त्रिदण्ड लिङ्गमाश्रित्य जीवन्ति बहवो द्विजाः।
यो हि ब्रह्म न जानाति त्रिदण्डार्हो न स स्मृत॥"

अत्रिदत्तात्रेयौ—"काणादशाक्यपाषण्डैरूयीधर्मो विलोपित।
त्रिदण्डधारिणा पूर्वं विष्णुना रक्षिता त्रयी॥"

हारीतः— "विष्णुरूपं त्रिदण्डाख्य सर्वदा धारयेद्यतिः।
कुर्यात्तूदण्डग्रहण कालक्षेप न कारयेत्॥"

वृद्धदक्ष.— "केशमात्रान् समग्रन्थीन् त्रिदण्डान् वैणवान् यति.' धारयेदिति शेषः। इत्थ परश्शतास्स्मृतयः विस्तरभयान्न लिख्यन्ते। अतो गुरुलघुविकल्पानुपपत्ते. शस्ताशस्तत्वकण्ठोक्ते त्रिदण्डालाभदशाविषयत्वप्रतिष्ठापनात्, त्रिदण्डधारणस्य प्रत्यक्षश्रुतिसिद्धत्वात्, आप्ततमबहुस्मृत्युपबृंहितत्वात्, त्रिदण्डधारणमेव चतुर्णा परिव्राजकानामविशेषेण मुख्यम्; एकदण्डधारणं त्वमुख्यम्; तच्च आपद्दशायां चतुर्णामपि सम्भवति; इति सिद्धम्।

अनेनैव न्यायेन परमहसस्य शिखावर्जनमपि अनुपपन्नम्, चतुर्णामपि लिङ्गभेदनिषेधस्य दर्शितत्वात्, विशेषविधायकासिद्धेः। 'मुण्डः शिखीवे' त्यादिविकल्पस्यापि त्रिदण्डैकदण्डधारणविकल्प

वन्मुख्यामुख्यतयैव निर्वाह्यत्वात् । सम्भवति हि केषाञ्चित् शिरसि व्याध्यादिवशात्केशानुत्पत्ति. । शौनकलिखित—गालवात्रि—प्रभृ. तिभि. शिखाधारणस्यैव स्मरणाच्च । गालवेन तु ' त्रिस्थानलोम वपनं कृत्वा प्राजापत्य कृत्वा प्राणायामशत चरेत् ' इति शिखा-वपने प्रायश्चित्तविधानात् विकल्पवाक्यस्य मुण्डनवाक्यस्य च यथा-कथञ्चिद्योजनीयतया समुच्चयार्थता शिखाव्यतिरिक्तमुण्डनविषयता शिखासम्बन्धमात्रविषयताञ्च यतिलिङ्गसमर्थने परमाचार्या. प्राहु. । शिखावपनमन्तरेण वपनेपि मुण्डशब्दस्तत्रैव दर्शितः । यथाह—लिखित.—

" पौर्णमास्या शिखावर्जं मुण्डयेत शिरो यतिः ।
अलाभे व्याधिपीडाया राजचोराद्युपद्रवे ॥
वापयेत्पौर्णमास्यादि यावत्स्यात् कृष्णपञ्चमी । " इति ।

मेधातिथि — "कक्षोपस्थशिखावर्जं मुण्डयेत शिरो यतिः ।" इति ।

एवमन्यैरपि—

" कक्षोपस्थशिखावर्जमृतुसन्धिषु वापयेत् ।
न त्रैमुण्ड्यमतिक्रामेद्भिक्षुस्संवत्सरे क्वचित् ॥ "

इत्यादिषु शिखाव्यतिरिक्ताशवपनेपि मुण्डशब्दस्य प्रयोगान्मुण्डन वपनशब्दयो पर्यायपदविशेषत्वोपपादनाच्च सामान्यो मुण्डशब्द

समुच्चयार्थतामित्यादि पक्षत्रय विकल्पवाक्यस्येत्यादिभिः त्रिभिः क्रमात् सम्बध्यते। मुण्डाञ्शखी वेति वाशब्दश्चार्थे । अंशभेदेन तयोस्समुच्चय. । शिखे ति । 'सशिख वपन कृत्वा' इत्यत्र कर्तव्ये साहित्येन शिखासम्बन्धस्यान्वय इत्यर्थ. ।

नन्वेव सति ' मुण्डश्शिखी वे ' त्यादिषु मुण्डशब्दानुपपत्तिः, तस्य सर्वकेशाभावविषयत्वात्, ' मुण्डा काषायवासिन ' इत्यादौ जिनभिक्षुषु तथा प्रयोगादित्यत आह शिखावपन मिति । अलाभ इत्यादिश्लोकोपादान यो-

शिखाव्यतिरिक्तविषय इति स्वारसिकम्, विकल्पाङ्गीकारेत्वमुख्यत्वं दर्शितमस्माभिः । वाशब्दश्चार्थ इति वरमाचार्या व्याचख्युः ।

अतः परमहंसैरप्येकमुपवीतमवश्यं धार्यम्, त्रिदण्डशिखे च मुख्यतया परिग्राह्ये, इति सिद्धम् । तदेतत् 'वर्णाश्रमोचिते' त्युचितशब्देन भाष्यकारैरपि सूचितमिति ।

इति शतदूषण्यां यतिलिङ्गभेदभङ्गो नाम

॥ चतुःषष्टितमो वादः ॥



र्णमास्याम्मुण्डयेत, तलाभे आपञ्चमीम्मुण्डयेते' ति वक्तव्ये वापयेदिति प्रयोगोक्त मुण्डनशब्दो वपनशब्दसमानार्थ इति दर्शयितुम् । पर्यायत्व-समानार्थत्वम्, अत्रत्यमुण्डनशब्दो वपनार्थक इत्यर्थ । स्वारसिक मिति । वाशब्दस्य विकल्पस्य रसत्वान्मुण्डशिखीवेत्यादिषु तदङ्गीकारे मुण्डत्वस्यामुख्यत्व दर्शितमित्यर्थ. ।

इति श्रीवाधूलकुलतिलकश्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्येन तदेकदैवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्ध महाचार्यापरनामधेयेन रामानुजदासेन विरचिताया शतदूषणीव्याख्याया चण्डमारुताख्याया यतिलिङ्गभेदभङ्गः चतु षष्टितमः स्कन्धः ॥६४॥



वाधूलश्रीनिवासार्यतनय विनयाधिकम् ।
प्रज्ञानिधि प्रपद्येह श्रीनिवासमहागुरुम् ।
कृष्णः करोतु कल्याण कसकुञ्जरकेसरी ।
कालिन्दी लोलकल्लोलकोलाहल कुतूहली ॥

॥ श्रीरस्तु ॥

॥पञ्चषष्टितमो वाद. ॥



अशेषाश्रमबाह्यानामीश्वराज्ञाभरश्रमात् ।
अल्पकदशाभाजामवलेपोत्र लुप्यते ॥

इह जगति केचिदवधूतसकलवर्णाश्रमधर्माश्चार्वाकसधर्माण आचण्डालमेकराशीभूय विधिनिषेधयन्त्रणामतन्त्रयन्त. पारिभाषिकब्रह्मविदो विश्व माविलयन्ति, तैस्सह [वास] वादरूपसम्भाषणादिकमपि निरयपातनमिति मन्वानास्तद्दर्शनेपि सर्वलोकलोचनमवलोकयन्तो दूरीभवन्ति सन्त. । उक्तं हि महर्षिभि.—

" पुसां जटाभरणमौण्ड्यवता वृथैव
मोघाशिनामखिलशौच बहिष्कृतानाम्[निराकृतानाम्]
तोयप्रदानपितृपिण्डविवर्जितानां
सम्भाषणादपि नरा नरक प्रयान्ति । " इति ।

तत्र यद्यपि तदभिमतशूद्रादि[वि]जातीयब्रह्मविदा त्रैवर्णिकब्रह्मविदा मिव तथाविधपतन न सम्भवति, तथापि तत्त्वमस्यादिवाक्यश्रवणोपदेश धर्मोपप्लवादिभिः तेषामप्यसम्भाप्यता । स्मर्यते हि—

" कपिलाक्षीरपानेन ब्राह्मणीगमनेन च ।
शूद्रे वेदाक्षरेणैव निष्कृतिर्न विधीयते ॥ "

इत्यादि । तथापि धर्मोपप्लवप्रशमनाशया युगमात्रविप्रकृष्टा वदामः । आचार्यवचनादिभिरीदृशमप्यनुमतम्—

" यत्किञ्चिदपि कुर्वाणो विद्वद्गुरुनियोगत. ।
तेषा वचनसामर्थ्यात् प्रायश्चित्तीयते नच । " इति ।

[बहुप्रयत्ने कृतेपि चण्डमारुतस्यालाभाच्छतदूषणीमात्रं मुद्यते ।]

सर्वशिष्टबहिष्कृतेयं युष्मदवस्थितिराश्रमरूपा, अनाश्रमरूपा वा? पूर्वत्र चतुर्भ्योन्या अनन्या वा? न तावदन्या, श्रुतिस्मृतीतिहासपुराणादिषु पञ्चमाश्रमविधानादर्शनात्। "अथाश्रमं चरमं सम्प्रविश्ये" त्यादिरपि पारिव्रज्यविषय. प्रसिद्ध। अन्तिममात्रं हि चरमशब्दार्थ., न पुनः प्रसिद्धव्यतिरिक्त.। षोढशविधाश्रमप्रतिपादनं तर्हि कथमिति चेन्न,—चतुर्णामेव चतुर्धा विभागेन तथा विधानात्। नाप्यनन्या, प्रथम तावदनभ्युपगमात्, श्रुतिकिङ्करत्वप्रसङ्गाच्च। श्रुत्या ज्ञानविधानेन वयमप्याश्रमविशेषनिष्ठा भवामेति चेत्? श्रोत्रियाणा पुरतो मन्द प्रभाषेधा., नह्यकृतप्रायश्चित्तानां भवतामाश्रमप्रवेशमनुमन्यन्ते धार्मिकाः। न च युष्माभिरनेककालानुवृत्तदुर्वचस्वैरोचितप्रायश्चित्त कर्तु शक्यम्। स्वैरूपमेव किञ्चिदाश्रमविशेषनियतमिदमस्माकं महद्व्रतमिति चेन्न,—तथाविधविध्यदर्शनात्। किञ्चास्मिन्महति सर्वलोकस्वरससिद्धे व्रते सति किमर्थमपुरुषार्थैरनन्तैर्नियमैः परिक्लेशयन्त्यागमाः। कश्चायमाश्रमो भवता वाङ्मात्रेणापि स्वीक्रियते? परमहसाभिधानः पारिव्रज्यविशेष इति चेन्न,—परमहसादिविशेषमपि विविच्य प्रतिपादयन्तीषु शाट्यायनकाद्युपनिषत्सु पाराशर्यदत्तात्रेयादिस्मृतिषु भवत्परिगृहीतवेषाचारविपरीतोपदेशात्। अत एव मन्वादिषु त्रिविष्टपपात्रपवित्रकमण्डलुशिखायज्ञोपवीतत्रिदण्डानां सामान्येन विधान न व्यवस्थितविषयमिति वक्तुं शक्यम्। ततश्च परित्यक्तयज्ञोपवीतादिकेष्वेकदण्डिकेष्वप्यद्याप्यायुष्मती विप्रतिपत्तिर्भास्करयादवप्रकाशादिग्रन्थरसायनसेवया निवर्तते। किंपुनर्विशेषतोपि वेदबाह्यसाम्यमङ्गीकुर्वत्सु भवादृशेषु। त्रिदण्डैकदण्डादिष्वपि च मुख्यामुख्यतया विकल्प इत्यपि स्मृतिभिरेव सिद्धमिति प्रागेवोक्तम्।

ननु द्विविधाः परमहंसा, विवृतवेषाचारा गूढवेषाचाराश्चेति, तत्र जाबालिकौषीतकादिश्रुतिषु तन्मूलबोधायनशौनकक्रतुकापिलविश्वामित्रादिस्मृतिषु महाभारते ब्राह्मादिषु च पुराणेषु परमहंसस्य दण्डादिविधानात्

विवृतवेषाचारास्सिद्धा , बाजसनेयतैत्तिरीयकाधर्वणबाष्कलादिश्रुतिषु तन्मूल भगवद्गीतादिस्मृतीतिहासभागवतादिपुराणादिषु च सर्वत्यागमात्रविधानात् गूढवेषाचारास्सिद्धा इति चेन्न,—त्यागोक्त्यादीनां फलसङ्गकर्तृत्वादित्याग विषयत्वस्य वक्ष्यमाणत्वात् ।

ननु मैत्रायणीयब्राह्मणे तन्मूललोकाक्षिगृह्ये च परमहंसस्य दण्डग्रहणाग्रहणयोर्विकल्पो दृश्यते, तथाहि—" परिव्राडेकशाटी परिहितो मुण्डो दरपाऽरण्यनित्यो भिक्षार्थी ग्राम प्रविशेदासाय प्रदक्षिणेनाविचिकित्सं सार्ववर्णिक भैक्षाचरणमभिशस्तपतितवर्जमयज्ञोपवीती शौचनिष्ठः कामभेक वैणवं दण्डमादधीते " ति मैत्रायणीयब्राह्मणम् , अत्र कामशब्दाद्दण्डग्रहणे विकल्पो दर्शित. , लोकाक्षिगृह्ये च " अथातः परमहसपरिव्रज्याविधिं व्याख्यास्याम " इत्युपक्रम्य, " सशिखान् केशान् निकृत्य विसृज्य यज्ञोपवीतमि " त्याद्युक्त्वा, पुनरप्याह " मौनी जातरूपधरः प्राचीमुदीची वा दिश व्रजेत् तिष्ठ भगवन् दण्ड गृहाणेत्यध्वर्युणा दत्त मस्तकप्रमाणं सत्वचमृजु सौम्यमेक वैणवं दण्ड " इन्द्रस्य वज्रोसि " " सखामे गोपाये " ति यदीच्छेदादधीते " ति अत्रापि यद्युपबन्धेनेच्छाश्रवणाद्विकल्पसिद्धिः ; तथा वैखानससूत्रे चतुर्विधचतुराश्रमवर्णनावसरे " परम हंसा नाम वृक्षैकमूले शून्यागारे श्मशाने वा आसीना वा साम्बरा दिगम्बरा वा न तेषा धर्माधर्मौ सत्यानृते शुच्यशुच्यादि द्वैतं सर्वसमास्सर्वात्मानः समलोष्टाश्मकाञ्चनाः सर्ववर्णेषु भैक्षाचरणमि " त्यादि । अत्र " साम्बरा दिगम्बरावे " ति विकल्पो विवृतगूढाचारभेदाभिप्रायेण । परमहसोपनिषदि तु काष्ठदण्डनिन्दनेन परमहंसाना ज्ञानदण्डत्व विधीयते । तस्माद्दण्डधारण न मुख्यम् । तर्हि को मुख्य इति चेत् ? अय मुख्य., " न दण्ड न शिखा न यज्ञोपवीतं नाच्छादन चरति परमहसः ।

" ज्ञानदण्डो धृतो येन एकदण्डी स उच्यते।
काष्ठदण्डो धृतो येन सर्वाशी ज्ञानवर्जितः॥
स याति नरकान् घोरान् महारौरवसञ्ज्ञकान्" इत्यादि।

अत्रैव विष्णुः— " अन्नार्थं लिङ्गमुद्दिष्टं न मोक्षार्थं विधीयते " इति।

मोक्षधर्मे च—

" यतेः सत्यपि लिङ्गेऽस्मिन् ज्ञानमेव हि कारणम्।
निर्मोक्षायेह दुःखस्य लिङ्गग्रामो निरर्थकः॥
काषायधारणं मौण्ड्यं त्रिविष्टब्धं कमण्डलुः।
लिङ्गान्यन्नार्थमेतानि न मोक्षायेति मे मतिः॥ "

अन्यत्र च —

" लिङ्गाभावात्तु कैवल्यमिति ब्रह्मानुशासनम्। "

एवमन्यान्यपि लिङ्गनिन्दापराणि वाक्यानि द्रष्टव्यानि। " अव्यक्तलिङ्गो व्यक्ताचार " इत्यादीन्यपि लिङ्गपरित्यागाभिप्रायाण्येव। तदेवमस्ति परमहंसद्वैविध्यमिति।

तदिदमपेशलम्, गन्धर्वभाषितप्रायैरासत्वेऽप्यनिदम्पूरैः वाक्यैः परमहंसस्य न त्वदिष्टभिदासिद्धिः। इह तावत्त्वत्पक्षपातिविज्ञानेश्वराद्यनुदाहृतत्वात्, त्वत्पक्षप्रतिक्षेपकैर्यादवाचार्यभास्करप्रभृतिभिर्बहुश्रुतैरुपन्यस्य दूषितत्वाभावाच्च सन्दिग्धश्रुतित्वादिषु केषुचिद्वचनेषु अप्रत्ययादेव परिहारः, अन्येषु त्वन्यपरतयेति संग्रहः।

तत्र यदुक्तं मैत्रायणीयब्राह्मणे तन्मूललोकाक्षिगृह्ये च परमहंसस्य दण्डग्रहणाग्रहणयोर्विकल्पो दृश्यत इति। तदसत्, तत्रापि स्मृत्यन्तरादि सम्प्रतिपन्नस्यैकदण्डत्रिदण्डविकल्पस्यैव विवक्षितत्वात्। काममेक वैणव दण्डमाददीत यद्वा त्रिदण्डमिति हि तत्राभिप्रायः। एव 'यदीच्छेदाददीते' त्यत्रापि यद्येक दण्डं गृहीतुमिच्छेत् तदैकं अन्यथा त्रिदण्डमिति। अन्यथा

कथ जातरूपधरस्यैव दण्डग्रहणाग्रहणविकल्पः । विद्वदविद्वद्विषयसन्न्यास-भेदसिद्धावविद्वद्विषयं दण्डग्रहण विद्वद्विषय तदग्रहणमिति चेत् ? किमिद कर्णे स्पृष्ट. कटि चालयसि । जातरूपधरस्य कथ तद्ग्रहणमित्येतदेव ह्यनुयोगास्पदम्, न हि वैणव दण्ड धारयन् कश्चिज्जायते, न च दिगम्बरो विकीर्णमूर्धज एकदण्डधारी कश्चिद्भवतामपीष्टो दृष्टो वा ? दण्डग्रहणकाले काषायमपि गृह्णीयादिति चेत् ? किमत्र प्रमाणम् ? स्मृत्यन्तरादिकमिति चेत् ? तर्हि तदनुसारादस्मत्प्रदर्शितमेवार्थमङ्गीकुरुष्व । अतस्तत्र सन्न्यसन वेलाया प्रागुदग्गमनावसर एव तथा वेष., अनन्तरं तु यथालाभं यथेच्छ वा त्रिदण्डैकदण्डयोरन्यतरस्य काषायादेर्ग्रहणमेवाभिमतमिति भावय ।

यच्चाविद्वद्विषय दण्डग्रहणमिति, तदपि साहसिकप्रलपितम् विद्वां समधिकृत्यैव तद्विधानात् । कथ चातिशयितविद्येन भवता इतिहासपुराणादिपठितकाषायदण्डशिखाधारिणः कपिलपञ्चशिखदुर्वासः प्रभृतयो महर्षयश्शङ्करादयश्च भवत्सिद्धान्तप्रतिष्ठापका भगवन्नाथमुनिमिश्रभास्करयादवप्रकाशादयश्चाविद्वास इत्युन्नीतम् । तदेतदवैदिकंसिद्धान्तसारस्यमन्तरेण न कस्यचिद्रोचेत ।

यत्तु विखनस्सूत्रे "साम्बरा दिगम्बरा वे" ति विकल्पो विवृत गूढाचाराभिप्रायेणेति, तदपि न, तदसिद्धेरेव तद्विषयत्वासिद्धे. । तत्र हि निस्सङ्गत्वप्रतिपादनाय तथा तथा व्यपदेश., यथा वृक्षमूले शून्यागारे श्मशाने वा वासिन इत्यत्र न व्यवस्थितविषयो विकल्पस्तद्वदत्रापि । "न तेषा धर्माधर्मौ सत्यानृते शुच्यशुच्यादि द्वैत सर्वसमा" इत्यत्रापि नह्यधर्मासत्या द्यनुमति. क्रियते । तथासति तेषामित्यविशेषेण परामृष्टाना विवृतवेषाणामपि तदनुमतिप्रसङ्गात् । न च तदिच्छसि । अतस्तत्राप्यधर्मा सत्यादे. स्वाश्रयाङ्गभूतकतिपयधर्मव्यतिरिक्तधर्मादीना च स्वरूपतः प्रहाणमुच्यते ।

यत्तु परमहंसोपनिषदि काष्ठदण्डनिन्दनेन ज्ञानदण्डविधानमित्युक्तम्, तदपि "न हि निन्दा निन्द्य निन्दितुं प्रवर्तते अपि तु निन्दितादितरत्प्रशंसितुमि" ति न्यायेन ज्ञानदण्डविधानादरादेव, यथा अनुदितहोमनिन्दा उदितहोमप्रशंसार्था तथेहापि। अन्यथा काष्ठदण्डधारिणः कथ महारौरवादिप्राप्त्यभिधानम्! तथा च सति काष्ठदण्डधारणस्य महापातकत्वप्रसङ्गेन तद्धारिणा दूरपरिहरणीयस्वप्रसङ्गात्। तत्र शिखायज्ञोपवीताच्छादनपरित्यागोक्तिरपि तत एवान्यपरेति सिद्धम्। विवृतवेषादिविषयतया च वक्ष्यमाणप्रकारेण यथासम्भव तन्निर्वाहस्सर्वत्र। एव लिङ्गनिन्दापराण्यपि सर्वाणि स्मृतिवचनानि लिङ्गमात्रवता तत्तद्धर्मविकलानां निन्दापराणीति तत्र तत्रैव पूर्वापरपरामर्शेन सुव्यक्तम्। "अव्यक्त लिङ्गोऽव्यक्ताचार" इति वाक्य तु लिङ्गाचारयोर्गोपनमवमन्तव्यतार्थ विदधातीति प्रतीयते, नह्यलिङ्गोऽनाचर इत्युच्यते। अतो नास्ति भवदभिमत परमहसद्वैविध्यम्। त्रिदण्डैकदण्डादिविकल्पास्तु सम्भवन्ति।

ननु श्रीभागवते "न्यासे कुटीचकः पूर्व बहूदो हंसनिष्क्रियावि"ति परमहंसस्य निष्क्रियत्वमुक्तमिति चेत्? किमतः? गूढाचारसिद्धिरिति चेन्न,—कुटीचकादित्रयेण सह परमहंसावान्तरविशेषस्य निर्देशायोगात्। न हि पृथिव्यादिद्रव्यवर्गपरिगणने घट पट इत्यपि परिगण्यते। परमहसमात्रोपादाने तु न त्वदभिमतसिद्धि। तस्य निष्क्रियत्वोक्तिस्तु पूर्वपूर्ववत्कर्मप्राचुर्याभावात्—अलाघने पुरुषे दरिद्रशब्दवत्। न च सर्वे परमहसास्सर्वक्रियाशून्या इति त्वयापि स्वीकृतम्। विवृतगूढवेषाचार विभागाभावप्रसङ्गात्।

ननु करतलामलकीकृत सकल निगम स्मृतीतिहासपुराणार्थैस्समस्त न्यायसार्थवाहै परमहसपरिव्राजकपरिवृढैर्भगवच्छङ्कराचार्यैरशेषोपनिषत्स्मृति जलधिसुधायामुपदेशसाहस्रिक्या सर्ववर्णाश्रमधर्मत्यागरूपो गूढाचारधर्मः

स्वपक्षतयाऽभीक्ष्णं सयुक्तिक प्रदर्शित इति चेत् ? अहो भवान् महीयोभि राचार्यवर्णनादृष्टैरनिष्टान् विजिगीषते । ये पुनर्यत्प्रतिपादिते निर्विशेषात्मा द्वैते प्रपञ्चवञ्चनादौ च प्रमाणसरणिमनुसरन्तो विवदन्ते ते कथ तत्समर्थिते प्यन्यस्मिन्नपार्थे चरितार्थधियो भवेयु. । ये चात्राशरीरत्वादयो युक्त्याभासा वर्णाश्रमधर्मत्यागाय वर्णिता , तेपि जीवन्मुक्तिजीवघातेन विनिहता वेदित व्या' । शरीरतत्प्रयुक्तसुखदु खाद्यनुषङ्गस्य प्रत्यक्षादिसिद्धत्वेन तन्निषेधस्य तद्बाधितत्वात् । स्वरूपेण वर्णाश्रमरहितस्याप्यात्मनश्शरीरविशिष्टाकारेण तद्वत्तामुपजीव्य प्रवृत्तैश्शास्त्रैरेव तत्प्रयुक्तानुष्ठानसिद्धे. । न हि देहात्मभ्रमो पजीवनेन पारलौकिकशास्त्रोदय । अतो न कथञ्चिदपि युष्मदनुष्ठीयमानं स्वैरकर्मसह पारमहस्य नाम किमपि दृश्यते ।

ननु ये वहिर्विषयविमुखतया निषिद्धनिवृत्तविरक्त-लिङ्गधारिण. त एव साक्षात्परमहंसाभिधानब्रह्मविदः, वयन्तु नाममात्रधारिण इति चेन्न,— तैरप्याश्रमविशेषनियतलिङ्गविशेषस्य धर्मविशेषस्य चापरित्यागात् । यश्च तेषा विषयवैमुख्य निषिद्धनिवृत्तिकारणमुक्तम्, तदपि कि निरशेषशब्द स्पर्शादिवैमुख्यरूपम्, उत कतिपयवैमुख्यरूपमिति ? नाद्यः, कबलग्रहणादौ कस्यचिदप्यंशस्य न्यूनत्वादर्शनात् । मिथ्यैतदिति चेत् ? शान्तं पापम्, कृतघ्नोसि । ये भवत्सु ब्रह्मवित्त्वेन बम्भ्रम्यमाणाः प्रतिदिनमग्रासने कृत्वा यथाभिलाषं चतुर्विधमन्नमुपहरन्ति, ते पुनरेवविध वाक्यमाकर्ण्य कथ न परिदूयेरन् । येन च प्रमाणेन ब्रह्मविद्भोगानां मिथ्यात्वापादन तेनैवाब्रह्म विद्भोगानामपीति सर्वेषामनायासेन विषयवैमुख्यं समर्थितम् । द्वितीयेपि यत्किञ्चिद्विषयवैमुख्यमात्ररूपम्, उत निषिद्धवैमुख्यरूपमिति ? पूर्वत्रान्येषा मपि तत्सम्भवेन पुनरप्यविशेष । उत्तरत्रापि तन्निषिद्धवैमुख्य कि अनिष्ट त्वमात्रात्, उत शास्त्रसिद्धानर्थहेतुत्वाध्यवसायेन ? नाद्य , विकल्पासह-त्वात् । अनिष्टत्वमपि शास्त्राग्निकण्टकादिवत्सर्वप्रतिकूलत्वोपलम्भाद्वा ब्रह्मावि

त्प्रतिकूलत्वोपलम्भाद्वा, आनुकूल्यानुपलम्भनमात्राद्वा[1] न प्रथमः, सर्वलोकोपलम्भविरोधात्। अत एव नापरः, ब्रह्मविदा स्वात्मप्रत्यक्षविरोधात्। न हि मांसादिषु संस्कृतेषु ब्रह्मविदामपि निम्बादिवत् प्रातिकूल्यादिबुद्धिः। परेषां तु चेष्टाकारलिङ्गकानुमानविरोधः। शैलूषादिचेष्टादिवदिहापीति चेन्न,—परविप्रलम्भपरानन्दजननादिप्रयोजनायोगेन तथाविधबुद्धिपूर्वकत्वानुपपत्तेः। स्वार्थतावुद्धिपूर्वकत्वे तु वैमुख्यासिद्धेः, भक्षणाद्यर्थप्रवृत्तेरबुद्धिपूर्वकत्वायोगात्। निषिद्धार्थप्रवृत्तिरेव तेषां नास्तीति हेत्वसिद्धिरिति चेत्? प्रामादिकनिषिद्धप्रवृत्तेर्ब्रह्मविदामपि सम्भवात्। बुद्धिपूर्वकनिषिद्धप्रवृत्त्यभावस्तु शास्त्रसिद्धानर्थहेतुत्वाध्यवसायेनैवेति द्वितीय कल्पस्स्यात्। तथा च निषेधशास्त्रकिङ्करत्वेनाविशेषात् विधिशास्त्रमप्यनुबध्नातीति दुरन्तता। नचैतदुभयं भवतामिष्टम्। यदाहु "दग्धाखिलाधिकारत्वात् ब्रह्मज्ञानाग्निना मुनिः। वर्तमानः श्रुतेर्मूर्ध्नि नैव स्याद्विधिकिङ्करः" इति। अत्याश्रमपक्षे यम्, आश्रमपक्षे तूभयमपीष्टमिति चेत्? तर्हि यथाविधि लिङ्गाचारानुवर्तस्व। तदातु न विवदामहे। शास्त्रवश्यत्वाभावेपि ज्ञानिनोऽत्यर्थनिषिद्धनिरोधवासनाबलादेव बुद्धिपूर्वनिषिद्धनिवृत्तिरिति चेन्न,—निषिद्धविरोधवासना हि निषिद्धे प्रवृत्तिं निवर्तयति। नचाब्रह्मविदो निषिद्ध ब्रह्मविदोपि निषिद्धं भवति, अतिप्रसङ्गात्। अतश्चानिषिद्धत्वात् प्रवृत्तिरेव स्यात्। अन्यथा ब्रह्मचर्यावस्थानिषिद्धतत्सन्निरोधवासनया उत्तरेषामाश्रमाणामनारम्भप्रसङ्गात्। विधिवशात्तत्र पुनः प्रवृत्तिरिति चेन्न,—ब्रह्मचारिनिषिद्धेषु गृहस्थादीनाम विहिताप्रतिषिद्धेषु केषुचिदन्तर्माल्यादिवप्यप्रवृत्तिप्रसङ्गात्। यदि च प्राङ् निषिद्धत्वमात्रेण तदानीमनिषिद्धेपि वासना विरोधिका, तदा ब्रह्मविदो न काचिदपि प्रवृत्तिः स्यात्, सर्वेषामपि कर्मणामधिकारिभेदेन देशकालादिभेदेन वा निषिद्धत्वात्। अस्तु तादृशो निरीहोऽस्माक ब्रह्मविदिति चेन्न—समाधि स्वापादिक वान्तरेण तादृगवस्थत्व सिद्धे। न च समाधिस्थ तथा

विध प्रतिक्षिपामः । तस्याप्युत्थानकाले विधिनिषेधौ गलग्राहिणावेव । अस्तु तर्हि लोकसग्रहार्थं निषिद्धवैमुख्यमिति ? तर्हि न वैमुख्यमपि तु बलान्निरोधः । तथा च विहिताभिमुख्यमप्यभिमुखीभवति । । लोकसग्रहोपि लोकक्षोभजन्यपापभयादेवेति तदेव शास्त्रवश्यत्वम् । ब्रह्मानुभवरसवशादेव निषिद्धक्षुद्ररसवैमुख्यमस्त्विति चेन्न, अविहिताप्रतिषिद्धेऽप्यप्रवृत्तिप्रसङ्गात् । साच सत्यपि समाधिदशैवेति प्रागेवोक्तम् । एतेन जरठवद्धोक्तृत्वशक्तिवैकल्यात् ब्रह्मविदो भोगवैमुख्यमिति च प्रत्युक्तम् । अलाभाच्च चारकराजादिभयाद्वा तद्वैमुख्यमिति तु स्यात् । तदेतत्तुरङ्गमब्रह्मचर्यम्, निर्विघ्नलाभदशायां तु स्वैरमेव न्यायतम् ।

एतेनात्याश्रमपक्षेपि निषिद्धवैमुख्य दूषितम् । अनाश्रमित्वावस्था च किं विधायकशास्त्रबलादङ्गीक्रियते, लिङ्गदर्शनमात्राद्वा, तदशक्त्या वा, अन्यतो वा कुतश्चिदिति ? न प्रथमः, विधायकादर्शनात्, प्रत्युत "अनाश्रमी न तिष्ठेत्तु दिनमेकमपि द्विज" इत्यादिस्मृतिशतैर्निषेधात् । नचैतदविद्वद्विषय मन्तव्यम्, सङ्कोचकाभावात् । अनाश्रमित्वविधिदर्शने हि तत्सङ्कोचः । ज्ञानिनामपि नाश्रमो निषिध्यते, अपि तु स्वैराचारः । यथा—" नाविरतो दुश्चरितान्नाशान्तो नासमाहितः । नाशान्तमानसो वापि प्रज्ञानेनैन माप्नुयादि " ति ।

ननु " तद्यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यते । " " अनिष्टमिष्ट मिश्रं च त्रिविध कर्मणः फलम् । भवत्यत्यागिना प्रेत्य न तु सन्न्यासिना क्वचित् । " इति श्रुतिस्मृतिभ्यां ज्ञानिन उत्तराघाश्लेषः श्रूयत इति चेन्न,—दुश्चरिताविरतिपरश्रुतिबलादेवाश्लेषश्रुत्यादेरबुद्धिपूर्वविषयत्वात्, अपद्विषयत्वाच्च । सूत्रित च—"सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनादि " ति, ' शब्दश्चातो कामकार ' इति च । ' कुर्वन्नेवेह कर्माणि जिजीविषेच्छत समाः ' इत्युक्त्वा ' न कर्म

लिप्यते नर ' इति वचनाद्बुद्धिपूर्वकर्मणा ऽप्यश्लेषः श्रुत इति चेन्न,—तस्य वाक्यस्य विद्याङ्गभूतासङ्गकर्मविषयत्वात्। विद्यास्तुत्यर्थत्वाद्वा। तथाचासूत्रयत् ' ' नाविशेषादि ' ति, ' स्तुतयेऽनुमतिर्वे ' ति च। अन्यथा पूर्वोक्तविरोधात्। दुश्चरितविरतिश्रुतिरेव किमन्यपरतया न निरूप्यत इति चेन्न,—तस्यास्तात्पर्यविषयस्यान्यस्यादर्शनात्। विज्ञानविरोधादेव तत्रापि तात्पर्यमिति चेन्न;—ज्ञानस्य दुश्चरितविरामाद्यभावे स्वसाध्यसाधकत्वाभावलक्षणवैकल्यप्रतिपादनमुखेन दुश्चरितादिनिन्दारूपतया तदभावविशिष्टत्वेन विशेष एव वाक्यस्य तात्पर्यात्। ज्ञाननिष्पत्त्यर्थ- दुश्चरितादिनिवृत्तिर्निष्पन्नज्ञानस्य तु निरपेक्षतया स्वैरानुमतिरिति चेन्न;—दुश्चरितप्रभृतीना ब्रह्मप्राप्तिविरोधित्वेन ' नैनमाप्नुयादि ' ति प्रतिपादनात्। न ह्यत्र ' नाविरतो दुश्चरितात् ' ' प्रज्ञानमाप्नुयादित्युच्यते। ' ' नागुस्सम्पन्नमश्नाती ' त्यत्र क्षीरादिसम्पद्रूपावेशेषनिषेधवत् प्रज्ञाननिषेधे तात्पर्यमिति चेन्न,—पूर्वापरभावसहकृतकरणश्रुतिबलादेव सिद्धत्वप्रतीतेः साध्यत्वविवक्षायास्तद्विरुद्धत्वात्, स्वारस्याभावाच्च। अत एव 'नागु· क्षीरेण भुङ्क्ष' इति वदिति प्रत्युक्तम्, भोजनवत् ब्रह्मप्राप्तेरन्यतः प्राप्त्यभावाच्च। साध्यत्वविवक्षायामपि ज्ञानस्याप्रयाणादनुवर्तनीयत्वस्य प्रतिपादितत्वात्। प्रतिदिवसमुपचीयमानानुवृत्तज्ञानसिद्ध्यर्थं दुश्चरितविरामादेरप्यामोक्षादनुवर्तनीयत्वस्य प्रतिपादितत्वात्। अतो यावज्जीवं स्वैरनिषेधे अनन्यथासिद्धे सति ' कुर्वन्नेवे ' त्यादिकं ज्ञानस्तुत्यर्थं ज्ञानाङ्गकर्मविधिपरं वेति नेतव्यम्।

अत एव ' अपिचेदसि पापेभ्यस्सर्वेभ्यः पापकृत्तमः। सर्वं ज्ञानप्लवेनैव व्रजिन सन्तरिष्यसि ' ' यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेर्जुन। ज्ञानाग्निस्सर्वकर्माणि भस्मसात्कुरुते तथा। ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः। लिप्यते न स पापेन पद्मपत्रमिवाम्भसा। यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते। हत्वापि स इमान् लोकान् न

हन्ति न निहन्यते ' इत्यादीन्यपि क्रियमाणे कर्मणि फलसङ्गकर्तृत्वादि प्रतिषेधपरतया ज्ञानविशेषमाहात्म्यप्रतिपादनादिपरतया वा न स्वैरानुमति लिङ्गानि । अत एव ' अपिचेत्सुदुराचारो भजते मामनन्यभाक् । साधुरेव स मन्तव्यस्सम्यग्व्यवसितो हि स ' इत्युक्त्वा, अनन्तरमेव ' क्षिप्र भवति धर्मात्मा शश्वच्छान्तिं स गच्छती ' त्यादिना समाधीयते ।

' तस्माद्ब्राह्मणः पाण्डित्य निर्विद्य बाल्येन तिष्ठासेदि ' ति विदुषो बाल्यविधिबलात्कामचारवादकामभक्षत्वादिप्राप्तिरिति चेत् ?—न हि तत्र बाल्यशब्दो बालभावपरः, स हि वयोवस्थाविशेषरूप उपादातुं न शक्यते । अतः स्वमाहात्म्यानाविष्काररूप बालकर्म उपादातु शक्यत इति तद्विषयोयं विधिः । अन्यथा प्रागुक्तविरोधात् । सूत्रितं च ' अनाविष्कुर्वन्नन्वयादि ' ति । योगिना च स्वमाहात्म्यानाविष्कारेण जडवदाचरण योगोपकारकतया स्मर्यते,—यथा—

" जानन्नपि हि मेधावी जडवल्लोकमाचरेत् ।
सम्माननापरा हानि योगर्धेः कुरुते यतः ॥ " इत्यादि ।

सनत्सुजातोपि—

" य इमं सर्वदा भूतेष्वात्मानमनुपश्यति ।
अन्यत्रान्यत्र युक्तेषु किन्नु[स] शोचेत्ततः परम् ।
अहमेवास्मि वो माता पिता पुत्रोऽस्म्यहं पुनः ।
आत्माहमस्य सर्वस्य यच्च नास्ति यदस्ति च ।
पितामहोस्मि स्थविर पिता पुत्रश्च भारत ॥
ममैव यूयमात्माथ न मे यूय च नाप्यहम् ।
आत्मैव स्थानं मम जन्मचात्मे " त्यादिना सर्वान्तरात्म भूतब्रह्मसाक्षात्कारिण सर्वजननिरुपाधिकसुहृद ब्रह्मनिष्ठ प्रस्तुत्य,—

' तस्य सम्यक् समाचारमाहुर्वेदविदो जनाः ।
नैव मन्येत भूयिष्ठ बाह्यमाभ्यन्तर जनमि '' त्यादिना तस्य स्वाकारगोपनं विधाय ,

' यद्येवमन्तरात्मान ब्रह्मणो हन्तुमर्हति ।
निर्लिङ्गमचलं सिद्ध सर्वद्वन्द्वविवर्जितम् '

इत्यादिना परिशुद्धात्मस्वरूपानुसन्धान च विधाय,

' योन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते ॥
किं तेन न कृत पाप चोरेणात्मापहारिणा ।'

इत्ययथाभूतात्मवेदिन विनिन्द्य,

' अश्रान्तस्यावनावात्मा सम्मतो निरुपद्रव. ।
शिष्टो नशिष्टवत्स स्याद्ब्राह्मणो ब्रह्मवित्कवि. ॥ '

इति विशिष्टस्यैव सतस्तस्यावमानसिद्ध्यर्थमविशिष्टवदभिनय एवाभिधीयते । व्यज्यते हि तत्रैव—

' सम्मानपरिहारार्थं स्ववीर्यस्य हि गोपनम् ।
ये यथा वान्तमश्नन्ति बाला नित्यमभुङ्क्तये ॥
एव ते वान्तमश्नन्ति स्ववीर्यस्योपभोजनात् ।
नवै मानं च मौनं च सहितौ चरतस्सदा ।
अयं मानस्य विषयो ह्यसौ मौनस्य तद्विदुरि ' ति ॥

उक्त हि तैत्तिरीयके— ' तस्मादेव विद्वान् । वीव नृत्येत् । प्रेव चलेत् । व्यस्येवाक्ष्यौ भाषेत । मण्ठयेदिव । क्राथयेदिव । शृङ्गायेतेव । उतमे-ऽपवदेयु· । उतमे पाप्मानमपहन्युरिति ' इति । अत्रापि पापनिवृत्त्यर्थं परिभवनीयत्वसिद्ध्यर्थ मुन्मत्तत्वादिसमानव्यापार एव हि विधीयते , न पुनः परमहंसाना परदारादिगमनरूपनिषिद्धकरणम्, नापि नित्यनैमित्तिकत्याग.।

उक्त च मनुना—

' सम्मानात् ब्राह्मणो नित्य उद्विजेत विषादिव ।
अमृतस्येव चाकाङ्क्षेदवमानस्य सर्वदा ॥ ' इति ।

अयमेवार्थ. स्मृत्यन्तरेप्वप्युच्यते—

'यन्न सन्त नचासन्त नाश्रुत नबहुश्रुतम् ।
न सुवृत्त न दुर्वृत्त वेद कश्चित्स वै द्विजः
गूढ समाश्रितो विद्वानज्ञातश्चरितं चरेत् ॥
अन्धवज्जडवच्चापि मूकवच्च मही चरेत् ।
स्वाचारस्यापरित्याग स्वप्रभावस्य गोपनम् ॥
अपरिग्रहशीलत्व पावनानि प्रचक्षते ।' इत्यादिभिः ।

एतेन द्वितीयोपि हेतुः प्रत्युक्तः, प्रत्यक्षश्रुतिविरोधे प्राप्त्यभावेच लिङ्गदर्शनमकिंञ्चित्करमेव । न च तदस्ति । आदिभरतोपि हि योगसिद्धचर्थं जडवदाचारमात्रे प्रवृत्त इति तत्रैव व्यक्तम् । तथाहि श्रीविष्णुपुराणे—आदिभरतोपाख्याने—

" तत्र चोत्सृष्टदेहो सौ जज्ञे जातिस्मरो द्विजः ।
सदाचारवता शुद्धे योगिना प्रवरे कुले ।
सर्वविज्ञानसम्पन्नस्सर्वशास्त्रार्थतत्त्ववित् ।
अपश्यत्सच मैत्रेय आत्मानं प्रकृतेः परम् ।
आत्मनोधिगतज्ञानो देवादीनि महामुने ।
सर्वभूतान्यभेदेन स ददर्श सदात्मनः ।
न पपाठ गुरुप्रोक्तां कृतोपनयनश्श्रुतिम् ।
न ददर्श च कर्माणि शास्त्राणि जगृहे न च ॥
उक्तोपि बहुशः किञ्चिज्जडवाक्यमभाषत ।
तदप्यसस्कारगुणं ग्राम्यवाक्योक्तिसाश्रितम्
अपध्वस्तवपुस्सोथ मलिनाम्बरधृग्जटी ॥

क्लिन्नदन्तान्तरस्सभ्यैः परिभूतस्स नागरैः ।
सम्माननां परां हानिं योगर्धे· कुरुते यत. ।
जनेनावमतो योगी योगसिद्धिं च विन्दति ।
तस्माच्चरेत वै योगी सतां वर्त्म न दूषयेत् ।
जना यथावमन्येरन् गच्छेयुर्नैव सङ्गतिम् ।
हिरण्यगर्भवचन विचिन्त्येत्थं महामतिः ।
आत्मानं दर्शयामास जडोन्मत्ताकृतिं जने ।
भुङ्क्ते कुल्माषवाट्यादि शाकं वन्यफलान् कणान् ।
यद्यदाप्नोति सुबहु तदत्ते कालसंयमम् ।
पितर्युपरते सोऽथ भ्रातृभ्रातृव्यबान्धवैः ।
कारितः क्षेत्रकर्माणि कदन्नाहारतोषितः ।
सरूक्षपीनावयवो जडकारी च कर्मणि ।
सर्वलोकोपकरणं बभूवाहारचेतनः ।
तं तादृशमसंस्कारं विप्राकृतिविचेष्टितम् ।
क्षत्ता सौवीरराजस्य विष्टियोग्यममन्यत " ॥ इति ।

तथोत्तरत्र—

" योगिनो विविधैरूपैर्नराणामुपकारिणः ।
भ्रमन्ति पृथिवीमेतां मभिज्ञातस्वरूपिणः " इति ॥

नह्यत्राधर्मानुष्ठानं किञ्चिदुक्तम्, न च धर्मोपप्लव । कर्माणि तु यज्ञादीनि ब्रह्मचारित्वादेव नाग्रहीत् । अत एव तत्र " सतां वर्त्म न दूषयेन्नि " त्यप्युक्तम् । भागवते च तस्य यज्ञोपवीतादिधारणादिकथनादाश्रमित्वमेव प्रतीयते । यथोक्तम्—"कस्त्वं निगूढश्चरसि द्विजानां बिभर्षि सूत्रं कतमोऽवधूत " इति । अत्र निगूढश्चरसीति स्वमाहात्म्यानाविष्कारो व्यक्त. । अत एव ' न पपाठ गुरुप्रोक्तां कृतोपनयन. श्रुतिमि' त्यत्रापि

कृतोपनयनत्वं न निषिध्यते । अनूच्चारणपरित्यागोपि जन्मान्तरसंस्कारोद्बोधनादिना वेदाना स्वत प्रकाशात् । अथवा एकवारश्रवणमात्रेण वेदधारणात् । दुर्वास प्रभृतीनामुन्मत्तव्रतादिकमपि कादाचित्कमाश्रमधर्मनिष्ठानामेव लोकोपहास्यतादिफलावसितम् । न पुन सर्वाश्रमत्यागात्मकम् । अत एव दुर्वाससः पश्चात्सन्न्यासानुप्रवेश काषायदण्डादिमत्त्वं च स्मर्यते । ऋभु—शुकसवर्तादिषु नग्नचर्यादिदर्शनादनाश्रमित्वमवगम्यत इति चेन्न;—नग्नचर्याया अपि वर्षवातातपादितितिक्षालक्षणकम्बलकवलिताशेषविशेषाकारपुरातनाधिकारिविशेषविषयव्रतविशेषरूपत्वात् । आश्रमित्वाभावे कथ वाताशनस्यैव सवर्तस्य महीभृता ऋत्विक्त्वेन वरणम् । अतस्सर्ववर्णाश्रमसाधारण व्रतविशेष एव नग्नचर्या । गृहस्थस्यैव ह्यार्त्विज्यादिकम् । पूर्व विधुरस्यापि कार्यार्थ दारक्रियादिपूर्वकमार्त्विज्य युज्यते ।

ननु ' पुर पञ्चशत नार्यो वारमुख्या समाद्रवन्नि ' त्यादिना ' तस्य भुक्तवतस्तात तदन्त पुरकाननम् । सुरम्य दर्शयामासुरेकैकश्येन भारते ' ति तस्य ब्रह्मविदो महर्षे शुकस्य वारमुख्यासु गणिकासु भोजन मप्युक्तमिति चेन्न,—ब्रह्मणादिपरिपक्वोपनीतान्नभोजनेन तासा परिजनत्या भोजनानन्तर तालवृन्तादिग्रहणादिमुखेनावस्थानेपि तद्व्यपदेशोपपत्ते । शुकस्य ब्रह्मचर्यादिपरीक्षणमात्रे हि तत्र तात्पर्यमिति सुव्यक्तम् । नैतन्निषिद्धान्नभोजनलिङ्गम् । उत्तरत्र च—

" विज्ञाते तु परे तत्वे प्रत्यक्षे हृदि शाश्वते ।
किमवश्य हि वस्तव्यमाश्रमेषु वनेषु च ।
एतद्ब्रवन्तं पृच्छामि तद्भवान् प्रब्रवी तु मे ।

इति शुकेन पृष्टे, जनकेन तेषामेवाश्रमधर्माणा सङ्गत्यागपूर्वकमनुष्ठानमेव उक्तम् ।

यच्च तत्र—

' न विना ज्ञानविज्ञानान्मोक्षस्याधिगमो भवेत् ।
न विना गुरुसम्बन्धात् ज्ञानस्याधिगम स्मृत. ॥
आचार्य. प्लाविता तस्य ज्ञानं प्लव इहोच्यते ।
विज्ञाय कृतकृत्यस्तु तीर्णस्तदुभयं त्यजेत् ॥
त्यज धर्ममधर्म च त्यज सत्यानृते अपि ।
उभे सत्यानृते त्यक्त्वा येन त्यजसि त त्यजे' त्युक्तम्, तत्र 'ताणस्तदुभयं त्यजेदि' त्यनेन आमोक्षात्तदुपायभूतज्ञानाचार्ययोरनुवर्तनीयत्वमेवोक्तम् । ' त्यज धर्ममधर्मं चे ' ति श्लोकस्तु—

' त्यज धर्ममसङ्कल्पात्त्यजाधर्ममहिसया ।
उभे सत्यानृते बुद्ध्वा बुद्धि परमनिश्चयाम्' ॥ इत्यनेन श्लोकेन व्याख्यातार्थत्वात् नासौ त्वदनुगुण ।

यत्पुनः श्रीभागवते शुकस्य परमहसस्य वेषानुक्त्वा—

' तत्रागमत् भगवान् व्यासपुत्रो यदृच्छया गामटमानोऽनपेक्ष ।
अलक्ष्यलिङ्गो निजलाभतुष्टो वृतश्च बालैरवधूतवेष ॥
तं द्व्यष्टवर्षं सुकुमारपादकरोरुबाह्वंसकपोलगात्रम् ।
चार्वारुणाक्षोन्नसतुल्यकर्णसुभ्र्वानन कम्बुसुजातकण्ठम् ।
निगूढजत्रु पृथुतुङ्गवक्षस सावर्तनाभि वलिवल्गूदर च ।
दिगम्बरं वक्त्रविकीर्णकेश श्याम सद' पिच्छिलयाङ्गलक्ष्म्या ॥
स्त्रीणा मनोज्ञं रुचिरस्मितेन प्रलम्बबाहु सुकुमारोत्तमाङ्गम् ।
प्रत्युत्थिता सुनयस्त्वासनेभ्य ' इत्यादि, अत्र नग्नचर्यापरत्वालिङ्गस्य निगूहनमलक्ष्यलिङ्ग इत्युक्तम् ।

यत्पुनराश्वमेधिके प्रोक्त—'राजन्नाङ्गिरस पुत्रस्संवर्तो नाम धार्मिक' ।

दिशश्चङ्क्रमते सर्वा दिग्वासा मोहयन् प्रजा ।
उन्मत्तवेष बिभ्रत्स चरन् वै तु यथासुखम्

वाराणसी तु नगरी अभीक्ष्णमुपसेवते ॥

नैव धर्मी नचाधर्मी नचापि हि शुभाशुभीत्या दि, तत्रापि धार्मिक इत्युपक्रमात् पुण्यक्षेत्रनिरन्तरसेवनरूपधर्मविशेषनिष्ठत्वस्य चाभिधानात् उन्मत्तवेषधारणमात्रमेवोच्यते ।

यत्पुनरजगरोपाख्यान स्वैरानुरूपमुपवर्णयन्ति; तदप्यसत् । तथाहि—

' केन वृत्तेन वृत्तज्ञ वीतशोकश्चरेन्महीम् ।
किञ्च कुर्वन् नरो लोके प्राप्नोति परमा गतिम् ॥ '

इति युधिष्ठिरेण पृष्टो भीष्मः पत्याह—

अत्राप्युदाहरन्तीमभितिहास पुरातनम् ।
प्रह्लादस्य च सवाद मुनेरजगरस्य च ।
चरन्त ब्राह्मणं कञ्चित्तुल्यचित्तमनामयम् ॥
पप्रच्छ राजन् प्रह्लादो बुद्धिमान् प्राज्ञसत्तमः ।

प्रह्लाद·—

' स्वस्थ शुक्लो मृदुर्दान्तः निर्विवित्सोऽनसूयक. ।

सुवाग्बहुमतोलोके प्राज्ञश्चरसि बालव दि'त्यादिना पूर्व प्रह्लादप्रश्नेन ब्राह्मणस्य मुमुक्षूपादया गुणाः प्रदर्शिता. । यत्पुनस्तत्रोक्तम्—'धर्मार्थकाम कार्येषु कूटस्थ इव लक्ष्यसे । नानुतिष्ठसि धर्मार्थौ न कामे चापि वर्तसे ॥' इति, तदपि काम्यकर्मादिविषयमेव, अन्यथा उत्तरत्र धर्मोपभोगप्रतिग्रहवचन विरोधात् । प्रह्लादानुयुक्तो हि ब्राह्मणस्तत्र सर्वपदार्थानामनित्यत्वमुक्त्वाह—

'उत्पत्तिनिधनज्ञस्य कि कार्यमवशिष्यते ।
सर्वभूतानि सम्पश्यन् अनुरक्तानि मृत्युना ।
सर्व सामान्यतो विद्वान् कृत्यकृत्यस्सुख स्वपे ॥
सुमहान्तमपि ग्रास ग्रसे लब्ध यदृच्छया ।
शये पुनरभुञ्जानो दिवसानि बहून्यपि ॥

अ.स्तवत्यपि मामन्नं पुनर्बहुगुणं बहु ।
पुनरल्पं पुनस्स्तोकं पुनर्नैवोपपद्यते ।
कणान् कदाचित्खादामि पिण्याकमपि च ग्रसे ।
भक्षये शालिमासानि भक्ष्याश्चोच्चावचान् पुनः ।
धारयामि च चीराणि शाणक्षौमाजिनानि च ।
महार्हाण्यपि वांसासि धारयाम्यहमेकदा ।
शये कदाचित्पर्यङ्के भूमावपि पुनश्शये ।
प्रासादे वापि मे शय्या कदाचिदुपपद्यते ।
न सन्निपतितं धर्म्यमुपभोगं यदृच्छया ।
प्रत्याचक्षे नचाप्येनमनुरुन्धे सुदुर्लभम् ।
अनियतफलभक्ष्यभोज्यपेयं विधिपरिणामविभक्तदेशकालम् ।
हृदयसुखमसेवित कदर्यैर्व्रतमिदमाजगर शुचिश्चरामि ॥
सुखमसुखमनर्थमर्थलाभ रतिमरतिं मरणं च जीवित च ।
विधिनियतमवेक्ष्य तत्वबुद्ध्या व्रतमिदमाजगर शुचिश्चरामि॥

'अनियतशयनासनप्रकृत्येत्यादि, अत्र यथालब्धवृत्तित्वेपि प्रपञ्च्यमाने धर्म्यमिति धर्मादनपेतत्वमेव सावधानेनोक्तम्, उत्तरत्रापि निरपेक्षत्व मात्रेण यदालब्धवृत्तित्वं सम्माननपरिहरणमात्र चोपदिश्यते ।

'निस्तुतिर्निर्नमस्कारो निर्द्वन्द्वो निष्प्रतिग्रहः ।
अरण्ये विचरैकाकी येन केनचिदाश्रित. ।
येन केन चिदाच्छन्नो येन केनचिदाशित· ।
यत्र क्वचन शायी स्यात्तं देवा ब्राह्मण विदु. ।
निराशिषमनारम्भं निर्नमस्कारमस्तुतिम् ।
अक्षीण क्षीणकर्माण तं देवा ब्राह्मण विदुः
येन पूर्णमिवाकाशं भवत्येकेन सर्वदा ॥

शून्यं यस्य जनाकीर्णं त देवा ब्राह्मण विदुः ।
यस्मिन् वाचः प्रणश्यन्ति कूपे प्राम्त्राश्मिला इव ।
वक्तार न पुनर्यान्ति त देवा ब्राह्मण विदु. ।
अनुत्तरीयवसनमनुपम्तीर्यशायिनम् ।
बाहूपधान शाम्यन्त तदेवा ब्राह्मण विदु. ।
योहेरिव गणाद्भीतम्सन्मानान्मरणादिव ।
कुणपादिव च स्त्रीभ्यस्त देवा ब्राह्मण विदुरित्यादि—गृहीतमौ नव्रतस्तूष्णीबभूवे'त्यादिना जडादिवद्भावनामात्रमभिधीयत इति सुव्यक्तम् ।

यच्च तत्र विपरीतमिव किञ्चिदुक्तम्— *यर्हि वा व स भगवान् लोकमिमं योगस्युत्थाप्रतीपमिहचक्षाणस्तत्प्रकृतकर्मभवस्थितमाजगरं नामावस्थितइशयान एवाश्नाति पिबति खादत्यवमेहती ' त्यादि, यच्चैव गोमृग काकचर्यया व्रजस्तिष्ठन्नासीन· काकमृगगोवच्चरति पिबत्यवमेहतीत्यादि, तदप्यखिलमजगरगोमृगचर्यारूपलोकावज्ञाहेतुभूतयोगोपकारकव्रतविशेषविषयम्। तत एव च तथाविधस्यैव ऋषभस्य विधिनिषेधकिङ्करत्वमेव ज्ञापितमिति न विरोधः । अत एव हि भक्तिज्ञानवैराग्यलक्षणं पारमहंस्यं ' धर्ममुपशिक्षमाण ' इत्युपक्रमेप्युक्तम् ।

यच्चोत्तरत्र—' अवधूत द्विज कञ्चिच्चरन्तमकुतोभयम् ।
कवि निरीक्ष्य रमण यदु. पप्रच्छ धर्मवित् ।
कुतो बुद्धिरिय ब्रह्मन् अकर्तुस्सुविशारदा ।
यामासाद्य भवाल्लोकं विद्वांश्चरति बालवत् ।
प्रायो धर्मार्थकामेषु विवित्साया च मानवाः ।
हेतुनेहसमीहन्ते आयुषो यशसश्रयः ।
त्व तु कल्पः कविर्दक्षस्सुभगोमितभाषण. ।
न कर्तुमीहसे किञ्चिज्जडोन्मत्तपिशाचवत् ।
जनेषु मुह्यमानेषु कामलोभदवाग्निना ।

* अत्र वाक्ये शुद्धः पाठो नोपलभ्यते । विमृशन्तु विचक्षणा. ॥

न तप्यसेऽग्निना मुक्तो गङ्गाम्भस्स्थ इव द्विपः।
त्व हि न. पृच्छता ब्रह्मन्नात्मन्यानन्दकारणम्।
ब्रूहि स्पर्शविहीनस्य भवत. केवलात्मन.।"

इति पृष्टेनावधूतेन ब्राह्मणेन—

"सन्ति मे गुरवो राजन् बहवो बुद्धयुपाश्रिताः।
यतो बुद्धिमुपादाय मुक्तोहमिह तान् शृणु।
पृथिवी वायुराकाश आपोऽग्निश्चन्द्रमा रविः।"

इत्युपक्रम्य,

'एते मे गुरवो राजन् चतुर्विंशतिराश्रिता.।'

इति गुरुवर्गमुक्त्वा,

"विषयेष्वाविशन् योगी नानाधर्मेषु सर्वतः।
गुणदोषव्यपेतात्मा न विषज्येत वायुवत्।
तेजस्वी तपसा दीप्तो दुर्धर्षोदरभाजन.।
सर्वभक्षोपि युक्तात्मा नाधत्ते मलमग्निवत्।
क्वचिच्छन्न. क्वचित् स्पष्ट उपास्यः श्रेय इच्छताम्।
भुङ्क्ते सर्वत्र दातृणा दहन्प्रागुत्तराशुभम्॥'

इत्याद्युक्तम्,

तदप्युक्तेनैव न्यायेन योगनिष्ठप्रशसारूपातिवादात्मकमिति अपिशब्दादिभिरेव लिङ्गैर्व्यक्तम्। उपक्रमे प्रश्नवाक्येनापि निष्परिग्रहत्वनिरभिमानत्वादिक हि दर्शितम्, तदेव ह्युत्तरेणाप्यभिप्रेतम्। अतो यादृच्छिकसगुणविगुणान्नवि वेकत्यागे सर्वभक्षोक्तेस्तात्पर्यम्। यच्च यादृच्छिकान्नव्यति[illegible] प्राप्तभोजनमपि दृष्टमित्युच्यते, यथा—

"स्तोक स्तोक ग्रसेद्ग्रासान् देहो वर्तेत यावता।
गृहानहिसन्नातिष्ठेद्वृत्तिं माधुकरीं मुनि.।

सायन्तनं श्वस्तनं वा न संगृह्णीत भिक्षितम् ।
प्राणिपात्रोदरामत्रो मक्षिकेव न संग्रही ।
गुणैर्गुणानुपादत्ते यथाकाल विमुञ्चति ।
न तेषु सज्जते योगी गोभिर्गा इव गोपतिः ।"

इत्यादि ; तदपि स्थास्नुपात्रपरित्यागादौ तत्परम् । परिव्राजां भिक्षा काले शीर्णपर्णपुटेनापि भिक्षणस्य कैश्चिदनुमतेः । यच्च तदुत्तरत्रेत्युपात्तम्—

"ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वाऽनपेक्षकः ।
सलिङ्गानाश्रमांस्त्यक्त्वा चरेदविधिगोचरः ।
बुधो बालकवत् क्रीडेत् कुशलो जडवच्चरेत् ।
वदेदुन्मत्तवद्विद्वान् गोचर्यां नैगमश्चरेत् ।
यदृच्छयोपपन्नान्नमद्याच्छ्रेष्ठमुतावरम् ।
तथा वासस्तथा शय्या प्राप्तं प्राप्तं भजेन्मुनिः ।"

इत्यादि, तदपि क्रियमाणेष्वेवाऽकर्तृत्वानुसन्धानविधौ तत्परमिति प्रागुक्तनयेन नेतव्यम् । अन्यथा तत्रैव कथ "मविधिगोचरश्चरेदि" त्यादिविधिर्घटेत ।

यत्तु वाररुचे स्वरूपग्रन्थ इत्युपात्तम्—

"देहजात्यादिसम्बन्धान् वर्णाश्रमसमन्वितान् ।
भावानेतान् परित्यज्य स्व भाव भवियेद्बुधः ।
सर्वोपाधिविनिर्मुक्तं चैतन्यं यन्निरन्तरम् ।
तद्ब्राह्मणमिति ज्ञात्वा कथ वर्णाश्रमी भवेदि"ति,

तदपि वररुचेः ऋषिभावनयोपदेशपरं चेत् परिगृहीततमऋष्यन्तरस्मृत्यन्तरादिवचनाविरोधेन यथावस्थितपरिशुद्धात्मस्वरूपानुसन्धानपूर्वकवर्णाश्रमधर्मविशेषविधिपरतया योज्यम् । उपपत्तिपर चेत् सर्वधर्मोपप्लवमूलकुतर्ककल्क कल्पितत्वेन प्रामाणिकैर्बीभत्सनीयम् । बृहस्पतिप्रणीतलोकायतादिग्रन्थवत् । विदुरवृत्तान्तोपि प्रागुक्तन्यायेन व्याख्यातः ।

यद्यपि "जपस्तपस्तीर्थयात्रा प्रव्रज्यामन्त्रसाधनम् ।

देवतारार्धनं चेति स्त्रीशूद्रपतनानि षडि " त्यादि स्त्रीशूद्रादिषु भर्तृ—त्रैवर्णिकशुश्रूषाबहिर्भूतजपतप.प्रभृतिषु पतनस्मृति', तथापि क्षत्रियविशेषस्य सन्न्यासाभ्यनुज्ञानवच्छूद्रादेरपि केषुचिद्व्रतेष्वनुज्ञानमस्ति। न च तस्य यज्ञोपवीतादिपरित्यागलक्षणदोषावकाशः, प्रागेव तदभावात्। ये च नग्न चर्यामातिष्ठन्ते महात्मानः ते हि ब्रह्मचर्यकाष्ठामधिष्ठाय तथा भवन्ति। " ऋषयो वातरशनाः " "वातरशना ह वा ऋषयश्रमणा ऊर्ध्वमन्थिन" इति हि श्रूयते। न पुनर्भवन्त इव पट्टांशुकादिभाण्डागारशालिनः क्षितिसुर चण्डालक्षीरसुरादिभेदत्यजः परकलत्रशरणाः पशुमृगसधर्माणः प्रजननसन्तताः श्रूयन्ते। सनत्कुमारादीनां नग्नता नित्यबाल्यावस्थतया, केवलब्रह्मभावना—भावितात्मान' कुमारा हि ते महात्मानः श्रूयन्ते। पशुपतेर्नग्नचर्या तु पाशु पतव्रतविशेषाङ्गरूपत्वात् तत्र धर्मत्वसदसद्भावयोरपि त्रयीधर्मनिष्ठैरनुपादेयैव। यत्पुनर्मुग्धेन्दुशेखरस्य मुनिधर्मदारमोहनादिकमवैदिकाचारजालम्, तत्र वैराग्यशालिनस्तस्य मोहनाभिसन्धिविरहः प्रस्पष्ट पठितः। अन्यथापि तस्येश्वरत्वमभ्युपगच्छतामीश्वरत्वादेव परिहृतम्। " न देवचरितं चरेदि " ति ह्याहुः। लोक वेदविरुद्धयोरप्यलेपः स्वतन्त्रश्चेति हि महापाशुपता' प्राहुः। अनीश्वरत्वपक्षे तु तेजोविशेषेणैव सोढव्यम्। स्मरन्ति हि ' दृष्टो धर्मव्य तिक्रमः साहसं च पूर्वेषां तेषां तेजोविशेषेण प्रत्यवायो न विद्यते तदन्वीक्ष्य प्रयुञ्जानस्सीदत्यवरज ' इत्यादि।

एतेन सर्वेश्वरस्य भगवतो वसुदेवनन्दनस्य स्वच्छन्दलीलया गोपव-धूदर्शनव्याकुलीकरणं व्याख्यातम्। परिहृतं चैतदकर्मवश्यतया भगवत्परा शरादिभिः, ' कामाद्वेष्य ' इति भगवत्यनुरागानुवृत्तिरपवर्गायैव जायत इति चोक्तम्। ननु धर्मसंस्थापनार्थाय सम्भवस्तत्संक्षोभकरणं चेति कथमिदमुप पद्यते ? न, उक्तोत्तरत्वात्। नन्दगोपनन्दनत्वाभिमानमभिनयतस्तस्य न तावत्तदानीं वर्णाश्रमाचारानुवृत्तिनियमः। आभीरकन्यका अपि भगवन्तमेव

भर्तारमभ्यर्थ्य जन्मान्तरचरितव्रता दिव्यप्रकृतय एवेति तास्वप्सरस्समाधिरनुसन्धेय. । तत्तदभिमतफलप्रदान चेश्वरस्यादोषायेति । यदा तु भगवान् वसुदेवतनयतया प्रतिबोधमभिनयन् यदुवंशोचितं क्षत्रधर्ममनुप्राविशत्, तदा सावधान एव सर्वदा सर्वान् धर्मानन्वपालयत् । तथाहि सर्वत्र कथ्यते

' न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन ।
नानवाप्तमवाप्तव्य वर्त एव च कर्मणी ' ति । तथा
कृतोदक· कृतजपो हुताग्निस्समलकृत ।
तत उद्यन्तमादित्यमुपातिष्ठत माधव इति,

तथा अश्वत्थामास्त्रपावकष्लुष्टविराटतनयागर्भसञ्जीवनावसरे साधिकषोडशस्त्रीसहस्रसंख्को वृन्दावनविहारी वल्लवीवृन्दनिविष्टयौवनारम्भो भगवान् स्वयमेव वोचत्—

' यदि मे ब्रह्मचर्यं स्यात् सत्य च मयि तिष्ठति ।
अव्याहत ममैश्वर्य तेन जीवतु बालक. । ' इति ।

ननु श्वेनाश्वतरोपनिषदुपहारे तदधिकारितया अत्याश्रमित्वोपपादनादप्रसार्थत्वेन तद्विधिरिति चेन्न,—अतिशयिताश्रमविशेषनिष्ठ इति वा, ब्रह्मचर्यादित्रयातिक्रान्ताश्रमविशेषनिष्ठ इति वा, अन्येन वा केनचिदविरुद्धेन निमित्तेन तन्निर्वाहात् । अन्यथा स्फुटनरार्थश्रुतिस्मृतीतिहासादिशतकोपप्रसङ्गः । ' शारीर केवल कर्म कुर्वन् ' ' सर्वारम्भपरित्यागी ' ' सर्वधर्मान् परित्यज्ये ' त्यादिभिस्सर्वधर्मपरित्यागोक्त्या चानाश्रमित्वसिद्धिरिति चेन्न,—फलसङ्गकर्तृत्वादिविषयतया वा विधीयमानधर्मव्यतिरिक्तविषयतया वा यथा सम्भव तद्व्यवस्थापनस्य तत्र तत्रैवोपक्रमादिभिर्व्यक्तत्वात् । ' सन्न्यासस्य महाबाहो तत्वमिच्छामि वेदितुम् ' इति सन्न्यासत्यागतत्वबुभुत्सयोपसेदुषे धनञ्जयायोक्त भगवता—

" एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च ।
कर्तव्यानीति मे पार्थ निश्चित मतमुत्तमम् ॥

नियतस्य तु सन्न्यासः कर्मणो नोपपद्यते।
मोहात्तस्य परित्यागस्तामसः परिकीर्तितः' इति।

एतेन—

"यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः।
आत्मन्येव च सन्तुष्टः तस्य कार्यं न विद्यते।
नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन।
नचास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः"

इत्यादीन्यपि वाक्यानि सर्वकार्यस्वरूपनिषेधपराण्यपि मुक्तदशां समाधिदशां वाऽऽश्रित्य निर्वाह्याणि। अतो यथायथमाश्रमविशेषविषया वा फलस्य कर्तृत्वादिविषयो वा सन्न्यासपरित्यागादिवादः, न पुनस्स्वरूपपर्यवसितम् इति सिद्धम्।

एतेन 'न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः' 'न्यास एवात्यरेचयत्।' 'तस्मान्न्यासमेषां तपसामतिरिक्तमाहुः' इत्यादि, 'किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे किं प्रजया करिष्यामः येषां नोऽयमात्मा ब्रह्मलोकः' इत्यादिकमपि धर्मविशेषविषयतया तत्तत्यात्मसमर्पणादिविषयतया वा यथायथं निर्वोढव्यम्। अतस्सर्वाश्रमपरित्यागोक्तिसम्भवेऽपि प्रागुक्त एव न्यायः। न च तथास्ति, अपि तु 'त्रयो धर्मस्कन्धाः' इत्याश्रमान्विधाय 'ब्रह्मसंस्थोऽमृतत्वमेति' त्याश्रमनिष्ठानामेव ब्रह्मविदाममृतत्वं श्रूयते। 'स स्वल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसम्पद्यते न च पुनरावर्तते न च पुनरावर्तते' इति यावज्जीवं गृहस्थधर्मनिष्ठस्य ब्रह्मविदोऽपुनरावृत्तिराम्नाता। 'यो वा एतदक्षरं गार्गि' त्यादौ च ज्ञानरहितकर्मणामन्तवत्फलसाधनत्वं ज्ञानपूर्वककर्मणां स्थिरफलसाधनत्वं चोक्तम्। अतो न कदाचिदपि यावज्जीवं स्ववर्णाश्रमोचितधर्मस्वरूपत्यागसम्भवः। यानि चान्यानि वाक्यानि सम्प्रतिपन्नश्रुतिस्मृतिभ्यो दृश्य

मानानि स्वाचारानुरूपमतपरिचर्यया केषुचिदप्रसिद्धेषु वा नष्टकोशेषु वा अनिरूपितमूलाग्रेषु वा पुराणेषु प्रक्षिप्य पठन्ति पापिष्ठा स्तानि प्रत्यक्षश्रुत्या दिपरिशीलनशालिनीषु गरिष्ठगोष्ठीषु नावकाश लभन्ते ; तत्प्रामाण्येपि प्रसिद्ध विरोधेन नेतव्यमित्यत एवैतान्यपि निर्व्यूढानि ।

न च तृतीयः, अनाश्रमित्वाक्षेपकवचनादर्शनात् । जीवन्मुक्ते श्रुत्यर्थापत्त्यैवानाश्रमित्वसिद्धिरिति चेन्न;—तद्दूषणादेव तदसिद्धेः । अस्तु नित्यमुक्तिवशात्सर्वाश्रमत्याग इति चेन्न,—तस्या अपि मोक्षोपायोपदेशकशास्त्रादेव विस्तरतस्तत्प्रकरणे निषेधात् । चतुर्थस्तु विपरीत एव ।

अथ गौडपादहरिप्रभृतिभिराचरितत्वात्सर्वाश्रमपरित्यागोऽस्माभिः स्वीकृत इति चेत् ? हन्त सदाचारनिदर्शनतया महान्त इमे दुर्ब्राह्मणशूद्रसन्तानादयः शिष्टा निर्दिष्टाः, यदनुविधायिनोपि यूयं शिष्टैर्बहिष्क्रियन्ते । हन्तैवं सति धर्मकीर्तिप्रभृतिभिः परिगृहीतत्वात्सौगतलोकायतिकादिसमय एव किं न स्वीक्रियते । न च वस्तत्परिग्रहेपि मुक्तिः प्रतिबध्यते । सत्यम् , तथापि येनाकारेण यावज्जीवं जीवनाय लोको रञ्जयितुं शक्यः तेन यथायथं वर्ता महे इति चेत् , सत्यमिदमन्तर्गतमुद्गीर्णं भवता, तदेव चार्वाकसमयरहस्यमिति तत्प्रहारेण प्रहृतमिदम् । न हि चार्वाकान् भवन्तोपि गोष्ठीषु व्यक्तमन्तर्भावयन्ति । भजन्तु वा प्रकाशं चार्वाकामिरुयाम् । ननु ब्रह्मविच्छब्दोस्मासु प्रयुज्यमानो दुरपह्नव इति चेत् ? सत्यम् , भ्रान्तिमूलतया निरर्थकोऽयमिति ब्रूमः । दिगम्बरादिष्विदानीमृष्यादिशब्दप्रयोगवत् । तत्त्वविद इति भवता स्वयं स्थानेषु समाहूयामह इति चेत् ? किमतः? तत्त्ववित्त्वमेवेति चेन्न,—तस्य विडम्बनपरत्वात् , भवदधीनकार्यलाभकालप्रतीक्षणाद्वेति ।

नापि पञ्चमः, अधर्मत्वप्रसङ्गात् । यद्यपि स्वाश्रमधर्मानुष्ठानक्लेशादात्मानुसन्धानविच्छेदभयेन सर्वधर्मपरित्याग इति तु यथाहृदयं सत्यं वचः, तथापि श्रुतिस्मृत्यादयः शक्तानां धर्मलोपे प्रकुप्येरन्निति प्रायश्चित्तेन प्रति

सन्धानं वा निरयपतनं वाऽवश्यम्भावीति निश्चीयताम् । अयं हि राजस-स्त्यागः । यथोक्तं " दु खमित्येव यत्कर्म कायक्लेशभयात्त्यजेत् । स कृत्वा राजसत्यागं नैव त्यागफल लभे " दिति ।

षष्ठस्तु हेतुस्तदा शोभते, यद्यशक्तिरनाहार्या परमार्थभूता स्यात् ? नह्यशक्तमधिकृत्य शास्त्राणि प्रवर्तन्ते । न च तत्त्वतोऽशक्ति', अन्येभ्यः शक्तेभ्योऽनुतिष्ठद्भ्यो विशेषादर्शनात् । स्वहृदयविसंवादाच्च । सन्ति च धर्मसाक्षिणोऽन्येपि—" आदित्यचन्द्रावनिलो ऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च । अहश्च रात्रिश्च उभेच सन्ध्ये धर्मश्च जानाति नरस्य वृत्तमि " ति। विधुरत्वादिदशास्वपि सर्वसामान्यधर्मोदेरनुवर्तनीयत्व तच्चलने च प्रायश्चित्तं तदकरणे प्रत्यवायश्चेति ।

नापि सप्तमः, सामान्यनिर्देशमात्रेण तदसिद्धं विशेषतस्तदनिरूप णादिति न कदाचिदपि बुद्धिपूर्वपापानामलेपसम्भव इति ।

ननु भवन्तोऽप्यन्त्यजपर्यन्तान्भगवद्भक्ता इति धावन्तस्समाचार-विप्लवाय जायन्त इति समोयम्, अस्माकं पुनः को विशेष इति चेत् ? मैवम्; किं त्वया मुक्तानां तेषां प्रतिष्ठार्चनादिरूपसम्भावनमुपप्लवकारणतयो पन्यस्तम्, उत जीवतामेवावज्ञादिपरिहारेणान्येभ्य उत्कर्षभावनामिति । न प्रथमः, तेषां भगवदुपासनप्रभावविशेषनिश्शेषिताविद्याकर्मवासनादेहस-म्बन्धादीनामाविर्भूतभगवत्साम्यानां जातिविशेषसम्बन्धाभावेपि भक्तप्रतिष्ठा-र्चनशास्त्रैः पुरुषान्तरव्यावर्तनाय पूर्वाकारमुपलक्षणीकृत्य तत्समाने बिम्बे सन्निधाप्य सभाजनविषयतया प्रतिपादितानां तत्तच्छास्त्रप्रामाण्यानुसारेण तत्तदुचितसभाजनं विधीयमानं कथं पुनरुपप्लवकारणमुन्नीतं भवता । मुक्ता वनन्तगरुडविष्वक्सेनतुल्या " इमा लोकानि " ति श्रुत्या भगव-दनुसञ्चरणादिक कुर्वन्तीति सिद्धम् । नापि द्वितीय', अनेनैव शरीरेण विद्यमानेषूपप्लवपर्यन्तसम्भावनस्य तेष्वभावात् । तथाविधेभ्यो ऽन्येभ्यस्तेषु

भगवद्भक्त्या सञ्जातमतिशयमाद्रियामहे, न पुनर्जात्यादिभेदमेव भवन्त इव स्वरूपतो निह्नवामहे, येनाचारविप्लवस्स्यात् । न च जात्याद्यनुरूपसम्बन्धादिवर्जनाद्भगवद्भक्तेष्वपि तेष्ववज्ञादिप्रसङ्ग इति वाच्यम् ,—तत्कालोचित स्पर्शवर्जनेपि स्त्रीधर्मिण्यामात्मजनन्यामिव मानसिकवाचिकसम्भावनासामर्थ्य वैभवेन पुराणेतिहासभगवद्वाक्यशतनिर्णीतेन शास्त्रानुसारिणामवज्ञाप्रसङ्गाभावात् । उक्तं च भगवता ' मद्भक्तान् शूद्रसामान्याच्चावमन्येत बुद्धिमानि ' ति । यथा—मतङ्गजतुरङ्गमबिहङ्गमगोमृगादिषु पुरोहितामात्यसामन्तान्तःपुरकुञ्जकिरातवामनबधिरादिषुच महीपतिसमाश्रयणमहनीयता गतेषु विशेषादनवमन्तव्येषु तत्तज्जातिगुणानुगुणवैषम्यव्यवस्थितमेवानुपाल्यते तथा भगवत्समाश्रितेष्वपीति न कश्चिद्दोषः । राजाधिराजस्य भगवतो राजवदुपचार इति न्यायात् । आदिभक्तानां अनन्तगरुडादीनामिच्छावतारभेदा इति पुराणप्रसिद्धम् । तेन तेषां प्रतिष्ठार्चनादिकं रामकृष्णादिभगवदवतारादीनामिवेति भक्तप्रतिष्ठाशास्त्रानुसारेण निर्णेतव्यमिति ।

इति शतदूषण्यां अलेपकमतभङ्गो नाम

पञ्चषष्टितमो वादः ॥६५॥

॥ श्रीरस्तु ॥

॥ अथ षट्पष्टितमो वाद ॥

नमोऽस्तु ब्रह्मणे तस्मै बादरायणरूपिणे ।
यस्यैव ब्रह्मसूत्राणा रचना सगुणायते ॥

अद्वैतमतनिष्ठानामनुष्ठानमपाकृतम् ।
ब्रह्मसूत्रार्थवैरूप्य तेषामश्र निरूप्यते ॥

यदाहुः—आपादचूड ब्रह्मसूत्रेषु निर्विशेष ब्रह्मैवार्थ प्रपञ्चमिथ्यात्वं च स्पष्टमुपाद्यते, तथाहि - यद्ब्रह्म जिज्ञास्यतया प्रक्रान्त तदेव हि नाना नास्तीति श्रुतिप्रामाण्यप्रागल्भ्यात्तदनुसारिसूत्रस्वारस्याच्च निर्विशेषमिति निश्चन्वन्ति महान्त. । तत्र बहुषु सूत्रेषु तद्विषयभूतासु श्रुतिषु च एक वचनान्तनिर्देशादात्मैक्यं स्वरसतः प्रतीयते, सचात्मा पुन. " नस्थानतोपि परस्योभयलिङ्ग सर्वत्र हि " त्यादिभिस्सूत्रकलापैर्निर्गुणत्वेन निर्णीत· ; " भेदादिति चेन्न प्रत्येकमतद्वचनात् " "अरूपवदेव हि तत्प्रधानत्वात्" " आह च तन्मात्रमि " त्यादिभिरनेकेष्वधिकरणेषु भेदप्रसङ्गो निराकृत ; ब्रह्मव्यतिरिक्तानाम्पदार्थाना कात्स्न्र्येनानभिव्यक्तस्वरूपत्व " मायामात्र तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वादि " त्यादिभिर्निपुणतरमुपपादितम् , " सम्पद्याविर्भावस्स्वेन शब्दादि " ति मुक्तस्य स्वरूपाविर्भावमुपपाद्य, " अविभागेन दृष्टत्वा " दिति ब्रह्मस्वरूपाविभाग एव फलतया निर्दिष्ट· , इत्थ मापादचूड शारीरकशास्त्रे बहुषु सूत्रेषु निष्प्रपञ्चनिर्विशेषब्रह्मात्मैक्यस्य प्रतिपन्नत्वादुपात्तकतिपयसूत्रव्यतिरिक्तानि सूत्राण्यपि निर्विशेषमेव परं ब्रह्मोपपादयन्तीति नीतिविदा निर्णय , यानि पुनस्सगुणब्रह्मप्रतिपादकानि वाक्यानि, तानि गरुडमात्मान जानीयादित्यादिष्विव तत्तदुपासनार्थकल्पितप्रकार विशिष्टब्रह्मपराणि क्रममुक्तिन्यायेन परम्परया मोक्षविश्रान्तानि , क्वचित्तु

कल्पितेनाकारेण शाखाचन्द्रोपदेशन्यायेन उपलक्षणतया दर्शनेन ब्रह्मस्वरूपोपदेशपराणि, व्यास एवास्माक आदिगुरुरुपनिषदनुसारिभिस्सर्वैरेवास्माभिरनुसर्तव्य., न च प्रमाणविरोधात् ब्रह्मसूत्राणामप्रामाण्यमन्यपरत्व वा, तद्विरुद्धानामेव प्रमाणानामप्रमाणत्वात् ; अन्योन्यतस्तेषामाभिमानिकप्रमाणाना विरोध.च्च , अभिमानप्रतिष्ठित हि तत्तत्सिद्धान्तपरिगृहीताना प्रमाणा ना प्रामाण्यम् , अन्यथा स्वसिद्धान्तविरोधप्रसङ्गात् , ततश्च प्रमाणविरोधे प्यविरोधेपि सूत्रस्वारस्यानुरोधेन बादरायणसिद्धान्तोऽयमिति निश्चिते तिष्ठ वा तत्र हृदयाक्रोशेन, तत्परित्यागेन वा हृदि विन्यस्तहस्तः पक्षान्तराण्यधिशेष्वेति ।

अत्रोच्यते, " अथातो ब्रह्मजिज्ञासे " ति सूत्रमेव तावद्द्वैतिनां न घटते, चिन्मात्रस्य स्वप्रकाशत्वेन ज्ञानाविषयतया जिज्ञास्यत्वायोगात् , आरोपितगुणविग्रहादिविशिष्टस्याविद्यापरिणतिरूपत्वेन सुतरां जिज्ञास्यत्वायोगात् , ब्रह्मशब्दार्थानुपपते. प्रागेव प्रपञ्चितत्वाच्च ।

तथा " जन्माद्यस्य यत " इति सूत्रमपि ब्रह्मस्वरूपलक्षणोपदेशपरम् , लक्षण चासाधारणधर्म., स कथ निर्विशेषे सघटते उपलक्षणत्वेपि सुतरा सविशेषत्वमेव । उपलक्षणाकारोपलक्ष्याकारपूर्वप्रतिपन्नाकारविभागविरहात् निर्विशेषस्योपलक्ष्यत्वमपि न सम्भवतीति प्रागेव प्रपञ्चितम् । सामानाधिकरण्यस्य सविशेषार्थनिष्ठत्वस्य न्यायप्राप्तत्वात् सत्यज्ञानादिवावये स्वरूपलक्षणवर्णनापटाटोपोप्युत्पाटनीय इत्युक्तं प्रागेव ।

शास्त्रयोन्यधिकरणमपि शास्त्रगम्यत्वाभावादेव निरस्तम् , तद्गम्यत्वे वा प्रमाणविषयत्वात् दृश्यत्वमेव पार्ष्णि गृह्णाति । व्यावहारिकशास्त्रगम्यत्वं तु व्यावहारिकानुमानगम्यस्वरूपवदपध्वस्तम् । भनता च प्रमाणप्रमेयखण्डनात् शास्त्रप्रामाण्यमाप पाषण्डवादैस्सपिण्डीकृतमेव । वेदान्तशास्त्रस्यापि तर्कात्मकत्वात्तर्काणा स्वरूपलक्षणादिखण्डनप्राचण्ड्यनेव शरणयता कस्तर्क. किं

वा तदधीनार्थतत्वव्यवस्थापन कथञ्च तत्वावेदकता तत्वमस्यादिवाक्यानामिति परिपश्य। तथाच सर्वशास्त्रकुक्षिभरिमाध्यमिकोक्तिरेव विजयते।

समन्वयसूत्र च समन्वयमेव हेतुत्वेनोपाददाति, अन्वयस्तु भेदस्य प्राणबन्धुरिति सर्वलोकविदितमेतत्।

आनन्दमयाधिकरणे प्राचुर्यार्थमयट्—प्रयोगादानन्दाभ्यासस्य हेतुत्वेनोपादानाच्च भेदवाद एव साम्राज्यमाटीकते।

ईक्षत्यधिकरणेपि तदेवानुविदधाति, ईक्षणादिगुणयोगस्य मुख्यतया भिधानात्।

आकाशप्राणाधिकरणयोरपि ब्रह्मलिङ्गमेव पुरस्क्रियते, लिङ्ग पुनरसाधारणधर्म, निर्विशेषे कि लिङ्ग किञ्च वा साध्यमिति स्वयमेव विचारय।

ज्योतिरधिकरणे चरणाभिधान मरणायते मृषावादस्य, निर्विशेषस्य कश्चरणः का वा दीक्षिरनुत्तमेषु लोकेषु।

इन्द्रप्राणाधिकरणेपि "प्राणस्तथानुगमादि" त्युपक्रमोपसहारादिषड्विधतात्पर्यलिङ्गोपेतमहावाक्यसामर्थ्यादिन्द्रान्तर्यामिणो महापुरुषस्यैव प्रसाधनात्सविशेषपरत्वमेव। वाक्य तावदन्विताभिधानेप्यभिहितान्वयेपि सविशेषपरमेवेति तत्र तत्र क्रियासमभिहारेण साधितम्। वाक्यार्थोपि प्राणेन्द्रादिवैशिष्ट्यात्मकत्वात्सविशेषरूप एवेति निरूपितः।

एव शारीरोपक्रमसूत्राणा सगुणब्रह्मैदम्पर्ये समर्थिते त्रिपाद्यामपि अनेनैव न्यायेनार्थतत्व निर्णेतव्यमधिगुणैरन्तेवासिभि, स्थालीपुलाकन्यायानुसारस्य न्याय्यत्वात्। अविरोधाध्यायसूत्राणा आदिमाध्यायशेषत्वान्न पृथगभिधेय तात्पर्यमवशिष्यते। वैराग्योभयलिङ्गपादयोर्म्संसरतो जीवस्य संसारनिवर्तकस्य च परमात्मनो मिथो वैषम्यमुच्यते, स एव भेदवादः। गुणोपसंहारपादस्य नामैव निर्गुणवादस्य हृदयशूलम्, अङ्गाङ्गिभाववादोपि तस्यैव कर्णज्वर। तेन त्रिभिरध्यायैर्म्सगुणमेव निर्णीयते। फलाध्याये तु फलनिर्देश

एव निर्गुणवादिना निष्फल प्रलापमाविष्करोति, परमात्मसेविनो जीवस्यैव सायुज्यफलसाधनपुण्यपापरूपकर्मश्लेषविनाशो देहादुत्क्रमणमर्चिरादिना देवयानेन गमन पर ज्योतिरुपसम्पद्य स्वेन रूपेण अभिनिष्पत्तिरपुनरावृत्तिश्च इति शारीरकाष्टमाध्याये निर्गुणमशरीरमलक्ष्मिकमपरिवारमविभूतिक चिन्मात्रमिति पारिभाषिक ब्रह्म प्रतिपाद्यताम् ।

यदुक्त जिज्ञास्यतया प्रक्रान्त ब्रह्मैव " नात्माश्रुतेरि " त्यादावपि प्रतिपाद्यत इति । तदसत्, " ज्ञेत एव " " कर्त्ता शास्त्रार्थवत्त्वात् ' " परात्तु तच्छ्रुतेरि " त्यादिभिस्तत्रैवसूत्रैरात्मशब्दनिर्दिष्टस्य तस्य ज्ञातृत्वकर्तृत्वपरमात्मायत्तत्वादिप्रतिपादनात् , तस्य च सर्वस्य त्वदभिमतेऽस्मदभिमते वा ब्रह्मण्यसम्भवात् । भ्रान्त्या सम्भवतीति चेन्न,—परिशुद्धस्वरूपोपदेशदशाया प्रतिपक्षप्रतिक्षेपपूर्वकस्य भ्रान्तिसिद्धाकारसमर्थनस्य विरुद्धत्वात् । अन्यथा " नात्माश्रुते " रित्यधिकरणेपि यथालोकमुत्पत्तिविनाशयोरेव समर्थनप्रसङ्गात् । यदि तत्र लोकसिद्धाकारप्रतिषेध उपचिक्रसित· तदा लोकसिद्ध कर्तृत्वादिकमपि नास्तीत्येवं पदेष्टु युक्तम् । यदि तत्रैव सूत्राणा तत्पर्यमिति मनुषे, तदा प्रारब्ध त्वयैव सूत्रान्यथाकरणम् । अप्रस्तुतमात्मान्तरमिह कथ परीक्ष्यत इति चेन्न. — ' अथातो ब्रह्मजिज्ञासे " त्यत्रैव विषयतया ब्रह्मण इव अधिकारितया मुमुक्षो· प्रकृतत्वात्, तस्य च स्वरूपज्ञानावश्यम्भावित्वेन कृत्स्नस्वरूपस्यावश्यापदेष्टव्यत्वात् । व्यवच्छेद्यतया प्रधानमिव जीवोपि प्रथमाध्याये सर्वत्र प्रकृत । यदि विषयत्वेनाप्रकृतत्वादपरीक्षणीयता, तदा वियत्पाणादेरप्यपरीक्षणप्रसङ्ग ।

" धर्म जिज्ञासमानस्य तत्सम्बन्धिनिरूपणम् ।
यथैव ब्रह्मजिज्ञासेत्युक्त जीवनिरूपणम् ॥ "

किञ्च "असम्भवस्तु मनोनुपपत्तेरि" त्यत्रैव सच्छब्दवाच्यस्य परस्य ब्रह्मण उत्पत्त्यादेर्निरस्तत्वात् " नात्माश्रुते " रिति निरर्थक पुनरारम्भ ।

अतो नात्र जिज्ञास्यतया प्रक्रान्त ब्रह्मात्मशब्दनिर्दिष्टम्, अपि तु जिज्ञासाकर्तृतया प्रस्तुतो जीव ।

यत्पुनरुक्त एकवचनान्तनिर्देशादात्माद्वैतस्वारस्यमिति । " तदपि न " श्रेष्ठश्चे " त्यादिसूत्रेष्विव जात्यैक्यविवक्षया तत्प्रयोगसम्भवात् । तदुक्तमशाधिकरणे " नात्माश्रुतेरित्यत्राप्येकवचन जात्यभिप्रायमि " ति । याश्च तत्सूत्रविषयतया " नित्यो नित्याना चेतनश्चेतनानाम् " त्यादिश्रुतय उपादीयन्ते, तासिरपि सौत्रस्यैकवचनस्य जात्यभिप्रायत्व व्यक्तम् ।

यद्यद्देश्यगतत्वेन बहुत्वमविवक्षितम् ।
य एक इति निर्दिष्टमेकत्व कि विवक्ष्यते ।

अत ए"वाजो नित्य" इत्यादिश्रुत्यन्तरमपि निर्व्यूढम् ।

यत्तूभयलिङ्ग धिकरणे समस्तविशेषशून्यत्वं प्रत्यपादीति। तदप्यसत्, तत्र हेयगुणनिषेधेन समस्तमङ्गलगुणविशिष्टस्यैव प्रतिपिपादयिषितत्वात्, तदाह—" सविशेष ब्रह्मेत्येव हि तत्र वक्ष्यती " ति । वाक्यस्थोभय लिङ्गशब्दानादरेणासन्निहितदोषास्त्यनिषेध्याध्याहारो न युक्त इति चेन्न,—स्ववाक्यस्थस्यापि गुणस्य स्वरूपत एव निषेधानुपपत्ते । न हि गुणो गुणत्वादेव निषेध्य ? वैपरीत्यात् । न च दोषकोटिनिक्षेपेण तन्निषेध, सर्वज्ञत्वादेर्दोषत्वस्य प्रमाणाभावात् । अत पारिशेष्याद्दोष एव निषेध्य इति स्थिते जागरितस्वप्नाद्यवस्थासु जीवस्य ये दोषा पूर्वेष्वधिकरणेषु प्रकृता त एवात्र निषेध्यतया सूत्रकृदभिप्रेता इति स्पष्टमेव ज्ञातु । ततश्च "भेदादिति चेन्न प्रत्येकमतद्वचना " दित्यादिसूत्रेष्वपि नाप्रस्तुतानुपयुक्तत्वदभिमतार्थ सिद्धि । अन्यथा " प्रकृतैतावत्त्व हि प्रतिषेधति ततो ब्रवीति च भूय " इति समनन्तरसूत्रविरोधः । न हि तत्र प्रकृत प्रतिषेध इत्युक्तम्, अपि तु प्रकृतैतावत्वमिति । एतेन निषेधाना सर्वेषा विहितानुरोधेन विषयव्यवस्था कर्तव्येति दर्शयति ।

सामान्यस्य निषेधस्य विहितव्यतिरेकतः ।
निर्वाहस्सुप्रसिद्धश्च निगमेष्ववगम्यते ॥

अत एव सन्ध्याधिकरणेपि " मायामात्रन्त्विं " त्यादिना न प्रपञ्च मिथ्यात्व विवक्षितमिति गम्यते । मायाशब्दस्य च न मिथ्यात्ववाचित्व- मिति स्थलान्तरे विशद द्रष्टव्यम् । आह च—" मायामात्र न्त्विति च स्वाप्नानामप्यर्थाना जागरितावस्थानुभूतपदार्थवैधर्म्यमात्रेण मायामात्रत्वमु- च्यत " इत्यादि । " मेघोदयस्सागरसन्निवेश " इत्यारभ्य " विष्णोर्वि चित्राः प्रभवन्ति माया " इत्यादिषु मायाशब्दस्य विचित्रसृष्टिविशेषपरत्व- मेवेति सुव्यक्तमुपपादितम् । अस्तुवाम्य मिथ्यार्थवाचित्वम्, तथाप्यस्मिन् सूत्रे स्वाप्नार्थानामेव मिथ्यात्वमुच्यते, " सन्ध्ये सृष्टेराह हि " " निर्मा तारं चैकपुत्रादयश्चे "ति पूर्वपक्षसूत्राभ्यां स्वाप्नार्थानामेव प्रकृतत्वस्य भवद्भिरपि व्याख्यातत्वात् । सत्यं स्वप्नार्थमिथ्यात्वमधिकरणसाध्यम्, तत्र कैमुत्यला- भाय जागरितानामपि मिथ्यात्व "कार्त्स्न्येनानभिव्यक्तस्वरूपत्वादि" त्यनेन प्रदर्श्यत इति चेन्न,—विश्वमिथ्यात्वसिद्धौ स्वाप्नार्थसत्यत्वपूर्वपक्षानुत्था- नात् । अथ विश्वमिथ्यात्वमेव स्वाप्नार्थमिथ्यात्वप्रदर्शनद्वारा अत्रैव प्रसा- ध्यत इति मन्यसे तदप्यसत् , प्रपञ्चमिथ्यात्व प्रस्तुत्य स्वाप्नार्थनिदर्शन स्योचितत्वात् । प्रथमसूत्र एव विश्वमिथ्यात्वप्रसाधनमुखेन विश्वस्य ज्ञान- बाध्यतया ज्ञानप्रधान शास्त्रमारम्भणीयमिति भवद्भिस्समर्थनाच्च । अथ वक्ष्यमाणोपजीवनेन शास्त्रारम्भमात्र तत्र समर्थ्यत इति पश्यसि ? तदा नी- तिनिबन्धनात्मकस्य सूत्रस्य व्युत्पाद्यमतिमन्द स्यात् । किञ्च " कार्त्स्न्ये- नानभिव्यक्तस्वरूपत्वादि " त्यत्र न जागरगन्धं पश्यामः । ' कार्त्स्न्य- शब्देन तस्यापि सङ्ग्रह इति चेन्न,-प्रकृतैकदेशाबहिष्कारे तस्य व्युत्पत्तेः, ततश्च स्वाप्नार्थानां सर्वेषामेव मिथ्यात्व विवक्षित स्यात् , अन्यथा स्वाप्नार्थ मिथ्यात्व प्रतिज्ञाय जागरितार्थानामनभिव्यक्तस्वरूपत्व हेतुरुच्यत इति

व्यधिकरण स्यात्। अतः स्वाप्रार्थमिथ्यात्वसाधनाय तन्निष्ठमेवानभिव्यक्त स्वरूपत्वं हेतुनया सूत्र्यत इति नात्रापि विश्वमिथ्यात्वप्रतिपादनकथापि।

यत्पुन मोक्षोपायोपदेशदशाया "आत्मेति तूपगच्छन्ति" इति ब्रह्मात्मैक्यानुसन्धान सूत्रितमिति, तदपि न पश्याम., आत्मशब्दस्य नानार्थ रूढत्वात्, शरीरप्रतिसम्बन्धिनि रूढिप्रकर्षाच्च, ततश्शरीरात्म्यानुसन्धान सूत्रित स्यात्। तु न तत्, ब्रह्मणस्सर्वशरीरित्वेनान्तर्यामिब्राह्मणादिषु प्रपञ्चितत्वात्। यद्यपि स्वपर्यायोऽयमात्मशब्दो भाष्येऽन्वारूढ, तथ प्यन्ततोऽय मेवार्थ. प्रपञ्चयिष्यते। अत्राप्यधिकरणे वक्ष्यति—"इदमेव शरीरात्म भावलक्षण तादात्म्यमात्मेति तूपगच्छन्तीति वक्ष्यती" ति। विपरीतश्चाय व्यपदेश आयुष्मत, अह ब्रह्मास्मीत्यनुसन्धानं ह्यत्र व्याख्यायते, तच्च भ्रान्तिरूपमिति भवतेष्टव्यम्, विलुप्ताहम्भावादिविप्लवसंविन्मात्ररूपत्वाभ्युपगमात् ब्रह्मण, ततश्च मोक्षोपायतया भ्रान्तिरेव सूत्रितेत्यायातम्। शालामालादिन्यायेन विवक्षितपर्यवस्थापन ह्यु सूत्रस्वारस्योपन्यासदशाविरुद्धम्। किञ्च इतिकरणस्वारस्यादत्र दृष्टिविधिसूचनमेव स्वरसम्, तथैव हि श्रुतिरपि "आत्मेत्येवोपासीते" ति, वाक्यं च "आत्मेत्येव तु गृह्णीया" दिति, प्रसिद्धश्चायमर्थ· स्मृतिष्वपि—"ब्रह्माहमिति भावयेदित्ग" दिषु, तन्त्रेषु च "देवोऽहमिति भावये" दिति। अतोऽत्र इतिकरणस्वारस्यात् "मनो ब्रह्मेत्युपासीते" त्यादाविव दृष्टिविधित्वमात्रसिद्धौ उपास्य दृष्टिविशेषणस्य चात्यन्तभेदस्य सार्वत्रिकत्वात् अत्रापि जीवब्रह्मणोर्भेद एवान्ततस्सूत्रित स्यादिति नात्र भवत कश्चिदवकाश।

यत्तु फलदशाया "मविभागेन दृष्टत्वा" दित्यविभागानुभवस्सूत्रित इति, तदपि मन्दम्, अविभागशब्दस्य स्वरूपैक्यनियतत्वाभावात्। विभागो हि परस्परसम्बन्धपरिपन्थिधर्मविशेष इति विदुषा प्रसिद्धि, तेनाविभागोप्यपृथक्सिद्धिरेवेति सिध्यति, न पुनः स्वरूपैक्यम्, तत्र तद्व्यवहारश्चौ

पचारिकः। अस्तु वा मुख्य., तथाप्यनियतत्वादन्यशासिद्ध , वाङ्मन प्रभृति सम्पत्तिवदवन्थाविशेषमात्रविवक्षया " अविभागोवचनादि " त्यसूत्रयत् , अत्र तु यथाप्रमाणमपृथक्सिद्धत्वविवक्षयायमविभागशब्द , अन्यथा प्रमाण विरोधादुपपत्तिविरोधाच्च , प्रयुज्यते च मध्यस्था दण्डो देवदत्ताद्विभक्तः जातिगुणादिक त्वविभक्तामति च । यद्वा विभागो भेद एवास्तु, अविभागश्च भेदनिवृत्ति., तथापि स्वरूपभेदोऽत्र निषिध्यत इत्यत्र न प्रमाण पश्याम , प्रत्युत पूर्वापरसूत्रशतपरामर्शात्—" भोगमात्रसाम्यलिङ्गाच्च " ति उपान्त्य-सूत्रसवादाच्च किञ्चिज्ज्ञत्वसर्वज्ञत्वपरिमितसुखत्वनिरतिशयानन्दत्वादिवैधर्म्य लक्षणभेद एव निषिध्यत इति स्वरसत प्रतीयते, तत्कतुन्यायोपि कुशोदरी नाडनिहितकीटवदादिभरतमृगत्वादिवच्च साम्यापत्त्यैव समञ्जसयितु शक्य.। अन्यथा दृष्टान्त एव तत्र प्रतिदृष्टान्ततामश्नुते ।

तदेव भूयसा न्यायमसन्तमिव कृत्वा त्वदुपन्यस्तानि कतिपयानि सूत्राणि त्वदभिमतप्रतीपानि निदर्शितानि । ततश्चान्यपरानन्यपरविभागोपि विलीन । अत एवान्येषा भूयसा सूत्राणा कल्पिताकारपरत्वमुपलक्षणपरत्वं वा नोत्प्रेक्षितु शक्यम् । अन्यानि तु सूत्राणि सगुण सविभूतिकं च ब्रह्म प्रतिपादयन्तीत्ययमर्थस्त्वयापि दुरपह्नव ।

अर्थवत्त्वेऽपि सूत्राणामन्योन्यार्थविभागतः ।
सगुण ब्रह्म वेद्य स्यान्नचेत्सूत्रकथा मुधा ॥

आहच जन्माद्यधिकरणे—" ये तु निर्विशेष वस्तु जिज्ञास्यमिति वदन्ति तन्मते ' ब्रह्मजिज्ञासा " " जन्माद्यस्य यत " इत्यसङ्गत स्यात्, " निरतिशयबृहद्ब्रह्मण च ब्रह्मे " ति निर्वचनात्, तच्च ब्रह्म जग ज्जन्मादिकारणमिति वचनाच्च , एवमुत्तरेष्वपि सूत्रगणेषु सूत्रोदाहृतश्रुति गणेषु चेक्षणाद्यन्वयदर्शनात् सूत्राणि सूत्रोदाहृता श्रुतयश्च न तत्र प्रमाणमि ' त्यादि । अयमभिप्राय.—प्रथमाध्याये सर्वत्र " ईक्षतेर्नाशब्द " " आन-

न्दमयोभ्यासात् " " अन्तस्तद्धर्मोपदेशा " दित्यादिषु ब्रह्मणस्तद्धर्मविशेषै-र्वैशिष्ट्यं प्रतिपाद्यते, एव जीवादिभ्यो भेदश्च प्रतिपाद्यते, " भेदव्यपदेशा-च्चान्यः " " कर्मकर्तृव्यपदेशाच्च " " उभयेपि हि भेदेनैनमधीयते " " विशेषणभेदव्यपदेशाभ्या च नेतरौ " " भेदव्यपदेशात् " "" आका-शोर्थान्तरत्वादिव्यपदेशात् " " सुषुप्त्युत्क्रान्त्योर्भेदेन " इत्यादिषु सूत्रेषु तत्तच्छ्रुतिगतो भेदनिर्देश एव स्वशब्देन सूत्र्यते। " जीवमुख्यप्राणलि-ङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् " " न च स्मार्तमत-द्धर्माभिलापाच्छारीरश्च " " नानुमानमतच्छब्दात्प्राणभृच्च " " जीवमुख्य प्राणलिङ्गान्नेति चेत्तद्व्याख्यातं " इत्यादिषु प्रधानादिवत् जीवः स्वशब्देनो पादाय व्यवच्छिद्यते, " गुहा प्रविष्ठा वात्मानौ हि तद्दर्शनादि " त्यादिषु स्फुटः ; अतः प्रथमाध्याये सर्वत्र जिज्ञास्यतया प्रक्रान्त ब्रह्मानन्दगुणविशिष्ट प्रकृतेरिव पुरुषादपि विलक्षण च प्रत्यपादि, अयमेवार्थः स्थूणानिखननन्या येन द्वितीयाऽध्याये स्थिरीकृत इति सोपि तद्विषय एवेत्युक्तम्। तत्र च " इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः " इति जीवैक्यव्यपदेशमूलानेक दोषानाशङ्क्य " अधिक तु भेदनिर्देशात् " " अश्मादिवच्च तदनुपपत्ति " रिति सूत्राभ्यां पर्यहार्षीत्। तत्र चाभाष्यत—"ये पुनरस्यैव जीवस्याविद्याविषु क्तावस्थामभिप्रेत्य इमं भेदं वर्णयन्ति, तेषामिद सर्वमसङ्गत स्यात्, न हि तदव-स्थस्य सर्वज्ञत्वं सर्वेश्वरत्वं समस्तकारणत्वं सर्वात्मत्व सर्वनियन्तृत्वमित्यादीनि सन्ति, अनेनैव रूपेणाभिः श्रुतिभिः प्रत्यगात्मनो भेदः प्रतिपाद्यते, तत्सर्वं ह्यविद्यापरिकल्पित त्वन्मते , नचाविद्यापरिकल्पितस्याविद्यावस्थायां शुक्ति कारजतमरीचिकाजलादिभेदवत्परस्परभेदोऽत्र सूत्रकारेणाधिक तु भेदनिर्देशा दित्यादिषु प्रतिपाद्यते, ब्रह्मजिज्ञासा कर्तव्येति जिज्ञास्यतया प्रक्रान्तस्य ब्रह्मणो जगज्जन्मादिकारणस्य वेदान्तवेद्यत्व तस्य च स्मृतिन्यायविरोधपरिहा रश्च क्रियत" इति स्पष्टम्। अतोध्यायद्वय विशिष्टपरमिति स्थितम्। तृती

याध्यायेपि वैराग्यपादे तावत्प्रतिनियतकर्मफलभोक्तृणामनन्तानां कर्मिणां गमनागमनप्रकारचिन्तनादात्मभेदोऽर्थलब्ध. । उभयलिङ्गपादे तु शोध्यं शोधितम् । शिष्टमपि विशिष्टानुगुणमेव । गुणोपसंहारपादस्तु तत्तद्विद्यानियतानियतगुणोपाधिकविद्याभेदाभेदचिन्तनात्कार्त्स्न्येन गुणविशिष्टपर इति स्वरूपतोपि सुप्रसिद्ध न केवल नाममात्रेण । पुरुषार्थपादोपि विद्याया वर्णाश्रमधर्मेतिकर्तव्यताकत्वप्रतिपादनान्निर्विशेषात्माद्वैतवाक्यार्थविज्ञानपक्षप्रतिपक्ष. । तद्वदावृत्तिपादोपि, असकृदावृत्तोपासनादिप्रतिपादनेन फलाकुरस्यैवोपपादनात् । उत्क्रान्तिपादेपि स्थूलदेहादुत्क्रान्तिरूपफलप्रादुर्भावप्रपञ्चनम्, अर्चिरादिपादेपि तथेति सगुणब्रह्मोपासकाना तत्प्राप्त्यर्थमिति भवद्भिरेव व्याख्यातम् । फलपादेपि स्वरूपाविर्भावपूर्वक परब्रह्मसमानस्वच्छन्दभोगप्रपञ्चन व्यक्तमिति न बादरायणस्य क्वचिदपि त्वदभिमतानुपपन्नार्थविवक्षां प्रत्यक्षयामहे । उक्त च भास्कराचार्यैः—

सूत्राभिप्रायसंवृत्या स्वाभिप्रायनिवेशनात् ।
व्याख्यातं यैरिद सूत्र व्याख्येय तन्निवृत्तये ॥ इति ।

तदभिप्रायेण भाष्यकारैरप्युक्तम्—"भगवद्बोधायनकृता विस्तीर्णां ब्रह्मसूत्रवृत्तिं पूर्वाचार्यैस्संक्षिप्तां तन्मतानुसारेण सूत्राक्षराणि व्याख्यास्यन्त" इति ।

यत्पुनरुक्त प्रमाणविरुद्धत्वेन सूत्रार्थानामन्यथाकथनमयुक्तमिति ; तन्नूनमश्रुतम्वसिद्धान्तेनोक्तम्, सूत्राण्यपि यथाकथञ्चिद्योजयितव्यानीति क्वचिद्वृद्धवत्कूटस्थैर्व्याख्यानात् । दृश्यते च जैमिनिपतञ्जलिकणभक्षाक्षपादादिसूत्रेष्वपि ततद्व्याख्यातृभिरध्याहारादिकल्पना । तदाह—" लोके येष्वर्थेषु प्रसिद्धानि यानि पदानि तानि सति सम्भवे तदर्थान्येव सूत्रेष्वपी " ति । अध्याहारादिभि स्वाभिमतार्थपरतया निर्वाहो वेदसवादभूयत्स्ववैदिकपरि

ग्रहविशेषादिभिरासोक्तत्वनिश्चये मन्वादिप्रणीतधर्मशास्त्रादिष्वपि । क्वचित्कवेदविरोधादेर्यथाकथंचिदुपपादयितव्यत्वात् । अत एवाह " सति सम्भव " इति । श्रुतिसूत्रयोरविरोधे सूत्रेष्वध्याहारादिकमन्याय्यम्, विरोधप्रसङ्गे पुनरध्याहारादिभिस्सूत्रं श्रुत्यनुगुणतया नेतव्यम् । नचासौ विभ्रम इति शङ्कितुमपि शक्यम्, सकलवेदशाखाप्रवर्तनाधिकृतत्वात्क्वचिदपि प्रमाणविरुद्धार्थादर्शनात् परिग्रहातिशयाच्च । अतस्तदुक्तेषु सूत्रेषु यत्र क्वचित्प्रमाणविसंवादे यथाकथञ्चित्समाधातव्यम्, नचास्ति विसंवाद इति दर्शितमिति ॥

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्यां परमते सूत्रस्वारस्यभङ्गः

षट्षष्टितमो वादः ॥६६॥

समाप्ता च शतदूषणी ।



